**૧૫. આલોચનાવિધિ પંચાશક :** પોતાના દુષ્કૃત્યોનું સંપૂર્ણપણે ગુરુસમક્ષ પ્રકાશન કરવું તે આલોચના કહેવાય છે. સહસા, અજ્ઞાન, ભય, આપત્તિ, રોગ, પરપ્રેરણા, મોહ અને રાગ દ્વેષથી દુષ્કૃત્યોનું સેવન થાય. પરંતુ પશ્ચાત્તાપથી તથા વિધિપૂર્વક ભાવથી આલોચના કરવાથી પાપોનો નાશ થવાથી ચિત્ત વિશુદ્ધ-નિર્મલ થાય છે. ◆ પક્ખીમાં કે ચોમાસીમાં આલોચના કરવી એવી પૂર્વમુનિઓની આચરણા છે. સંયમમાં યતનાવાળાને પણ વિસ્મરણ અને પ્રમાદથી સૂક્ષ્મ અતિચારો સંભવે છે. તથા સાધુ અને શ્રાવકે પક્ખી વગેરેમાં આલોચના કરવી એવી જિનાજ્ઞા છે. માટે દરેક સાધકે આલોચના કરવી જોઈએ ◆ ગીતાર્થની સમક્ષ દુષ્કૃતનું ભાવથી પ્રકાશન ન કરવું એ ભાવશલ્ય છે. શલ્યસહિત આલોચના કરવાથી જીવ બોધિદુર્લભ બને છે અને અનંતકાળ સંસારમાં ભટકે છે. સશલ્યઆલોચનાના આવા ભયાનક વિપાકોને સાંભળી લજ્જા, ભય, માયા આદિ દોષોનો ત્યાગ કરી શુદ્ધ આલોચના કરવી. જેમ માતા આદિની પાસે બોલતું બાળક કઈ પણ છૂપાવ્યા વિના કાર્ય કે અકાર્યને કહે છે તેમ સાધકે માયા અને મદથી રહિત બની આલોચના કરવી ◆ ગુરુના ઉપદેશ પ્રમાણે પ્રાયશ્ચિત્ત કરવું અને દોષોનું સેવન ન કરવું એ સમ્યગ્ આલોચનાનું લક્ષણ જાણકારો કહે છે ◆ આલોચનાના શુભ પરિણામવાળો સાધુ સમાધિમરણ પામીને ફરી ઉત્કૃષ્ટ આરાધના કરીને ત્રીજે ભવે મોક્ષે જાય છે વધુમાં વધુ આઠ ભવે મોક્ષ પામે છે. આથી, ભવાભિનંદી લોકોની મનોવૃત્તિરૂપ લોકસંજ્ઞાઓનો ત્યાગ કરીને અતિચારોની વિશુદ્ધિ કરવા દ્વારા જિનવચનાનુસારી લોકોત્તમસંજ્ઞામાં પ્રયત્ન કરવો જોઈએ કારણકે મોક્ષપ્રાપ્તિનો આના સિવાય બીજો કોઈ ઉપાય નથી. વગેરે અનેક સ્પષ્ટતા વિસ્તારથી આ પંચાશકમાં કહેલી છે.

**૧૬. પ્રાયશ્ચિત્તવિધિ પંચાશક :** આ પંચાશકમાં પ્રતિક્રમણાદિ દશ પ્રકારના પ્રાયશ્ચિતનું વિસ્તારથી નિરૂપણ કર્યું છે તેનું વર્ણન દ્રવ્યશલ્યના દ્રષ્ટાન્તથી જણાવ્યું છે તે પ્રાયશ્ચિત્તની વિધિ જણાવતા વિશેષમાં જણાવ્યું છે કે- સર્વ પ્રકારના પ્રાયશ્ચિત્તના વિષયમાં પરમાર્થ આ પ્રમાણે છે. અશુભ અધ્યવસાયથી અશુભકર્મનો બંધ થાય છે. અશુભ અધ્યવસાય પણ જિનાજ્ઞાની વિરાધનાથી જ થાય છે. શુભભાવથી અશુભ કર્મનો નાશ થાય છે અને શુભભાવ જિનાજ્ઞાને અનુસરવાથી જ થાય છે. ◆ જે

પ્રકારના અશુભભાવથી અપરાધ થયો હોય તેનાથી અધિક પ્રમાણમાં શુભભાવ થાય, તે અહીં આગમના સિદ્ધાંત મુજબ વિશિષ્ટ શુભભાવ જ યથાર્થ પ્રાયશ્ચિત્ત જાણવો. માત્ર સામાન્ય શુભભાવથી પ્રાયશ્ચિત્ત થતું હોત તો બ્રાહ્મી-સુંદરીને પ્રતિક્રમણ કરવાથી થયેલા માત્ર શુભભાવથી પ્રાયશ્ચિત્ત થઈ ગયું હોત અને એથી કર્મનાશ થવાથી સ્ત્રીઅવતાર પ્રાપ્ત ન થયો હોત. પરંતુ બ્રાહ્મી-સુંદરીને સ્ત્રી ભવ થયો આથી સિદ્ધ થાય છે કે વિશિષ્ટ શુભભાવ જ સાચુ પ્રાયશ્ચિત્ત છે. ◆ વિશિષ્ટ શુભભાવ ઉત્પન્ન કરવાના ત્રણ કારણો (૧) અતિશય ભવભય-મુખ્ય કારણ છે (૨) અપ્રમત્તતા (૩) નાના મોટા અતિચારો સમ્બન્ધી સ્મરણશક્તિ, આ ત્રણેય ગુણોથી આત્મવીર્યોલ્લાસ પ્રગટે છે અને તેનાથી વિશુદ્ધિનો હેતુ વિશિષ્ટ શુભભાવ અવશ્ય થાય. ◆ પ્રાયશ્ચિત્ત રૂપ શુભભાવથી નિકાચિત પણ કર્મોનો સર્વથા ક્ષય થાય છે તે અપૂર્વકરણ અને શ્રેણિની ઉત્પત્તિ દ્વારા પ્રાયશ્ચિત્તરૂપ શુભભાવમાં સંગત બને છે તથા વિશિષ્ટ શુભભાવથી અશુભભાવથી બંધાયેલા કર્મોનો નાશ થાય અથવા કર્મોનો સર્વથા નાશ ન થાય તો તેના અનુબંધનો વિચ્છેદ થાય. શાસ્ત્રમાં ઉપશમશ્રેણિનું ફળ અનુત્તર દેવભવ અને ક્ષપકશ્રેણિનું ફળ મોક્ષ જણાવવામાં આવ્યું છે. સમગ્ર દીક્ષાધર્મનું પાલન પૂર્વભવોમાં કરેલ પાપકર્મોનું પ્રાયશ્ચિત્ત છે. આમ પ્રાયશ્ચિત્ત મહાફલદાયક છે. વગેરે ગંભીરભાવો આ પંચાશકમાં જણાવવામાં આવ્યા છે.

**૧૭. સ્થિતાસ્થિતકલ્પ પંચાશક :** આચેલક્ય વગેરે દશ પ્રકારના કલ્પ-આચારો પહેલા અને છેલ્લા જિનના સાધુને આશ્રયીને સ્થિતકલ્પ કહેવાય છે. મધ્ય બાવીશ જિનના સાધુને આશ્રયીને તે કલ્પ અસ્થિત કલ્પ કહેવાય છે. તેમાં ત્રણ પ્રકારના ઔષધનું દૃષ્ટાન્ત આપ્યું છે અને દશ આચારોનું વર્ણન કરતા અનેક પ્રાસંગિક પદાર્થો જણાવ્યા છે જેમકે- શય્યાતરપિણ્ડ વાપરવામાં લાગતા દોષો (૧) અજ્ઞાતભિક્ષાનું પાલન ન થાય (૨) આધાકર્માદિ દોષો લાગે (૩) લોલુપતા થાય (૪) શરીર વધુ પૌષ્ટિક ભોજનથી પ્રમાદી બને, ભારે કિમતી વસ્ત્રોથી ઉપધિનો ભાર વધે (૫) વસતિ દુર્લભ થાય (૬) વસતિનો વિચ્છેદ થાય માટે શય્યાતર પિણ્ડનો સર્વ તીર્થકરોના શાસનમાં નિષેધ કર્યો છે. ◆ વંદનિક સાધુને વંદન ન કરવામાં નીચેના દોષો થાય. (૧) અહંકાર થાય (૨) અહંકારથી નીચ ગોત્રકર્મ બંધાય (૩) જૈન શાસનમાં વિનયગુણ કહ્યો જ નથી, કારણ કે સાધુઓ પર્યાય પ્રમાણે વંદન કરતા નથી. (૪) આ સાધુઓ અજ્ઞાન છે કારણ કે લોકરૂઢિનું પણ પાલન કરતા નથી, એવી શાસનનિંદા થાય (૫) શાસનનિંદા થવાથી જ અબોધિ એટલે ભવાન્તરમાં જૈનધર્મની

પ્રાપ્તિ જ ન થાય (૬) બોધિલાભ ન થવાથી સંસાર વધે. ◆ માસકલ્પનું પાલન ન કરવામાં પ્રતિબંધ અને લઘુતા થાય તથા જનોપકાર, દેશવિજ્ઞાન અને આજ્ઞારાધના ન થાય એ દોષો લાગે છે. ◆ પૂર્વકાળના સાધુઓની અપેક્ષાએ દુષમકાળના સાધુઓ હીનક્રિયાવાળા અને હીનપરિણામવાળા હોવા છતાં તેમનામાં સાધુપણું છે. સાધુઓ વિના શાસન ન હોય અને શાસન વિના સાધુઓ ન હોય. જ્યાં સુધી છકાયજીવોની રક્ષા થાય ત્યાં સુધી શાસન અને સાધુઓ બંને રહેવાના ◆ સંસારથી ભય પામેલા ગુરુનો વિનય કરનારા, જ્ઞાની, જિતેન્દ્રિય, જિતકષાય અને દેશ-કાલ આદિની અપેક્ષાએ યથાયોગ્ય સંસારનો ક્ષય કરવામાં ઉદ્યત બનેલા છે તે ભાવસાધુ છે. વગેરે આચારમર્યાદા આ પંચાશકમાં વર્ણવી છે.

**૧૮. ભિક્ષુપ્રતિમા પંચાશક :** વિશિષ્ટ પ્રકારના સંઘયણાદિગુણોથી યુક્ત સાધુ જ આ પ્રતિમાનો સ્વીકાર કરી શકે છે. માસિકી વગેરે બાર ભિક્ષુપ્રતિમાઓનુંઅહીં વર્ણન કર્યું છે. તેમજ અવાન્તર પદાર્થો પણ આમાં ઘણા જાણવા મળે છે જેમકે- ગચ્છવાસમાં સાધુને ગુરુપારતન્ત્ર્ય, વિનય, સ્વાધ્યાય, સ્મારણા, વેયાવચ્ચ, ગુણવૃદ્ધિ, ગુણસંપન્ન શિષ્યોની પ્રાપ્તિ અને શિષ્યપરંપરા આટલા લાભો થાય. ◆ દીક્ષા ભવ્યજીવને આપીને ઉપકાર કરવો એ અન્ય ઉપકારોની અપેક્ષાએ પ્રધાન ઉપકાર છે. કારણ કે શ્રુતકેવલી શ્રીભદ્રબાહુસ્વામીએ સંઘયણ, શ્રુત આદિસંપત્તિથી યુક્ત પ્રતિમાકલ્પનો સ્વીકારવાને યોગ્ય સાધુઓને પણ કલ્પનો સ્પષ્ટ નિષેધ કર્યો છે. અર્થાત્ કલ્પસ્વીકારથી દીક્ષાદાન અધિકલાભનું કારણ છે. પ્રથમ ભિક્ષુપ્રતિમા = નવપૂર્વની ત્રીજી વસ્તુ જઘન્યથી શ્રુતજ્ઞાન-ગચ્છ સાથે ક્ષમાપના કરી ગુરુથી અનુજ્ઞા અપાયેલ અનેક પ્રકારે પરિકર્મથી ઘડાયેલા ગચ્છનો ત્યાગ કરી એક મહિનાની મહાપ્રતિમાને સ્વીકારે. જેમાં ભોજન અને પાણીની એક જ દત્તિ હોય. ધાર તૂટ્યા વિના એક વખત પાત્રમાં જેટલું પડે તે એક દત્તિ. અભિગ્રહવાળી ભિક્ષા લે. વાઘ, સિંહ વગેરે આવે તો મરણભયથી એક ડગલું પણ ખસે નહિ, પરંતુ મરણાન્ત ઉપસર્ગને સહન કરે. આવી ઉત્કૃષ્ટ સાધના એક માસ કર્યા પછી પ્રતિમારૂપ મહાન તપ પૂર્ણ કરીને સાધુ અહીં આવ્યા છે એમ રાજા વગેરેને જણાવે. રાજા વગેરે લોક અને શ્રમણસંઘ તે સાધુની પ્રશંસા કરવા પૂર્વક તેને ગચ્છમાં પ્રવેશ કરાવે. ઠાઠમાઠથી નગર પ્રવેશ કરાવવામાં ત્રણ કારણો. (૧) તપનું બહુમાન (૨) અન્ય સાધુઓની શ્રદ્ધાવૃદ્ધિ (૩) શાસન પ્રભાવના અંત અને પ્રાંત અલ્પ ભોજન કરનાર પ્રતિમાધારીને કાયપીડા હોવા છતાં સંયમસ્થાન વૃદ્ધિ પામે છે અથવા ક્લિષ્ટ, ક્લિષ્ટતર અને ક્લિષ્ટતમ એમ વિવિધ પ્રકારના

જ્ઞાનાવરણીયાદિ કર્મોના સંપૂર્ણનાશનો અને અનુબંધના નાશનો ઉપાય પ્રતિમાકલ્પ ઈત્યાદિ વિવિધ અનુષ્ઠાન જ હોય, માટે કાયપીડા સુસંગત છે. = પ્રતિમાસ્વીકારની યોગ્યતાને પામેલા સાધુએ પ્રતિમાઓ સ્વીકારવી જોઈએ. વર્તમાનકાળમાં પૂર્વોનો વિચ્છેદ થયેલ હોવાથી ભિક્ષુપ્રતિમાનો વિચ્છેદ થયો છે ત્યારે જે અભિગ્રહો ગીતાર્થોને બહુમાન્ય હોય અને અદ્ભૂત હોવાના કારણે પ્રશંસાનું કારણ હોવાથી શાસનપ્રભાવનાનું કારણ બને તે અભિગ્રહો ભાવ અને ક્રિયા બંનેથી સ્વીકારવા. જેમકે ઠંડી વગેરે સહન કરવું, પદ્માસને બેસવું, વિવિધ દ્રવ્યાદિ અભિગ્રહો કરવા. છતી શક્તિએ મદ અને પ્રમાદથી અભિગ્રહો ન કરવા તે અતિચાર છે. માટે આ બધા અભિગ્રહોને સ્વશક્તિ અનુસાર જિનાજ્ઞા પ્રમાણે આરાધી જીવો જલ્દી સંસારનો ક્ષય કરે છે. વગેરે આગમિક પદાર્થો આ પંચાશકમાં જાણવા મળે છે.

**૧૯. તપોવિધિ પંચાશક :** શાસ્ત્રમાં અનશનાદિ બાર પ્રકારનો તપ વર્ણવાયેલો છે, અને વિશેષથી તીર્થંકરોના પવિત્ર કલ્યાણકના દિવસોમાં થતો તપ તીર્થંકરનિર્ગમઆદિ તપનું પણ વર્ણન કરેલું છે. આ તપમાં તીર્થંકરની પ્રવ્રજ્યા આદિનું આલંબન અતિશય શુભભાવરૂપ હોવાથી સર્વગુણોનો સાધક છે તથા ધર્મસમ્બન્ધી વિશેષજ્ઞાન વગરના બાળજીવોનું વિશેષ હિત કરે છે. ◆ અન્યદર્શનીઓએ પણ વિષય, સ્વરૂપ અને અનુબંધથી શુદ્ધ અનુષ્ઠાનને મોક્ષનું કારણ કહ્યું છે.

વિષયશુદ્ધ : જે તપમાં વિષય શુદ્ધ હોય તે તપ વિષયશુદ્ધ કહેવાય. ઉદા. તીર્થંકર નિર્ગમન તપનું તીર્થંકરની પ્રવ્રજ્યા પ્રશસ્ત નિમિત્ત છે.

સ્વરૂપશુદ્ધ : જે તપમાં આહારત્યાગ, બ્રહ્મચર્ય, જિનપૂજા, સાધુદાન આદિ પ્રવૃત્તિઓ હોય તે તપ સ્વરૂપશુદ્ધ છે.

અનુબંધશુદ્ધ : જે તપમાં પરિણામનો ભંગ ન થાય પણ સતત વૃદ્ધિ થાય તે તપ અનુબંધશુદ્ધ છે. માટે ભાવશુદ્ધિથી જ્ઞાનાવરણીયાદિ કર્મોનો નાશ થાય તે રીતે તપ (ધર્મ) આરાધવો જોઈએ.

આ પંચાશકમાં ચાન્દ્રાયણ, રોહિણી, સર્વાંગસુંદર આદિ અનેક તપનું વિધાન જાણવા મળે છે અને કયા આશયથી તપ કરવો જોઈએ તેનું પણ વર્ણન અહીં જાણવા મળે છે.

**૨૦ ઉપધાનપ્રતિષ્ઠાવિધિ પંચાશક :** અબુધ જીવોના સંમોહને નષ્ટ કરવા આ પંચાશકમાં નીચેના મુદ્દાઓ વર્ણવાયા છે. નવકાર આદિ સૂત્રોના ઉપધાન કરવા

જોઈએ. મહાનિશીથ સૂત્રમાં ઉપધાન કરવાનું વિધાન કરેલું છે.

શંકા-મહાનિશીથસૂત્ર શું પ્રમાણિક છે ? સમાધાન-નંદીસૂત્રમાં આગમોના નામવર્ણનમાં નિશીથસૂત્રની સાથે જ મહાનિશીથસૂત્રનો નામોલ્લેખ કર્યો હોવાથી તે પ્રમાણિક છે

શંકા-અનેક બાબતોમાં અન્ય શાસ્ત્રો સાથે વિરોધ આવતો હોવાથી મહાનિશીથ સૂત્ર પ્રમાણરૂપ કઈ રીતે ગણાય. સમાધાન-આપણા આગમશાસ્ત્રોનો લૌકિક શાસ્ત્રો સાથે અનેક સ્થળે વિરોધ આવતો હોવાથી તે પ્રમાણરૂપ કઈ રીતે માનશો. વળી, આવશ્યક સૂત્રમાં કહેલ પદાર્થોનો કલ્પભાષ્ય, જ્ઞાતાધર્મકથા, જીવાભિગમસૂત્ર આદિ અનેક શાસ્ત્રો સાથે વિરોધ આવે છે, તો પણ તે આવશ્યકસૂત્રને પ્રમાણરૂપ માનો છો તો મહાનિશીથસૂત્રને પણ પ્રમાણબુદ્ધિથી સ્વીકારવું જોઈએ. નવકાર-લોગસ્સ આદિ સૂત્રોના અલગ અલગ ઉપધાન ન કરવા જોઈએ એવી શંકાનું અહીં યુક્તિપૂર્વક નિરાકરણ કર્યું છે ઉપધાનની આરાધનાનો નિષેધ કરવો તે પ્રબળ મોહ જ છે. આલોકના તુચ્છ ફલને મેળવવા કરાતી મન્ત્રસાધનામાં પણ જો પૂર્વસેવા કરાય છે તો સર્વશ્રેષ્ઠ મોક્ષફળને મેળવવા ઉપધાન સાધનારૂપ પૂર્વસેવા કેમ ન કરાય-અર્થાત્ ઉપધાન સાધના કરવી જ જોઈએ.

નવકારાદિસૂત્રોનું ઉપધાન વિધાન કેવલીભગવંતે રચેલું અને ઉપદેશેલ હોવાથી મહાન પ્રભાવયુક્ત છે. માટે અધિકારી સાધકે અવશ્ય ઉપધાન કરવા જ જોઈએ. ઉપધાનવિધિ વગર પણ મરુદેવી આદિ મોક્ષે ગયા છે, એવું તમે કહેશો તો તપ-દીક્ષા પ્રમુખ સર્વ સાધનામાર્ગનો નિષેધ કરવાની અનિષ્ટ આપત્તિ આવશે. જો તમારો મોક્ષને મેળવવો છે તો અનેક યુક્તિઓથી યુક્ત અનેક મહાપુરુષોએ આચરેલ માર્ગને વિષે કુગ્રહ-કદાગ્રહના ત્યાગપૂર્વક પ્રયત્ન કરો વગેરે આગમિક રહસ્યો આ પંચાશકમાં વર્ણવેલા છે. આ પંચાશકની પચાશમી ગાથામાં કુગ્ગહ વિરહેણ... 'વિરહ' શબ્દના ઉલ્લેખથી આ પંચાશકના રચયિતા પૂજ્યાચાર્ય શ્રીહરિભદ્રસૂરિજી મહારાજ સિદ્ધ થાય છે.

આ પ્રમાણે વીશ પંચાશકના ઉપયોગી પદાર્થોની સંક્ષિપ્ત વિચારણા સાથે પંચાશક પ્રકરણનું વિષયદર્શન અહીં પૂર્ણ થાય છે.

**પ.પૂ.આ.શ્રીબોધિરત્નસૂરીશ્વરજી મહારાજના શિષ્ય**

**મુનિધર્મરત્નવિજય મહારાજ.**

# सङ्केतसूचिः

| संक्षिप्तनाम | ग्रन्थः |
| --- | --- |
| आचा. | आचाराङ्गसूत्रम् |
| आ.प. | आराहणा पडागा |
| यो.दृ. | योगदृष्टिसमुच्चयः |
| चं.वे. | चन्द्रवेध्यप्रकीर्णकम् |
| सुश्रु. | सुश्रुतः |
| विं.विं. | विंशतिर्विंशिका |
| वि.सा. | विचारसारप्रकरणम् |
| पं.व. | पंचवस्तुः |
| उ.प. | उपदेशपदः |
| दश.नि. | दशवैकालिकनिर्युक्तिः |
| आ.नि. | आवश्यकनिर्युक्तिः |
| अ.प्र. | अष्टकप्रकरणम् |
| आचा. | आचारोपदेशः |
| प्र.स्व. | प्रत्याख्यानस्वरूपम् |
| ओ.नि. | ओघनिर्युक्तिः |
| दश. | दशवैकालिकसूत्रम् |
| त.का. | तत्त्वार्थाधिगमसूत्रकारिका |
| तत्त्वा. | तत्त्वार्थाधिगमसूत्रम् |
| त.भा. | तत्त्वार्थाधिगमसूत्रभाष्यः |
| भ.गी. | भगवद्गीता |
| श्रा.दि.वृ. | श्राद्धदिनकृत्यवृत्तिः |
| पा.धा. | पाणिनीधातुपाठः |
| वि.पा. | विपाकसूत्रम् |
| अ.टी. | अभयदेवसूरिटीका |
| जे. | त. ता. १ प्रतिः |
| पा. | पातासंपा ६९-१ प्रतिः |
| पुस्तकः | पंचाशक प्रकरण गुर्जरानुवादः भाग-१-२ |
| | पंचाशक प्रकरण गुर्जरानुवादः अरिहंत आराधक ट्रस्ट |
| पंचा.टीका-ताड. | जि. ता. २११ प्रतिः |
| कोबा-प्रतिः | कैलाससागरसूरि ज्ञानभण्डार-प्रतिः १००४८ |

# श्रीजिनभद्रसूरि ताडपत्रीय ज्ञानभण्डार - जेसलमेर

## नं. जि. ता. २११ - पञ्चाशकप्रकरणलघुवृत्तिः



# पाटण संघवी पाडा ताडपत्रीय ज्ञानभाण्डागार - पाटण

## नं. पातासंपा ६९-१-पञ्चाशकप्रकरणम्



# तपागच्छताडपत्रीयज्ञानभाण्डागार - जेसलमेर
## नं. त.ता.१ - पञ्चाशकप्रकरणम्



याप्रिशुक्लाष्टमूकर्थसंस्त्ववाप्तसर्वमपि दिनमेतिगाथार्थः॥८॥तत्रतीर्थकरनिर्गमतपः प्रतिपादयन्नाह॥निर्गुमा
११/६ इक्कमितिगाथार्थः॥८॥एतदेवाह॥सुमतिर्गा॥सुमतिः पंचमजिनः धर्मनिपाइत्रयत्यण निर्याणः नित्यस्तकेन त्वरा
त्यपवासरूपेण॥ निगाथार्थः॥८॥एतदेव नविविमा॥१२॥समाहा॥ सेषत्वादिकस्याना मयनिर्गमायामस्यरपि
तेनवयाकुमाननवीरः साविकेविनिगाथार्थः॥८॥ एतदेवमनं नरमाहा॥ वर्तनगाया॥ मासंपारमरंचः॥नामा
दैमानमासि त्वाद मार्गशीर्षबहुलदशमी दिनपरैति परममेयाममपीतिान धालिंगलरूपमस्यांस स्वादि
ते कुरसः पारणा समासीत्रोकमात्रा सानिष्ठ॥ शपाणमजिनादीनां परमात्रंपायसम धृतरासनान्नाकह॥
८ ॥ः प्रथममतिरूपनिर्थ कमिनिगाथार्थः॥८॥ तथानिर्गमा॥ तीर्थकराणा

णां॥तीर्थकरोर्निर्गमस्य हृत्वामाद्यकृतेनतप त्रीर्थकरनिर्गमः॥ एवत्तुरन्नेकाराना नत्रकोदशमित्यादि तीर्थकराचनतपमा
नस्तजनतात्रिविदिनापूर्वासनम्रस्य स्थीनिर्गतानां हृदत्वा सासाहिः कांतस्य पोवास मयांद्यादशाजिनाः दिनचतुर्थं निकापवास
थतीर्थकरनिर्गमः करोयाविवय उपनः सामान्यानाम्नगणः सर्वे॥ मनिविधमानवालशक्तिनथाविवक्लामावद्गुन
भत्तादिजिननिर्गमतयस्सायमासाः पूर्णनाः दिनानिवनिमयः नानितमासदिनानि निमुनमासाल निर्थंनरघुकुवने
गमितपासात्ता वसमिति निषारमसदीनायस्थयसारणा काजनमासोनस्यसमपन्तिः पाटिमसारणेसंपनि सस्युक्तः पारणा
दापरुयारासप्ताः दृउपमायस्थ नृतथानयसीः सूदितिगाथार्थः॥ ८॥ एतत्र सोवयसंप्रमनलम्भविकालमाहा॥ संवह्या
॥नारतनिविनिसंस्थानमायस्य तीर्थकरस्य नाराननिसंहितं कुत्तुसर्वैव शारुनवान्नानि तिसमुवत्या चपरमेतत्राणारहा

निर्गताः हृत्वा सासार्व ः स्वसपिद्यायां संपुनानित्तुनसप्ता स्पोवर्त्तमानायया सम्मात्तिपन तत्रस्थमाणं विति दिहानि
स्यपण पाश्वसूत्राया विशतिनामांमल्लिनकानविंशतिनामो दपम नापेवासत्रयस्यपेण शेषास्तु विसप्तिः स्तुनःप्रभु
तीर्थ कम करणे विनादाहरंनिसावनं सुवांधियापारिशुद्धामिनादीपतमणदवा दुर्वाशा परिसुद्धः नथाविशुद्ध तियर्या
तीर्थकरनिर्गमतयमथादिस्सपुरुषामिना निःक्रमसातन यांधीकृतविरमासंव कृत्वा पृथमी दिनपवा सबकार्ये
कामनहृदयमाण मयानृपत्ता तीनां कुशह प्रयणमिगाथार्थः॥८॥ नादेवाह॥ इसतगाथा॥ तृसंतुनास्यास्ते
गाथा॥ सवसारण तिर्थकालक्षरूपतागोनाकनाघन शेषं विनिकेथं दिनीयदिवासयबपाविरसायरूयालं॥
निस्या परलोदितनविविना रूपस्यादिकामणा

श्री जिनभद्रसूरि ताडपत्रीय ज्ञानभण्डार-जेसलमेर

नं. जि.ता. २०८ पञ्चाशकप्रकरण-अभयदेवीयवृत्तिः ।



# पञ्चाशक प्रकरणम्

॥ श्रीशत्रुञ्जयतीर्थमण्डनश्रीआदिनाथाय नमः ॥

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ ऐँ नमः ॥

परमपूज्याचार्यश्रीयशोभद्रसूरिविरचितवृत्तियुतं

याकिनीमहत्तराधर्मसूनुश्रीहरिभद्रसूरिविरचित

# श्रीपञ्चाशकप्रकरणम्

## ॥ प्रथमं श्रावकधर्मविधि-पञ्चाशकम् ॥

### [ टीकाकृन्मङ्गलम् ]

सर्वातिशयसम्पन्नमनादिनिधनं स्फुटम् ।
जैनं जयति रागादि-विच्छेदचतुरं वचः ॥१॥

भूत्यै सरस्वति ! न ईश्वरि ! देवि ! भूयाः,
यस्याः प्रसादवशतो रुचिनिर्मलत्वम् ।

वाचां भवत्यवितथाऽमलिनप्रबन्धम्,
विद्वद्भिरर्चितगुणं गुणवद्भिरग्र्यम् ॥२॥

### [ धर्माधिकारी फलवर्णनं च ]

इह जन्मान्तरोपचितस्वकुलप्रवाहपरिपाकवताम्, विमलप्रज्ञाऽतिशयविशोधिताशयानाम्, निरन्तरं सुखसम्पत्समन्वितानाम्, महात्मनामितरेषां चाऽनर्वाक्पारजाति-जरा-मरणप्रवाहसलिलाऽऽपूर्णभवजलधिमध्यावस्थितानाम्, [रागद्वेषमोहोपनिहता] ध्यवसायानाम्, अनेकशारीर-मानसव्यसनसहस्रोपद्रुतानाम्, सकलकल्याण[परंपरानिर्वतनाक्षमे, चिन्ता]मणिकल्पद्रुमोपमे निरुपमाद्या(मव्या)पारस्वभावैकान्तिकान्त्यन्तिकसुखपरमपदहेताविह-परलोकयोराश्वासनिबन्धने धर्म एवादरो विधातुमर्थ-कामयोग(रा)स्थां विहाय युक्तः, यतः -

*"धर्मादभ्युदयो लोके, तथा निःश्रेयसं च यत् ।*
*अतः कल्याणकामेन, सदा सेव्यः स एव हि ॥१॥[ ]*

इति विद्वज्जनैरुक्तम् ।

## [ ज्ञानमाहात्म्यम् ]

तस्य च सकलनरा-ऽमर-महर्षिपूजनीयस्य, सर्वसत्त्वहितसम्पादननिरतस्वभावस्य सर्वावस्थासुन्दरस्य जगदतिशायिविपच्यमानपुण्यराशेर्भगवतो धर्मतीर्थकरस्येव सुगृहीतनाम्नो महामहिम्नः सन्तानापेक्षाऽव्यवच्छिन्नवृत्तेर्धर्मस्य, मूलमागमिकममलबोधात्मकं सम्यग् ज्ञानम्।

*"यः खलु सम्यग् बोधो हेयोपादेयवस्तुविषयगतः,*
*ज्ञानावरणापरासा( गमा )ज्जीवस्य स उच्यते ज्ञानम् ।[ ]* इति वचनात्।

स चागमो विषय-विषयिभागेन निरूप्यमाणः, प्रज्ञातिशयविशेषसंपन्नैर्गम्भीरोदाराऽऽशयभाग्भिरतीन्द्रियार्थवेदिभिर्भगवदनन्तरस्थानवर्तिभिर्गणधरैस्तच्छिष्यैश्च, त्रिधा व्यवस्थापितोऽर्थज्ञानवचनभेदात्, तत्र (१) अर्थागमः परमार्थसत् जीवाजीवरूपः, सामान्येन सर्वपदार्थव्यक्तिसङ्ग्रहाद्, विशेषतस्तु समयसविवधं (सविधं?) चास्तिकायात्मकः । (२) ज्ञानागमस्तु द्रव्यपर्या[य]योः यः स्वभाव-वस्तुविषयो ज्ञेयपरिच्छेदात्मकतया प्रतिलब्ध(ब्धि) स्वरूपः, समस्तसजातीय-विजातीयव्यावृत्ताऽसाधारणस्वलक्षणाऽभिलाषा(लाप्य) धर्मगोचरः प्रसिद्ध एव। (३) स्व-परसमयवेदिनां वचनं नागमः पुनरतिप्रकृष्ट-पा[रा]यतमतीनां प्रज्ञापनीयानन्तभागवर्त्तिसमानपरिणामपातिवन्नु(दुर्ण) धर्मालम्बनरूपाऽभिलाप्यवस्तुधर्माऽऽलम्बनः, सकलशास्त्रव्यापी, निखिलव्यवहारनिदानम्, हेयोपादेयोपेक्षणीयनिवेदनकारी, सुधियामास्थाहेतुरविप्रतिपत्त्या परिस्फुरन्निव पुरस्तात्, सर्ववेद्य-वेदकस्वरूपाऽमितकौशलाऽव्यभिचारितया स्व-परसिद्धान्तसाध्योपदेशभाक्, परमार्थत एक एव तत्त्वदृशां विसंवादस्यैवाऽनागमहेतुत्वोपपत्तेः शिष्टानुमतमूलागमानुसारिनिष्कलङ्कप्रेक्षावत्प्रज्ञासमालोचितसर्व-सत्त्वहिताऽविरुद्धानुष्ठानगर्भः, विदुषां महोदयानन्दनिबन्धनं सर्वशास्त्रहृदयावबोधप्रसृतिहेतुः, वागीश्वरदेवाधिष्ठितः अष्टचत्वारिंशद्दिव्यसहस्रकोशः प्राभृतपूज्यः, पूज्यपादानां चतुर्दशपूर्वविदादीनामतिप्रतीत एव। तस्य च निखिलाश्चर्यवन्निधानस्यैकदेशार्थोद्धाररूपाशेषाङ्गोपाङ्गप्रकीर्णस्य, अनादिनिधनस्य लवमात्रार्थोपनिबन्धनानि, सर्वाण्येव स्व-परसमयवचांसि मन्यमानः, परममध्यस्थतामवलम्ब्य श्रोतृषु, सदनुष्ठानाऽवन्ध्यकारणमिह-परलोकसुखावहम्, धर्मनिमित्तमाद्यं सम्यग् ज्ञानम्। आत्मचित्त(त्ताभिन्न) विज्ञानसदृशनिश्चयरूपम् । परमकरुणया हितकाम्यया प्रवर्त्तितमतिः [तत्] समुत्पिपादयिषुराचार्यः प्राकृत-प्रकरणप्रबन्धमकार्षीत्, स च धर्मो द्विधा, गृहस्थधर्मः साधुधर्मश्च । तत्र भूयसा व्यवसायस्थानप्रत्यासत्त्या, द्वितीयस्य प्रथमपूर्वकत्वात्, आदौ तमेव कतिचित् प्रकरणेषु अधिचक्रे । पूर्वस्मिन् निष्णातमतिरभ्यस्तनिरवद्यशुभक्रियोऽथोत्तरमपि सुखेनैव ज्ञानानुष्ठानविषयीकरिष्यतीति तदनु द्वितीयम् । एवं व्यवस्थितक्रमो धर्मस्याद्यं प्रतिपिपादयिषयाह,

इष्टविशिष्टदेवतानमस्कारपूर्वकं प्रयोजना-ऽभिधेय-सम्बन्धत्रयप्रदर्शनाय गाथां निजगाद-

**नमिऊण वद्धमाणं, सावगधम्मं समासओ वोच्छं ।**
**सम्मत्ताई भावत्थसंगयं सुत्तनीईए ॥१॥ १/१**

**नत्वा** प्रणम्य, **वर्धमानं** महावीरस्वामिनम्, **श्रावकधर्मं** श्रावको वक्ष्यमाणः, तस्य धर्मः, तम्। **समासतः** सङ्क्षेपेण, **वक्ष्येऽ**भिधास्ये। **सम्यक्त्वादयो भावा** विशेषलक्षणाः, त एवार्थास्तैः **सङ्गतं** युक्तम्। **सूत्रनीत्या**गमनीत्या।

अत्र 'नत्वा वर्धमानम्' इत्यनेन देवतानमस्कार उक्तः, अर्हत्त्वं च गुणतः, देवतात्वं च परमगत्यवाप्त्या। 'समासतो वक्ष्ये' इत्यनेन समासप्रतिपादनम्। 'सूत्रनीत्या' शिष्येभ्यः प्रकरण-प्रयोजनमाह। 'श्रावकधर्मम्' इत्यनेनाऽभिधेयम्। सम्बन्धस्तु प्रकरणप्रयोजनोपायोपेयलक्षणः सामर्थ्यगम्य एव तर्कानुसारिणः, तथाहि - शब्दसन्दर्भरूपं प्रकरणमुपायस्तदर्थप्रतिपादनं तु शिष्यगतमुपेयम्। उक्तं च -

*अस्येदं फलमित्येवं, योगः सम्बन्ध उच्यते।*
*तथाऽप्यन्तर्गतत्वेन न पृथक् कैश्चिदिष्यते॥ १॥[ ] इति*

'श्रावकधर्मं वक्ष्ये' इत्युक्तम्, तत्र कः श्रावकः, यस्यायं धर्मः ? इत्याह -

**परलोगहियं सम्मं, जो जिणवयणं सुणेइ उवउत्तो ।**
**अइतिव्वकम्मविगमा, सुक्कोसो सावगो एत्थ ॥२॥ १/२**

**परलोकाय हितम्** पथ्यम्, **सम्यग**विपरीतम् **यः** पुरुषो [**जिनवचनं**] जिनधर्मः स्वाध्याय-चारित्रलक्षणम्, **शृणोति** [**उपयुक्तः** उपयोगयुक्तः] आकर्णयत्युपादेयबुद्ध्या। **अतितीव्र-कर्मविगमा**दतिक्लिष्टमिथ्यादर्शनमोहनीयकर्माऽपगमात्, [**सः**] **उत्कृष्ट**सम्यग्दृष्टितया **श्रावकोऽत्र** [उच्यते] ॥२॥

किं पुनः सम्यक्त्वं यत्सम्बन्धादसौ श्रावकः ? इत्याह -

**तत्तत्थसद्दहाणं, सम्मत्तमसग्गहो न एयम्मि ।**
**मिच्छत्तखओवसमा, सुस्सूसाई उ हुंति दढं ॥३॥ १/३**

**तत्त्वार्थश्रद्धानं सम्यक्त्वम्, असद्ग्रहो** विपरीतबोधो मिथ्यावबोधो **नैतस्मिन्** सम्यक्त्वे सति **मिथ्यात्वक्षये** [क्षयोपशमे] यस्माद्धेतोः **शुश्रूषादयस्तु** शुश्रूषा-श्रवण-ग्रहण-धारणादयः पुनर्भ**वन्ति दृढ**मित्यर्थः।

'तत्त्वार्थश्रद्धानम्' इत्यनेन सम्यक्त्वरूपमुपात्तम्, 'असद्ग्रहो नैतस्मिन्' इत्यनेन त्वनर्थप्रतिघात उक्तः। 'शुश्रूषादयस्तु भवन्ति' इत्यनेन त्वर्थसंसिद्धिरुक्ता, अनर्थप्रतिघातपूर्वकत्वादर्थसंसिद्धि, एवमुपन्यासः ॥३॥

सम्यक्त्वाऽविनाभावलिङ्गान्याह -

**सुस्सूस धम्मराओ, गुरुदेवाणं जहासमाहीए ।**
**वेयावच्चे नियमो, वयपडिवत्तीए भयणा उ ॥४॥ १/४**

श्रोतुमिच्छा **शुश्रूषा** धर्मशास्त्रविषया। **धर्मरागो** धर्माभिलाषो **गुरु-देवानां** पूज्यनमस्कार्याणाम्। **यथासमाधि** समाध्यनतिक्रमेण, स्वमनःसमाधानानुल्लङ्घनेन। **वैयावृत्त्ये** व्यावृत्तस्य भावे, तत्त्वार्थप्रणामार्चनविषये। **नियमो**ऽभिग्रहोऽवश्यंभावः। सम्यक्त्वे सति **व्रतप्रतिपत्तौ तु भजना** विकल्पना, स्याद् वा न वा व्रतप्रतिपत्तिः ॥४॥

किमिति भजनेत्याह -

**जं सा अहिगयराओ, कम्मखओवसमओ न य [१]तओ वि ।**
**होइ परिणामभेया, लहुं ति तम्हा इहं भयणा ॥५॥ १/५**

**यद्** यस्मात् कारणात्, **सा** व्रतप्रतिपत्तिर्विरतिः **अधिकतराद्** बहुतराद् सम्यक्त्वलाभ-कालापेक्षया **कर्मक्षयोपशमतो** ज्ञानावरणादिकर्मक्षयोपशमाद् भवति। **न च** नैव, **तको**ऽप्यसावपि सम्यक्त्वप्रतिपत्तिहेतुः, कर्मक्षयोपशमो **भवति** जायते। **परिणामभेदा**ज्जीवपरिणतेर्भेदात्, सम्यक्त्वे सत्यपि व्रतपरिणामानुपपत्तेः, **लघ्विति** शीघ्रमेव, **तस्मादिह** व्रतप्रतिपत्तौ **भजना** नियमः। शुश्रुषादिषु तु नियम एवेति ॥५॥ (१. तओ उ-अटी.)

किमिति भजनेत्याह -

**सम्मा पलियपुहत्ते, अवगए कम्माण भावओ हुंति ।**
**वयपभिईणि भवण्णवतरंडतुल्लाणि नियमेण ॥६॥ १/६**

**सम्यक्त्वात्** सम्यक्त्वप्रतिपत्तिकालात्, **पल्योपमपृथक्त्वे** समयप्रसिद्धे ऽपगते, क्षीण**कर्मणां** तद्विध्यातहेतूनां स्वभावस्थित्या कालगमनेन स्थितिक्षयापहारेण वा। **भावतो** भावमाश्रित्यान्तर-परिणामरूपतया [**नियमेन**] **भवन्ति** जायन्ते, **व्रतप्रभृती**न्यणुव्रतगुण[व्रत]शिक्षापदानि, तथाविधदेशचारित्रमोहनीयक्षयोपशमजन्यानि, **भवार्णवतरण्डतुल्यानि** संसारसमुद्रतरणे [नौ]कल्पानि ॥६॥

व्रतप्रभृतीनीत्युक्तं, तान्येवाह-

**पंच उ अणुव्वयाइं, थूलगपाणवहविरमणाईणि ।**
**उत्तरगुणा तु अण्णे, दिसिव्वयाई इमेसिं तु ॥७॥ १/७**

**पञ्च तु** पञ्चैव **अणुव्रतानि** महाव्रतापेक्षया **स्थूलकप्राणिवधविरमणादीनि** स्थूलप्राणातिपातविरत्यादीनि, **उत्तरगुणा** तस्य **चान्येऽपरदिग्व्रतादयः**, आदिशब्दात् शिक्षापदपरिग्रहः। **एषां तु** श्रावकाणामेतानि भवन्ति येषां धर्मो विवक्षितः ॥७॥

प्रथमाणुव्रतमधिकृत्याह-

**थूलगपाणवहस्सा, विरई दुविहो य सो वहो होइ ।**
**संकप्पारंभेहिं, वज्जइ संकप्पओ विहिणा ॥८॥ १/८**

**स्थूलप्राणवधस्य** समयप्रसिद्धस्य **विरतिर्निवृतिः द्विविधश्च** द्विप्रकारश्च **स वधः** प्राणातिपातो **भवति सङ्कल्पा-ऽऽरम्भाभ्याम्** सङ्कल्पः प्राणिव्यापादनाभिसन्धिः, आरम्भ उपतापमर्दोऽसञ्चिन्त्य कृतो, **वर्जयति** परिहरति वध इति गम्यते। **सङ्कल्पतः** सङ्कल्पमाश्रित्य, न त्वारम्भम्, तत्प्रवृत्तत्वात् शास्त्रोक्त**विधानेन**, तं च सङ्कल्पजमत्र योजनीयम् ॥८॥

तं वर्जनीयत्वेन प्रतिपद्य किं करोतीत्याह -

**गुरुमूले सुयधम्मो, संविग्गो इत्तरं व इयरं वा ।**
**वज्जित्तु तओ सम्मं, वज्जेइ इमे य अइयारे ॥९॥ १/९**

**गुरुमूले** गुर्वभ्यासे स **श्रुतधर्मा**ऽवगतधर्मा **संविग्नः** संसारभीतः, **इत्वरं वा** स्वल्पकालं प्रतिनियतचातुर्मासादिरूपम् **इतरं वा** यावज्जीवरूपं **वर्जयित्वा** वधमिति सम्बन्धः । **ततो** विरत्युत्तर**सम्यग्**भावतो **वर्जयति** वर्जनीयांश्चा**ऽतिचारान्** [**इमान्**] वक्ष्यमाणान् ॥१/९॥

तानेव प्रथमाणुव्रतातिचारान् प्रतिषेधद्वारेणोपदर्शयितुमाह -

**[१]बंधवहछविच्छेयं, अइभारं भत्तपाणवोच्छेयं ।**
**कोहाइदूसियमणो, गोमणुयाईण नो कुणई ॥१०॥ १/१०**

बन्धः संयमनं दामरज्वादिभिः, वधः ताडनं लत्ता-लकुटादिभिः, छविः शरीरं तस्य छेदः बन्धश्च वधश्च छविच्छेदश्च **बन्ध-वध-च्छविछेदम्** । **अतिभारमतिभारारोपणम्, भक्तपान-व्यवच्छेदमाहारनिरोधम्**। **क्रोधादिदूषितमनाः** कषायकलुषितचित्तः, **गो-मनुजादीनामादिशब्दाद्**

महिष्यजाकिकादिग्रहः । **न करोति** न विधत्ते, क्रियापदं सर्वत्र योजनीयम् । क्रियायामनुवर्तमानायामपि न करोतीति तात्पर्यम् ॥१०॥ (१. वहबंधं - अटी बंधवहं-जे ।)

उक्तं सातिचारं प्रथमाणुवतम्, द्वितीयमाह -

**थूलमुसावायस्स य, विरई सो पंचहा समासेणं ।**
**कण्णागोभोमालिय, नासहरण कूडसक्खिज्जे ॥११॥ १/११**

**स्थूलमृषावादस्य** चागमप्रसिद्धस्य **विरतिः** । **स** मृषावादः **पञ्चविधः समासेन** सङ्ग्रहेण, स च द्विपद-चतुष्पदा-ऽपदविषय इति मन्यमानस्तदुपलक्षणाय वक्ति । **कन्या**लीकरूपो **गवा**लीक-रूपो **भूम्यलीक**रूपश्च । कन्याग्रहणं सर्वकुमारादिद्विपदविशेषोपलक्षणम्, गोग्रहणं सर्वचतुष्पदभेदोपलक्षणम्, भूमिग्रहणं पृथिव्यप्तेजोवायुवनस्पतिजात्युपलक्षणम्, **न्यासहरणा**लीक-रूपोऽदत्तादानविषयं विहाय वाग्विषयः । **कूटसाक्ष्यम**नृतसाक्ष्यम् लोकप्रसिद्धमेव । एष पञ्चविधो मृषावाद इति ॥११॥ (१. अत्र जातिपदं स्वरूपबोधकम् ।)

अस्यैवाणुव्रतस्य वर्जनीयत्वेनातिचारानाह -

**इह सहसाऽब्भक्खाणं रहसा य सदारमन्तभेयं च ।**
**मोसोवएसयं कूडलेहकरणं च वज्जेइ ॥१२॥ १/१२**

[इह-स्थूलमृषावादविरतौ-अटी.] **सहसा**ऽसमीक्ष्य, **अभ्याख्यान**मनृतदोषोद्भावनम्, चौरस्त्वमित्यादिकम् । **रहसा च** रहस्येनार्थेनाभ्याख्यानम् 'इदमनेन प्रच्छन्नं संवृत्तम्' [इत्यादिकम्] । **स्वदारमन्त्रभेदं च** स्वकलत्रविश्रब्धभाषितान्यकथनं च । **मृषोपदेशनं** विवादे त्वयेदं वक्तव्यम् । **कूटलेखकरणं च** कूटलेखितकरणं च भ्रान्तिजनकं **वर्जयेत्** परिहरेत् ॥१२॥

उक्तं सातिचारं द्वितीयम् । अधुना तृतीयाणुव्रतं विषयभेदेन निरूपयन्नाह -

**थूलादत्तादाणे, विरई तं दुविह मो विनिद्दिट्ठं ।**
**सच्चित्ताचित्तेसुं, लवणहिरण्णाइवत्थुगयं ॥१३॥ १/१३**

**स्थूलाऽदत्ताऽऽदाने** [स्थूलाऽदत्ताऽऽदानम्-अटी.] समयप्रसिद्धे **विरतिः**, तृतीयमदत्तादानम्, **तद् द्विविधम्** । **मो** इति निपातः पूरणार्थः । **विनिर्दिष्टं** कथितम् । **सचित्ता-चित्तयोर्**विषयकृतयोः निदर्शनेनोपदर्शयति-**लवणहिरण्यादिवस्तुगतम्** । [२] लवणं सचित्तम्, हिरण्यमचित्तम्, आदिशब्दात् सचित्तेतरसकलविशेषपरिग्रहः ॥१३॥ (१. उ निद्दिट्ठं-पा. । २. लवणपदमत्र सचित्तमात्रग्राहकम् ।)

तृतीयाणुव्रतातिचारपरिवर्जनायाह -

**वज्जइ इह तेनाहड, तक्करजोगं विरुद्धरज्जं च ।**
**कूडतुलकूडमाणं, तप्पडिरूवं च ववहारं ॥१४॥ १/१४**

**वर्जयतीह** तृतीयव्रते, **स्तेनाहृतं** चौराहृतं, कुङ्कुमादिद्रव्यजातं देशान्तरादानीतम् । प्रच्छन्नं दीयमानं लोकव्यवहारपतितं गृह्णात्यपि **तस्करः** तदेव चौर्यकर्माऽविरतं कुर्वन्ति, नान्यत्कृष्यादिकमिति [तत्+कृ] 'तद्ग्रहणतोः कर-पत्योश्चौर-देवतयोः' इति निपातनात् तेषामिति । **योगः प्रयोगो** व्यापारणमानयत यूयम्, अहं ग्रहीष्यामि इति तम् । **विरुद्धराज्यं च** विरुद्धराज्यातिक्रमं च । **कूटतुला-कूटमानम**सत्योत्कीर्णकण्टकतुला, असत्यधान्य-रसमानं, **तत्प्रतिरूपं च** सत्यसदृशं च **व्यवहारः** घृत-तिल-शाल्यादिषु वसा-महिषीप्रस्रवण-पलञ्जादिप्रक्षेपरूपम् ॥१४॥

उक्तं सातिचारं तृतीयाणुव्रतम् । अधुना चतुर्थमाह -

**परदारस्स य विरई, ओरालविउव्विभेदओ दुविहं ।**
**एयमिह मुणेयव्वं, सदारसंतोस मो एत्थ ॥१५॥ १/१५**

**परदारस्य च विरतिर्व्रतमौदारिक-वैक्रियभेदतो द्विविधमेतत्** परदारमिह **मन्तव्यम्** । **स्वदारसन्तोषश्चात्र** व्रतम् । कश्चित्परदारवर्जनं विधत्ते, कश्चित् स्वदारसन्तोषम् ॥१/१५॥

तयोरतिचारानाह -

**वज्जइ इत्तरिअपरिग्गहियागमणं अणंगकीडं च ।**
**परवीवाहक्करणं, कामे तिव्वाभिलासं च ॥१६॥ १/१६**

**वर्जयति, इत्वरी** गत्वरी, न सदावस्थायिनी, इत्वरं च कियन्तमपि कालं भाटीप्रदानेन सङ्गृहीता इत्वरिका, **अपरिगृहीता** वेश्याकुलाङ्गना वाऽनाथा । इत्वरिका चापरिगृहीता च, तयोर्**गमन**मासेवनम् [इत्वर्थपरिगृहीतागमनम्] । **अनङ्गक्रीडां च** कामशास्त्रोपदेशेन, तथा विक्षेपकरणैः । **परविवाहकरणम्**, कन्याफललिप्सया । **कामे** कामविषयम्, **तीव्राभिलाषं च** रात्रिंदिवं तदध्यवसायरूपम् ॥१६॥

उक्तं सातिचारं चतुर्थाणुव्रतम्, अधुना पञ्चममाह -

**इच्छापरिमाणं खलु, असदारंभविणिवित्तिसंजणगं ।**
**खेत्ताइवत्थुविसयं, [1]वित्तादविरोहओ चित्तं ॥१७॥ १/१७**

**इच्छापरिमाणं** परिगृह्यमानेच्छा, इयत्ताऽवधारणम्, **खलुशब्दो** वाक्यालङ्कारे, **असन्तः** अशोभना अनुचिता, **आरम्भाः** कर्तव्यविशेषा भूतोपघातिनः, तेभ्यो **विनिवृत्तिसञ्जनकं** वित्तादविरोहओ त्ति-विरतिकारणम्। **क्षेत्रादिवस्तुविषयं** परिगृह्यमाणक्षेत्रादिवस्तुगोचरम्, **वित्त-विद्या-पात्रताद्यविरोधेन**, ('चित्तादविरोहओ'त्ति चित्तं-मन आदिर्येषां वित्तदेशवंशादीनां ते तथा। अटी.) **चित्रं** नानाप्रकारम् ॥१७॥ (१. चित्तादविरोहओ - अटी.)

इच्छापरिमाणस्यैव प्रतिषेधमुखेनातिचारानाह -

**खित्ताइहिरण्णाई, धणाइदुपयाइकुप्पमाणकमे ।**
**जोयणपयाणबंधणकारणभावेहि नो कुणइ ॥१८॥ १/१८**

**क्षेत्रं** सेतुः केतुः उभयं च त्रिधा, **आदिशब्दाद्** वास्तुग्रहः, तदपि खातम् (१) उच्छ्रितं (२) खातोच्छ्रितं (३) च त्रिधा। **हिरण्यं** रूप्यं घटितमघटितं वा। **आदिशब्दाद्** सुवर्णग्रहः। **धनं** खण्डगुडादि, तुलासम्मितम् **आदिशब्दाद्धान्यपरिग्रहो**, **द्विपदं** मनुष्य-हंस-मयूर-रथ्यादिः **आदिशब्दाच्चतुष्पदपरिग्रहः** **कुप्यं** उपस्करो, मृण्मय-ताम्र-लोहोपस्करादि, एतेषां द्वन्द्वः। **क्षेत्रादि-हिरण्यादि-धनादि-द्विपदादि-कुप्यानि** तेषां **मानं** प्रमाणम्, तस्य क्रमान्क्रमणान्युल्लङ्घनानि, अतिक्रमा इति यावत तान् करोतीति सम्बन्धः। कैः प्रकारैरित्याह-**योजन-प्रदान-बन्धन-कारण-भावैः [ ५ ]**-तत्र (१) योजनं संयोजनम्, इच्छापरिमाणसमयाभिगृहीतक्षेत्र-वस्तुनामधिकतरक्षेत्रपरिधिसंवर्धनेन, वृति-प्राकारकरणेन, क्षेत्रवास्तुपरिमाणमतिक्रामति। (२) प्रदानमधिकहिरण्यसुवर्णयोः, कुतश्चिन्नृपत्यादेः सम्पन्नयोः, स्वीकृत्येच्छापरिमाणभङ्ग-भयादभिगृहीतकालावधिं प्रतीक्षमाणोऽन्यस्मै ददाति, तेन प्रदानेनातिक्रामति। (३) बन्धनं संयमनं लाञ्छितं मुद्रितकरणम्। धन-धान्ययोरिच्छापरिमाणविषयीकृतयोरधिकतरं परिवारार्थं लभ्यद्रव्यसम्पत्तिहेतोः परकीयस्यान्याप्रदेयत्वेन व्याषेधपूर्वकमवस्थापनम्। तेनातिक्रामतीच्छा-परिमाणम्, वस्तुतस्तयोरपि स्वीकृतत्वात् तत्सामर्थ्योपपत्तेः (४) कारणं कर्तुः प्रयोजकः व्यापारः। स च गोकुलादिषु खण्डादिप्रक्षेपादिः, तं हि कारयन्नभिगृहीतकालावधेः परस्ताच्चतुःपदादेराधिक्यं भविष्यतीति मन्यमानः कारयति, तेन तथाविधकारणेनातिक्रामति लभ्यद्रव्यकारणत्वेन वा परहस्तात् साक्षाच्चतुष्पदादि व्रतभङ्गभयाच्च गृह्णन् द्रव्यनिमित्तं 'ममेदं भविष्यती'ति मन्यमानः परहस्ते व्यवस्थापयति तेनातिक्रामति। (५) भावेन तद्गतव्यवसायरूपेण, मृण्मय-लोहोपस्करादि कुप्यं प्रमाणातिरिक्तमिदानीमग्राह्यं शोभनत्वेन, कालावधेः परस्ताद् ग्रहीतुकामः पराऽप्रदेयत्वेन व्यवस्थापयति, 'मा दूरेऽकार्षीस्त्वमिदमिति, अतिक्रामतीच्छापरिमाणम्। एभिः प्रकारैर्न **करोति** क्रमात् ॥१८॥

उक्तान्यणुव्रतानि, गुणव्रतानां प्रथमं दिग्व्रतमाह –

**उड्ढाहो तिरियदिसिं, चाउम्मासाइकालमाणेणं ।**
**गमणपरिमाणकरणं, गुणव्वयं होइ विण्णेयं ॥१९॥ १/१९**

**ऊर्ध्वाधस्तिर्यग् दिशि** सर्वासु दिक्ष्वित्यर्थः **चातुर्मासादिकालमानेना**भिग्रहविशेषरूपेण, **गमनपरिमाणकरणं** गमनपरिच्छेदव्यवस्थापनम्, **गुणव्रतं भवति विज्ञेयं** दिग्व्रतमित्यर्थः ॥१९॥

अस्यैवातिचारान् वर्जनीयत्वेनाह –

**वज्जइ उड्ढाइक्कममाणयणप्पेसणोभयविसुद्धं ।**
**तह चेव खेत्तवुड्ढिं, कहंचि सइअंतरद्धं च ॥२०॥ १/२०**

**वर्जयत्यूर्ध्वादिक्रमम्**ऊर्ध्वाधस्तिर्यग् व्यतिक्रममित्यर्थः । अनेनैवातिचारत्रयं सङ्गृहीतम्, **नयनं** ग्रामान्तरादेः [स्थितस्य वस्तुनः अटी.] **प्रेषणं** तेष्वेव **उभयम**ेकदा तेष्वेव, **तैर्विशुद्ध**मभिगृहीत-क्षेत्रादेः परस्तादानयनादिवर्जनेन । **तथा चैव क्षेत्रवृद्धिम्** अन्यस्यां दिश्येकयोजनादिप्रक्षेपरूपम्, **कथञ्चित्** प्रमादाद् **स्मृत्यन्तर्धानं** स्मृतेरन्तर्धानं व्यवधानं विस्मृतिः [चशब्दः समुच्चये-अटी.] ॥२०॥

उक्तं प्रथमं गुणव्रतम्, द्वितीयमाह –

**वज्जणमणंतगुंबरिअच्चंगाणं च भोगओ माणं ।**
**कम्मयओ खरकम्माइयाण अवरं इमं भणियं ॥२१॥ १/२१**

वर्जनमनन्तकोदुम्बरिकाऽत्यङ्गानामनन्तकायस्य पञ्चफलोपलक्षणोदुम्बरिकायाः अतिशयवन्ति भोगोपभोगानि तेषाम् । **चशब्दो** भिन्नक्रमः, **भोगतो मानं** च, भोगपरिमाणं चेहात्र द्रष्टव्यः, भोजनमाश्रित्योक्तं भोगपरिमाणम्, **कर्मतः** कर्माश्रित्य **खरकर्मादिकानाम्**[१] (चु)ल्लिकप्रभृतीनामन्येषां च लोहकारादीनां कर्मणां वर्जनम् **अवरमिदं भणितं** द्वितीयगुणव्रतमित्यर्थः ॥२१॥ (१. निस्त्रिंशजनोचितकठोरारम्भाणां कोट्टवालगुप्तिपालकर्मादीनाम्, अटी.)

अस्यैव भोगकर्मविषयस्यातिचारवर्जनमाह –

**सच्चित्तं पडिबद्धं, अपउल दुप्पउल तुच्छभक्खणयं ।**
**वज्जइ कम्मयओ वि [१]हु, एत्थं इंगालकम्माइं ॥२२॥ १/२२**

**सचित्त**मागमप्रसिद्धं फलादिप्रतिबद्धम् । सचित्ताऽस्थिकं **प्रतिबद्धं** परिपक्वम्, अपक्वम् धान्यं चणकादि **'दुपउलं'** [दुष्पक्वम्] तदेवाऽर्धपक्वम्, **तुच्छौ**षध्यो निस्सारास्तेषामपक्वादीनां **भक्षणं**

**वर्जयति**, भोजन [माश्रित्यक्तमि]ति, **कर्मतोऽपि**। 'हुः' शब्दः पूरणे। अणुव्रतेऽङ्गारकर्मादि पञ्चदशभेद-बहुसावद्यकर्मोपलक्षणत्वाच्चान्यदपि, उक्तं द्वितीयगुणव्रतम्॥२२॥ (१. य अटी.)

अधुना तृतीयमाह -

**तहऽणत्थदंडविरई, अण्णं स चउव्विहो अवज्झाणे।**
**पमयायरिए हिंसप्पयाण पावोवएसे य ॥२३॥ १/२३**

**तथाऽनर्थदण्डविरतिः**, **अन्यत्** तृतीयं गुणव्रतम्, **सोऽनर्थदण्डश्चतुर्विधः** - (१) **अपध्यानरूपः** क्लिष्टचिन्तनप्रायः (२) **प्रमादाचरितः** पञ्चविधप्रमादाऽऽसेविता, (३) **हिंसाप्रदानरूपो** हिंसनशीलानि हिंस्राण्युपकरणानि शस्त्रा-ऽग्नि-विषप्रभृतीनि प्राण्युपघातजननानि, तत्प्रदानम्। (४) **पापोपदेशश्च** पापविषय उपदेशः प्रोत्साहनं 'क्षेत्राणि कृष्यताम्, गावो दम्यताम्' इत्यादिरूपः॥२३॥

अस्यैव तृतीयगुणव्रतस्य प्रतिषेध्यत्वेनातिचारानाह -

**कंदप्पं कुक्कुइयं, मोहरियं संजुयाहिगरणं च।**
**उवभोगपरीभोगाइरेगयं चेत्थ वज्जेइ ॥२४॥ १/२४**

**कन्दर्पः** कामः, तद्धेतुचेष्टाविशेषोऽपि कन्दर्पो हास्यादिस्तम्। कुकुचभावः **कौक्रुच्यमनार्य**-चेष्टारूपं घतनादीनामिव। मुखरभावो **मौखर्यमसंबद्धप्रलापितम्**। **संयुताधिकरणं चह** खल-मुसलादिविषयम्। **उपभोगपरिभोगयोरतिरेकं** वाऽधिक्यं **चाधिकरणप्रवर्तकम्**। निरर्थकमेवात्र तृतीयगुणव्रते **वर्जयेत्**॥२४॥

उक्तं गुणव्रतत्रयम्। साम्प्रतं शिक्षापदेषु सामायिकमधिकृत्याह -

**सिक्खावयं तु एत्थं, सामाइय मो तयं तु विण्णेयं।**
**सावज्जेयरजोगाण, वज्जणासेवणारूवं ॥२५॥ १/२५**

**शिक्षाव्रतं त्वत्राभिधीयते। सामायिकं मो** इति निपातः, **तकद्** विज्ञेयम्। तच्च विधिप्रतिषेधस्वरूपमित्याह। **सावद्येतरयोगानां** सपापेतरव्यापाराणाम्, **वर्जनासेवनारूपं** परिहार-प्रवृत्तिरूपम्॥२५॥

अस्यैवातिचारान् परिहार्यत्वेनाह -

**मणवयणकायदुप्पणिहाणं इह जत्तओ विवज्जेइ।**
**सइअकरणयं अणवट्ठियस्स तह करणयं चेव ॥२६॥ १/२६**

**मनो-वचन-कायदुष्प्रणिधानमिह** सामायिके, **यत्नतः** परमादरेण, **विवर्जयति**। दुष्प्रणिधानलक्षणं चेदं फलं च यदा कषायैरुपसृज्यते मनो-वपु-र्ध्वनिर्वा युगपत् क्रमेण वा, तदा स योगः त्रिविधोऽपि पण्डितैस्समासतो दुष्प्रणिधानमुच्यते।

*यथोक्तदोषेष्वनिवृत्तमानसः, कृतापराधोऽपि च नानुतप्यते।*
*सदैव नर्माणि परस्य लिप्सते, मनोमयाद्दुष्प्रणिधानतो नरः ॥१॥ (वं.)*

*यदुच्यमानं व्यसनाय देहिनां, प्रपञ्चवाण्या च कुदृष्टिपुष्टये।*
*अपार्थकं यच्च हि वाङ्मयं मया, तथाविधं दुष्प्रणिधानमुच्यते ॥२॥ (वं.)*

*यदीरणं लोचनपक्ष्मणापि, करोति बालः शयने स्वपन्नपि।*
*तदुच्यते दुष्प्रणिधानमाङ्गिकं, न केवलं वेषवयोविडम्बना ॥३॥ (वं.) [ ]*

**स्मृतेरकरणम्**, स्मृतिमूलं हि सर्वं धर्मानुष्ठानं निःश्रेयसाय, तेन तद् वर्जयति। **अनवस्थितस्य** यदृच्छासम्पाद्यस्य **तथा करणकं** [आसेवनं अटी.] **चैव** [शब्दः समुच्चयात्मकः] ॥२६॥

उक्तं प्रथमं शिक्षापदम्, साम्प्रतं द्वितीयमाह -

**दिसिवयगहियस्स दिसापरिमाणस्सेह पइदिणं जं तु।**
**परिमाणकरणमेयं, अवरं खलु होइ विण्णेयं ॥२७॥ १/२७**

**दिग्व्रतगृहीतस्य दिक्परिमाणस्य** बहुतरस्य **इह** प्रक्रमे, **प्रतिदिनं** प्रतिदिवसं **यत्तु** यत्पुनः **परिमाणकरणं** सङ्क्षेपकरणम् **एतदपरं** द्वितीयम्। **खलुशब्दो** वाक्यालङ्कारे, भवति **विज्ञेयं** शिक्षाव्रतम् ॥२७॥

अस्यैवातिचारान्निवारणीयत्वेनाह -

**वज्जइ इह आणयणप्पओग पेसप्पओगयं चेव।**
**सद्दाणुरूववायं, तह बहिया पोग्गलक्खेवं ॥२८॥ १/२८**

**वर्जयतीह** द्वितीये। **आनयनप्रयोगं** ग्रामादेर्गवाद्यानयनव्यापारम्, **प्रेष्यप्रयोगं चैव** प्रेषणीयः प्रेष्यो भृत्य-कर्मकरादिस्तत्प्रतियुक्तं **च**। **शब्दाणुपातं** शब्दाणुपातमभ्युच्छ्वासितादिरूपम्, परिजनज्ञापनार्थम्। **रूपाणुपातं** स्वकीयरूपसन्दर्शनार्थं कार्यज्ञापनफलम्। **तथा बहि-रभिगृहीतविषयात्**, **पुद्गलक्षेपमु**पलादिप्रक्षेपम् ॥२८॥

उक्तं सातिचारं [द्वितीयं] शिक्षाव्रतम्, साम्प्रतं तृतीयमाह -

**आहारदेहसक्कारबंभऽवावारपोसहो अण्णं।**
**देसे सव्वे य इमं, चरमे सामाइयं नियमा ॥२९॥ १/२९**

**आहार-देह-सत्कार-ब्रह्माऽव्यापारपौषधः** आहारश्च देहसत्कारश्च ब्रह्म च अव्यापारश्च, तेषु पौषधः । पोषं धर्म्मपुष्टिं धत्त इति व्रतविशेष एव यः पर्वस्वनुष्ठीयते । **अन्यद्** तृतीयं शिक्षापदम्, **देशे सर्वस्मिंश्चेदं** वर्तते, देशपोषधरूपं सर्वपोषधरूपं चेत्यर्थः । चरमे उपन्यासक्रमप्रामाण्याद-व्यापारपोषधे, **सामायिकं नियमाद्** [कर्त्तव्यं अटी.] भवति । अन्यथा सामायिकलभ्यगुणाभावः ॥२९॥

अस्यैवातिचारानाह -

**अप्पडिदुप्पडिलेहियऽपमज्जसेज्जाइ वज्जई एत्थ ।**
**सम्मं च अणणुपालणमाहाराईसु सव्वेसु ॥३०॥ १/३०**

**अप्रत्युपेक्षित-दुष्प्रत्युपेक्षिता-ऽप्रमार्जितशय्यादि वर्जयत्यत्र** पोषधे । अप्रत्युपेक्षितशय्या-संस्तारकं दुष्प्रत्युपेक्षितशय्यासंस्तारकमप्रमार्जितशय्या संस्तारकं दुष्प्रमार्जितशय्या संस्तारकं **सम्यक्** भावसारं **च अननुपालनमसंरक्षणम्, आहारादिषु सर्वेषु** पौषधेषु ॥३०॥

उक्तं सातिचारं तृतीयं शिक्षापदम्, अधुना चतुर्थमाह -

**अण्णाईणं सुद्धाण, कप्पणिज्जाण देसकालजुयं ।**
**दाणं जईणमुचियं, गिहीण सिक्खावयं भणियं ॥३१॥ १/३१**

**अन्नादीनामन्नपानप्रभृतीनां शुद्धानां** न्यायागतानां **कल्पनीयानां** यतियोग्यानां **देशकालयुतं** देशकालोपपन्नं **दानं** सम्प्रदानं **यतीनामुचितं** भर्त्तव्यानुरोधेन **गृहिणां शिक्षापदं भणितम्,** चतुर्थमतिथिसंविभागाख्यं पोषधोत्तरकालभावि, यतस्तत्र नियमभावीदं [यद्] दत्त्वा [तदैव] भुङ्क्ते, नान्यथा, अन्यदा त्वनियमो, दत्त्वा वा भुङ्क्ते भुङ्क्त्वा वा ददाति, परिजनं व्यापारयतीति ॥३१॥

अस्यैवातिचारानाह -

**सच्चित्तनिक्खिवणयं वज्जइ सच्चित्तपिहणयं चेव ।**
**कालाइक्कम परववएसं मच्छरिययं चेव ॥३२॥ १/३२**

**सचित्तनिक्षेपणं** देयद्रव्यस्य प्रमादतः सचित्तपृथिव्यादिनिक्षेपं **वर्जयति** परिहरति । **सचित्तपिधानं चैव** सचित्तेन मातुलिङ्गादिना फलेन पिधानं स्थगनमनावृतद्वारस्य सर्पिष्पात्रादेः । **कालातिक्रम**मतिक्रान्तकालप्रदानरूपं साधुपारणोत्तरकालभाविनम् । **परव्यपदेश**मभ्यर्हितवस्तु-विषयपरकीयभणनम्, वस्तुवृत्त्या परकीय एव साधोस्तत्राऽदित्सायामपृष्ट एव तथा प्रतिपादन-मतिचाररूपम् । **मात्सर्यं चैवा**न्यदातृविषयम्, यद्यसौ मत्तः सकाशान्निर्विभवादिरपि ददाति,

किमहं न ददामीत्येवंरूपम् ॥३२॥

उक्तं सातिचारं चतुर्थशिक्षाव्रतम्, अधुना सर्वव्रतेषु परिशुद्धेष्वतिचारा एव न सम्भवन्तीत्याह –

**एत्थं पुण अइयारा, नो परिसुद्धेसु होंति सव्वेसु ।**
**अक्खंडविरतिभावा, वज्जइ सव्वत्थऽओ भणियं ॥३३॥ १/३३**

अत्र प्रक्रमे **पुनरतिचाराः** प्रागुक्ता **नो** नैव, **परिशुद्धेषु** भावशुद्धियुक्तेषु **भवन्ति**, **सर्वेष्वेव** व्रतेषु, **अखण्डविरतिभावात्** सम्पूर्णदेशविरतिसद्भावात्। **वर्जयतीति सर्वत्र** सर्वेष्वेव व्रतेष्वतो **भणितं** प्राक् ॥३३॥

एवं तावद् व्रतस्वरूपं सकलमभिधाय, तद्गतविज्ञेयोपायादि प्रतिपादयिष्यन्नाह –

**सुत्ताउवायरक्खणगहणपयत्तविसया मुणेयव्वा ।**
**कुंभारचक्कभामगडंडाहरणेण धीरेहिं ॥३४॥ १/३४**

**सूत्रादागमाद्**, ज्ञेयानुष्ठानविषयात्, गमेन हि ज्ञाता अर्थाः अनुष्ठीयमानाः पुरुषस्य क्रियाविषया भवन्तीति चागमादेव ज्ञानक्रियारूपेण प्रवर्त्तन्ते । अतस्तेषां प्रवर्तकं सूत्रम् । ते **चात्रोपाय-रक्षणग्रहणप्रयत्नविषया मुणितव्या** विज्ञेयाः । अत्र च यथाप्राधान्येन यदुपन्यासो लाभस्तु पश्चानुपूर्व्या । पूर्वं तावद्विषयो अणुव्रतादीनां विज्ञेयः । क्व विषये, किमणुव्रतं व्यवस्थितमिति । यतोऽन्यत्र भावो विषयार्थो, विषये परिज्ञाते सत्यागमाविरुद्धं मनो-वाक्-चेष्टापरिहारेण ग्रहणयोग्यतासम्पादनाय प्रयत्नम्, प्रयत्नेऽणुव्रतग्रहणात्प्राक्कालभावी जीवगुणविशेषः, ततः प्रयत्नात् सम्पन्नयोग्यत्वस्य विवक्षिताणुव्रतग्रहणम्, तत्करणाभ्युपगमरूपमणुव्रतप्रतिपत्तिरित्यर्थः । ततः प्रतिज्ञाताणुव्रतक्रियस्य तदविरुद्धमार्गसेवनेन रक्षणमनुपालनं प्रतिदिवसाचरितशिष्टक्रियारूपं नमस्कारबोधादि । **उपायस्तु** रक्षणोत्तरकालभावी, लाभोचितदान-भोग-निधि-नैपुण्यादिविशेष-गर्भस्तेषामेवाणुव्रतानां सातत्यपरिपालनहेतुरिह परलोकाविरुद्धः सकलशास्त्रसम्मतो नीतिविशेषः। त एते कथं विज्ञेया इत्याह-**कुम्भकारचक्रभ्रामकदण्डोदाहरणेन** । यथा कुम्भकारचक्रावयवाः-प्रतिक्षणविवर्तिनोऽपरापरदेशस्थाद् भ्रमणहेतुदण्डाद् वेगाख्यसंस्कारात्, अतो निवर्तनक्षमात् प्रवर्तमाना उपलभ्यन्ते, सर्वैरपि लौकिकपरीक्षकैरविप्रतिपत्त्या। तथैतेऽप्युपायादयः सूत्रात्प्रवर्तन्त। एवमनेनोदाहरणेन **धीरैः** विद्वद्भिर्विज्ञेयाः । व्रतपरिणामपालनकाङ्क्षिभिः सर्वथा सूत्र एव यत्नो विधेय इत्यावेदितं भवति ॥३४॥

अत एवाह -

**गहणाउवरि पयत्ता, होइ असन्तो वि विरइपरिणामो ।**
**अकुसलकम्मोदयओ, पडइ अवण्णाइ लिंगमिह ॥३५॥ १/३५**

**ग्रहणादुपरि** अणुव्रतग्रहणोत्तरकालम्, **प्रयत्नात्** क्रियाविशेषमूलादप्रमादात्सूत्रसमुत्थाद् **भवति असन्नपि** प्रागवस्थायां **विरतिपरिणामो** देशविरतिपरिणतिः, **अकुशलकर्मोदयतो** देशचारित्रावरणीयकर्मोदयेन, **पतति** च कस्यचित् स एव परिणामः पूर्वावस्थायां सन्नपि, **अवज्ञादि** अवज्ञानमवज्ञा, आदिशब्दादबहुमानादिपरिग्रहो, अवज्ञा आदिर्यस्य तदवज्ञादि, **लिङ्गं** चिह्न**मिह** देशविरतिपरिणामे प्रस्तुते विज्ञेयमिति ध्येयम् ॥३५॥

तत्प्रतिपादनार्थं चाप्रमादो विधेय इत्याह ग्रन्थकारः -

**तम्हा निच्चसतीए, बहुमाणेणं च अहिगयगुणम्मि ।**
**पडिवक्खदुगंछाए, परिणइआलोयणेणं च ॥३६॥ १/३६**

**तित्थंकरभत्तीए, सुसाहुजणपज्जुवासणाए य ।**
**उत्तरगुणसद्धाए य, एत्थ सया होइ जइयव्वं ॥३७॥ १/३७ जुम्मं**

**तस्मान्नित्यस्मृत्या** अभिगृहीताणुव्रताविस्मरणेन **बहुमानेन च**, सदन्तःकरणरूपेण भावेन **अधिकृतगुणे प्रतिपन्नगुणे प्रतिपक्षा**धिकृतगुणापेक्षया हिंसादयः, तेषाम्, **जुगुप्सा** परिहारो द्रव्यतो भावतश्च स्वयमकरणम्, न तु हिंसादिप्रवृत्तानां निन्दा, परिविवाद[परपरिवाद]प्रसङ्गात्, तस्य च निषिद्धत्वात् कषायपरिकर्मादिषु । यथोक्तम् -

*परपरिवायंमि कए, जइ नाम हवेज्ज कज्जनिप्फत्ती ।*
*ता लोए सच्च-सोएसु आयरो कस्स होज्जाहि ॥[ ]*

**परिणत्यालोचनेन च** परिणतेः जीवाजीवस्वरूपाऽनवस्थितलक्षणायां तथाभावदर्शनेन, आलोचनमवधारणं तेन च ॥३६॥

**तीर्थंकरभक्त्या** जिनपूजाकरणाभिलाषातिरेकरूपया, **सुसाधुजनपर्युपासनया च** सद्गुर्वादिसेवया च, **उत्तरगुणश्रद्धया** उत्तरगुणस्थानश्रद्धया च, **अत्रा**णुव्रतपालने, **सदा भवति यतितव्यम्** ॥३७॥

**एवमसंतो वि इमो, जायइ जाओ य न पडइ कयाई ।**
**ता एत्थं बुद्धिमया, अपमाओ होइ कायव्वो ॥३८॥ १/३८**

**एवं** यतमानस्य, **असन्नप्ययं** प्राग्देशविरतिपरिणामो **जायते** प्रादुर्भवति, **जातश्च न पतति कदाचिन्नैव** प्रतिपतति। **तत्**तस्माद् **अत्र** नित्यस्मृत्यादौ, तदुपाये **बुद्धिमता** प्रेक्षावता **अप्रमादो** यत्नातिशयो **भवति कर्त्तव्यः** करणीय इति ॥३८॥

अणुव्रतादीनामेव यावज्जीवेत्वरविभागप्रतिपादनायाह -

**एत्थ उ सावगधम्मे, पायमणुव्वयगुणव्वयाइं च ।**
**आवकहियाइं सिक्खावयाइं पुण इत्तराइं ति ॥३९॥ १/३९**

**अत्र तु** प्रस्तुते **श्रावकधर्मे** प्रागुक्ते **प्रायो** बाहुल्येन **अणुव्रतानि गुणव्रतानि च यावत्कथिकानि** यावज्जीवकानि। प्रायोग्रहणान्न नियमेन यावज्जीवम्, चातुर्मास्याद्यभिग्रहविशेष-प्रतिपत्तेः। **शिक्षाव्रतानि पुनरित्वराणीति** इत्वरकालान्येव प्रतिदिनकरणीयत्वात् सामायिकादीनाम् ॥३९॥

श्रावकधर्मपर्यन्तवर्तिन्यपि संलेखना कस्मान्नोक्ता ? इत्याह -

**संलेहणा य अंते, न निओगा जेण पव्वयइ कोइ ।**
**तम्हा नो इह भणिया, विहिसेसमिमस्स वोच्छामि ॥४०॥ १/४०**

**संलेखना चान्ते न नियोगात्**, न नियोगेन, **येन प्रव्रजति कश्चित्** श्रावकः सर्वविरतिं गृह्णाति। **तस्मान्नो** नैव, **इहा**धिकारे **भणिता** उक्ता, **विधिशेषं** कर्त्तव्यशेषं व्रतपालनोपायरूपम्, **अस्य** श्रावकस्य **वक्ष्याम्य**भिधास्ये ॥४०॥

**निवसेज्ज तत्थ सड्ढो, साहूणं जत्थ होइ संपाओ ।**
**चेइयघराइं जम्मि उ, तदण्णसाहम्मिया चेव ॥४१॥ १/४१**

**निवसेदावसेत्, तत्र** क्षेत्रे, श्रद्धा अस्यास्तीति **श्राद्धः** श्रावकः। **साधूनां** यतीनां **यत्र भवति सम्पातः** समागमः **चैत्यगृहाणि** च शान्ताऽयतनानि च **यस्मिंस्तदन्यसाधर्मिका-श्चैवा**परसमानधार्मिकाश्चैव यत्र सन्ति ॥४१॥

अधुनाऽस्यैव रात्रिंदिवानुष्ठाने च वक्तुमाह [गाथाष्टकेन] -

**नवकारेण विबोहो, अणुसरणं सावओ वयाइं मे ।**
**जोगो चिइवंदणमो, पच्चक्खाणं च विहिपुव्वं ॥४२॥ १/४२**

शरीरस्थितिहेतुस्वापानन्तरं **नमस्कारेण** पञ्चमङ्गललक्षणेन, **विबोधः** प्रबोध **अनुस्मरणम**-मुकशिष्योऽहममुककुलश्च, **श्रावको, व्रतानि मे** सन्ति सर्वगृहीतानि, तेषां न काचित् क्षति-

रित्यनुस्मरणम् । **योगः** शरीरस्थितिहेतुर्व्यापारः प्रश्रवणादिविषयः, तदनन्तरं **चैत्यवन्दनं** स्वगृह एव, **मो** इति निपातः । **प्रत्याख्यानं च** चैत्यवन्दनानन्तरम्, यावच्छक्तिनमस्कारसहितपौरुष्यादि **विधिपूर्व**मागमोक्तविधानपुरःसरम् ॥४२॥

**तह चेईहरगमणं, सक्कारो वंदणं गुरुसगासे ।**
**पच्चक्खाणं सवणं, जइपुच्छा उचियकरणिज्जं ॥४३॥ १/४३**

**तथा चैत्यगृहगमनं** सम्भवतः, **सत्कारश्च** चैत्यानां पुष्पगन्धमाल्यादिभिः, **वन्दनं** तेषामेव, **गुरुसकाशे** गुरुसमीपे **प्रत्याख्यानं** तदेव पूर्वगृहीतं-सविशेषं वा, **श्रवणं** गुरुसकाश एवागमश्रवणम्, **यतिपृच्छा** साधुविषयकर्त्तव्यपृच्छा, 'किं कस्य ग्लानादेः कर्त्तव्यम्' ? इति, **उचितकरणीयम्,** यदुचितं करणीयमवश्यकर्त्तव्यं तद्विधेयमिति शेषः ॥४३॥

तदनन्तरम् -

**अविरुद्धो ववहारो, काले तह भोयणं च संवरणं ।**
**चेइहरागमसवणं, सक्कारो वंदणाई य ॥४४॥ १/४४**

**अविरुद्धो** लोकधर्माविरुद्धः, **व्यवहारः** क्रियारूपो **काले** देश-काले, **तथा भोजनं च** विधेयम्, **संवरणं** प्रत्याख्यानम्, शरीरस्थित्यविरोधेन, **चैत्यगृहागमः** शेषव्यापाराभावे चैत्यगृह एवागमनम्, **श्रवणं** पुनरप्यागमविषयम्, **सत्कारश्चै**त्यानामुचितवेलायां **वन्दनादि** च कर्त्तव्यम्, आदिशब्दात् कुशलप्रणिधान-प्रणामपरिग्रहः ॥४४॥

**जइविस्सामणमुचिओ, जोगो नवकारचिंतणाईओ ।**
**गिहगमणं विहिसुवणं, सरणं गुरुदेवयाईणं ॥४५॥ १/४५**

**यतीनां** साधूनां **विश्रामणं** परिश्रान्तानां विश्रान्तिसंपादनं विधेयम्, **उचितो योगः** समुचितो धर्मव्यापारो, **नमस्कारचिन्तनादिकः**, आदिशब्दात् स्वाध्याय-ध्यानपरिग्रहः स च कर्त्तव्यः, पुनरपि चैत्यगृहात् [१]**स्वगृहगमनं** कर्त्तव्यम्, **विधिस्वप्नं** पञ्चनमस्कारपाठः सर्वजीवक्षान्तिपुरःसरः, **स्मरणं** मनसिकरणं **गुरुदेवतादीनां** धर्मगुरुवीतरागादीनाम्, विशेषतः स्वापकाले, आदिशब्दात् सम्यग्दृष्टिभद्रिकचतुर्निकायगतदेवपरिग्रहः ॥४५॥

**अब्बंभे पुण विरई, मोहदुगंछा सतत्तचिन्ता य ।**
**इत्थीकडेवराणं, तव्विरएसुं च बहुमाणो ॥४६॥ १/४६**

---

१. गिहगमणं—स्वगृहगमनमेतच्च स्वयोगसिद्धत्वेनापार्थकत्वान्निजपरिवारस्य धर्मदेशनाकरणमिति ज्ञापयति (श्राद्धदिनकृत्य गाथा-३ देवेन्द्रसूरिवृत्तिः)

**अब्रह्मण्य**ब्रह्मचर्ये, स्त्रीपरिभोगस्वभावे **पुनर्विरति**र्निवृत्तिर्विधेया भावक्रियाभ्याम्, **मोह-जुगुप्सा** मोहविषया निन्दा, 'दुरन्तोऽयं मोह' इति भावना, यथाशक्ति मोहभेदपरिहारश्च, **स्वतत्त्वचिन्ता च** स्वरूपचिन्ता च, **स्त्रीकलेवराणा** कल-मल-मांस-शोणित-पुरीषादिपूर्णतारूपा विधेया। **तद्विरतेषु** च स्त्रीकलेवरविरतेषु भावतः साधुषु, **बहुमान** आन्तरप्रीतिरूपो विधेयः ॥४६॥

**सुत्तविउद्धस्स पुणो, सुहुमपयत्थेसु चित्तविण्णासो ।**
**भवठिइनिरूवणे वा, अहिगरणोवसमचित्ते वा ॥४७॥ १/४७**

**सुप्तविबुद्धस्य** रात्रौ पूर्वं सुप्तः पश्चाद्विबुद्धस्तस्य, पुनरनन्तरनिद्रापगमे **सूक्ष्मपदार्थेषु** बन्धमोक्षादिषु स्वपरसमयप्रसिद्धेषु, सूक्ष्मेक्षिकया प्रेक्षावन्निरुपितेषु **चित्तविन्यासो** मनोऽवस्थापनम्, **भवस्थितिनिरूपणे** वा, जन्म-जरा-मरणप्रबन्धलक्षण-संसारस्थितिनिरूपणे वा, चित्तविन्यासो विधेय इति सर्वत्र सम्बन्धनीयम्। अधिक्रियते नरकादिष्वनेनेति **अधिकरणं** भूतोपघातस्थानं, **तदुपशमे** तत्परिहारे **चित्त**मभिप्रायस्तस्मिन्, कलहोपशमाभिप्राये वा चित्तविन्यासः ॥४७॥

**आउयपरिहाणीए, असमंजसचेट्ठियाण व विवागे ।**
**खणलाभदीवणाए, धम्मगुणेसुं च विविहेसुं ॥४८॥ १/४८**

**बाहगदोसविवक्खे, धम्मायरिए य उज्जयविहारे ।**
**एमाइचित्तणासो, संवेगरसायणं देइ ॥४९॥ १/४९ जुम्मं**

**आयुःपरिहाण्यामायुषः** प्रतिसमयं परिहाणिर्भवतीत्येवं भावनीयम्, **असमञ्जसानि** लोकधर्मविरुद्धानि **चेष्टितानि** मनो-वाक्-कायव्यापाररूपाणि, तेषां **च विपाके** यथा-समञ्जसचेष्टितानां स्वयमेव जीवेन फलविपाकोऽनुभवनीयः, **क्षणे** क्षणे यो **लाभः** शुभाध्यवसायरूपः, सम्यग्ज्ञानादिप्रवृत्तिहेतुः तस्य **दीपनायां** प्रकाशनायामात्मनश्चित्तविन्यासः, **धर्मगुणेषु च** स्वाध्यायध्यानाऽहिंसादिष्वागमप्रसिद्धेषु **विविधेष** विधिप्रतिषेधरूपतया व्यवस्थितेषु ॥४८॥

यैर्यैर्दोषैरर्थकामस्नेहरागादिभिः, स धर्माधिकारी पुरुषो बाध्यते **बाधकदोषाः तद्विपक्षे**, तत्प्रतिपक्षभावनारूपे यथोक्तम् -

*अत्थंमि रागभावे, तस्सेव उवज्जणाइ संकेसं ।*
*भावेज्ज धम्महेउं, अभावमो तह य तस्सेव ॥१॥ [ पंचवत्थुगं गाथा-८११ ]*

धर्मोपदेशहेतुस्तत्प्रथमतया बोधिलाभकरः धर्माचार्य यथोक्तमागमे *'धम्मो जेणुवइट्ठो सो*

*तस्स गुरु गिहि व समणो वा'* तस्मिन्, **धर्माचार्ये च** विषयभूते सकलकल्याणहेतुः ममायमित्येवंभूतश्चित्तविन्यासः। **उद्यता**नामुद्यतो वा प्रयत्नवान् साधूनां **विहारो** धर्मचेष्टारूपस्तस्मिन्, यथा 'मया प्रव्रज्यां गृहीत्वा अप्रमत्ततया विहर्तव्यम्' इत्येवंभूते, एषां सप्तमीनिर्दिष्टानां बहुत्वं पश्चात् चित्तन्यासस्य च फलमुपदर्शयन्निदमाह-**एवमादिचित्तविन्यास** एवमादिषु भावनीयेष्वर्थेषु चित्तन्यासश्चित्तनिक्षेपो विधीयमानः **संवेगरसायनं** संवेग एव रसायनमौषध-विशेषस्तद्**ददाति,** यथा रसायनमुपजीव्यमानं वयोदार्ढ्यहेतुर्भवति एवं संवेगोऽपि धर्मस्थैर्यादि-हेतुरिति, तेनोपमीयते ॥४९॥

एवं नमस्कारपाठात् प्रबोधं यावद्विधिमभिधाय तमेवावर्तमानमतिदिशन्नाह -

**गोसे भणिओ य विही, इय अणवरयं तु चेट्ठमाणस्स ।**
**भवविरहबीयभूओ, जायइ चारित्तपरिणामो ॥५०॥ १/५०**

**गोसे** प्रभाते, **भणितश्च विधिः स एव** द्रष्टव्य **इत्येवमनवरतं तु** सततम्, **चेष्टमानस्य** व्याप्रियमाणस्य, **भवविरहबीजभूतः** संसारविरहकारणं **जायते चारित्रपरिणामः** तथाविध-क्षयोपशमसम्भव इति ॥१/५०॥

**॥ प्रथमंश्रावकधर्मविधि-पञ्चाशकं सम्पूर्णम् ॥**

# ॥ द्वितीयं दीक्षाविधि-पञ्चाशकम् ॥

एवं श्रावकधर्मविधिमभिधायाधुना सिंहावलोकितन्यायेन प्राक्कालभावि सकृद्बन्धका-ऽपुनर्बन्धकगतं दीक्षाविधिमधिकृत्याह -

**नमिऊण महावीरं, जिणदिक्खाए विहिं पवक्खामि ।**
**वयणाउ निउणनयजुयं, भव्वहियट्ठाय लेसेण ॥५१॥ २/१**

**नत्वा** नमस्कृत्य महावीर्यविराजनात् **महावीरस्तम्, जिनदीक्षायाः** प्रस्तुतायाः **विधिं प्रवक्ष्याम्युपायमभिधास्ये, वचनादागमात्, निपुणनययुतं** सूक्ष्मनीतिसमन्वितम् । **भव्यहितार्थं** तथाविधभव्यसत्त्वोपकाराय, **लेशेन** सङ्क्षेपेण ॥१॥

दीक्षास्वरूपमाह -

**दिक्खा मुंडणमेत्थं, तं पुण चित्तस्स होइ विण्णेयं ।**
**न हि [१]अप्पसंतचित्तो, धम्मऽहिगारी जओ होइ ॥५२॥ २/२**

**दीक्षा मुण्डनमत्र,** 'दीक्षा, मौण्ड्य-इज्या-उपनयन-नियम-व्रतादेशेषु- [पा.धा० ६०९] इति धातुपाठात् तत्पुनर्मुण्डनं **चित्तस्य भवति विज्ञेयम्**उत्कटक्रोधादिकषायलवनरूपत्वात् **न ह्यप्रशान्तचित्तः** क्रोधादिदूषितचित्तः, **धर्माधिकारी यतो भवति । 'अप्पसत्तचित्तो'** स्वल्पसत्त्वचित्त इति पाठान्तरं वा । *आपत्स्ववैक्लव्यकरमध्यवसानकरं सत्त्वं* शास्त्रज्ञैरुक्तं तदल्पम्, यस्मिंश्चित्ते तदल्पसत्त्वं चित्तमस्येति सोऽयमल्पसत्त्वचित्तः । शेषं तदेव ॥२॥ (१. अप्पसत्तचित्तो. अटो. जे.)

किमित्यप्रशान्तचित्तोऽल्पसत्त्वचित्तो वा धर्माधिकारी न भवति । यतोऽस्या दीक्षाया असम्भव इत्याह-

**चरमम्मि चेव भणिया, एसा खलु पुग्गलाण परियट्टे ।**
**सुद्धसहावस्स तहा-विसुज्झमाणस्स जीवस्स ॥५३ ॥ २/३**

**चरम एव** सर्वान्त्य एव, **भणिता** प्रतिपादिता, **एषा खलु** दीक्षा **पुद्गलानां परिवर्ते** समयप्रसिद्धे, **शुद्धस्वभावस्य** निर्मलस्वकीयभावस्य **तथाविशुध्यमानस्य** तत्कालोचित चित्तविशुद्धिमनुभवतः सतः, **जीवस्यात्मनः,** तेनासावेव क्षीणप्रायकर्ममलो धर्माधिकारी दीक्षायोग्यः ॥३॥

कस्य च दीक्षाधिकारित्वमित्याह -

**दिक्खाएँ चेव रागो, लोगविरुद्धाण चेव चागो त्ति ।**
**सुंदरगुरुजोगो वि य, जस्स तओ एत्थ उचिओ त्ति ॥५४॥ २/४**

**दीक्षायामेव** प्रस्तुतायां **रागो**ऽनुरागो वक्ष्यमाणः, **लोकविरुद्धानां चैव** वक्ष्यमाणानां **त्यागः**, **इति** परिहाररूपः **सुन्दरः** सम्यग् ज्ञान-सदनुष्ठानसम्पन्नः स चासौ **गुरुश्च** तेन **योग** उचितसम्बन्धो **यस्या**धिकृतजीवस्यास्ति, तकोऽसौ **अत्र** दीक्षायाम् **उचितो** योग्य **इति** ॥४॥

[गाथात्रिकेण] दीक्षारागमेवाह -

**पयईए सोऊण व, दट्ठूण व केइ दिक्खिए जीवे ।**
**मग्गं समायरन्ते, धम्मियजणबहुमए निच्चं ॥५५॥ २/५**

**एईए चेव सद्धा जायइ पावेज्ज कहमहं एयं ? ।**
**भवजलहिमहानावं निरवेक्खा साणुबंधा य ॥५६॥ २/६**

**विग्घाणं चाभावो, भावे वि य चित्तथेज्जमच्चत्थं ।**
**एयं दिक्खारागो, निद्दिट्ठं समयकेऊहिं ॥५७॥ २/७ तिगं ।**

**प्रकृत्या** स्वभावेन, **श्रुत्वा वा** दीक्षागुणान्, **दृष्ट्वा वा कांश्चित् दीक्षितान् जीवान् मार्गं समाचरतः** सतः, धर्मं चरन्तीति **धार्मिका**स्ते च ते **जना**श्च तेषां **बहुमतान्** सम्मतान्**नित्यं** सर्वकालम् ॥५॥

**एतस्यामेव** प्रस्तुतदीक्षायाम्, **श्रद्धा** रुचिः **जायते** प्रादुर्भवति। **प्राप्नुयां** लभेयं **कथमहमेतां** दीक्षां, कीदृशीं ? **भवजलधिमहानावं** संसारसमुद्रमहाद्रोणीम्, तत्तरणाव्यभिचारिणीम् । सा च श्रद्धा **निरपेक्षा** सांसारिकफलनिरपेक्षतया, **सानुबन्धा** **च**ागामिककालभाविसन्ताना चाव्यवच्छिन्नेत्यर्थः ॥६॥

**विघ्नानां** **चो**पद्रवाणां च **अभावो**ऽदृष्टसामर्थ्याद्, **भावेऽपि च** सद्भावेऽपि च, विघ्नानां कथञ्चिन्निरुपक्रमक्लिष्टकर्मोदयात् **चित्तस्थैर्यमत्यर्थं** चित्तदार्ढ्यमतीव। **एतत्** पूर्वोक्तम्, **दीक्षारागो निर्दिष्टं** कथितम् [तः] । **समयकेतुभिः** समयज्ञैः ॥७॥

[गाथात्रयेण] लोकविरुद्धप्रतिपिपादयिषयाऽऽह -

**सव्वस्स चेव निंदा, विसेसओ तह य गुणसमिद्धाणं ।**
**उजुधम्मकरणहसणं, रीढा जणपूयणिज्जाणं ॥५८॥ २/८**

**बहुजणविरुद्धसंगो, देसादायारलंघणं चेव ।**
**उव्वणभोगो य तहा, दाणादि वि पगडमण्णे तु ॥५९॥ २/९**

**साहुवसणम्मि तोसो, सति सामत्थम्मि अपडियारो य ।**
**एमाइयाणि एत्थं, लोगविरुद्धाणि णेयाणि ॥६०॥ २/१० तिगं ।**

**सर्वस्य चैव** प्राणिमात्रस्य, **निन्दा** जुगुप्सा, **विशेषतो** विशेषेण । **तथा च गुणसमृद्धानां** बहुगुणानां **ऋजूनां** स्वस्थाशयानां **धर्मकरणं** धर्मक्रिया सामान्येन तस्यां **हसन** परिभवबुद्ध्या, **रीढा** अवज्ञा, **जनपूजनीयाना** मातापितृ[मातृपितृ]प्रभृतीनाम् ॥८॥

**बहुभिजनैर्लोकैर्ये विरुद्धा** विरोधभाजस्तैः सह **सङ्गः** सम्पर्कः, **देशाद्याचारलङ्घनम्, चैव** आदिशब्दात् कुलग्रामाद्याचारपरिग्रहः, **उल्बणभोगश्च तथा** देशकालविभववयोऽवस्थाद्य-नुचितो **दानाद्यपि, प्रकटमन्ये तु** तथाविधशिष्टलोकाऽसम्मतम् ॥९॥

**साधूनां** शिष्टानाम्, **व्यसने तोषः** परितोषः **सति सामर्थ्ये** व्यसनापहाररूपे, **अप्रतीकार-**श्चानुद्यमश्च व्यसनविघातशैथिल्यमित्यर्थः । **एवमादिकान्यत्र** विद्वल्लोकप्रसिद्धानि । **लोकविरुद्धानि ज्ञेयानि** ज्ञातव्यानि ॥१०॥

सुन्दरगुरुयोगमाह -

**नाणाइजुओ य गुरू, सुविणे उदगादितारणं तत्तो ।**
**अचलाइरोहणं वा, तहेव वालाइरक्खा वा ॥६१॥ २/११**

**ज्ञानादियुतश्च गुरुः** ज्ञानदर्शनाभ्यां चारित्रेण च युक्तो गुरुर्भवति, **स्वप्ने** स्वप्न मनोविज्ञानरूपे, **उदकादितारणमुदक**-ज्वलनादिव्यसनेभ्य[गर्तादिभ्यः अटी.]स्तारणं निस्तारणम् । **ततो** गुरोः सकाशात् पश्यति आत्मन उदकादिषु निमज्जतोऽवधारणं तेषां चाक्रामतां वारणं निवारणम् । **अचलादिषु** पर्वत-प्रासाद-वृक्ष-शिखरादिषु, **रोहणं** चारोपणं **वा** तत इति सम्बध्यते, **तथैव** च **व्यालादिभ्यो रक्षा वा**, स्वप्ने तत एव, अनेन सुन्दरगुरुयोगो व्याख्यातः ॥११॥

तदेवं प्रस्तुतदीक्षार्हस्य समवसरणप्रक्रमविरचनद्वारेण दीक्षार्थमागमनं विशिष्टकाले प्रदिदर्शयिषुस्तावदिदमाह-

**वाउकुमाराईणं, आहवणं नियनिएहिं मन्तेहिं ।**
**मुत्तासुत्तीए किल, पच्छा तक्कम्मकरणं तु ॥६२॥ २/१२**

**वाउकुमाराहवणे, पमज्जणं तत्थ सुपरिसुद्धं तु ।**
**गंधोदगदाणं पुण, मेहकुमाराहवणपुव्वं ॥६३॥ जुम्मं । २/१३**

**वायुकुमारादीनां** समयप्रसिद्धानाम् **आह्वानं** संशब्दनम् । **निजनिजैर्मन्त्रैः** प्रणव-नमःपूर्वकैस्तन्नामभिर्यथासम्प्रदायमागतैः, **मुक्ताशुक्त्या** मुक्ताफलोत्पत्तिनिबन्धनशुक्त्याकारया मुद्रया, **किल पश्चात् तत्कर्मकरणं तु** वायुकुमारादिकर्मसम्पादनम् ॥१२॥

**वायुकुमाराह्वाने प्रमार्जनं** क्षेत्रशुद्धिरूपम्। **तत्र सुपरिशुद्धं तु** सङ्कल्पशुद्ध्या कर्त्तव्यमिति गम्यते । **गन्धोदकदानं** सुरभिगन्धसम्मिश्रसलिलप्रवर्षणम् । **पुनर्मेघकुमाराह्वानरूपं** समवसरणेऽपि यतस्तत् कुर्वन्ति ॥१३॥

**उउदेवीणाहवणे, गंधड्ढा होइ कुसुमवुट्ठि त्ति ।**
**अग्गिकुमाराहवणे, धूवं एगे इहं बेन्ति ॥६४॥ २/१४**

**ऋतुदेवीना** वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिरनामर्तुदेवीनाम् **आह्वाने** सङ्कीर्तने, **गन्धाढ्या** भवति **कुसुमवृष्टिरिति, अग्निकुमाराह्वाने धूममेके,** समयज्ञा **इह** स्थाने **ब्रुवते** तेजो निक्षिप्यम्, अन्ये तु स्वरूपत एव धूपं सुरभिगन्धाढ्यं सन्न्यसनीयं ब्रुवते ॥१४॥

**वेमाणियजोइसभवणवासिआहवणपुव्वगं तत्तो ।**
**पागारतिगण्णासो, मणिकचणरुप्पवण्णाणं ॥६५॥ २/१५**

**वैमानिक-ज्योति-र्भवनवास्याह्वानपूर्वकम् ततः** क्रमापेक्षयाभ्यन्तर-मध्यम-बाह्यरूपं **प्राकारत्रिकम्,** तस्य **न्यासो, मणिकाञ्चनरूप्यवर्णानां** प्राकाराणां स च न्यास इति ॥१५॥

**वंतरगाहवणाओ, तोरणमाईण होइ विण्णासो ।**
**चितितरुसीहासणछत्तचक्कधयमाइयाणं च ॥६६॥ २/१६**

**व्यन्तराह्वानात् तोरणादीनाम्,** आदिशब्दात् पीठ-देवच्छन्दके पुष्करिण्यादिपरिग्रहः, **भवति, विन्यासो** विरचना, यतो व्यन्तरदेवास्तानि कुर्वन्ति, **चैत्यतरु-सिंहासन-छत्र-चक्र-ध्वजादीनां च,** आदिशब्दात् पद्म-चामरपरिग्रहः ॥१६॥

**भुवणगुरुणो य ठवणा, सयलजगपियामहस्स तो सम्मं ।**
**उक्किट्ठवण्णगोवरि, समवसरणबिंबरूवस्स ॥६७॥ २/१७**

**भुवनगुरोश्च** भगवतस्त्रिलोकनाथस्य, **स्थापना** सद्भावरूपा, **सकलजगत्पितामहस्य** जगतो धर्मः पिता, पालनाभियुक्तत्वात्, तस्यापि भगवांस्ततस्तदनन्तरं **सम्यगवैपरीत्येन,** अथवा

जगत्पितामहो ब्रह्मा, ऋषभदेवो, यथोक्तम् -

*पितुः प्रजानां भरतस्य यत्पिता, पितामहस्तेन निरुच्यते भवान् ।*
*अहिंसनादप्यवसङ्क( शङ्क? )शङ्करः, स्मरादिभिश्चायमन्यज्जिनो मतः ॥१॥( वं. )[ ]*

**उत्कृष्टो वर्णकः**, चन्दनं, *वर्णकमाहुश्चन्दनम्* इत्युक्तेः । *'व्यपगतमालावर्णकविलेपनस्य'* इति च समयप्रसिद्धेः [ ] तस्यापरि **समवसरणबिम्बरूपस्य** उपरिवर्तिसमवसरणव्यवस्थित-प्रतिमास्वरूपस्य ॥१७॥

**एयस्स पुव्वदक्खिणभागेणं मग्गओ गणहरस्स ।**
**मुणिवसभाणं वेमाणिणीण तह साहुणीणं च ॥६८॥ २/१८**

**एतस्य** भुवनगुरोः, **पूर्वदक्षिणभागेन मार्गतः** पृष्ठतः, **गणधरस्य** गणस्वामिनः, **मुनिवृषभाणा**मतिशयसम्पन्नेतरसाधूनाम्, **वैमानिकदेवीनां तथा साध्वीनां च** भवति विन्यास इति सम्बध्यते ॥१८॥

**इय अवरदक्खिणेणं, देवीणं ठावणा मुणेयव्वा ।**
**भवणवइवाणमंतर-जोइससंबंधिणीणं ति ॥६९॥ २/१९**

यथाऽस्य त्रिकस्य न्यासतोऽवमेऽ**परदक्षिणेन** दिग्भागेन **देवीनां स्थापना मुणितव्या भवनपति-व्यन्तर-ज्योतिष्कसम्बन्धिनीनामिति**, भवनवासि-ज्योतिष्क-वनविवरचारि-देवीक्रमेण ॥१९॥

**भवणवइवाणमंतर-जोइसियाणं च एत्थ देवाणं ।**
**अवरुत्तरेण नवरं, निद्दिट्ठा समयकेऊहिं ॥७०॥ २/२०**

**भवनपति-व्यन्तर-ज्योतिष्काणां चात्र देवानां** स्थापनेति सम्बध्यते । **अपरोत्तरेण** दिग्भागेन **नवरं** केवलं **निर्दिष्टा, समयकेतुभिः** समयचिह्नैरागमवेदिभिः ॥२०॥

**वेमाणियदेवाणं, नराण नारीगणाण य पसत्था ।**
**पुव्वुत्तरेण ठवणा, सव्वेसिं नियगवण्णेहिं ॥७१॥ २/२१**

**वैमानिकदेवानां नराणां** मनुष्याणां **नारीगणानां च प्रशस्ता । पूर्वोत्तरेण स्थापना सर्वेषामेव निजकवर्णै** रक्त-पीत-सित-वर्णैर्वैमानिकानाम् ॥२१॥

**अहिनउलमयमयाहिवपमुहाणं तह य तिरियसत्ताणं ।**
**बितियंतरम्मि एसा, तइए पुण देवजाणाणं ॥७२॥ २/२२**

**अहि-नकुल-मृग-मृगाधिप-प्रमुखानामे**तत्प्रभृतीनाम्, **तथा च तिर्यक् सत्त्वानां** तिर्यक्जीवानाम्। **द्वितीयान्तरे** द्वितीयप्राकारान्तरे **एषा** स्थापना, **तृतीये पुनरन्तरे, देवयानानां** देवयानविमानानामनेकहंसमयूराद्याकारभृताम् ॥२२॥

**रइयम्मि समोसरणे, एवं भत्तिविहवाणुसारेणं ।**
**सुइभूओ उ पओसे, अहिगयजीवो इहं एइ ॥७३॥ २/२३**

**रचिते समवसरणे** पूर्वोक्ते **एव**मुक्तनीत्या। **भक्तिश्च विभवश्च,** तयोः, **अनुसारेण** अनुरूपेणानुरूपक्रमेण, **शुचिभूतस्तु** द्रव्य-भावशौचाभ्याम्, **प्रदोषे** रात्रिप्रथमयामे दिवसावसान इति यावत्। **अधिकृतजीवः** प्रस्तुतजीवो दीक्षार्ह **इह** स्थाने। **एति** प्रविशति, तदेव स्थानमध्यास्त इत्यर्थः ॥२३॥

इहैवोपयोगीदमाह -

**भुवणगुरुगुणक्खाणा, तम्मी संजायतिव्वसद्धस्स ।**
**विहिसाहणमोहेणं, तओ पवेसो तहिं एवं ॥७४॥ २/२४**

**भुवनगुरोर्गुणाः** क्षायिकसम्यक्त्व-केवलज्ञान-दर्शनादयः, जीवस्वरूपप्रतिबद्धास्तदपरे च सर्वातिशायिनश्चतुस्त्रिंशदतिशयप्रतिबद्धा देहसौगन्धादयः, तेषा**माख्यानं** स्वरूपकथनम्। तस्माद्धे-तो**स्तस्मिन्** भगवति भुवनगुरौ **सञ्जाततीव्रश्रद्धस्य** समुत्पन्नतीव्राभिलाषस्य **विधिसाधनमोघेन** सामान्येन, **ततः प्रवेशस्तस्मिन्** समवसरणे। **एवं** वक्ष्यमाणन्यायेन ॥२४॥ १ सासण. अटी.।

तमेव न्यायमाह -

**वरगंधपुप्फदाणं, सियवत्थेणं तहच्छिठवणं च ।**
**आगइगइविण्णाणं, इमस्स तह पुप्फपाएणं ॥७५॥ २/२५**

**वरगन्धपुष्पदानम्।** तस्य हस्त इति गम्यते। **सितवस्त्रेण** मङ्गल्यवस्त्रेण मन्त्राऽभिसंस्कृतेन। **तथाक्षिस्थगनं च** नयनयोरावरणं च, किञ्चित्काल**मागतिगत्योः** चेष्टाविशेषरूपयोः **विज्ञानम्।** पूर्वं गत्वा तैरन्यैर्वा पदैः प्रत्यागच्छति। तद्विषयनिमित्तज्ञानमावृतनयनस्य विज्ञेयमस्य प्रस्तुतस्य। तथा **पुष्पपातेन** हस्तगतपुष्पपतनविशेषेण। अथवा पुरं शरीरं पातीति [1]पुष्पो जीवो ऊर्ध्व [च]रः,

१. पुष्प जीवत्वविशिष्ट इति फलितार्थः।

यथा दीर्घत्वं प्राकृते तु समानं रूपं तस्य जीवस्य पातश्चेष्टाविशेषः । स्वापादिक्रियाविशिष्टस्य पृथिव्यां तेन चागतिगत्योर्विज्ञानम् । कुतोऽयमागतः क्व वा यास्यतीति ? देवादिजन्मन आगतस्तेष्वेव विशिष्टेषु पुनरुत्पत्स्यत इत्येवं रूपम् । *पुष्प विकसने [ पा.धा. ११२२ ]* । पुष्पतीति पुष्पम् । सङ्कोचविकासवच्छरीरं, तत्क्रियाविशेषेण वा । आगतिगतिविज्ञानमिदं च साम्प्रदायिकं स्वपर-समयाद्विज्ञेयम् । परमसूक्ष्मदृष्टिवादानुसारिसन्दर्भाङ्गविद्यादिषु च प्रसिद्धम् ॥२५॥

**अभिवाहरणा अण्णे, नियजोगपवित्तिओ य केइ त्ति ।**
**दीवादिजलणभेया, तहुत्तरसुजोगओ चेव ॥७६॥ २/२६**

**अभिव्याहरणाद**भिव्याहारात् समयगतादुद्देशादेरन्ये मन्यन्ते, पूर्वोक्तं **निजयोगप्रवृत्तितश्च** स्वकीयमनोवाक्कायव्यापाराच्च । **केचिदिति** ब्रुवते । गुरोरात्मसम्बन्धिव्यापारात्, दीक्षणीय-शुभाशुभपरिज्ञानमस्य वा प्रस्तुतस्य **दीपादिज्वलनभेदात्** दीपादिज्वलनविशेषाद्, आदिशब्दादाहुति-ज्वलनपरिग्रहः, तद्विशेष उत्सर्पणावसर्पणादिगतः, ततः केचिद् ब्रुवते । **तथोत्तरसुयोगतश्चैव** विचित्रोत्तरशोभनव्यापारतश्च सहजनिमित्तरूपात् ॥२६॥

**बाहिं तु पुप्फपाए, वियडणचउसरणगमणमाईणि ।**
**काराविज्जइ एसो, वारतिगमुवरि पडिसेहो ॥७७॥ २/२७**

**बहिस्तु** समवसरणकल्पितबिम्बात् तद्गतोत्तममध्यमावस्थानाद् वा **पुष्पपाते** सति, विकटनमालोचनं स्वभावप्रकाशनम्, चतुःशरणगमनमर्हत्सिद्धसाधुकेवलिप्रज्ञप्तधर्माश्रयोपगमः, आदिशब्दादुष्कृतगर्हादिपरिग्रहो **विकटनचतुःशरणगमनादीनि** विद्वत्समयप्रसिद्धानि । **कार्यते एषो**ऽधिकृतसत्त्वो **वारत्रिकं** यावत्, **उपरि प्रतिषेधो** न पुनश्चतुर्थवारं कार्यत इत्यर्थः ॥२७॥

**परिसुद्धस्स उ तह पुप्फपायजोगेण दंसणं पच्छा ।**
**ठिइसाहणमुववूहण, हरिसाइपलोयणं चेव ॥७८॥ २/२८**

**परिशुद्धस्य तु** तथाविधनिमित्तशुद्धिसमन्वितस्य । पुनस्तथा, **पुष्पपातयोगेनानुकूल**-पुष्पपतनव्यापारेण । **दर्शनं** भगवद्दर्शनं **पश्चात्तस्य** भवतीति शेषः । **स्थितिसाधनं** मर्यादासाधन-मक्षिस्थगनादिका मर्यादेयं नान्यथा मन्तव्या । **उपबृंहणम्**–'धन्यस्त्वं धर्माधिकारी क्षीणप्रायक्लेशः' इत्येवंरूपम् । **हर्षादिप्रलोकनं चैव** हर्षात्यन्तविस्मयादिप्रदर्शनं चैव, गुरोस्तद्विषयमिति गम्यते ॥२८॥

**अह तिपयाहिणपुव्वं, सम्मं सुद्धेण चित्तरयणेण ।**
**गुरुणो निवेयणं सव्वहेव दढमप्पणो एत्थ ॥७९॥ २/२९**

**अथानन्तरं त्रिप्रदक्षिणापूर्वं** गुरूंस्त्रीन् वारान् प्रदक्षिणीकृत्येत्यर्थः। **सम्यक्शुद्धेन** भावशुद्धेन **चित्तरत्नेन** मनश्चिन्तामणिना, **गुरोर्निवेदनं सर्वथैव** वित्त-चतुष्पदपरिवारादिभिः **दृढमात्मनोऽत्र** दीक्षायां सत्याम् ॥२९॥

**एसा खलु गुरुभत्ती, उक्कोसो एस दाणधम्मो उ ।**
**भावविसुद्धीएँ दढं, इहरा वि य बीयमेयस्स ॥८०॥ २/३०**

**एषा खलु** एषैव, **गुरुभक्तिः उत्कृष्ट एष दानधर्मस्तु** यत्सर्वथा निवेदनमात्मनो **भावविशुद्ध्या दृढं** नितान्तम् **इतरथापि च** तथाविधभावशुद्ध्यभावे, **बीजमेतस्योत्कृष्ट**-दानधर्मस्योदारभावस्य वा ॥३०॥

**जं उत्तमचरियमिणं, सोउं पि अणुत्तमा न पारेन्ति ।**
**ता एयसयासाओ, उ पगरिसो होइ एयस्स ॥८१॥ २/३१**

**यदुत्तमचरितमिद**मुत्तमपुरुषचेष्टितमिदम्, **श्रोतुमप्यनुत्तमा न पारयन्ति** न शक्नुवन्ति तथाविधवीर्यायोगात्। **तत्**तस्माद् **एतत्सकाशात्** दानधर्मसकाशात्, [तु] पुनः **प्रकर्षो भवत्येतस्य** प्रस्तुतभावस्य ॥३१॥

ननु गुरोर्वित्तादि प्रतीच्छतोऽधिकरणं भविष्यतीत्याशङ्कापनोदायाह –

**गुरुणो वि नाहिगरणं, ममत्तरहियस्स एत्थ वत्थुम्मि ।**
**तब्भावसुद्धिहेउं, आणाए पयट्टमाणस्स ॥८२॥ २/३२**

**गुरोरपि नाधिकरण**मारम्भप्रवृत्तिरूपम्, **ममत्वरहितस्य** लोभाहङ्काररहितस्य **अत्र वस्तुनि** न तु दानपरिग्रहरूपे। **तद्भावशुद्धिहेतोराज्ञया** आगमात् **प्रवर्तमानस्य** ॥३२॥

**नाऊण य तब्भावं, जह होइ इमस्स धम्मवुड्ढि त्ति ।**
**दाणादुवदेसाओ, अणेण तह एत्थ जइयव्वं ॥८३॥ २/३३**

**ज्ञात्वा च तद्भाव**मत्युदाराशयरूपं विवक्षितदानविषयं वा, **यथा** चैत्य-साधु-पूजादिना **भवत्यस्य** दीक्षापात्रस्य **धर्मवृद्धिरिति** धर्मसमृद्धिः, **दानाद्युपदेशादौ** विषये, आदिशब्दात् शील-तपो-भावनापरिग्रहः, **अनेन** गुरुणा, **तथाऽत्र यतितव्यं** प्रयत्नः कार्यः ॥३३॥

अधुना गुरुशिष्ययोर्द्वयोरपि, दीक्षामङ्गीकृत्य भावप्रयत्नसमानत्वमुपदर्शयति –

**नाणाइगुणजुओ खलु, निरभिस्संगो पयत्थरसिगो य ।**
**इय जयइ न पुण अण्णो, गुरू वि एयारिसो चेव ॥८४॥ २/३४**

**ज्ञानादिगुणयुतः खलु** सम्यग्ज्ञानादिसम्पन्नः **निरभिष्वङ्गो** बाह्यद्रव्यनिस्पृहः, **पदार्थ-रसिकश्चागमोक्तभावप्रीतियुक्तश्च, इत्येवं यतते** प्रयत्नं विधत्ते । **न पुनरन्यो**ऽनधिकारित्वात्, **गुरुरपि तादृश एवानुकूलत्वात्** परितोषसम्पादनसमर्थः ॥३४॥

साम्प्रतं दीक्षासम्प्राप्त्या सत्त्वानां प्रशंसनीयतामाह -

**धण्णाणमेयजोगो, धण्णा चेट्ठंति एयनीईए ।**
**धण्णा बहु मन्नन्ते, धण्णा जे न प्पदूसन्ति ॥८५॥ २/३५**

**धन्यानामेतद्योगो** दीक्षया सम्बद्धो गुरुयोगो वा। **धन्याश्चेष्टन्ते एतन्नीत्या** पूर्वोक्तया, **धन्या बहु मन्यन्ते** बहुमानविषयीकुर्वन्ति, **धन्या ये न प्रदुष्यन्त्य**स्यामिति गम्यते, चित्तविकारं नापद्यन्त इत्यर्थः ॥३५॥

दीक्षानन्तरविधिमाह -

**दाणमह जहासत्ती, सद्धासंवेगकमजुयं नियमा ।**
**विहवाणुसारओ, तह जणोवयारो य उचिओ त्ति ॥८६॥ २/३६**

**दानमथ यथाशक्ति** शक्त्यनुरूपम् । **श्रद्धासंवेगक्रमयुतं** नियमाद्धर्मानुरागमोक्षाभिलाष-प्रदेयानुपूर्वीयुक्तम्, **नियमान्नियोगेन** कर्त्तव्यम् । **विभवानुसारतो** विभवापेक्षया, **तथा जनोपचारश्च** लोकपूजारूपः, **उचित इति** योग्यतावैचित्र्येण ॥३६॥

अस्या एव लिङ्गमाह -

**अहिगयगुणसाहम्मियपीईबोहगुरुभत्तिवुड्ढी य ।**
**लिंगं अव्वभिचारी, पइदियहं सम्मदिक्खाए ॥८७॥ २/३७**

**अधिकृतगुणाश्च साधर्मिकप्रीतिश्च बोधश्च गुरुभक्तिश्चा**धिकृतगुणसाधर्मिक-प्रीतिबोधगुरुभक्तयस्तासां प्रत्येकं **वृद्धिश्च, लिङ्गं** चिह्नम् **अव्यभिचार्य**विसंवादि, **प्रतिदिवसं** प्रतिदिनम्, **सम्यग्दीक्षायाः** शोभनदीक्षायाः ॥३७॥

अधिकृतगुणवृद्धिः कथं भवतीत्याह -

**परिसुद्धभावओ तह, कम्मखओवसमजोगओ होइ ।**
**अहिगयगुणवुड्ढी खलु, कारणओ कज्जभावेणं ॥८८॥ २/३८**

**परिशुद्धभावतो** जीवसम्बन्धिविशुद्धादध्यवसायाद् वीर्यकृतात् **तथा कर्मक्षयोपशम-योगतो** भावसहकारिणो भावावस्थानहेतोः [**भवति** जायते अटी.] **अधिकृतगुणवृद्धिः**

**खल्वधिकृतगुणवृद्धिरेव**, कुतो न्यायादित्याह-**कारणतः कार्यभावेन** । गुणवृद्धेः कारणमधिकृतजीववीर्यं क्षयोपशमश्च । तच्च स्वफलनिवर्तने न व्यभिचरति । तेन गुणवृद्धिरेवेति स्थितम् ॥३८॥

साधर्मिकप्रीतिवृद्धिः कथं भवतीत्याह –

**धम्मम्मि य बहुमाणा, पहाणभावेण तयणुरागाओ ।**
**साहम्मियपीईए उ हंदि वुड्ढी धुवा होइ ॥८९॥ २/३९**

**धर्मे च** धर्मविषयाद्, **बहुमानात् प्रधानभावेन** धर्मस्यैव, **तदनुरागात्** साधर्मिकानुरागा-द्धर्मानुरागाद् वा, **साधर्मिकप्रीतेस्तु** विशिष्टफलनिर्वर्तिकायाः । हन्तैवं प्रत्यवधारय **वृद्धिर्ध्रुवा भवति** ॥३९॥

बोधवृद्धिः कथं भवतीत्याह –

**विहियाणुट्ठाणाओ, पाएणं सव्वकम्मखउवसमो ।**
**नाणावरणावगमा, नियमेणं बोहवुड्ढि त्ति ॥९०॥ २/४०**

**विहितानुष्ठानात्** सदनुष्ठानरूपात् **प्रायेण** बाहुल्येन, **सर्वकर्मक्षयोपशमो** मोहान्तराय-ज्ञानावरणादिक्षयोपशमो यतः सम्भवति । ततो **ज्ञानावरणापगमात्** तत्कृत्या **नियमेन** नियोगेन, **बोधवृद्धिरिति** ज्ञानवृद्धिः ॥४०॥

गुरुभक्तिवृद्धिः कथं भवतीत्याह –

**कल्लाणसंपयाए, इमीएँ हेऊ जओ गुरू परमो ।**
**इय बोहभावओ, च्चिय जायइ गुरुभत्तिवुड्ढी वि ॥९१॥ २/४१**

**कल्याणसम्पदः** कल्याणसम्पत्तेः, **अस्याः** प्रस्तुताया **हेतुः** कारणम् । **यतो गुरुः परमो** वर्तते । इत्येवंप्रकार**बोधभावत एव** सकाशाद् **जायते** । **गुरुभक्तिवृद्धिरपि** गुरुसेवासमृद्धिरपीति ॥४१॥

**इय कल्लाणी एसो, कमेण दिक्खागुणे महासत्तो ।**
**सम्मं समायरन्तो, पावइ तह परमदिक्खं पि ॥९२॥ २/४२**

**इत्येवं** प्रस्तुतनीत्या, **कल्याणी** पुण्यवान्, **एष** प्रस्तुतः, **क्रमेण** परिपाट्या, **दीक्षागुणान् महासत्त्वः** सत्त्वाधिकः, **सम्यक् समाचरन्** भावसारम्, **प्राप्नोति** तथा **परमदीक्षामपि** सर्वविरतिदीक्षामपि ॥४२॥

इदानीमस्या फलमाह -

**गरहियमिच्छायारो, भावेणं जीवमुत्तिमणुहविउं ।**
**नीसेसकम्ममुक्को, उवेइ तह परममुत्तिं पि ॥९३॥ २/४३**

**गर्हितमिथ्याचारः** परिहृतमिथ्याचारः, तल्लक्षणं चेदम् -

*बाह्येन्द्रियाणि संयम्य, य आस्ते मनसा स्मरन् ।*
*इन्द्रियार्थान् विमूढात्मा, मिथ्याचारः स उच्यते ॥१॥ [ भगवद् गीता अ.३ श्लोक ६ ]*

**भावेनान्तः**करणलक्षणेन **जीवन्मुक्तिमनुभूय** जीवत एव मुक्तिर्निःसङ्गतया शरीरस्थस्यैव मुक्तिस्तामनुभूय **निःशेषकर्ममुक्तः** सकलकर्मविप्रमुक्तः **उपैत्यु**पगच्छति । **तथा परममुक्तिमपि** सिद्धिपदरूपाम् ॥४३॥

दीक्षाफलविधानमाह -

**दिक्खाविहाणमेयं, भाविज्जंतं तु तन्तनीईए ।**
**सइअपुणबंधगाणं, कुग्गहविरहं लहुं कुणइ ॥९४॥ २/४४**

**दीक्षाविधानमेतत्** पूर्वोक्तं **भाव्यमानं तु** चिन्त्यमानमभ्यस्यमानं वा । **तन्त्रनीत्या**गमनीत्या, **सकृदपुनर्बन्धकयो**रागमप्रसिद्धयोः सम्बन्धिभ्यां वा भाव्यमानं वा । **कुग्रहविरहं** कुत्सिताभिनिवेश-वियोगमसदभिनिवेशपरित्यागम्, **लघु** शीघ्रं **करोति** विधत्त इति ॥४४॥

**॥ दीक्षाविधानपञ्चाशकं द्वितीयं समाप्तम् ॥**

# ॥ तृतीयं चैत्यवन्दनविधि-पञ्चाशकम् ॥

प्रस्तुतदीक्षानन्तरमेव वन्दनं भवतीति तत्प्रतिपादनार्थमिदमाह -

**नमिऊण वद्धमाणं, सम्मं वोच्छामि वंदणविहाणं ।**
**उक्कोसाइतिभेयं, मुद्दाविण्णासपरिसुद्धं ॥९५॥ ३/१**

अस्या अपि प्रयोजनाद्यभिसन्धानं पूर्ववत्, **नत्वा** नमस्कृत्य गुरुकृतनाम्ना **वर्धमानं** '***अम्मापिउ-संतिए वद्धमाण***' इति [श्री कल्पसूत्रम्-सूत्र-१०८] वचनात्। **सम्यग् वक्ष्याम्या**गमानुसारेण, **वन्दनविधानं** चैत्यवन्दनस्य विधानं विधिमित्यर्थः । **उत्कृष्टादित्रिभेदं** पाठ-क्रिये भूयसी, समाश्रित्योत्कृष्ट-मध्यमेतरभेदम्। न तु भावतः तस्य स्वल्पस्याप्युत्कृष्टत्वाद्। भेदाच्च वक्ष्यमाणाद् वन्दनस्य त्रयो-**मुद्राविन्यासपरिशुद्धम्**, मुद्रा च वक्ष्यमाणास्तिस्रस्ताभिः परिशुद्धम् ॥१॥

तानेव त्रीन् भेदानाह -

**नवकारेण जहन्ना, दंडगथुइजुयल मज्झिमा णेया ।**
**संपुण्णा उक्कोसा, विहिणा खलु वंदणा तिविहा ॥९६॥ ३/२**

**नमस्कारेण जघन्या** स्वल्पा लघ्वी वन्दना, **दण्डक-स्तुतियुगलाभ्यां मध्यमा ज्ञेया** दण्डकेनैकेन प्रणिपातदण्डकेन दण्डकैर्वा सकलस्तुतियुगलेन च प्रसिद्धेन मध्यमा वन्दना । **उत्कृष्टा सम्पूर्णा** पर्यन्तवर्तिप्रणिधानसहिता । **विधिना खलु वन्दना त्रिविधा** त्रिविधैवानेन प्रकारेण ॥२॥

प्रकारान्तरमधिकृत्याह -

**अहवा वि भावभेया, ओहेण अपुणबंधगाईणं ।**
**सव्वा वि तिहा णेया, सेसाणमिमी न जं समए ॥९७॥ ३/३**

**अथवापि भावभेदा**दधिकारगताऽध्यवसायविशेषात् **ओघेन** सामान्येन, **अपुनर्बन्धकादी-नामा**दिशब्दात् सम्यग्दृष्टि-देश-सर्वचारित्रिपरिग्रहः । **सर्वाऽपि त्रिधा ज्ञेया** वन्दना **शेषाणाम**-पुनर्बन्धकात् पूर्वेषां सकृद्बन्धक-मार्गपतित-मार्गाभिमुखादीनामनधिकारिणां योग्यतावैकल्याद् **इयं** वन्दना, **न** नैव, **यद्** यस्मात् **समये** सिद्धान्ते प्रतिपादितेति गम्यते ॥३॥

साम्प्रतमपुनर्बन्धकलक्षणमाह -

**पावं न तिव्वभावा, कुणइ न बहु मन्नए भवं घोरं ।**
**उचियट्ठिइं च सेवइ, सव्वत्थ वि अपुणबंधो त्ति ॥९८॥ ३/४**

**पापं** हिंसादि **न तीव्रभावात् करोति**, सामान्येन करोत्यपि तथाविधकर्मदोषात् **न बहु मन्यते भवं घोरं** संसारकारणोपरतचित्तत्वात् तीर्थकराद्याशातनादोषपरिहारेण, **उचितस्थितिं च सेवते**, यथोचितोपकारकरणेन **सर्वत्रापि** हीनादौ, **अपुनर्बन्धक** इत्येभिर्लिङ्गैर्लक्षणीयः ॥४॥

सम्यग्दृष्टिलिङ्गान्याह -

**सुस्सूस धम्मराओ, गुरुदेवाणं जहासमाहीए ।**
**वेयावच्चे नियमो, सम्मद्दिट्ठिस्स लिंगाइं ॥९९॥ ३/५**

**शुश्रूषा** श्रोतुमिच्छा धर्मशास्त्रविषया, गेयरागिकिन्नरगेयशुश्रूषाधिका जिज्ञासोत्तरकालभाविनो। **धर्मरागो** धर्मानुरागः कान्तारोत्तीर्णदरिद्रब्राह्मणहविःपूर्णाभिलाषातिरिक्तः । **गुरुदेवानां** परम-पूज्यानां **यथासमाधि** स्वसमाध्यनतिक्रमेण, यथात्मनः पीडा न भवति, तत्पूजां कुर्वन्तस्तदादेशं वा, **वैयावृत्त्ये** व्यावृत्तभावे तत्कर्मणि वा, **नियमो** नियोगो वाऽवश्यं मयैतद्यथाकालं कर्तव्यमित्यवश्यंभावः, **सम्यग्दृष्टेर्लिङ्गानि** चिह्नान्येतानि ॥५॥

चारित्रिलिङ्गान्याह -

**मग्गणुसारी सड्ढो, पण्णवणिज्जो कियापरो चेव ।**
**गुणरागी सक्कारंभसंगओ तह य चारित्ती ॥१००॥ ३/६**

**मार्गानुसारी** चारित्रमोहनीयकर्मक्षयोपशमयोगादस्य च तत्त्वावाप्तिं प्रत्यवन्ध्यकारणत्वात्, तथा **श्राद्धः** तत्प्रत्यनीकदर्शनमोहनीयह्रासातिशयात् तथा **प्रज्ञापनीयो** मार्गानुसारित्व-श्राद्धत्वाभ्यां समवबोधग्रहणयोग्यं तथा **क्रियापरश्चैव** स्वाध्याय-ध्याना-ऽहिंसादिक्रियाप्रधानश्चैव। **गुणरागी** विशुद्धाशयत्वात् प्रस्तुतेषु गुणेष्वन्येषु वा पूर्वेष्वनुरागवान्। **शक्यारम्भसङ्गतो** वन्ध्यारम्भभावनिवृत्तेः यदेव शक्यं कर्तुं तदेवारभते **तथा च चारित्री** चैवंविधो भवतीति ॥६॥

**एतेऽहिगारिणो इह, न उ सेसा दव्वओ वि जं एसा ।**
**इयरीएँ जोग्गयाए, सेसा ण उ अप्पहाण त्ति ॥१०१॥ ३/७**

**एतेऽ**पुनर्बन्धकादयस्त्रयो**ऽधिकारिण इह** वन्दनायाम्, **न तु शेषा** सकृद्बन्धकादयस्तीव्रभाव-पापकरणादि चिह्नावसेयाः। प्रदीर्घसंसारिणः **द्रव्यतोऽपि, यद्** यस्माद् **एषा** वन्दना, पुनरि**तरस्या** भाववन्दनायाः **योग्यतायां** सत्यां **सैषा** प्रदीर्घसंसारिगता, **न तु** नैव **अप्रधानेति** कृत्वा, योग्यतावाची

द्रव्यशब्दस्तस्यां नास्तीति भावः ॥७॥ १. सेसाण-अटी. ।

**न य अपुणबंधगाओ, परेण इह जोग्गया वि जुत्त त्ति ।**
**न य न परेण वि एसा, जमभव्वाणं पि निद्दिट्ठा ॥१०२॥ ३/८**

**न च** नैव **पुनरबन्धकात् परेण** प्रागवस्थायाम् इह (भाववन्दनायाम्,-अटी.) **योग्यताऽपि युक्तेति**, संसारभूयस्त्वादेव । **न च न परेणाप्येषा** सामान्येन वन्दना शब्दक्रियारूपा, किन्वस्त्येव, **यद्** यस्माद् **अभव्यानामपि निर्दिष्टा**गमे ॥८॥

किं लिङ्गसद्भावादेषा विज्ञेयेत्याह -

**[१]लिंगाण तीए भावो, न तदत्थालोयणं न गुणरागो ।**
**नो विम्हओ न भवभयमिय वच्चासो य दोण्हं पि ॥१०३॥ ३/९**

**[१]लिङ्गानां तस्यां** सामान्य[द्रव्य]वन्दनायाम्, **भावः** सद्भावोऽयं विज्ञेयः **न तदर्थालोचनं** न वन्दनासूत्रार्थमीमांसा । **न गुणरागो** न वन्दनाभिधेयानुष्ठेयगुणानुरागः, **नो विस्मयो** मयाऽप्राप्तपूर्वेयमनादौ संसारे प्राप्तेत्येवंरूपः प्रसादः [प्रमोदो अटी.] । **न भवभयं** संसारभयम्, विराधनायामि**ति** कृत्वा, **व्यत्यासश्च** विपर्ययश्च । **द्वयोरपि** भाव-क्रिययोर्वन्दनागतयोः ॥९॥ (१. लिंगा ण-अटी.)

[१. 'लिंग'त्ति प्राकृते *लिंगमतन्त्रम्* इति [ ] वचनात्..... अथवा लिङ्गानां भावः सत्ता, ........ अटी.]

साम्प्रतं द्रव्येतरवन्दनाविशेषाभिधित्सयाऽऽह -

**वेलाए विहाणम्मि य, तग्गयचित्ताइणा य विण्णेओ ।**
**तव्वुड्ढिभावऽभावेहि, तह य दव्वेयरविसेसो ॥१०४॥ ३/१०**

**वेलया** प्रतिनियतकालरूपया, **विधाने च** सङ्गतवाक्-चेष्टारूपे सति, **तद्गतचित्तादिना च** वन्दनगतचित्तादिना । आदिशब्दाल्लेश्या-तदर्थोपयुक्तत्वादिपरिग्रहो विज्ञेयः, द्रव्येतरविशेषवन्दनाया इति सम्बन्धनीयम् । **तद्वृद्धिश्च** वन्दनागतवृद्धिश्च, प्रतिदिवसानुष्ठानरूपा, भावाभावश्च [१]सम्यक्त्वसद्भावश्च तद्वृद्धिभावाभावौ ताभ्याम् । **तथा चवञ्च द्रव्येतरविशेषो** द्रव्यभाववन्दनागत विशेषः, अयमत्र वाक्यार्थो-वेलया-विधाने-तद्गतचित्तादिना तद्वृद्ध्याभावभावेन च भाववन्दना, एतद्वैकल्ये तु द्रव्यवन्दना ॥१०॥ (१. 'अथवा तद्वृद्धिश्च भावाभावश्च रोमाञ्चादिलिङ्ग्यभक्तिसद्भावः [वाऽभावः । अथवा 'तद्वृद्धिभावाभाव'श्चेति तद्वृद्धिभावाभावौ, ताभ्यामसद्भ्यां सद्भ्यां चेति गम्यम्' - अटी.)

नन्वपुनर्बन्धकादीनां प्रवर्धमानचैत्यवन्दनाभावनामधिकारित्वनिर्देशेन किमित्यादावेव भाववृद्धिः प्रशस्यत इत्याह -

**सइ संजाओ भावो, पायं भावंतरं जओ कुणइ ।**
**ता एयमेत्थ पवरं, लिंगं सइ [1]भाववुड्डीए ॥१०५॥ ३/११**

**सकृत् सञ्जातो भाव** एकदा समुत्पन्नो विशिष्टो व्यवसायः, **प्रायो भावान्तरं** समधिकरूपं वा **यतः करोति**, न त्वनुत्पन्न एव । **तत्तस्माद् एतदत्र प्रवरं लिङ्गं** सकृद्भावोत्पत्तिरूपम्, **सदा** सर्वकालम्। **भाववृद्धेस्तू**त्तरकालभाविन्याः, अन्यथा हेत्वभावेन तदसम्भवात् ॥११॥ (१. भाववुड्डी तु अटी.)

किमित्येवमादिभूतो भावः प्रशस्यत इत्याह -

**अमए देहगए जह, अपरिणयम्मि वि सुहा उ भाव त्ति ।**
**तह मोक्खहेउ अमए, अण्णेहि वि हंदि निद्दिट्ठा ॥१०६॥ ३/१२**

**अमृते** शुभपुद्गलपरिणामरूपे, **देहगते** शरीरव्यापिनि **यथाऽपरिणते**ऽनिर्जीर्णशक्तिके जीर्णसामर्थ्यस्य स्वकार्याकरणात्, **शुभास्त्वेव भावा** भवन्ति देहसौष्ठवाऽऽरोग्यादयः । तथा **मोक्षहेतावमृते** शुभभावरूपे । **अन्यैरपि** [अन्यतीर्थिकैरपि] **हन्त** शुभा एव भावा **निर्दिष्टाः** ॥१२॥

भाववन्दनामधिकृत्यापुनर्बन्धक-सम्यग्दृष्टि-चारित्रिणां प्रयत्नविशेषो भवतीत्याह -

**मंताइविहाणम्मि वि, जायइ कल्लाणिणो तहिं जत्तो ।**
**एत्तोऽहिगभावाओ, भव्वस्स इमीए अहिगो त्ति ॥१०७॥ ३/१३**

**मन्त्रादिविधानेऽपि** च मन्त्रविद्यादिपूर्वोत्तरसेवाविषय अवन्ध्यफले, **जायते, कल्याणिनो** विशिष्टसिद्धिपुण्यवतः **तस्मिन्** मन्त्रादौ, **यत्नः** प्रयत्न आदरः । **अतो** मन्त्रादिविधानात्, **अधिकभावात्** प्रकृष्टव्यवसायाद्, **भव्यस्य** जीवस्य वन्दनायोग्यस्य वा, **अस्यां** वन्दनायाम् **अधिक इति** अधिकप्रयत्नो भवति ॥१३॥

किमित्यधिको भावो जायत इत्याह -

**एतीए परमसिद्धी, जायइ जं ता दढं तओ अहिगा ।**
**जत्तम्मि वि अहिगत्तं, भव्वस्सेयाणुसारेण ॥१०८॥ ३/१४**

एतया प्रस्तुतवन्दनया, **परमसिद्धिः** प्रधानसिद्धिरात्यन्तिकी मोक्षलक्षणा **जायते यद्** यस्मात्

तत् तस्माद् **दृढमत्यर्थम्, ततो** मन्त्रादेः **अधिका** प्रकर्षवती । **यत्नेऽपि चाधिक**त्वमाधिक्यं **भव्यस्यैतदनुसारेण** प्रधानफलसिद्ध्यनुसारेणाधिकभावानुसारेण वा ।।१४।।

वन्दनागतप्रयत्नफलमाह –

**पायं इमीए जत्ते, न होइ इहलोगिया वि हाणि त्ति ।**
**निरुवक्कमभावाओ, भावो वि हु तीए छेयकरो ।।१०९।। ३/१५**

**प्राया** बाहुल्येन, **अस्यां** वन्दनायां, **यत्ने** क्रियमाणे सति, वेलादिक्रमेण, **न भवति** न सञ्जायते **ऐहलौकिकापी**हलोकगतापि **हानिरिति** धनधान्यादिविषया, तथाविधादृष्टसामर्थ्यात् **निरुपक्रमभावा**न्निरुपक्रमत्वात् क्लिष्टकर्मणाम्, **भावोऽपि** हानेः पूर्वोक्तायाः, सद्भावोऽपि सत् [**हु** शब्दो वाक्यालङ्कारेऽवधारणे वा-अटी.] **तस्याः** हानेः **छेदकरः** पर्यन्तकरः, न पुनरन्यदा हानिर्भवतीत्यभिप्रायः । इदमुक्तं भवति-निरुपक्रमपूर्वकृतक्लिष्टकर्मवशात् यद्यपि कथञ्चिदैहलौकिकी हानिर्भवति, तथापि तदाशयोपात्त-पुण्यकर्म-सामर्थ्यादमुष्मिन् लोके न तथाविधा हानिः सम्पत्स्यते, पुण्यप्रतिबद्धशक्तित्वादिति ।।१५।।

इदमेव वस्तु तन्त्रान्तरपरिभाषया समर्थ्यमान आह –

**मोक्खद्धदुग्गगहणं, एयं तं सेसगाण वि पसिद्धं ।**
**भावेयव्वमिणं खलु, सम्मं ति कयं पसंगेणं ।।११०।। ३/१६**

**मोक्षाध्वनि** प्रवृत्तस्य पुंसः, **दुर्गग्रहणं** दुर्गाश्रयणम्, यथाऽध्वनि तस्करादिभिरभिभूयमानस्य पर्वतवनदुर्गादिसमाश्रयणं परित्राणहेतुः तत्कृतव्यसनेभ्यः, न ते दुर्गस्थं पराभवितुमलम्, अनेन साम्येन मोक्षाऽध्वदुर्गग्रहणं प्रस्तुतमुच्यते । **एतत्प्रस्तुतं** तद्भाववन्दनम्, स्वपरिभाषया, **शेषाणामपि** तन्त्रान्तरीयाणां **प्रसिद्धम् । भावयितव्यमिदं खलु** भावनीयम्, [१]आगमापनीतविपर्ययमलया प्रज्ञया, माध्यस्थमवलम्ब्य परोक्तमिति । मत्सरं विहाय **सम्यगित्य**विपरीतत्वाच्छोभनमेतदिति । **कृतं** पर्यासम् **प्रसङ्गेन** वचनविस्तरेण भूयसा, अल्पीयसा वाचा येनैतस्यैवार्थस्य प्रतिपत्तिक्षमत्वात् ।।१६।। (१. विपर्यय एव मल इति विपर्ययमलः, आगमेन अपनीतविपर्ययमल इति । आगमापनीतविपर्ययमलः ।)

तदेव द्रव्यभाववन्दनविधिं परिसमाप्य प्रस्तुतां मुद्राविन्यासशुद्धिमाह –

**पंचंगो पणिवाओ, थयपाढो होइ जोगमुद्दाए ।**
**वंदण जिणमुद्दाए, पणिहाणं मुत्तसुत्तीए ।।१११।। ३/१७**

**पञ्चाङ्गः प्रणिपातो** वक्ष्यमाणः, **स्तवपाठः** स्तोत्रपाठः, **भवति योगमुद्रया** वक्ष्यमाणयैव,

**वन्दन जिनमुद्रया** निर्दिष्टमाणया । **प्रणिधानं** चित्तैकाग्र्यम्, *"शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम"* इति [ ] वचनादिह पुनर्वाङ्मयं मनोमयं च विचित्ररूपम्, पुरुषयोग्यता-पेक्षया प्रमत्ताऽप्रमत्तमभिगृह्यते, तद् **मुक्ताशुक्त्या** विधेयमिति शेषः ॥१७॥

पञ्चाङ्गप्रणिपातं व्याचष्टे -

**दो जाणू दोण्णि करा, पंचमगं होइ उत्तमंगं तु ।**
**सम्मं संपणिवाओ, णेओ पंचंगपणिवाओ ॥११२॥ ३/१८**

**द्वे जानुनी, द्वौ करौ, पञ्चमकं भवत्युत्तमाङ्गं तु** शिरः । **सम्यक्** सुश्लिष्टतया, **सम्प्रणिपातो** निरवद्यप्रणामः **ज्ञेयः पञ्चाङ्गप्रणिपातः**, एभिः पञ्चभिरङ्गैरुपलक्षितत्वात् ॥१८॥

साम्प्रतं योगमुद्रामाह -

**अण्णोण्णन्तरिअंगुलि-कोसाकारेहिं दोहिं हत्थेहिं ।**
**पिट्टोवरि कोप्परसंठिएहि तह जोगमुद्द त्ति ॥११३॥ ३/१९**

**अन्योन्यान्तरिताङ्गुलिकोशाकाराभ्यां द्वाभ्यां हस्ताभ्यामुदरस्योपरि कोप्पर-संस्थिताभ्याम्** (**कूर्पराभ्यां** कुहणिकाभ्यां **संस्थितौ** व्यवस्थितौ । अटी.) । **तथा योगमुद्रेति**, योगो ध्यानं यथोक्तम् -

*आगमेनानुमानेन, योगाभ्यासरसेन च ।*
*त्रिधा प्रकल्पयन् प्रज्ञां, लभते तत्त्वमुत्तमम् ॥१॥ [ योगदृष्टिसमुच्चय गाथा-१०१ ]*

धर्मव्यापारो वा तद्विषया **मुद्रा** तथाविधव्यवधानाङ्गुलिरचनारूपा विज्ञेयेति शेषः ॥१९॥

अधुना जिनमुद्रामाह -

**चत्तारि अंगुलाइं, पुरओ ऊणाइं जत्थ पच्छिमओ ।**
**पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ॥११४॥ ३/२०**

**चत्वार्यङ्गुलानि** स्वकीयान्येव, **पुरतो**ऽग्रत **ऊनानि** किञ्चिन्न्यूनानि । **यत्र** यस्याम्, **पश्चिमतः पादयारन्तरे** पृष्ठतः, **उत्सर्गः** कायोत्सर्गः, एवंस्थितिका **एषा पुनर्भवति जिनमुद्रा** । य एवंविधः कायोत्सर्गः स एव जिनमुद्रा वर्तते ॥२०॥

साम्प्रतं मुक्ताशुक्ति[मुद्रा]मभिधित्सुराह -

**मुत्तासुत्ती मुद्दा, समा जहिं [1]होंति गब्भिया हत्था ।**
**ते पुण ललाडदेसे, लग्गा अण्णे अलग्ग त्ति ॥११५॥ ३/२१**

**मुक्ताशुक्तिर्मुद्रा समौ** प्रगुणौ, न वैषम्येन व्यवस्थितौ, **यत्र** यस्याम्, **भवतः** समवतिष्ठेते। **गर्भितौ** न सर्वथा नीरन्ध्रौ **हस्तौ** पाणी, **तौ पुनर्ललाटदेशे लग्नौ, अन्येत्वलग्नाविति** ॥२१॥
[१ दो वि-अटी.।]

प्रणिधानं मुक्ताशुक्त्येत्युक्तम्, तद्वन्दनायां यथाविषयमभिधातुमाह -

**सव्वत्थ वि पणिहाणं, तग्गयकिरियाभिहाणवण्णेसु ।**
**अत्थे विसए य तहा, दिट्ठंतो छिन्नजालाए ॥११६॥ ३/२२**

**सर्वत्रापि** सर्वेष्वेव, वन्दनास्वरूपाऽऽलम्बनेषु, **प्रणिधान**मैकाग्र्यं विधेयमिति शेषः। तद्गता चासौ क्रिया च, वन्दनक्रिया, अभिधानमभिव्याहार उच्चारणविशेषः। स चोदात्तादिवर्णधर्मो ग्राह्यः, वर्णाक्षराणि तद्गतान्येव, तेषु **तद्गतक्रियाभिधानवर्णेषु, अर्थे** वन्दनासूत्राभिधेय**विषये, च तथा,** प्रतिमादौ भावालम्बनभूते, कोऽत्र प्रणिधानकरणे साध्यार्थस्योपमाभूते दृष्टान्तः ? इत्याह-**दृष्टान्तः छिन्नज्वालया** यथा छिन्नज्वाला, उपरिष्टात् स्वक्षेत्रावगाह्य, दग्धाश्च ज्वालायां न सम्बद्धा, किन्तु स्वरूपक्षेत्रविभागप्रतिनियताऽप्रतिनियतकालवर्तिन्येव च, नोपरिष्टान्नाधस्तात् स्वकालात् प्रकाशते, एवमिदमपि प्रणिधानम्, स्वेष्वेव विषयभूतेषु क्रियादिषु प्रतिबद्धस्वभावम्, नान्यरूपादिविषयकषायस्वरूपसंस्पर्शितदन्यसङ्गविरहात् तस्यामेव चावस्थायां सम्भवतीति छिन्नज्वालो[ज्वालयो]पमीयते ॥२२॥

ननु किमेतस्मिन् प्रणिधाने सति परिपूर्णं भवति भाववन्दनं न वेत्येतदाशङ्क्याह -

**न य तत्थ वि तदणूणं, हंदि अभावो न ओवलंभो वि ।**
**चित्तस्स वि विण्णेओ, एवं सेसोवओगेसु ॥११७॥ ३/२३**

**न च** नैव **तत्राप्युपवर्णितप्रणिधानेऽपि, तद्** भाववन्दनम्, **अन्यूनं** सम्पूर्णेनोपयुक्तकरणमात्रेणैव भाववन्दनमिति यावत्। कुत इत्याह-**हन्तेति** प्रत्यवधारणे **अभावो** भावरहितः, सम्यक्त्वविकलो न च **नैवोपलम्भोऽप्यु**पयोगोऽपि **चित्तस्यापि** सम्बन्धी **विज्ञेयः,** उपयुक्तानुष्ठानस्यापि सम्यग्दर्शनविकलस्य द्रव्यानुष्ठानत्वात्, सम्यग्दृष्टेरेव हि भावानुष्ठानमिष्यत। न केवलमेष उपयोगप्रकारश्चैत्यवन्दनायामेवेति, सर्वत्रगं न्यायमुपदर्शयन्निदमाह-**एवं शेषोपयोगेषु**-अपि शब्दोऽत्राभिसम्बन्धनीयः, प्रागुक्तो द्रव्यावश्यकभावावश्यकमित्यादिषु समयोक्तव्यापारेषु सर्वेष्वेव नोपयोगमात्रेणैव भावानुष्ठानम्, किन्तु सम्यग्दृष्टेरुपयुक्तस्येत्यैदम्पर्यमवसेयम् ॥२३॥

सकृत् सञ्जातो भावो भावान्तरं करोति [११तमी गाथायां] इत्युक्तं प्राग् भावरहित उपयोगोऽप्यनुपयोग इति वा वेदितम्, तत्र किमर्थमयं भाव एव स्तूयत इत्याह –

**खाओवसमिगभावे, दढजत्तकयं सुहं अणुट्ठाणं ।**
**परिवडियं पि हु जायइ, पुणो वि तब्भाववुड्ढिकरं ॥११८॥ ३/२४**

**क्षायोपशमिकभावे** कर्मक्षयोपशमनिर्वृत्तपरिणामे, **दृढयत्नकृतं** बलवत्प्रयत्नसम्पादितम्, **शुभमनुष्ठानं** कुशलकर्तव्यं चैत्यवन्दनादि, **प्रतिपतितमपि** कथञ्चित्कर्मदोषाद्, [**हु** शब्दोऽवधारणार्थः, अटी.]भाव-क्रियाभ्यां **जायते** [एव]**पुनरपि** कालान्तरे, **तद्भाववृद्धिकरं** प्राक्समासेऽपि तत् क्षायोपशमिकवन्दनादिभावकरम्, अतो भावः प्रशस्यते ॥२४॥

उक्तमेवार्थं दृढयन्नाह –

**अणुहवसिद्धं एयं, पायं तहजोगभावियमईणं ।**
**सम्ममवधारियव्वं, बुहेहिं लोगुत्तममईए ॥११९॥ ३/२५**

**अनुभवसिद्धमेतत्** स्वसंवेदनसिद्धमेतत्, पूर्वोक्तं शुभानुष्ठानं पुनरपि जायत इति **प्रायो** बाहुल्येन **तथायोगभावितमतीनां** विशिष्टधर्मव्यापारवासितधियाम् **सम्यगवधारयितव्यं** सम्प्रधारणीयम् **बुधैर्विद्वद्भिः**, **लोकोत्तममत्या** संज्ञानगर्भया ॥२५॥

किं पुनरानन्तर्येण भाववन्दनाया लिङ्गमित्याह –

**जिण्णासा वि हु एत्थं, लिंगं एयाए हंदि सुद्धाए ।**
**निव्वाणंगनिमित्तं, सिद्धा एसा तयट्ठीणं ॥१२०॥ ३/२६**

**जिज्ञासाऽपि,** अपिशब्दात् केवलं वेलाविधान-तद्गतचित्तादिः, **अत्र** प्रक्रमे लिङ्गं चिह्नम् **एतस्या** वन्दनायाः, **हन्त शुद्धाया** भावरूपाया इति यावत्। यस्मान्निर्वाणाङ्गनिमित्तं मोक्षकारण-सम्यग्ज्ञानादिनिमित्तम्। **सिद्धा एषा** वन्दना, जिज्ञासा वा। **तदर्थिनां** वन्दनार्थिनां निर्वाणार्थिनां वा ॥२६॥

किमित्येवं जिज्ञासा शस्यते इत्याह –

**धिइसद्धासुहविविदिस-भेया जं पायसो उ जोणि त्ति ।**
**सण्णाणादुदयम्मी, पइट्ठिया जोगसत्थेसुं ॥१२१॥ ३/२७**

तत्र **धृतिः** स्वास्थ्यमुद्वेगादिचित्तदोषपरिहारेण निर्वृतिः । **श्रद्धा** तत्त्वरुचिः । **सुखा** विशिष्टाऽह्लादरूपा उत्साहशक्तिबीजम्। वेदितुमिच्छा **विविदिषा** जिज्ञासा। धृतिः श्रद्धा सुखा

विविदिषा भेदा यस्याः योनेः स तथा। यद् यस्मात्**प्रायशस्तु** योनिरिति धर्मयोनि**रिति**। "**धृतिः** ***श्रद्धा सुखा विविदिषा विज्ञप्तिरिति तत्त्व-धर्मयोनयः*** [ ] इति वचनात्। **सद्ज्ञानाद्युदये** सम्यग्ज्ञानाद्युत्पत्तौ, **प्रतिष्ठिता योगशास्त्रेषु** प्रसिद्धेष्वित्यर्थः ॥२७॥"

इयं च जिज्ञासा कदा भवतीत्याह -

**पढमकरणोवरि तहा, अणभिणिविट्ठाण संगया एसा ।**
**तिविहं च सिद्धमेयं, पयडं समए जओ भणियं ॥१२२॥ ३/२८**

**प्रथमकरणस्य** यथाप्रवृत्तकरणस्य **उपर्यु**परिष्टात्, **तथानभिनिविष्टाना**मभिनिवेशरहितानाम्, **सङ्गतैषा** युक्तरूपा, **त्रिविधं च सिद्धमेतत्** करणम्, **प्रकटं समये** सिद्धान्ते, **यतो भणित**मुक्तम् ॥२८॥

एतदेव त्रैविध्यमाह -

**करणं अहापवत्तं, अपुव्वमणियट्टि चेव भव्वाणं ।**
**इयरेसिं पढमं चिय, भण्णइ करणं ति परिणामो ॥१२३॥ ३/२९**

**करण**मध्यवसायरूपम्, **यथाप्रवृत्तं** स्वाभाविकमनादिसंसारव्यवहारप्रवृत्तमभिन्नग्रन्थेरिहापूर्व-करणादधस्तात् सकलमेव गृह्यते। **अपूर्वमि**त्यपूर्वकरणम्, यद्बलेन ग्रन्थिं भिनत्ति। **अनिवर्त्ये**-तच्च सम्यक्त्वप्राप्तेर्ननिवर्तत इत्यनिवर्ति। एतच्च सम्यक्त्वोत्पत्तेरधस्ताद्, यतोऽनिवृत्तिकरणं **शिरसि** सम्यक्त्वमवाप्नोति एतत्करणत्रयं, **भव्यानां** भाविनी सिद्धिरेषामिति, भव्यसिद्धय इति वक्तव्ये सिद्धिपदलोपाद् भव्या इत्युक्तम्, योग्यानां वा, **इतरेषामभव्यानाम्**, **प्रथममेव यथाप्रवृत्तमेव भण्यत** अभिधीयते। **करणमि**त्यनेन शब्देन **परिणामा** जीवाध्यवसायः, सत्त्वाध्यवसायस्थानान्येतानीत्युक्तं भवति ॥२९॥

एषामेव विभागं प्रदर्शयन्नाह -

**जा गंठी ता पढमं, गंठिं समइच्छओ भवे बितियं ।**
**अणियट्टीकरणं पुण, सम्मत्तपुरक्खडे जीवे ॥१२४॥ ३/३०**

**यावद्ग्रन्थि**र्ग्रन्थिभेदस्थानम्, **तावत्** प्राक्कालभावि। **प्रथम**मिति, यथाप्रवृत्तम्, **ग्रन्थि**घन-रागद्वेषपरिणामलक्षणम्, **समतीच्छतः** समतिक्रामतो भिन्दानस्येत्यर्थः। **भवेद् द्वितीय**मपूर्वकरणम्, **अनिवृत्तिकरणं पुनः** प्रागुक्तं समयोक्तस्वरूपं वा **पुरस्कृतसम्यक्त्वे** प्राक्कृते, पूर्वाऽपरनिपातो-ऽतन्त्रमितिकृत्वोक्तम्, सम्यक्त्वपुरस्कृते **जीव** आत्मनि भवेदिति, यत एवं करणत्रयमुपवर्तितम् ॥३०॥

**इत्तो उ विभागाओ, अणादिभवदव्वलिंगओ चेव ।**
**निउणं निरूवियव्वा, एसा जह मोक्खहेउ त्ति ॥१२५॥ ३/३१**

**अतस्तु** [इतस्तु अटी.] **विभागाद**भिन्नग्रन्थेर्भाववन्दना[या] असम्भवादित्याकूतम् **अनादिभवद्रव्यलिङ्गतश्चैवा**नादौ संसारेऽनेकशो द्रव्यलिङ्गावाप्तेः, तत्र च प्रायशः सकलक्रियानुष्ठानात् तदन्तर्गतत्वाच्च, वन्दनाया न प्रागसम्भव इति हृदयम्, **निपुणं** सूक्ष्मबुद्ध्या, **निरूपयितव्या**लोचनीया, **एषा** वन्दना, **यथा मोक्षहेतु**रिति येन प्रकारेण मोक्षकारणत्वेन व्यवस्थिता ॥३१॥

किमित्येवं निरूपणीया यत आह -

**नो भावओ इमीए, परो वि हु अवड्ढपोग्गला अहिगो ।**
**संसारो जीवाणं, हंदि पसिद्धं जिणमयम्मि ॥१२६॥ ३/३२**

**नो** नैव **भावता** भावमाश्रित्य **अस्यां** भाववन्दनायां सत्याम्, **परोऽपि** उत्कृष्टोऽपि, हुर्वाक्यालङ्कारे, **अपार्धपुद्गला**दित्यपार्धपुद्गलपरिवर्तात्, समयप्रसिद्धात्, **अधिको**ऽभ्यधिको दीर्घतर इत्यर्थः । **संसारो जीवाना** प्रतिपतितसम्यग्दर्शनानामपि, संसारे विपरिवर्तमानानामपि । **हन्त** (उपप्रदर्शने अटी.) **प्रसिद्धं जिनमते**, अतो नैषा प्रदीर्घसंसारस्य सम्भवति ॥३२॥

अन्यथैषा कार्यकारिणीत्याह -

**इय तंतजुत्तिओ खलु, निरूवियव्वा बुहेहिं एस त्ति ।**
**न हु सत्तामेत्तेणं, इमीए इह होति निव्वाणं ॥१२७॥ ३/३३**

**इति तन्त्रयुक्तितः खल्वा**गमन्यायादेव, **निरूपयितव्या बुधैरेषेति** जिज्ञासनीयैषा वन्दना, **न हु** नैव **सत्तामात्रेण यस्याः**कस्याश्चिन्निर्बीजाया इतिभावोऽस्या वन्दनायाः, **इह** प्रक्रमे, **भवति निर्वाणं** नैव भवतीत्यर्थः । तस्माद्विशिष्टैव परिमितसंसारस्य निर्वाणाङ्गम् ॥३३॥

इहैवाभ्युच्चयमाह -

**किंचेह छेयकूडग-रुवगनायं भणंति समयविऊ ।**
**तंतेसु चित्तभेयं, तं पि हु परिभावणीयं ति ॥१२८॥ ३/३४**

**किञ्चेह** वन्दनायाम्, **छेको** व्यवहारयोग्यः स्वकार्यकारी, **कूटक**स्तद्विपरीतः, स चासौ **रूपकश्च** तद् **ज्ञात** तदुदाहरणम् **भणन्ति** प्रतिपादयन्ति, **समयविदः** सिद्धान्तवेदिनः, **तन्त्रेष्वा**गमेषु **चित्रभेदं** नानाप्रकारम्, **तदपि** ज्ञातम् । हुर्वाक्यालङ्कारे [भिन्नक्रमश्चेति-अटी.] । **परिभावनीयमिति**

स्वरूपेण युक्तरूपत्वात् ॥३४॥

एतदेव व्यनक्ति -

**दव्वेणं टंकेण य, जुत्तो छेओ हु रूवगो होइ ।**
**टंकविहूणो दव्वे वि न खलु एगंतछेओ त्ति ॥१२९॥ ३/३५**

**द्रव्येण** रूप्यसुवर्णादिना, **टङ्केन च** लक्षणेन च रेखाविन्यासरूपेण **युक्तः** समन्वितः **छेक** एव **रूपका भवति** । हुरेवकारार्थः **टङ्कविहीनो** लक्षणविहीनो, **द्रव्येऽपि** रूपादौ सत्यपि, **न खल्वैकान्तश्छेक इति** नैव व्यवहारावतारी ॥३५॥

**अद्दव्वे टंकेण वि, कूडो तेण वि विणा उ मुद्द त्ति ।**
**फलमेत्तो [१]एवं चिय, मुद्धाण पयारणं मुत्तुं ॥१३०॥ ३/३६**

**अद्रव्ये** द्रव्याभावे, **टङ्केनापि** लाञ्छनेनापि कूटः-असत्यः, तृतीयभङ्गपतितः **तेनापि विना** टङ्केन च द्रव्येण च विप्रयुक्तो, **मुद्रेति** चिह्नप्रायः, **फलं** साध्यम्, **अतो** वन्दनायाः, **एवमेव**, भङ्गानुपूर्व्यैव उभयसम्पन्नः सम्पूर्णफलमितरथा विकलम्। **मुग्धानामज्ञानानाम्, प्रतारणं** (वञ्चनम्- अटी.) **मुक्त्वा**, ते ह्यन्यथा प्रतार्यन्त एव ॥३६॥ १ एयं चिय अटी. ।

**तं पुण अणत्थफलयं, नेहाहिगयं जमणुवओगि त्ति ।**
**आयगयं चिय एत्थं, चिंतिज्जइ समयपरिसुद्धं ॥१३१॥ ३/३७**

**तत्पुनर्वन्दनम् अनर्थफलदं** स्वपरयोः **नेहाधिकृतं** नात्र प्रस्तुतम्, **यदनुपयोगीति** यस्मात्, तन्नोपयुज्यते। परमार्थविचारे, **आत्मगतमेवात्र चिन्त्यते** वन्दनम्, **समयपरिशुद्धमा**गमविशुद्धम् न तु परेषामन्यथाकरणे परिवादः करणीय इति तात्पर्यम् ॥३७॥

एवं छेक-कूटकरूपकज्ञातं वन्दनायां योजयति -

**भावेणं वण्णादिहिं, चेव सुद्धेहिं वंदणा छेया ।**
**मोक्खफल च्चिय एसा, जहोइयगुणा य नियमेणं ॥१३२॥ ३/३८**

**भावेन** सम्यक्त्वेनोपयोगेन च, **वर्णादिभिश्चैवा**ऽक्षराऽभिव्याहाराऽर्थैः **शुद्धैः** अविपरीतै-रुपलक्षिता **वन्दना छेका** शुद्धा प्रशतेत्यर्थः । **मोक्षफलैवैषा** न संसारफला भावक्रियागर्भा, **यथोदितगुणा च** शास्त्रप्रतिपादितगुणाव्यभिचारिणी च, **नियमेन** नियोगेन, शास्त्रे गुणा विघ्नोपशमादयो वन्दनाया उच्यन्ते, तस्याः सम्भवन्तीति भावः ॥३८॥

**भावेणं वण्णादिहिं, तहा उ जा होइ अपरिसुद्ध त्ति ।**
**बीयगरूवसमा खलु, एसा वि सुह त्ति निद्दिट्ठा ॥१३३॥ ३/३९**

**भावेन** याऽयुक्ता **वर्णादिभिस्तथा तु, या** वन्दना, **भवत्यपरिशुद्धा इत्यसम्पूर्णा** विकृता[सदोषा अटी.]इति यावत्। **द्वितीयकरूपकसमा खलु** द्वितीयभङ्गपतितरूपकतुल्यैव। **एषाऽपि शुभेति निर्दिष्टा,** भावगर्भत्वादस्या: ॥३९॥

**भावविहूणा वण्णाइएहिं सुद्धा वि कूडरूवसमा ।**
**उभयविहूणा णेया, मुद्दप्पाया अणिट्ठफला ॥१३४॥ ३/४०**

**भावविहीना** भावरहिता, **वर्णादिभिर्वर्णादिकै:** प्रकारै:, **शुद्धापि** दोषरहितापि **कूटरूपसमा** कूटरूपतुल्या **उभयविहीना** चतुर्थभङ्गपतिता, **ज्ञेया मुद्राप्राया** न स्वकार्यकारिणी **अनिष्टफले-** ष्टफलरहिता ॥४०॥

एषा च मुद्रा प्राय: केषां भवतीत्याह -

**होइ य पाएणेसा, किलिट्ठसत्ताण मंदबुद्धीणं ।**
**पाएण दुग्गइफला, विसेसओ दुस्समाए उ ॥१३५॥ ३/४१**

**भवति च प्रायेणैषा** वन्दना **क्लिष्टसत्त्वानां** बहुक्लेशजीवानां **मन्दबुद्धीना** जडधियां **प्रायेण** बाहुल्येन **दुर्गतिफला** विशिष्टफलरहितत्वाद् **विशेषता** विशेषेण **दु:षमायां** तु कालदोषात् ॥४१॥

**अण्णे उ लोगिग च्चिय, एसा नामेण वंदणा जइणी ।**
**जं तीइ फलं तं चिय, इमीए न उ अहिगयं किंचि ॥१३६॥ ३/४२**

**अन्ये तु** अन्ये पुनरेवं मन्यन्ते **लौकिक्येवैषो**भयविकला वन्दना, **नाम्ना तु वन्दना जैनी** अक्षर-क्रियासाम्यात् [**यदिति**-यदेव-अटी.] **तस्या: फलं** लौकिकवन्दनायास्त**देवास्या** जैन्या:, [१]**न त्वधिकृतं किञ्चित्** शास्त्रोक्तमभ्युदयमोक्षरूपम्, सामान्येन लौकिकवन्दनायामपि किञ्चित् फलमिष्यत एव, तेन तत्समानत्वनिर्देशात् तदभ्यनुज्ञायते न त्वपरमितिगर्भ: ॥४२॥

[१. **न त्** न पुनरधिकृतं प्रस्तुतं जिनवन्दनोचितं मोक्षादि, अथवाऽधिकमर्गलतरं लौकिकवन्दनापेक्षयेति अटी.]

एवं तावदन्यदीयमतमधिकृत्योक्तमेतदपि कथञ्चिद् युज्यत एवेत्युपदर्शयन्नाह -

**एयं पि जुज्जइ च्चिय, तदणारंभाउ तप्फलं व जओ ।**
**तप्पच्चवायभावो वि, हंदि तत्तो न जुत्त त्ति ॥१३७॥ ३/४३**

**एतदपि** लौकिकत्वं युज्यत **एव** वन्दनायाः **तदनारम्भात्** तस्या जैनवन्दनाया अनारम्भादप्रस्तुतत्वात् **तत्फलमिव** स्वर्गसम्पत्ति-क्षुद्रोपद्रवहान्यादिफलमिवाराधनाजन्यं **यतो** यस्मात् **तत्प्रत्यपायभावोऽपि** विराधनाजन्य उन्मादादिभावोऽपि **हन्त ततो** वन्दनाया **न युक्त इति** न युक्तरूपः । इदमत्र हृदयम्-यदि जैनवन्दना प्रारब्धा भवेत् ततस्तत्फलमिष्टानिष्टरूपमाराधन-विराधनजन्यं भवेद्, न च लौकिकवन्दनायां तदस्ति ततो लौकिक्येवैषा, यतः सम्यग्दृष्टेर्वितथक्रियायां प्रत्यपायसम्भवो, न त्वस्यां, तेन न जैनीति ॥४३॥

अत्रैव युक्तिमाह -

**जमुभयजणणसहावा, एसा विहिणेयरेहिं न उ अण्णा ।**
**ता एयस्साभावे, इमीएँ एवं कहं बीयं ॥१३८॥ ३/४४**

**यद्** यस्मात् **उभयजननस्वभावैषा** सामग्रीभेदेनेष्टानिष्टफलजननस्वभावा जैनी वन्दना वर्त्तते। **विधिना** शास्त्रोक्तेन क्रियमाणा **इतरैश्चा**विधिभिरनेकप्रकारैर्**नत्वन्या** लौकिकी तथा ज्ञेया, प्रत्यवाययोर्हेतुः, परमार्थेन मिथ्यादृष्टिर्वन्दनायां स्वरूपस्यैवानारम्भात्, **तत्** तस्माद् **एतस्य** द्विविधस्यापि फलस्य **अभावेऽस्या** जैनवन्दनाऽवन्दनाविपरीतायाम् **एवमुक्तनीत्या कथं बीजम्** ॥४४॥

**तम्हा उ तदाभासा, अण्णा एस त्ति नायओ णेया ।**
**मोसाभासाणुगया, तदत्थभावानिओगेणं ॥१३९॥ ३/४५**

**तस्मात्पूर्वोक्ताद्धेतोः**, [तुशब्दोऽवधारणे-अटी.] **तदाभासा** तत्प्रतिच्छाया सैव जैनवन्दनेवाभासत इति तत्सदृशी । **अन्या** ततो भिन्ना **एषेति** लौकिक्येव **न्यायतो ज्ञेया** । **मृषाभाषानुगता** [1]**तदर्थभावानियोगेन** नियमेन ॥४५॥

[१. कथमित्याह-**तदर्थे** वन्दनाभिधेयवस्तुनि, भावस्य सच्छ्रद्धानाद्यध्यवसायस्य, अनियोगोऽव्यापारः, तेन, अटी.]

सम्यग् वन्दनायाः [अभव्यानाम् अटी.] दुर्लभताप्रतिपादनायाह -

**सुहफलजणणसहावा, चिंतामणिमाइए वि नाभव्वा ।**
**पावंति किं पुणेयं, परमं परमपयबीयं ति ॥१४०॥ ३/४६**

**शुभफलजननस्वभावान्** शुभकार्योत्पादनप्रकृतीन् **चिन्तामण्यादिकानपि** आदिशब्दात् कल्पद्रुम-कामधेन्वादिपरिग्रहः, वस्तुविशेषान् नाभव्यास्तत्प्राप्त्योरपि **प्राप्नुवन्ति** लभन्ते, **किं पुनरिमां** भाववन्दनां **परमां** प्रधानां **परमपदबीजमिति** मोक्षहेतुभूताम्, तस्माद्भव्या एवेमाम् [भाववन्दनां] प्राप्नुवन्ति । ॥४६॥ (अभव्यास्तावदिमां न प्राप्नुवन्ति, भव्या अपि न सर्व एवेति दर्शयन्नाह - अटी.)

अत्रैव विशेषाभिधानमाह -

**भव्वा वि एत्थ णेया, जे आसन्ना न जातिमेत्तेणं ।**
**जमणाइ सुए भणियं, एयं न उ इट्ठफलजणगं ॥१४१॥ ३/४७**

**भव्या अप्यत्र ज्ञेया ये आसन्नाः** मुक्तेरिति गम्यते, **न जातिमात्रेण** भव्यत्वेनैव **यदनादि, श्रुते** सिद्धान्ते **भणितमुक्तम् एतद्** भव्यत्वं [जातिभव्यत्वम्] **न त्विष्टफलजनकम्** । सर्वभव्यानां मुक्त्यनवाप्तेः सामग्रीवैकल्याद् । योग्यतामात्रभव्यत्वाभ्युपगमात् केषाञ्चिदेव सिद्ध्यताम् तदिष्टफलजनकम् । सेत्स्यतां तु सामान्येनैव भव्यत्वम्, *'सेत्स्यन् भव्यः'* इति [ ] वचनात् । तल्लक्षणं चेदं सिद्धेरात्यन्तिक्याः शुद्धानां परमनिर्वृतेर्यस्मात् तदभिज्ञातभव्यस्योक्तं भगवद्भिरर्हद्भिः ॥४७॥

तस्मादासन्नभव्या एवात्र ग्राह्या इत्याह -

**विहिअपओसो जेसिं, आसन्ना ते वि सुद्धिपत्त त्ति ।**
**खुद्दमिगाणं पुण सुद्धदेसणा सिंहनादसमा ॥१४२॥ ३/४८**

**विधावप्रद्वेषो येषामासन्नास्तेऽपि शुद्धिप्राप्ता इति** कृत्वा विधिकरणेऽपि क्षयोपशमविशेषाद्विध्यप्रद्वेषवतो विशुद्धिप्राप्तत्वादासन्ना इह गृह्यन्ते । **क्षुद्रमृगाणां** कृपणभीरूणां **पुनः शुद्धदेशना** विधिदेशना क्रियमाणा, **सिंहनादसमा** सिंहध्वनितुल्या सन्त्रासहेतुत्वाद् । यथोक्तं- *शुद्धदेशना हि क्षुद्रसत्त्वमृगयूथसन्त्रासनसिंहनादः* ॥४८॥

तस्मात्तेषां तदुपकारिण्येव देशना युक्ता, मार्गावतारभावेन तद्धितोपपत्तेरिति प्रज्ञापकोपदेशमाह -

**आलोचिऊण एवं, तंतं पुव्वावरेण सूरीहिं ।**
**विहिजत्तो कायव्वो, मुद्धाण हियट्ठया सम्मं ॥१४३॥ ३/४९**

**आलोच्यैवम्**, तन्यन्ते विस्तार्यन्तेऽर्था अनेनेति **तन्त्रं** सूत्रम् । **पूर्वापरेण** पूर्वापरप्रकाराभ्यामविरोधेनेत्यर्थः । **सूरिभिराचार्यैः विधियत्नः कर्त्तव्यो** विधातव्योऽभिधेयः, **मुग्धानामज्ञानानां**

**हितार्थं** हितसम्पादनार्थं **सम्यग**वैपरीत्येन ॥४९॥

किमिति विधियत्न उपदिश्यते ? इत्याह –

**तिव्वगिलाणाईणं, भेसजदाणाइयाइं नायाइँ ।**
**दट्ठव्वाइँ इहं खलु, कुग्गहविरहेण धीरेहिं ॥१४४॥ ३/५०**

**तीव्रग्लानादीनामा**दिशब्दान्मध्यम-जघन्यपरिग्रहः, **भेषजदानादिकान्या**दिशब्दादौषध-निवाताश्रय-परिश्रमपरिहारादिपरिग्रहः, **ज्ञातान्यु**दाहरणानि **द्रष्टव्यानीह** वन्दनाप्रस्ताव । **खलु**शब्दोऽवधारणे भिन्नक्रमश्च, द्रव्यान्येवेत्यत्र योज्यः तद्दर्शनपूर्वकत्वाद् विधियत्नस्य, यो हि पुरुषविशेषात् सम्यगवगच्छति, स तद्धिताय यतते । एवं वन्दनायामपि योग्यविशेषाश्रयो [विशिष्टो योग्यः इति योग्यविशेषः आसन्नभव्यः, तस्याश्रयो यस्मिन् सः] यत्न आस्थेयः **कुग्रहविरहेण** कुत्सितग्रहपरित्यागैः [अशास्त्रीयाभिनिवेशत्यागेन अटी.] **धीरैः** स्थिरैर्विद्वद्भिरिति ॥५०॥

**॥ चैत्यवन्दनविधि-पञ्चाशकं तृतीयं समाप्तम् ॥**

## ॥ चतुर्थं पूजाविधि-पञ्चाशकम् ॥

वन्दनार्हस्य तत्प्रवृत्तस्य च पूजा युक्तेति पूजाविधिप्रकरणमाह –

**नमिऊण महावीरं, जिणपूजाए विहिं पवक्खामि ।**
**संखेवओ महत्थं, गुरुवएसाणुसारेण ॥१४५॥ ४/१**

**नत्वा** प्रणम्य **महावीरमा**गमप्रसिद्धनामानम्, सदेवमनुष्यासुरलोके स्तूयते श्रमणो भगवान् महावीर इति [श्री कल्पसूत्र] वचनात् सर्वदेवकृताह्वयम् (सर्वेषां देवानां देवः इन्द्रः-तेन) । **जिनपूजायाः** चैत्यपूजाया **विधिं** विधानं **प्रवक्ष्याम्य**भिधास्ये । **सङ्क्षेपतः** सङ्क्षेपेण, **महार्थं** महानर्थः प्रयोजनं यस्य तम्, **गुरूपदेशानुसारेणा**चार्योपदेशानुगमेन । महोपकारकत्वं च पूजायाः प्रतिपादितमेव यथोक्तं "धर्मशास्त्रविधेये [धर्मस्य शास्त्रोक्तं विधेयं-तस्मिन्] तीर्थकरातिशयानामुपलब्धे[१]र्मोक्षमार्गदीप्तेश्च[२] सर्वगुणकामसिद्धे[३]र्मनःप्रसादात्[४] समाधेश्च[५] अभ्यासगुणविशेषाच्छि[६]ष्यहितत्वात्[७] स्मृतेरुपस्थानात्[८] देवानां सांनिध्यादा[९]स्थाभ्युत्पादकत्वाच्च[१०] आयव्ययगुणवृद्धेः[११] शुभपुण्य-फलानुबन्ध्युपचयाच्च[१२] कर्मक्षयोपपत्ते[१३]राशु पुनर्बोधिलाभाय[१४] पूजा भगवदर्हतां कर्तव्या सर्वलोक-पूज्यानां दुःखार्णवोत्तितीर्षुभिरत्यन्तैकान्तहितकामैः," इति ॥१॥

किमिति विधिरुच्यत इत्याह –

**विहिणा उ कीरमाणा, सव्व च्चिय फलवती हवति चेट्ठा ।**
**इहलोइया वि किं पुण, जिणपूया उभयलोगहिया ॥१४६॥ ४/२**

**विधिना तु** विधिनैवोपायेनैव **क्रियमाणा** विधीयमाना **सर्वैव फलवती** फलसम्पन्ना **भवति चेष्टा** राजसेवा कृष्यादिका **ऐहलौकिक्यपि**प्येहभाविक्यपि । **किं पुनर्जिनपूजा ?** भगवत्पूजा **उभयलोकहितो**भयलोक[फल]सम्पादकत्वेन ॥२॥

विधिमेवाह –

**काले सुइभूएणं, विसिट्ठपुप्फाइएहिं विहिणा उ ।**
**सारथुइथोत्तगरुई, जिणपूजा होइ कायव्वा ॥१४७॥ ४/३**

**काले** वक्ष्यमाणे, **शुचिभूतेना**धिकारिणा पुरुषेण **विशिष्टपुष्पादिकै**र्योग्यपुष्पवस्त्रादिभिः **विधिना त** शास्त्रोक्तेन प्रकारेण, **सारस्तुति-स्तोत्रगुर्वी** । स्तुति-स्तोत्रयोः पृथगुपादानं रूढ्या

[स्तुतिश्चैकश्लोकप्रमाणा, स्तोत्रं तु बहुश्लोकमानम् - अटी.] तत्कृतगौरवविशेषयुक्त्या, तेभ्यः बहुमानविशेषसम्भवात् **जिनपूजा भवति कर्तव्या** ॥३॥

एनामेव गाथां लेशतः प्रतिपदं व्याचष्टे -

**कालम्मि कीरमाणं, किसिकम्मं बहुफलं जहा होइ ।**
**इय सव्व च्चिय किरिया, नियनियकालम्मि विण्णेया ॥१४८॥ ४/४**

**काले** स्वोचिते प्रस्तावे, **क्रियमाणं कृषिकर्म** लोकप्रसिद्धं **बहुफलं** बहुशस्यं **यथा भवति** यथा सम्पद्यते **इत्येवं सर्वैव क्रिया** चेष्टा **निज निजकाले** यथा स्वसमये **विज्ञेया** फलवती ॥४॥

**सो पुण इह विण्णेओ, संझाओ तिण्णि ताव ओहेण ।**
**वित्तिकिरियाऽविरुद्धो, अहवा जो जस्स जावइओ ॥१४९॥ ४/५**

**स** कालः **पुनरिह** पूजायां **विज्ञेयो** ज्ञातव्यः । **सन्ध्यातिस्त्रस्तावदोघेन** सामान्येन सन्ध्यात्रयोपलक्षितत्वात् **वृत्ति**र्वर्तनोपायः शिल्पवाणिज्यादि **तत्क्रियाया अविरुद्धो**ऽबाधको **अथवा यो यस्य** पूजाकारिणः पुरुषस्य **यावान्** यत्परिणामः ॥५॥

ननु किं वृत्तिक्रियाऽविरुद्धः पूजायाः कालः प्रशस्यत इत्याह -

**पुरिसेणं बुद्धिमया, सुहवुड्ढिं भावओ गणंतेणं ।**
**जत्तेणं होयव्वं, सुहाणुबंधप्पहाणेण ॥१५०॥ ४/६**

**पुरुषेण बुद्धिमता** बुद्धिसम्पन्नेन, **शुभवृद्धिं** पुण्योपचयं **भावतः** परमार्थतः **गणयता** सतात्मनः कलयता, **यत्नेन** सर्वादरेण **भवितव्यम्, शुभानुबन्धप्रधानेन** कुशलानुबन्धपरेण यथा पुण्यसन्तानः प्रादुर्भवति तथा यत्नो विधेयः स च वृत्तिक्रियाऽविरुद्धसमयः पूजासेवनेनेति भावः ॥६॥

व्यतिरेकदोषमाह -

**वित्तीवोच्छेयम्मि य, गिहिणो सीयंति सव्वकिरियाओ ।**
**निरवेक्खस्स उ जुत्तो, संपुण्णो संजमो चेव ॥१५१॥ ४/७**

**वृत्तिव्यवच्छेदे च** जीवनोपायव्यवच्छित्तौ च **गृहिणो** गृहस्थस्य **सीदन्ति** न प्रवर्तन्ते, **सर्वक्रिया** धर्मलोकव्यवहारगताः, **निरपेक्षस्य तु** सर्वक्रियास्विति गम्यते । **युक्त** उपपन्नः सङ्गतः । **सम्पूर्णः संयम एव** साधुधर्म एव साधुवदन्यथा सर्वथा निरपेक्षत्वासिद्धेः ॥७॥

**तासिं अविरोहेणं, आभिग्गहिओ इहं मतो कालो ।**
**तत्थावोच्छिन्नो जं, निच्चं तक्करणभावो त्ति ॥१५२॥ ४/८**

**तासां** सर्वक्रियाणाम्, **अविरोधेनाबाधया, अ[ आ ]भिग्रहिको** ऽभिग्रहविषयीकृतः प्रतिनियत इत्यर्थः। **इह** प्रक्रमे **मतो**ऽभिप्रेतः **काल** अवसरः **तत्रे**ति सामान्येनैव वस्तुनि, कालविवक्षायां तु तदा **अव्यवच्छिन्नो**ऽनुबन्धवान्, निरन्तरसेवनप्रवृत्तौ **यद्** यस्मात् **नित्यं** सदा **तत्करणभाव इति** पूजानिर्वर्तनाव्यवसायः ॥८॥

शुचिभूते[४-३ गाथायाम्]त्युक्तं तद्विवृणोति –

**तत्थ सुइणा दुहा वि हु, दव्वे ण्हाएण सुद्धवत्थेण ।**
**भावे उ अवत्थोचिय-विसुद्धवित्तिप्पहाणेण ॥१५३॥ ४/९**

**तत्र शुचिना** शौचयुक्तेन **द्विधापि हु** (हुशब्दः समुच्चये-अटी) द्रव्यतो भावतश्च । **द्रव्ये स्नातेन** देश-सर्वस्नानाभ्याम् । देशस्नानं कर-चरणप्रभृत्यवयवप्रक्षालनम् । सर्वस्नानं तु सर्वावयवशौचका[क]रणम्, ताभ्यां स्नातेन, **शुद्धवस्त्रेण** शुचिनिवसनेन सितवस्त्रेण वा। **भावे** तु भावे [शौचे] पुनः **अवस्थोचितविशुद्धवृत्तिप्रधानेना**वस्थायाः देशकालपुरुषगताया उचिता योग्या, सा चासौ विशुद्धि[द्धा]वृत्तिश्च तत्प्रधानेन तदादरवता, जिनपूजा भवति कर्त्तव्येति वर्तते ॥९॥

ननु स्नानादि जीवनिकायवधसम्भवाद् दुष्टमित्याशङ्क्याह –

**ण्हाणाइ वि जयणाए, आरंभवओ गुणाय नियमेणं ।**
**सुहभावहेउओ खलु, विण्णेयं कूपणाएणं ॥१५४॥ ४/१०**

**स्नानाद्यपि यतनया** त्रसजीवरक्षारूपया। यतनावद्भिः [१]सामयिकः। **आरम्भवता** धन-स्वजनदेहगेहादिनिमित्तमारम्भप्रवृत्तस्य **गुणायो**पकाराय **नियमेन शुभभावहेतुतः खलु** शुभभावहेतुत्वादेव **विज्ञेयम्। कूपज्ञातेन** कूपोदाहरणेन । स्वसंवेदनसिद्धश्चायं स्नानादिपूर्वकं पूजाप्रवृत्तस्य शुभभावो विशिष्टलोकसिद्धोऽपि च वर्त्तते। तेनाविप्रतिपत्तिविषयः। कूपोदाहरणं तु समयप्रसिद्धम्। यथा कूपे खन्यमाने यद्यपि तृट्-परिश्रम-देहमालिन्यानि भवन्ति, तथापि तत्समुत्थेन सलिलेन तानि सर्वाण्यपनीयन्ते । एवं स्नानादौ यद्यपि कथञ्चित् प्राक्प्रवृत्तारम्भसम्भवस्तथापि तत्समुत्थेन भावेन पूजाविशोधिताशयस्य बहुतरकर्मक्षयोपपत्तेर्महान् गुण इति कूपखननवत् स्नानादि न्याय्यम् ॥१०॥ (१. सामयिकः-समयःशास्त्रम्, शास्त्रानुसारेण इति सामयिकः।)

यतनया स्नानादिगुणायेत्युक्तम्, ४-३ गाथायाम् तामेवाह -

**भूमीपेहणजलछाणणाइ जयणा उ होइ ण्हाणाओ ।**
**एत्तो विसुद्धभावो, अणुहवसिद्धो च्चिय बुहाणं ॥१५५॥ ४/११**

**भूमिप्रेक्षणजलशोधनादिर्यतना तु भवति** । तत्र भूमिप्रेक्षणं कीटिकानगरपरिहारेण, जलशोधनं पूतरकादिपरिहारेण, आदिशब्दादागन्तुकसत्त्वासङ्कीर्णताग्रहः । **स्नानादौ**[१] स्नानविलेपन-पुष्पमालादौ तद्योनिजाऽऽगन्तुकसत्त्वपरिहारेण **अतो** यतनातो **विशुद्धभावो** विशुद्धाध्यवसायः पूजाविषय एव **अनुभवसिद्ध एव बुधानां** स्वसंवेदनप्रत्यक्षसिद्ध एव विदुषाम् [१. इह च प्राकृते औकारश्रुतेरभावात् ण्हाणाओ इत्येवं पठ्यते - अटी.] ॥११॥

व्यतिरेके दोषमाह -

**अन्नत्थारंभवओ, धम्मेऽणारंभओ अणाभोगो ।**
**लोए पवयणखिंसा, अबोहिबीयं ति [१]दोसाय ॥१५६॥ ४/१२**

**अन्यत्र** स्वगृहव्यापारेषु **आरम्भवतः** तत्प्रवृत्तस्य **धर्मेऽनारम्भतो** [अनारम्भकः-अटी.] अनारम्भाद्धर्मविषयारम्भपरिहारात्, **अनाभोगो**ऽज्ञानबहुलत्वं शास्त्रोक्तस्याप्यारम्भस्य परिहारात् पूजाविषयं ह्यारम्भमागमोक्तत्वात् करोति, न स्वेच्छया, तमपि परिहारतो अज्ञानमनाभोगो वर्त्तत । **लोके प्रवचनखिंसा अबोधिबीजमिति दोषाय** [दोसा य '[दोषाश्च] च शब्दोऽनाभोगापेक्षया समुच्चयार्थः - अटी.] सर्वो विशिष्टलोकः शरीरशौचपूर्वकं देवपूजादौ वर्त्तते । तद्व्यवहारान्यथा-करणे लोके निन्दा प्रवचनस्य सा चाबोधिबीजम्, स्नानादिपरिहारेण पूजाप्रवृत्तस्येति दोषाय सम्पद्यत । तस्मात्तद्दोषपरिहारार्थं द्रव्यतः शुचिना पूजा विधेया । भावे विशुद्धवृत्तिना पूजा विधेयेति ॥१२॥ (१. दोसा य अटी. ।)

तद्विपक्षव्यवच्छेदायाह -

**अविसुद्धा वि हु वित्ती, एवं चिय होइ अहिगदोसा उ ।**
**तम्हा दुहा वि सुइणा, जिणपूया होइ कायव्वा ॥१५७॥ ४/१३**

**अविशुद्धापि** स्वावस्थाऽनुचितापि । हुर्वाक्यालङ्कारे, **वृत्तिर्**वर्तनोपायरूपा । **एवमेव** प्रवचनखिंसावद् **भवत्यधिकदोषा तु** प्रभूतदोषैव । **तस्माद् द्विधापि** द्रव्यभावाभ्यां **शुचिना जिनपूजा भवति कर्तव्या** ॥१३॥

विशिष्टपुष्पादिभिः पूजोक्ता, [४-३ गाथायाम्] तामेव व्यक्तितोऽनुग्रहार्थमुपदिशति -

**गंधवरधूवसव्वोसहीहिं उदगाइएहिं चित्तेहिं ।**
**सुरहिविलेवणवरकुसुमदामबलिदीवएहिं च ॥१५८॥ ४/१४**

**सिद्धत्थयदहिअक्खयगोरोयणमाइएहिं जहलाभं ।**
**कंचणमोत्तियरयणादिदामएहिं च विविहेहिं ॥१५९॥ ४/१५ जुग्गं ।**

**गन्धाः** गन्धवद् विशिष्टसुरभिद्रव्याणि। **वरधूपो** गन्धयुक्तिप्रसिद्धः। **सर्वौषधिरपि** तत्प्रसिद्धैः- अथवा सर्वाश्च ता औषधयश्च। सर्वेषां पदानां द्वन्द्वस्ताभिर्गन्ध-वरधूप-सर्वौषधीभि**रुदकादिकैश्च चित्रैर्नानाप्रकारैः** । **सुरभिविलेपनं** चन्दनाद्युपदेहे **वरकुसुमदामानि** प्रधानसुरभिपुष्पमालाः । **बलिरू**पहारः **दीपकाः** प्रदीपाः प्रसिद्धा एव तैः सुरभि-विलेपन-वरकुसुम-दाम-बलि-दीपकैश्च ॥१४॥

**सिद्धार्थकाः** सर्षपाः **दध्यक्षता** दध्ना संसृष्टा अक्षताः । पृथग् वा द्वयोर्ग्रहणम्। **गोरोचना** गोपित्तप्रभवा प्रसिद्धैव, **आदिशब्दा**च्छेषमङ्गल्यवस्तुपरिग्रहस्तैः **यथालाभं** यथासम्पत्ति। **काञ्चन-मौक्तिकरत्नादिदामकैश्च** कनकावलि-मुक्तावलि-रत्नावल्यादिरूप**र्विविधै**रनेकविधानैः ॥१५॥

किं पुनर्विशिष्टपुष्पादिभिः पूजोच्यत इत्याह -

**पवरेहिं साहणेहिं, पायं भावो वि जायए पवरो ।**
**न य अण्णो उवओगो, एएसि सयाण लट्ठयरो ॥१६०॥ ४/१६**

**प्रवरैरुत्कृष्टैः, साधनैः** पूजोपकरणद्रव्यैः, **प्रायो** बाहुल्येन, **भावोऽपि जायते प्रवरः** प्रधानः। क्वचिदनुत्कृष्टवस्तुभिरपि पूजां कुर्वन् उत्कृष्ट एव क्षयोपशमविशेषाद् भावो भवतीति प्रायो ग्रहणम्। भूयस्त्वेन तु सहकारिविशेषाद् भावविशेषः । यथोक्तम् -

*गुणभूइट्ठे दव्वंमि, जेणमत्तोऽहियत्तणं भावे ।*
*इइ वत्थूओ इच्छइ, ववहारो निज्जरं विउलं ॥[ ]*

*[गुणभूयिष्ठे द्रव्ये, येन मात्राधिकत्वं भावे ।*
*इति वस्तुत इच्छति, व्यवहारो निर्जरां विपुलाम् ॥]*

**न चान्य उपयोगः** स्वफलसाधनव्यापाररूपः, **एतेषां** प्रवरसाधनानां **सतां** विद्यमानानां **लट्ठयरो** कान्ततरोऽभिलषिततरः ॥१६॥

अथ किं भावप्राधान्यात् प्रवरसाधनोपदेश इत्याशङ्क्याह –

**इयलोयपारलोइयकज्जाणं पारलोइयं अहिगं ।**
**तं पि हु भावपहाणं, सो वि य इय कज्जगम्मो त्ति ॥१६१॥ ४/१७**

**इहलोक-पारलौकिककार्ययोर्मध्ये पारलौकिकमधिकं** तत्प्रधानत्वाद्विदुषां **तदपि च** पारलौकिकं धर्मकार्यं **भावप्रधानं** वर्त्तते । **सोऽपि च** भावः **इत्येवं कार्यगम्य** एवंविधप्रवरपूजासाधनोपनयनावसेयः, **इति** हेतौ परिसमाप्तौ वा ॥१७॥

प्रस्तुतवस्तुनिगमनायाह –

**ता नियविहवणुरूवं, विसिट्ठपुप्फाइएहिं जिणपूया ।**
**कायव्वा बुद्धिमया, तम्मी बहुमाणसारा य ॥१६२॥ ४/१८**

**तस्मान्निजविभवानुरूपं** स्वकीयविभवसदृशं क्रियाविशेषणम् । **विशिष्टपुष्पादिकैः** प्रागुक्तैः **जिनपूजा कर्त्तव्या बुद्धिमता** प्रेक्षावता । **तस्मिन्** जिने भगवति **बहुमान** आन्तरः प्रीतिविशेषः, तद्भावाच्च बहुमानविशेषात् फलविशेषसिद्धेः ॥१८॥

विधिना इत्युक्तम् [४/३ गाथायाम्] तमेव लेशतो दर्शयति –

**एसो चेव इह विही, विसेसओ सव्वमेव जत्तेण ।**
**जह रेहइ तह सम्मं, कायव्वमणण्णचेट्ठेणं ॥१६३॥ ४/१९**

**एष एवेह** पूजायां **विधिरूपदेश** उपाय इति यावत् । **विशेष [तः]** पुनरयं **सर्वमेव** प्रागुक्तम्, **यत्नेनादरेण यथा राजते** शोभते **तथा सम्यक् कर्तव्यमनन्यचेष्टेन** नान्या शरीरविषया चेष्टा यस्य, तेनानन्यव्यापारयुक्तेनेत्यर्थः ॥१९॥

**वत्थेण बंधिऊणं, नासं अहवा जहासमाहीए ।**
**वज्जेयव्वं तु तदा, देहम्मि वि कंडुयणमाई ॥१६४॥ ४/२०**

**वस्त्रेण बद्ध्वावृत्याऽऽच्छाद्य नासां** नासिकामष्टपुटेन, सामान्येन **वा, यथासमाधि** चेतःस्वास्थ्यानतिक्रमेण बद्ध्वापीत्यर्थः । **वर्जयितव्यं तु तदा** जिनपूजाकाले, **देहेऽपि कण्डूयनादिः,** आदिशब्दाद्देहसंस्कार-परिकर्माङ्गमर्दनादिग्रहः ॥२०॥

किं विधियत्नः प्रशस्यत इत्याह –

**भिच्चा वि सामिणो इय, जत्तेण कुणंति जे उ सनिओगं ।**
**होंति फलभायणं ते, इयरेसि किलेसमेत्तं तु ॥१६५॥ ४/२१**

**भृत्या अपि स्वामिनो** नरपतेः **इत्येवं यत्नेन कुर्वन्ति ये तु स्वनियोगं** स्वाधिकारम्, **भवन्ति फलभाजन**मैहलौकिकभोगफलपात्रम्, **ते भृत्याः । इतरेषाम**विनीतत्वात् **क्लेशमात्रं त**, क्लेशमात्रमेव विवक्षितफलविकलत्वात् ॥२१॥

**भुवणगुरूण जिणाणं पि[1] विसेसओ [2]एवमेव दट्ठव्वं ।**
**ता एवं चिय पूया, एयाण बुहेहिं कायव्वा ॥१६६॥ ४/२२**

**भुवनगुरूणां जिनानामपि विशेषत एवमेव द्रष्टव्यम् ।** यत्नेन कुर्वतां पूजाविधान-फलभावत्वम् (फलभाजनं अटी.) द्रष्टव्यम् । **तत्** तस्मात् **एवं पूजा एतेषां** जिनानां **बुधर्विद्वद्भिः कर्तव्या** ॥२२॥ (१. तु-अटी. । २ एष एव-अटी. ।)

'तस्मिन् बहुमानसारेत्युक्तम्', [४-१८ गाथायाम्] तमेवाधिकृत्याह -

**बहुमाणोऽवि हु एवं, जायइ परमपयसाहगो नियमा ।**
**सारथुइथोत्तसहिया, तह य चितिवंदणाओ य ॥१६७। ४/२३**

**बहुमानोऽपि** प्रीतिविशेष [षोऽपि] एवं विधिप्रवृत्तस्य **जायते । परमपदसाधकोः** मुक्ति-निर्वर्तकः **नियमात्** नियमेन, **सारस्तुतिस्तोत्रसहितात् तथा च चैत्यवन्दनात्तु** चैत्यवन्दनाच्चैव बहुमानः सारस्तुत्यादियुक्तात् ॥२३॥

सारस्तुति-स्तोत्रस्वरूपाख्यानायाह -

**सारा पुण थुइथोत्ता, गंभीरपयत्थविरइया जे उ ।**
**सब्भूयगुणुक्कित्तणरूवा खलु ते जिणाणं तु ॥१६८॥ ४/२४**

**साराणि पुनः स्तुति-स्तोत्राणि गम्भीरपदार्थविरचितानि यानि तु** पदान्यर्थाश्च पदार्थाः । गम्भीराश्च ते पदार्थाश्च तैर्विरचितानि दृब्धानि । गम्भीरत्वं च पदानां गम्भीरोक्त्यार्थानां तु सूक्ष्मबुद्धिगम्यतया महामतिग्रथितत्वेन **सद्भूतगुणोत्कीर्तनरूपाणि खलु** विद्यमाननिरूप-चरितगुणप्रतिपादनस्वरूपाण्येव **तानि** स्तुतिस्तोत्राणि, **जिनाना तु** सम्बन्धीनि विषयमाहात्म्यमनेन दर्शयति । विषये वस्तुप्रयुक्तमनुष्ठानं श्रेयसे सम्पद्यत इति न्यायदर्शनार्थं चैवमभिधानम् ॥२४॥

किं पुनरेवंरूपाणि स्तुतिस्तोत्राणि प्रशस्यन्त ? इत्याह -

**तेसिं अत्थाहिगमे, नियमेणं होइ कुसलपरिणामो ।**
**सुंदरभावा तेसिं, इयरम्मि वि रयणनाएणं ॥१६९॥ ४/२५**

**तेषां** स्तुतिस्तोत्राणाम् **अर्थाधिगमे**ऽभिधेयार्थपरिज्ञाने, स्तोतॄणां **नियमेन भवति**

**कुशलपरिणामः** शुभाशयः **सुन्दरभावात्** **तेषां** स्तुति-स्तोत्राणां सुन्दरत्वात् । **इतरस्मिन्नपि** अर्थापरिज्ञानेऽपि तथाविधस्तोत्रापेक्षया **रत्नज्ञातेन** ॥२५॥

रत्नोदाहरणमेवाह –

**जरसमणाई रयणा, अण्णायगुणा वि ते समिंति जहा ।**
**कम्मजराई थुइमाइया वि तह भावरयणा उ ॥१७०॥ ४/२६**

**जरशमनादीन्यादि**शब्दाच्छूलशमनादिग्रहः, **रत्नानि** पृथिवीपरिणामानि । **अज्ञात-गुणान्यप्य**निश्चितगुणान्यपि । **तान्** ज्वरशूलादीन् **शमयन्ति** निवर्तयन्ति, **यथा**ऽयं दृष्टान्तः, द्राष्टान्तिकमाह-**कर्मज्वरादीन्** **स्तुत्यादीन्य**प्यपायहेतुं **तथा** **भावरत्नानि** **तु** स्तुतिस्तोत्राणि भावरत्नकल्पानि शमयन्ति ॥२६॥

**ता एयपुव्वगं चिय, पूयाए उवरि वंदणं णेयं ।**
**अक्खलियाइगुणजुयं, जहाऽऽगमं भावसारं तु ॥१७१॥ ४/२७**

**तत्** तस्मा**देतत्पूर्वकमेव** स्तुतिस्तोत्रपूर्वकमेव **पूजाया उपरि वन्दनं** चैत्यवन्दनं **ज्ञेयम-**वबोद्धव्यम् । **अस्खलितादिगुणयुतम**स्खलितामिलितव्यत्याम्रेडिताहीनस्वरादियुक्तम् । **यथागमं** यथाश्रुतम्, न तदतिक्रमेण, **भावसारं तु** भावसारमेव ॥२७॥

किमेतत्पूर्वकं चैत्यवन्दनं भावसारं प्रशस्यत इत्याह –

**कम्मविसपरममंतो, एवं एयं ति बेंति [१]सव्वण्णू ।**
**मुद्दा एत्थुस्सग्गो, अक्खोभो होइ जिणचिण्णो ॥१७२॥ ४/२८**

**कर्मविषपरममन्त्रः** तथाऽतदपरिहारकारित्वेन **एवमुक्तनीत्या** **एतदिति** वचनं **ब्रुवते** **सर्वज्ञाः** [(समयण्णू) = समयज्ञा इति पाठान्तरम् – अटी] । उपादेयप्रकर्ष एतदिति भावः । **मुद्रा**ऽनुल्लङ्घनीयरूपा क्षुद्रसत्त्वानां तथाविधचिह्नरूपा वा **अत्र** चैत्यवन्दने **उत्सर्गः** कायोत्सर्गः **अक्षोभो**ऽचलितस्वरूपो **भवति** । **जिनचीणा** जिनाचरितः श्रुतावधिमनःपर्यायकेवलिजिनाचरित-त्वाज्जिनकल्पिकाचरितत्वाच्च । चीर्णं प्रवासिव्रतमिति विशिष्टप्रयुक्तेः । चीर्णशब्दः संस्कृतेऽपि द्रष्टव्यः ॥२८॥ (१. समयण्णु अटी. ।)

चैत्यवन्दनान्तरविधेयमाह -

**एयस्स समत्तीए, कुसलं पणिहाणमो उ कायव्वं ।**
**तत्तो पवित्ति विग्घजय, सिद्धी तह य थिरीकरणं ॥१७३॥ ४/२९**

**एतस्य** वन्दनस्य **समाप्तौ** सत्यां **कुशलं** कुशलहेतुत्वात् । **प्रणिधानमै**काग्र्यम् । **'मो'** ['ओ' अटी.] इति निपातः, 'तुशब्द एवकारार्थः । **कर्तव्यं** विधेयमेव कुशलप्रणिधानम् । **ततः** प्रणिधानात् **प्रवृत्ति**र्धर्मव्यापारविषया प्रशमप्रधाना । **विघ्नजयो** हीनमध्यमोत्तमविघ्नाभिभवरूपः । **सिद्धिः** प्रस्तुतधर्मव्यापाराणां निष्पत्तिः **तथा स्थिरीकरण च** स्वपरगतानां धर्मयोगानामेव प्रवृत्यादीनि वाञ्छता प्रणिधानमवश्यकरणीयम् । तदभावे प्रवृत्त्याद्यसिद्धेः ॥२९॥

ननु च प्रणिधानं प्रार्थनारूपत्वाद् भोगादिनिदानवत् परिहर्तव्यमित्याशङ्क्याह -

**एत्तो च्चिय न नियाणं, पणिहाणं बोहिपत्थणासरिसं ।**
**सुहभावहेउभावा, णेयं इहराऽपवित्ती उ ॥१७४॥ ४/३०**

**अत एव** प्रवृत्यादिहेतुत्वादेव कुशलप्रणिधानं **न निदानम्** । रागद्वेषमोहगर्भस्य क्लिष्टाशयस्य भोगगृद्धिपरस्य निदानत्वान्न चैवंरूपमेतद् **प्रणिधानं बोधिप्रार्थनासदृशम्**, समयनीत्या यथा बोधेः प्रार्थना समये न निदानं प्रसिद्धम् । यत् प्रोक्तम् -

**भासा असच्चमोसा, नवरं भत्तीए भासिआ एसा ।**
**ण हु खीणपेज्जदोसा, देंति समाहिं व बोहिं वा ॥** *[ आवश्यकनिर्युक्ति गाथा-१०९५ ]*

**शुभभावहेतुभावा**च्छुभाध्यवसायहेतुत्वेन **ज्ञेयं** ज्ञातव्यम् **इतरथा** शुभभावहेतुत्वमन्तरेण **अप्रवृत्ति**रेवाप्रवर्तनमेव प्रणिधाने स्यात् ॥३०॥

**एवं तु इट्ठसिद्धी, दव्वपवित्ती उ अण्णहा नियमा ।**
**तम्हा अविरुद्धमिणं, णेयमवत्थंतरे उचिए ॥१७५॥ ४/३१**

**एवमेव** प्रणिधानसहित एव वन्दने विधीयमाने, **इष्टसिद्धि**रिष्टनिष्पत्तिः, **द्रव्यप्रवृत्तिस्तु** द्रव्यप्रधाना प्रवृत्तिर्द्रव्यक्रियैव **अन्यथा** प्रणिधानमन्तरेण **नियमादवश्यं**भावेन । **तस्मादविरुद्धमिदं** प्रणिधानं **ज्ञेयमवस्थान्तर** पुरुषावस्थाविशेष **उचिते** योग्य आदिकर्मिकत्वादौ ॥३१॥

तत्प्रणिधानं कथं कर्तव्यमित्याह -

**तं पुण संविग्गेणं, उवओगजुएण तिव्वसद्धाए ।**
**सिरणमियकरयलंजलि, इय कायव्वं पयत्तेणं ॥१७६॥ ४/३२**

**तत् पुनः संविग्नेन** संसारभीरूणा मोक्षाभिलाषिणा वा । **उपयोगयुतेनो**पयुक्तेन दत्तावधानेन **तीव्रश्रद्धया** तीव्रप्रणिधानविषयाभिलाषेणोत्कृष्टधर्मश्रद्धया वा, **शिरोनमितकरतलाञ्जलि** र्मस्तकन्यस्तपाणितलाञ्जलिर्यथा भवति क्रियाविशेषणमेतत् । **इति** वक्ष्यमाणाक्षरोच्चारणन्यायेन **कर्तव्यं प्रयत्नेन** सर्वादरेण ॥३२॥

**जय वीयराय ! जगगुरु, होउ ममं तुह पभावओ भयवं ।**
**भवनिव्वेओ मग्गाणुसारिया इट्ठफलसिद्धी ॥१७७॥ ४/३३**

**लोगविरुद्धच्चाओ, गुरुजणपूया परत्थकरणं च ।**
**सुहगुरुजोगो तव्वयणसेवणा आभवमखंडा ॥१७८॥ ४/३४ जुग्गं ।**

**जय,** मङ्गलवचनमेतत् । सकलक्षुद्रोपद्रवपरिहारेण **वीतराग**वद्विगतरागद्वेषमोह **जगद्गुरा** जगज्ज्ञेयं चराचरं तस्य यथावस्थितस्वरूपसंसेवनाद् गुरुः । जगन्ति जङ्गमानि तेषां [१]मानवीयत्वात् गुणाधिकत्वाद् वा गुरुः **भवत मम त्वत्प्रभावतो भगवंस्त्व**त्सामर्थ्येन **भवनिर्वेदः** संसारनिर्वेदो **मार्गानुसारिता** मोक्षमार्गानुसारिता **इष्टफलसिद्धि**रविरोधफलनिष्पत्तिरैहलौकिकी ययोपगृहीतस्य चित्तस्वास्थ्यं भवति । ततश्च धर्मे प्रवृत्तिरन्यथा चित्तविघातान्नादिकर्मिकस्य निराकुलाशा तथाविधसत्त्वाभावेन तेनासाविष्टफलसिद्धिं प्रार्थयते परानुपरोधेन ॥३३॥ (१. मानवीयत्वात् - यद्यपि अत्र मनुष्यत्वेन सर्वेषामपि मनुष्याणां (अविरतिधराणामपि) ग्रहणं सम्भवति, तथापि पूर्वोक्तगाथोपदर्शितरीत्या "धर्मज्ञो धर्मकर्ता च सदा धर्मपरायणः ।" इत्यनेन सर्वविरतिधराणामेव गुरुशब्देन ग्रहणं योग्यम् ।)

**लोकविरुद्धानि** सर्वनिन्दास्वच्छाशयधर्मकरणहसनं जनपूजनीयावज्ञादीनि । तेषां **त्यागः** परिहारः, **गुरुजनपूजा** मातृपित्रादिपूजा, **परार्थकरणं च** परोपकारक्रिया च । **शुभगुरुयोगः** सुन्दरगुरुसम्बन्धः**तद्वचनसेवना** गुरुवचनसेवा यथाशक्ति **आभवमा**संसारमाजन्म वा । **अखण्डा** सकला तव प्रभावाद् भवत्विति सम्बन्धः ॥३४॥

आदिकर्म(र्मि)कमाश्रित्येदमभिहितमन्येषां तूत्तरोत्तरगुणवृद्ध्या स्वगुणस्थानकानुरूपं भवतीति सामान्येनैव प्रणिधानमाश्रित्याह -

**उचियं च इमं णेयं, तस्साभावम्मि तप्फलस्सऽण्णे ।**
**अपमत्तसंजयाणं, आराऽणभिसंगओ न परे ॥१७९॥ ४/३५**

**उचितं** च योग्यं **चेदं** प्रणिधानं **ज्ञेयम्** । **तस्य** प्रार्थनीयार्थस्या**भावे तत्फलस्य** प्रणिधानविषयीकृतार्थजन्यकार्यस्याविद्यमानत्वे**ऽन्ये** प्रणिधानमिच्छन्ति । यद्यपि सोऽर्थः सामान्येनास्ति तथापि तत्फलसंसिद्धये स एव प्रार्थ्यते । कथं तु नाम विशिष्टतमः स्यात्तस्यानेकभेदत्वाद् ? **अप्रमत्तसंयतेभ्य आरा**दर्वाग्भाग इत्यर्थः। प्रमत्तसंयतान्तमित्युक्तं भवति । **अनभिष्वङ्गाद्धे**तोर्**न परस्मिन्** प्रमत्तसंयतादप्रमत्तसंयते तस्य ह्यप्रमत्तत्वादेव न किञ्चित्प्रणिधानेन साध्यमस्ति प्रार्थनातीतत्वाद्विहितसेवनपरत्वात्कुशलपरिणामत्वाच्चेति ॥३५॥

'न निदानं प्रणिधानम्' इति [४-३० गाथायाम्] यदुक्तं तस्येव भावार्थगर्भनिगमनद्वारेणाह-

**मोक्खंगपत्थणा इय, न नियाणं तदुचियस्स विण्णेयं ।**
**सुत्ताणुमइत्तो जह, बोहीए पत्थणा माणं ॥१८०॥ ४/३६**

**मोक्षाङ्गप्रार्थना** मुक्तिहेतुसम्यग्ज्ञान-परोपकारादिप्रार्थना इत्युक्तनीत्या **न निदानम्** **तदुचित**[स्य]प्रणिधानो**चितस्य विज्ञेयम्, सूत्रानुमतेः** सकाशात् सूत्राभिप्रेतत्वात् वा तद्विधप्रार्थनाया **यथा बोधेः प्रार्थना मानं** प्रमाणमत्र यदि प्रार्थना सर्वापि निदानमभविष्यत्, ततो बोधिप्रार्थनां सूत्रे नाकरिष्यत् कृता च तस्मात् सैव प्रमाणम् ॥३६॥

ननु च यदि शुभभावप्रार्थनानिदानं न भवति, ततो दशाश्रुतस्कन्धे तीर्थकरविषयनिदानप्रतिषेधो युक्त इत्याशङ्क्याह -

**एवं च दसादीसुं, तित्थयरम्मि वि नियाणपडिसेहो ।**
**जुत्तो भवपडिबद्धं, साभिस्संगं तयं जेण ॥१८१॥ ४/३७**

**एवं च** रागद्वेषमोहगर्भस्य रूप-रस-गन्ध-स्पर्श-शब्दसांसारिकपदार्थविषयस्य क्लिष्ट-परिणामस्य निदानत्वे, **दशादिषु** ग्रन्थेषु **तीर्थकरेऽपि** तीर्थकरत्वविषयेऽप्यहमस्माद्धर्मात्तीर्थकरः स्यामिति **निदानप्रतिषेधः**, एवंरूपनिदाननिषेधो य उक्तः, स **युक्तो** वर्तते । **भवप्रतिबद्धं** संसारप्रतिबद्धं सांसारिकरूपसौभाग्यादिभावविषयम्। **साभिष्वङ्गं** सरागं **तत्**तीर्थकरनिदानं **येन**। अयमत्र भावार्थो-यदेव सांसारिकभावविषयं तीर्थकरत्वनिदानं तदेव तत्र निषिध्यते, न त्वन्यत् ॥३७॥

अत एवाह -

**जं पुण निरभिस्संगं, धम्मा एसो अणेगसत्तहिओ ।**
**निरुवमसुहसंजणओ, अपुव्वचिंतामणीकप्पो ॥१८२॥ ४/३८**

**ता एयाणुट्ठाणं, हियमणुवहयं पहाणभावस्स ।**
**तम्मि पवित्तिसरूवं, अत्थापत्तीएँ तमदुट्ठं ॥१८३॥ ४/३९ जुगगं ।**

**यत्पुनर्निरभिष्वङ्गं** तीर्थकरत्वप्रार्थनारूपं सांसारिकभावातीतं परोपकारादिफलम्, तददुष्टमिति सम्बन्धः । कीदृशं निरभिष्वङ्गमध्यमवसायरूपं ? **धर्माद**र्हद्वात्सल्याद्युपात्तानुत्तरपुण्यस्कन्धरूप-तीर्थकरनामकर्मफलविपाकाद् ज्ञानयोगप्रकर्षप्रतिपत्तिरूपाद् वा, **एष** भगवान् धर्माय एष इति वा धर्ममादिशतीति धर्मदेशो वा । **अनेकसत्त्वहितो**ऽनेकभव्यसत्त्वहितनिरतो **निरूपमसुखसञ्जनका** मोक्षसुखहेतुस्तद्योगानाम्, **अपूर्वचिन्तामणिकल्प**श्चिन्तातिक्रान्तसुखविधायित्वेन ॥३८॥

**तत्त**स्मा**देतदनुष्ठानं** तीर्थकरानुष्ठानं तीर्थप्रवर्तनादि, **हितं** पथ्यमनुकूलम् । **अनुपहत**मप्रति-स्खलितसामर्थ्यम् । **प्रधानभावस्य** प्रधानत्वस्य । **तस्मिन्** परोपकारैकनिष्ठे भगवति **प्रवृत्तिस्वरूपं** परोपकार-प्रवृत्त्याकारम् **अर्थापत्त्या** न्यायतन्त्रयुक्तिगर्भयाऽन्यथानुपपत्त्या **तददुष्टं** न तस्य तीर्थकरप्रार्थनारूपस्य दोषोऽस्तीति यावत् । निदानप्रतिषेधस्तु साभिष्वङ्गचित्तविषयः, तस्यैव संसारानुबन्धित्वेन दुष्टत्वात्, तेन च कदाचित्तीर्थकरत्वाप्राप्तेः, निरभिष्वङ्गचित्तावर्जनीयं हि सर्वदा तत् । नहि निदानात्कश्चित्तीर्थकरो भवति महाकल्याणाश्रयस्यैव तीर्थकरनामकर्मत्वात् ॥३९॥

एवं द्वाभ्यां गाथाभ्यां व्याख्यायोपसंहरति -

**कयमेत्थ पसंगेण, पूया एवं जिणाण कायव्वा ।**
**लद्धूण माणुसत्तं, परिसुद्धा सुत्तनीईए ॥१८४॥ ४/४०**

**कृतमत्र प्रसङ्गे**नालं विस्तरेण **पूजैवं जिनानां कर्त्तव्या । लब्ध्वा मानुषत्वं** महारत्नकल्पम् । **परिशुद्धा** पूजा **सूत्रनीत्या**गमन्यायेन ॥४०॥

सलिल-वनस्पत्याद्यारम्भमाशङ्कमान एवाह -

**पूयाए कायवहो, पडिकुट्ठो सो य णेव पुज्जाणं ।**
**उवगारिणि त्ति तो सा, परिसुद्धा कह णु होइ त्ति ॥१८५॥ ४/४१**

**पूजायां** पूजाया वा **कायवधो** जीवनिकायहिंसा **प्रतिक्रुष्टः** प्रतिषिद्धः । **स च** कायवधो **न च (नैव) पूज्यानां** जिनानाम् **उपकारिणी**त्युपकारफलवती तथाविधसाधोरिवारोग्यक्रिया । **ततः सा** पूजा **परिशुद्धा** निर्दोषा **कथं नु भवतीति** नैव कथञ्चिद्भवतीति प्रश्नयितुरभिप्रायः ॥४१॥

अत्रोत्तरमाह -

**भण्णइ जिणपूयाए, कायवहो जइवि होइ उ कहिंचि ।**
**तह वि तई परिसुद्धा, गिहीण कूवाहरणजोगा ॥१८६॥ ४/४२**

**भण्यते** परिहार उच्यते, **जिनपूजया** व्यावर्णितया **कायवधः** प्रागुक्तो **यद्यपि भवति तु** भवत्येव **कथञ्चित्तत्रापि[ तई ]तका** (सा. अटी.) पूजा **परिशुद्धा**, न दोषवती **गृहिणामधिकारित्वेन। कूपोदाहरणयोगात्** कूपखननोदाहरणव्यापारात्। यथा स कूपखननव्यापारो न दोषवानधिकफलश्च। एकदा निर्वर्तितस्य बहुकालोपकारित्वेन भूयसां सत्त्वानाम्, तथैषाऽपि पूजेति भावः ॥४२॥

**असदारंभपवत्ता, जं च गिही तेण तेसि विन्नेया ।**
**तन्निव्वित्तिफल च्चिय, एसा परिभावणीयमिदं ॥१८७॥ ४/४३**

**असदारम्भप्रवृत्ता**शोभनगृहाद्यारम्भप्रवृत्ता **यद्** यस्माद् **गृहिणो** वर्तन्ते, **तेन** हेतुना **तेषां** गृहिणां **विज्ञेया** ज्ञातव्या । **तन्निवृत्तिफलैव** प्रयत्नपूर्वकाधिकारम्भनिवृत्तिफलैव **एषा** पूजा । **परिभावनीयमिद** विशेषकारणसदारम्भेष्वेवं पूजाया[यां] गृहस्थजनो मित्रपुत्रादिनिमित्तं हि प्रवर्तमानोऽप्रयत्नेनाऽपि प्रवर्तते असदारम्भेषु पूजायां तु प्रवर्तमानो देशकालज्ञतया शास्त्रोक्तत्वेन धर्मपरतया तथाविधेष्वसदारम्भेषु[न] प्रवर्तत इत्यसदारम्भनिवृत्तिफला ॥४३॥

पूजायां कायवध इति [४.४१ गाथायां] यदुक्तं तत्परिहृतम्, नैव सा पूज्यानामुपकारिणीत्यस्य परिहारायाह -

**उवगाराभावम्मि वि, पुज्जाणं पूजगस्स उवगारो ।**
**मंतादिसरणजलणादिसेवणे जह तहेहं पि ॥१८८॥ ४/४४**

**उपकाराभावेऽप्या**ह्लादादिविशेषाभावेऽपि **पूज्यानां** मुख्यवृत्त्या जिनानां तत्प्रतिमानां च, क्षीणमोहत्वादचेतनत्वाच्च। **पूजकस्य** पूजाप्रवृत्तभव्यसत्त्वस्य **उपकारः**-पूजाफललाभः, स्वगतो भवत्येवाशयविशेषाच्छास्त्रोक्तानुष्ठानाच्च । **मन्त्रादिस्मरण-ज्वलनादिसेवने यथा तथेहापि**-यथा मन्त्रविद्यादीनां स्मर्यमाणानां ज्वलनादीनां सेव्यमानानां [च] स्वगतोपकाराभावेऽपि स्मर्तुः सेवकस्य चोपकारः सम्पद्यते तथेहापि पूजकस्येति ॥४४॥

ये तु पृथिव्यप्तेजोवायुवनस्पत्यारम्भसामर्थ्यात् पूजायां सत्यपि शास्त्रोक्तत्वे न प्रवर्तन्ते, तान् प्रत्याह -

**देहादिनिमित्तं पि हु, जे कायवहम्मि तह पयट्टंति ।**
**जिणपूयाकायवहम्मि, तेसिमपवत्तणं मोहो ॥१८९॥ ४/४५**

**देहादिनिमित्तमपि** शरीरगृहपुत्रकलत्राद्यर्थमपि **ये** गृहिणः सन्तः जीव **कायवधे** जीवनिकायारम्भे **तथा** तैस्तैरूपायैर्भोजना-ऽऽच्छादन-स्नान-विलेपनादिभिः **प्रवर्तन्ते** प्रवृत्ति विदधति । **जिनपूजाकायवध** वनस्पत्याद्यारम्भे, **तेषामप्रवर्तनं** स्वयमन्येषां च **मोहो**ऽज्ञान-मनाभोगो वर्तते, शास्त्रोक्तायामपि पूजायामधिकारिणामप्रवृत्तत्वात् ॥४५॥

एवं सावद्यपरिहारां पूजा[विधि]मभिधाय तन्निगमनायाह -

**सुत्तभणिएण विहिणा, गिहिणा निव्वाणमिच्छमाणेणं ।**
**तम्हा जिणाण पूया, कायव्वा अप्पमत्तेणं ॥१९०॥ ४/४६**

**सूत्रभणितेनागमोक्तेन विधिना** विधानेनोपदेशेनेति यावत् । **गृहिणा** गृहस्थेन **निर्वाणं** परमपदं सुखं वा **इच्छताभिकाङ्क्षता तस्माज्जिनानां पूजाप्रमत्तेन** शास्त्रानुसारेण **कर्तव्या**। यत उक्तम् -

*जम्हा छउमत्थाणं, मोत्तूणं आगमं इह पमाणं ।*
*नो विज्जई उ अन्नं, तम्हा एत्थेव जइयव्वं [ विचारसारप्रकरणम् गाथा-८८२ ] ॥४६॥*

पूजाया एव विषयभेदात्फलविशेषमाह -

**एक्कं पि उदगबिंदु, जह पक्खित्तं महासमुद्दम्मि ।**
**जायइ अक्खयमेवं, पूया जिणगुणसमुद्देसु ॥१९१॥ ४/४७**

**एकोऽपि उदकबिन्दुः** सलिललवः । प्राकृतत्वाद् भाषायां नपुंसकनिर्देशः । **यथा प्रक्षिप्ते महासमुद्रे**ऽसङ्ख्यातोदके स्वयम्भूरमणादौ **जायते**ऽ**क्षयो**ऽक्षीणः, **एवं पूजा जिनगुणसमुद्रेषु** न्यस्ता अक्षया जायते । विषयमाहात्म्यादक्षयाऽनन्तफला ॥४७॥

इदानीं पूजाया एवोपादेयताख्यापनार्थं प्रत्यासन्नविप्रकर्षगतं फलमुपदिशन्निदमाह -

**उत्तमगुणबहुमाणो, पयमुत्तमसत्तमज्झयारम्मि ।**
**उत्तमधम्मपसिद्धी, पूयाए जिणवरिंदाणं ॥१९२॥ ४/४८**

**उत्तमगुणबहुमान** उत्तमेषु गुणेषु केवलज्ञान-दर्शन-यथाख्यातचारित्रादिषु बहुमानः प्रीतिविशेषः। **पदमुत्तमसत्त्वमध्यकारे** देवेन्द्र-नरेन्द्र-विद्याधर-पार्थिवादिमध्यस्थ इत्यर्थः । **उत्तमधर्मप्रसिद्धिः** स्वर्गापवर्गनिर्वर्तनक्षमधर्मप्रसिद्धिः क्षान्त्याद्याशयविशेषरूपदशविधधर्मप्रसिद्धिर्वा **पूजया जिनवरेन्द्राणां** भवति ॥४८॥

इहैव निदर्शनमाह -

**सुव्वइ दुग्गयनारी, जगगुरुणो सिंदुवारकुसुमेहिं ।**
**पूयापणिहाणेणं, उववन्ना तियसलोगम्मि ॥१९३॥ ४/४९**

**श्रूयते दुर्गतनारी** दरिद्रस्त्री तथाविधसुरभिगन्धिपुष्पाद्यभावेन निर्विभवा **जगद्गुरा**-र्भगवतः **सिन्दुवारकुसुमै**र्नदीतीरासन्नसम्भवैः **पूजाप्रणिधानेन** पूजागताध्यवसायेन कथञ्चिदायुः-क्षयादन्यद्वेलायां **उपपन्ना त्रिदशलोके** देवलोके। सा हि दुर्गतस्त्री समस्तसुरासुर-पार्थिवकृतपूजं भगवन्तं समवसृतं दृष्ट्वा भक्तिभरनिर्भरमानसा स्वकृतापराधमनुचिन्तयन्ती नूनं मयाऽन्यजन्मन्यपि महात्मनां केषाञ्चित् पूजा न कृतेति तत्फलमिदं दौर्गत्यम्, अतोऽधुना भगवत्पूजासम्पादनेन तदपनयामीत्यध्यवसायवती यथाप्रत्यासन्नलब्धसिन्दुवारकुसुमा[नि] तत्परिपूर्णाञ्जलिः प्रमोदातिशयात् समवसरणं प्रति प्रस्थिता । तस्याश्च तस्यां वेलायां शुभप्रणिधानविशेषाद् देवेष्वायुर्बन्धो बभूव । तदनन्तरं प्रवर्धमानशुभपरिणामा तथा विरचितप्रशस्तकुसुमाञ्जलिरेव भगवन्तं भावतः पूजयित्वा द्रव्यतस्तामसम्पाद्यैवायुःक्षयाद्देवलोके समजनिष्टः । तदेवं भावतः पूजायाः फलं श्रूयते । तस्मात्कर्तव्येयमिति ॥४९॥

**सम्मं नाऊण इमं, सुयाणुसारेण धीरपुरिसेहिं ।**
**एवं चिय कायव्वं, अविरहियं सिद्धिकामेहिं ॥१९४॥ ४/५०**

**सम्यग्ज्ञात्वेदं** पूजाविधानं **श्रुतानुसारेणा**गमनीत्या **धीरपुरुषै**र्विद्वत्पुरुषैः **एवमेव कर्तव्यम्**, यथागममेवेत्यर्थः । **अविरहितं** निरन्तरं **सिद्धिकामैः** मोक्षाभिलाषिभिरिति ॥५०॥

**॥ पूजाविधि पञ्चाशकं चतुर्थं समाप्तम् ॥**

## ॥ पञ्चमं प्रत्याख्यानविधि-पञ्चाशकम् ॥

जिनगुरुपूजानन्तरं क्रमप्राप्तं प्रत्याख्यानविधिमाह –

**नमिऊण वद्धमाणं, समासओ सुत्तजुत्तिओ वोच्छं ।**
**पच्चक्खाणस्स विहिं, मंदमतिविबोहणट्ठाए ॥१९५॥ ५/१**

**नत्वा वर्धमानं** प्रकृष्टपुण्योदयप्रवर्धमानत्वाद्वर्धमानस्वामिनम्, **समासतः** सङ्क्षेपेण **सूत्रयुक्तितः** सूत्रनीत्या **वक्ष्येऽ**भिधास्ये **प्रत्याख्यानस्य विधिं** विधानं **मन्दमतिविबोधनार्थम्** ॥१॥

जडबुद्धिविबोधनार्थं प्रत्याख्यानं किमुच्यत इत्याह –

**पच्चक्खाणं नियमो, चरित्तधम्मो य होंति एगट्ठा ।**
**मूलुत्तरगुणविसयं, चित्तमिणं वण्णियं समए ॥१९६॥ ५/२**

**प्रत्याख्यानं नियमश्चरित्रधर्मश्च भवन्त्येकार्थिकानि** निवृत्त्यभिधायित्वात् । **मूलोत्तरगुणविषयं** मूलगुणाः पञ्चमहाव्रतानि यतीनाम्, श्रावकाणामणुव्रतानि, उत्तरगुणाः पिण्डविशुद्ध्यादयोर्दिग्व्रतानि च तद्गोचरं **चित्रमिदं** प्रत्याख्यानं **वर्णितं समये** सिद्धान्ते ॥२॥

**इह पुण अद्धारूवं, नवकारादि पतिदिणुवओगि त्ति ।**
**आहारगोयरं जइगिहीण भणिमो इमं चेव ॥१९७॥ ५/३**

**इह पुनरद्धारूप**मद्धाप्रत्याख्यानस्वरूपं प्रतिनियतकालत्वेन, **नमस्कारादि** नमस्कारसहितादि **प्रतिदिनोपयोगीति** प्रतिदिवसोपयोगीति कृत्वा, **आहारगोचर**माहारविषयम् । **यतिगृहिणां** साधुगृहस्थानां **भणामः** प्रतिपादयामः । **इदं चैव** प्रत्याख्यानमेव प्रस्तुतत्वात् ॥३॥

प्रत्याख्यानगतानां द्वारगाथामाह –

**गहणे आगारेसुं, सामइए चेव विहिसमाउत्तं ।**
**भेए भोगे सयपालणाए अणुबंध भावे य ॥१९८॥ ५/४ [दारगाहा]**

**ग्रहणे** वक्ष्यमाणे, **आकारेषु** वक्ष्यमाणेष्वेव, **सामायिके** चैव कार्ये, **विधिसमायुक्तं** विधिसमन्वितम् । **भेदे** द्विविधादिगते **भोगे** प्रत्याख्यानोत्तरकालभाविनि **स्वयंपालनायां** स्वयमासेवने । **अनुबन्ध** भोगोत्तरकालभाविनि स्वाध्यायकरणादौ **भावे च** विशुद्धरूपे [अनुबन्धस्य

भावः सत्ताऽनुबन्धभावः, तत्र च - अटी.] विधिसमायुक्तमिति सम्बन्धः ॥४॥

एनामेव लेशतो व्याचष्टे -

**गिण्हति सयंगहीयं, काले विणएण सम्ममुवउत्तो ।**
**अणुभासंतो पइवत्थु, जाणगो जाणगसगासे ॥१९९॥ ५/५**

**गृह्णाति** प्रत्याख्यानं **स्वयंगृहीतम्,** गृह एव शरीरस्थिति-चैत्यवन्दनानन्तरं गृहीतम्। **काल** प्रत्याख्यानविषये भाविनि नातीते वर्तमाने वा अनागतं प्रत्याख्यामीति भाविकालविषयत्वे प्रतिपादनात्। अतीतवर्तमानयोश्च निन्दासंवरणविषयत्वात्, **विनयेन** वन्दनादिना । **सम्यग्**-देशकालापेक्षयौचित्यमाश्रित्य न तु यथाकथञ्चित् स्वाध्याय-ध्यान-विघ्नकरणेन, **उपयुक्तो** नान्यत्रगतचित्तोऽनुपयुक्तस्य सर्वानुष्ठानेष्वेव द्रव्यत्वप्रतिपादनात्। **अनुभाषमाणो** ज्ञातसाधुवत् प्रत्युच्चारयन्नविनष्टं प्रत्याख्यानसूत्रम्। **प्रतिवस्तु** वस्तु वस्तु प्रति यद् यत्प्रत्याख्येयमित्यर्थः । **ज्ञाप[ य ]को** ज्ञः स्वयंवेदिता प्रत्याख्यानसूत्रार्थस्य, **ज्ञाप[ य ]कसकाशे** ज्ञसमीपे ज्ञस्य साधोः समीप इति यावत् ॥५॥

**एत्थं पुण चउभंगो, विण्णेओ जाणगेयरगओ उ ।**
**सुद्धासुद्धा पढमंतिमा उ सेसेसु उ विभासा ॥२००॥ ५/६**

**अत्र पुनः** प्रत्याख्यानप्रस्तावे, चतूरूपश्चासौ भङ्गश्च प्रकारश्च **चतुर्भङ्गः**, प्रत्याख्याने चत्वारो भङ्गा, जातावेकवचनम्। **विज्ञेयो** ज्ञातव्यो **ज्ञाप[ य ]केतरगतस्तु** कुशलाऽकुशलबुद्धिपुरुषगतः। **शुद्धाशुद्धौ प्रथमान्त्या** भङ्गौ, प्रथमः शुद्धोऽन्त्यस्त्वशुद्धः। साकल्य-वैकल्याभ्यां प्रत्येकमवसेया। **शेषयोस्तु** द्वितीय-तृतीययोः **विभाषा** व्याख्या विकल्पो वा शुद्धाशुद्धत्वे ॥६॥

**बितिए जाणावेउं, ओहेण तइए जिट्ठगादिम्मि ।**
**कारणओ उ न दोसो, इहरा होइ त्ति गहणविही ॥२०१॥ ५/७**

**द्वितीये** [भङ्गे] ज्ञस्य ज्ञसमीपरूप-ग्रहणरूपे **ज्ञापयित्वा** तमज्ञं **ओघेन** सामान्येन, ओघेनाप्यज्ञाने विरतेरभावान्निर्विषयत्वेन यत्र ज्ञानं तद्विषयैव विरतिरिष्यते । ज्ञानविषयस्य विरतेरप्यविषयत्वात्, न ह्यज्ञाते कथञ्चिदपि विरतिर्नाम स्वल्पेऽपि तु ज्ञाने तद्विषया विरतिर्भवत्येव। ***ज्ञात्वाऽभ्युपेत्यकरणं विरतिरिति*** वचनात्। **तृतीये** भङ्गे ज्ञस्याज्ञसमीपग्रहणरूपे, **ज्येष्ठकादौ**[१] ज्येष्ठार्यादौ, आदिशब्दात्तथाविधमहातपस्वि-रत्नाधिकवृद्धपरिग्रहः । **कारणतस्तु** कारणादेव **न दोषः** शास्त्रबाधालक्षणः, **इतरथा भवतीति** भवत्येव दोषः । **ग्रहणविधिरयं** प्रत्याख्याने वर्तते ॥७॥

[१. **ज्येष्ठक** – आचार्यादिसम्बन्धी वृद्धभ्राता, आदिशब्दात्तन्मातुल-पितृ-पितृव्यादिग्रहः-अटी.]

'आकारेषु' (५.४ गाथायां)इत्युक्तम्। तद्विषयविभागार्थमाह –

**दो चेव नमोक्कारे, आगारा छच्च पोरिसीए उ।**
**सत्तेव य पुरिमड्ढे, एक्कासणगम्मि अट्ठेव ॥२०२॥ ५/८**

**द्वावेव नमस्कारे** नमस्कारसहिते, **आकारा** अपवादा विशेषा इति यावत्। **षडेव पौरुष्यां तु** षडेव च पौरुषीप्रत्याख्याने। **सप्तैव च पूर्वार्धे** प्रहरद्वयलक्षणे पूर्वाह्न इत्यर्थः, आकारा भवन्ति। **एकासनके** सकृदुपविष्टपुताचलनभोजनरूपे, अरक्तद्विष्टभोजनस्वरूपे वा, एकाशने समयप्रसिद्ध एकभक्ते वा लोक-लोकोत्तरप्रसिद्धे। **अष्टैवा**कारा आगमोक्ताः ॥८॥

**सत्तेगट्ठाणस्स उ, अट्ठेवायंबिलस्स आगारा।**
**पंच अभत्तट्ठस्स उ, छप्पाणे चरिमे चत्तारि ॥२०३॥ ५/९**

**सप्तैकस्थानस्य तु** आकुञ्च-प्रसारणवर्जाः। **अष्टैवायामाम्लस्याकाराः** उष्णौदका-ऽवश्रावण-सौवीरसहितौदनाद्यलवणान्नभोजिनः समयप्रसिद्धा एव। **पञ्च** भक्तार्थेन **तु**, न विद्यते भक्तार्थो भक्ताभिलाषोऽस्येति **अभक्तार्थ** उपोषितस्य, **षट् पाने** पानाहारे, विधिरूपाः अच्छबहललेपाऽलेप-ससिक्थऽसिक्थरूपाः। **चरमे** दिवसभवचरमरूपे **चत्वार** आकाराः शास्त्रप्रसिद्धाः ॥९॥

**पंच चउरो अभिग्गहे, निव्वीए अट्ठ नव य आगारा।**
**अप्पाउरणे पंच उ, हवंति सेसेसु चत्तारि ॥२०४॥ ५/१०**

**पञ्च चत्वारश्चाभिग्रहे** निजविवक्षासम्भवे सर्वप्रत्याख्यानगते नाहारमात्रवर्तिन्येव क्वचित् पञ्च क्वचिच्चत्वारः, प्रवचनप्रशंसार्थं पञ्चेष्यन्ते। **निर्विकृतिके** विकृतिपरिभोगरहितप्रत्याख्याने समयप्रसिद्धे। **अष्ट नव च आकारा** उत्क्षिप्तविवेकसंभवासंभवाभ्यां सिद्धान्तोक्ताः दृष्टव्याः। **अप्रावरणे पञ्च तु भवन्ति, शेषेषु** अभिग्रहेषु **चत्वार** आकाराः ॥१०॥

**नवणीओगाहिमए, अद्दवदहिपिसियघयगुडे चेव।**
**नव आगारा तेसिं, सेसदवाणं च अट्ठेव ॥२०५॥ ५/११**

**नवनीतो** म्रक्षणम्, अवगाहेन [= स्नेहबोलनेन-अटी.] निवृत्तम**वगाहिमं** 'भावप्रत्यया-न्तादिम' इति वचनाच्छब्दसिद्धिः कुट्टिमादीव, सत्स्नेहावगाहनिष्पन्नं पक्वान्नम्। नवनीतश्चावगाहिमं च नवनीतावगाहिमं तस्मिन्,अद्रवरूपे **अद्रवदधिपिशितघृतगुडे चैव** अद्रवदघ्नि पिण्डरूपे,

अद्रवपिशिते घनमांसेऽद्रवघृतगुडे चोद्धारयोग्ये **नवाकारास्तेषामु**क्ते परिधे सहितत्वात्, **शेष द्रवाणां च** शेषाणामेव पूर्वोक्तानां स्वरूपेण द्रवद्रव्याणां चान्येषां मद्यादीनाम् **अष्टैवा**कारा उक्षिप्तविवेकाभावात् ॥११॥

किं पुनराकाराः प्रत्याख्यानेऽभिधीयन्ते इत्याह –

**वयभंगो गुरुदोसो, थेवस्स वि पालणा गुणकरी उ ।**
**गुरुलाघवं च णेयं, धम्मम्मि अओ उ आगारा ॥२०६॥ ५/१२**

**व्रतं** शास्त्रतो नियमः तस्य **भङ्गो** विनाशोऽन्यथाकरणम् । गुरुर्दोषोऽस्मिन्निति **गुरुदोषो** वर्तत । व्रतविनाशो हि यतो महादोषो वर्तते । **स्तोकस्यापि** व्रतस्य **पालना** संरक्षणं गुणकरणशीला **गुणकारी तु** पालनैव गुणकारिणी, **गुरुलाघवं च ज्ञेयं धर्मे** गुणानां गौरवं वृद्धिर्दोषाणां च लाघवमल्पत्वम्, यथा संपद्यते धर्मविषये तथा ज्ञातव्यम् एकान्तग्रहणस्यानेकसत्त्वापकार-जनकत्वेनासुन्दरत्वात् विशिष्टधर्मकार्यक्षतिप्रसङ्गात् । 'ग्लानादि-साधर्मिककार्यकरण हेतुष्वाकाराः ।' **अतो** हेतोराकाराः शास्त्रे प्रतिपादिताः । प्रत्याख्यानाऽपवादा हि शास्त्र एवमर्थमुक्ताः, यथा प्रत्याख्यानभङ्गो न भवति । सर्वोपकारफला हि विदुषां प्रवृत्तिः । सा चैवमाराधिता भवति । न हि क्रियामात्रपरिपालनमेव तथाविधागमार्थगर्भविकलं विदुषां परितोषाय, तस्मात्सर्वानुग्रहार्थमिमे समाश्रियन्ते ॥१२॥

ननु च यतेः सर्वसावद्ययोगविरतिरूपभावसामायिकावस्थितस्य किमन्येनाहारप्रत्याख्यानेन प्रतिनियत-कालद्रव्यविषयभाविना ? नहि स कश्चित् गुणोऽस्ति यस्तदन्तर्वर्त्ती न सञ्जायत इत्याशङ्क्याह-

**सामइए वि हु सावज्जचागरूवे उ गुणकरं एयं ।**
**अपमायवुड्ढिजणगत्तणेण आणाउ विण्णेयं ॥२०७॥ ५/१३**

**सामायिकेऽपि, हु सावद्यत्यागरूपे तु गुणकरमेतत्** । आस्तां तावत् सम्यग्दृष्टि-देशविरतिस्थानयोः, सर्वविरतिसामायिकेऽप्येतद् गुणकरमेव, **अप्रमादवृद्धिजनकत्वेन** परिस्फुटैवाप्रमादवृद्धिर्यतेरप्याहारप्रत्याख्यानसेवने यथाकालमुपलभ्यते, किं पुनर्गृहस्थस्य सर्वारम्भाऽऽहारप्रवृत्तस्य । तस्य हि यावत्येव विषये प्रत्याख्यानं तावत्येवाप्रमादवृद्धिः प्रत्याख्यानमन्तरेण सर्वत्र प्रमादात् प्रवृत्तेः, **आज्ञातो विज्ञेयं** गुणकरमेव ॥१३॥

**एत्तो य अप्पमाओ, जायइ एत्थमिह अणुहवो पायं ।**
**विरतीसरणपहाणे, सुद्धपवित्तीसमिद्धिफलो ॥२०८॥ ५/१४**

**अतः** प्रत्याख्यानाद् **अप्रमादो जायत** आहारपरिभोगविषयः। **अत्र** वस्तुन्यप्रमादाख्ये [इह 'अस्मिन् प्रत्याख्यानस्याप्रमादजननलक्षणेऽर्थे' - अटी.] **अनुभवः प्रायः** स्वसंवेदनमत्र प्रमाणम्। स चाप्रमादः कीदृगित्याह-**विरतिस्मरणप्रधानः**। प्रत्याख्यानाद्धि भवन्नप्रमादो विरतिं स्मारयति-अतस्तत्प्रधान**शुद्धप्रवृत्ति-समृद्धिफलः**। शुद्धा चासौ प्रमादपरिहारेण, प्रवृत्तिश्च क्रिया च, [तस्याः समृद्धिः] तत्समृद्धिः फलमस्य अप्रमादस्येति तथोच्यते ॥१४॥

ननु चेदमद्धाप्रत्याख्यानं प्रतिनियतकालप्रतिनियताहारविषयत्वेन विधीयमानं कथं सर्वसावद्ययोगविरतिरूपं सामायिकं न बाधते? तस्य सर्वकालं सर्वद्रव्यविषयत्वादित्याशङ्क्याह-

**न य सामाइयमेयं, बाहइ भेयग्गहणे वि सव्वत्थ।**
**समभावपवित्तिणिवित्तिभावओ ठाणगमणं [1]च ॥२०९॥ ५/१५**

**न च सामायिकं** सर्वसामायिकम् **एतत्प्रत्याख्यानमाहारविषयं बाधते। भेदग्रहणेऽपि** विशेषग्रहणेऽपि त्रिविधादिगते, **सर्वत्र** सर्वस्मिन्, **समभावप्रवृत्तिनिवृत्तिभावतो** यतः समभावव्यवस्थित एव प्रवृत्तिनिवृत्ती सर्ववस्तुषु करोति। तद्भावतः स्वभावात् **स्थानगमन**भावात्। स्थानं हि गमनपरिहारेणावस्थितं गमनं **च** स्थानपरिहारेण। तद्यथाक्रियमाणं समभावं न बाधते, येन यत्करोति तत्र रागो, यतो निवर्तते तत्र द्वेषः, एवं रागद्वेषौ समभावबाधकौ न भवतः। प्रवृत्ति-निवृत्त्यौ (निवृत्त्ययोः) शास्त्रोक्तत्वेन संपादनात्, न ह्यसौ स्वतन्त्रः किञ्चित्करोति परिहरति वा। केवलं यद्यथा शास्त्रे प्रवृत्तिविषयत्वेन निवृत्तिविषयत्वेन वा देशकालाद[द्य]पेक्षया प्रतिपाद्यते तद्विधत्ते, तेनास्य समभावबाधा न क्वचिदुपजायते ॥१५॥ (१. व. अटी.)

ननु चाकारा अपवादा विशेषास्त इमे आहारप्रत्याख्यान उक्ताः, सामायिके नोक्ता तत्कथमेत-दित्याशङ्कमान आह -

**सामइए आगारा, महल्लतरगे वि नेह पण्णत्ता।**
**भणिया अप्पतरे वि हु, नवकाराइम्मि तुच्छमिणं ॥२१०॥ ५/१६**

**सामायिके** सर्वविरतिरूपे **आकाराः** प्रागुक्ताः **महत्तरकेऽपि** द्रव्यकालविषयापेक्षया, **नेह प्रज्ञप्ता भणिताऽल्पतरेऽपि** द्रव्यकालापेक्षयैव। '**हु**' शब्दो वाक्यालङ्कारे। **नमस्कारादौ** नमस्कारसहितादौ। **तुच्छमिदम्** असारमिदम्, युक्तिरहितत्वात्। तथाहि-महाविषय एव सर्वसामायिके आकारा वक्तुं युज्यन्ते, न पुनरल्पतरविषये नमस्कारादिप्रत्याख्याने, तत्कथं विपरीतत्वान्न तुच्छमिदम् ॥१६॥

एवं परेणोक्ते सत्याह -

**समभावे च्चिय तं जं, जायइ सव्वत्थ आवकहियं च ।**
**ता तत्थ न आगारा, पण्णत्ता किमिह तुच्छं ति ॥२११॥ ५/१७**

**समभाव एव** रागद्वेषविकलाध्यवसाय एव सामान्येन **तत्** सर्वविरतिसामायिकम् । **यद्** यस्माज्जायते सम्भवति **सर्वत्र** वस्तुनि **जायते** चेतनाचेतनस्वभावे **यावत्कथितं च** यावज्जीवं च, **ततस्तत्र** सामायिके **नाऽऽकाराः प्रज्ञप्ताः । किमिह तुच्छमिति** न किञ्चिदत्रासारम् ॥१७॥

**तं खलु निरभिस्संगं, समयाए सव्वभावविसयं तु ।**
**कालावहिम्मि वि परं, भंगभया नावहित्तेण ॥२१२॥ ५/१८**

**तत् खलु** सामायिकं **निरभिष्वङ्गं** निराशंसमेव, **समतया** मध्यस्थतया **सर्वभावविषयं त** सर्वपदार्थविषयमेव । ननु यदि सर्वद्रव्य-क्षेत्र-काल-भावविषयं तदिष्यते, तत्कथं यावज्जीवमित्युक्तमिति पराभिप्रायमुररीकृत्य वक्ति-**कालावधावपि** यावज्जीवलक्षणे, **परं** [जीवनात् परतः - अटी.] केवलं **भङ्गभयान्नावधित्वेन** । इदमत्र तात्पर्यं-यावज्जीवमिति न जीवितावधिपरिच्छेदेन, परतोऽनिष्टतया सर्वसावद्ययोगविरतेरेवमभिधानम् । परतः किलाहं सर्वमासेविष्ये भोगादि, जीवितावधिकालमात्रमेव मम सावद्ययोगनिवृत्तिर्नैवमर्थं यावज्जीववचनम्, किन्तु जीवितावधेः परतो मम सामायिकस्य भङ्गो मा भूदित्यवधिः क्रियते । यतो देवादिषु गतस्य न विरतिसम्भवो नाप्यात्मनो वशित्वम् । यदैव च वशित्वं तदैव तत्सामायिकं कर्तुं युक्तं प्रतिज्ञया । न हि सन्देहविषये विदुषां[षा] प्रतिज्ञा कर्तुं युक्ता । यावज्जीवितं तु प्रतिज्ञाकरणे स्वतन्त्रत्वान्न दोषः, तस्य ह्येवंविधोऽध्यवसायोऽस्ति यावतायुर्मया पालनीयमिदमिति, कर्मपारतन्त्र्यात् तदन्यथा भावेऽपि न तस्य कश्चिद्दोषः । स हि यदा यदा सामायिकपरिणामं प्रतिपद्यते तदा तदा तदध्यवसाय एव भवति, न विपरीताध्यवसायः । एवं मोक्ष-ग्रहणयोः सतोरपि न यावज्जीवप्रतिज्ञाक्षतिः । कर्मपारतन्त्र्यविकलस्तु यथोत्क्षिप्तभरनिर्वाहत्वेन सर्वदा तत्प्रतिज्ञ एव भवति, न मोक्ष-ग्रहणवान् । तेन भङ्गभयादेवमभिधत्ते, न पुनरवधित्वेन तदध्यवसायस्य परतोऽपि भावतः संकल्प्याह तदत्यन्तवल्लभत्वात् । तस्य केवलं कर्मपराव्यत्ययतः सुष्ठूच्यते । सर्वभावविषयमेतत् ॥१८॥

सामायिकनिरभिष्वङ्गता प्रतिपादनार्थमेवेदमाह -

**मरणजयज्झवसियसुहडभावतुल्लमिह हीणणाएण ।**
**अववायाण न विसओ, भावेयव्वं पयत्तेणं ॥२१३॥ ५/१९**

**मरणजयाध्यवसितसुभटभावतुल्यं** 'मर्तव्यं वा मया जयश्रीर्वा प्राप्तव्या' एवं व्यवसाय-

स्थितशूरपुरुषसङ्कल्पकल्पम्। **इह** प्रक्रमे। **हीनज्ञातेन** हीनोदाहरणेन। क्रोधादिकषायकलुषितचेता विषयोपभोगार्थी, परजिघांसाप्रवृत्तः, परोपकारानपेक्षः, विनयादिविकलश्च शरीरनिरपेक्षतामात्रेण पराक्रमते। भावसामायिकवांस्तु तद्गुणविपरीतविशेषयुक्तो महाकल्याणाशयो विधेयानुष्ठानविषये सदाप्रमत्ततया रात्रिंदिवं तदेवाध्यवसायित्वेन महापुरुषाचरितमार्गसेवनपरः सदैवोत्तमपदाभिलाषी सांसारिकसुखनिरपेक्षः पराक्रमते, तेनोत्तमपुरुषव्यापारापेक्षया हीनज्ञातमेतत्। तेन हीनज्ञातेनेत्युच्यते, न पुनः परमार्थतस्तत्तुल्यमुत्तमत्वादस्य भावसामायिकस्य। **अपवादानां न विषयः** शास्त्रोक्तसामायिकमुत्सर्गापवादगर्भत्वादस्य, तयोश्च शास्त्रेणैव विहितत्वात्, तदनपेक्षस्य सर्वदैवासम्भवात्। न हि शास्त्रोक्तप्रकारमन्तरेण कदाचिदेतत् सामायिकं सम्भवति। तस्मात्तदुत्तीर्णरूपाणामन्येषामपवादानामविषयो। **भावयितव्यम् प्रयत्नेन** भावनीयमादरेण शास्त्रोक्तास्तु विशेषा नैव निराक्रियन्ते, तदविनाभावित्वात्तस्येति सूक्ष्मधियाऽऽलोचनीयम्॥१९॥

**एत्तो च्चिय पडिसेहो, दढं अजोग्गाण वण्णिओ समए।**
**एयस्स पाइणो वि हु, बीयं ति विही य अइसइणा ॥२१४॥ ५/२०**

**अत एव** निरभिष्वङ्गपरिणामरूपत्वादेव सामायिकस्य **प्रतिषेधो** निषेधो **दृढम्** अत्यर्थम् **अयोग्याना** जीवानां संसाराविरक्तानां, **वर्णितः** प्रतिपादितः **समये** सिद्धान्ते। ननु यदि यावज्जीवसामायिकप्रतिपालनविकलानां सामायिकं न दीयत एवायोग्यत्वात् कथमाभीरजीवस्य सामायिकविधिः स्तूयत इत्याह-**एतस्य** सामायिकस्य **घातिना(पातिनो)**ऽप्यवश्यप्रतिपातिनोऽ**पि**। हुर्वाक्यालङ्कारे। **बीजमिति** कृत्वा **विधिश्चातिशयिना** कृतः। इदमुक्तं भवति। योऽतिशयिना सर्वज्ञेन भगवता महावीरस्वामिनाभीरजीवस्य नियमप्रतिपातिनोऽपि सामायिकस्य विधिरूपदर्शितः। स पूर्वजन्मन्यव्यक्तसामायिकस्पर्शनद्वारेण तथाविधद्वेषविनिवृत्त्या कालान्तरे भवान्तरमाश्रित्य बीजमवन्ध्यकारणं व्यक्तं भावसामायिकस्य भविष्यतीति निश्चित्य विहितः तेनातिशयिना। तथाविध उपदिश्यमानो न दोषाय। अनतिशयिना तु सर्वेणैव [१]योग्याश्रयणं विधेयम्। न यस्मै कस्मैचित् सामायिकं देयम्, उत्तमपुरुषयोग्यत्वादस्य॥२०॥ (१. योग्यं लक्षीकृत्येत्यर्थः।)

**तस्स उ पवेसनिग्गमवारणजोगेसु जह उ अववाया।**
**मूलाबाहाएँ तहा, नवकाराइम्मि आगारा ॥२१५॥ ५/२१**

**तस्य तु** सामायिकस्य, **प्रवेशः** आलये **निर्गमः** तत एव, [१]परस्परपरिहारस्थितिरूपावेतौ, यदा प्रवेशः, तदा न निर्गमो, यदा निर्गमः तदा न प्रवेश, एकस्यैव सामायिकवतः। **वारणं** प्रतिषेधो निवृत्तिः, योजनं तु **योगः** व्यापारप्रवृतिः, एतावपि वारण-योगौ तथैव निवृत्ति-प्रवृत्त्यात्मकत्वादनयोस्तदेतेषु प्रवेश-निर्गम**वारण-योगेष्** वर्त्तमानस्य **यथा तु अपवादा** यथैते

विशेषा **मूलाबाधया** भावसामायिकाबाधया मध्यस्थस्य सदौदासीन्ये वर्तन्ते, नैकत्रैकदाप्रवृत्तस्य तत्र रागो चान्यतो निवृत्तस्य तत्र द्वेषः, सममेव परस्परविरुद्धयोः निष्पादयितुमशक्यत्वान्न सामायिकबाधा । **तथा नमस्कारादौ आकाराः** क्रियमाणा न सर्वविरतिसामायिकं बाधन्ते । नमस्कारसहितादेरप्रमादवृद्धिजनकत्वेनेष्टत्वात् ॥२१॥ (१. परस्परपरिहारस्थितिरूपौ एतौ ।)

ननु च तस्य तेष्वाकारेषु वर्तमानस्याऽन्यथापरिणामो भविष्यति ततश्च सामायिक-बाधैवेत्याशङ्क्याह -

**न य तस्स तेसु वि तहा, निरभिस्संगो उ होइ परिणामो ।**
**पडियारलिंगसिद्धो, उ नियमओ अन्नहारूवो ॥२१६॥ ५/२२**

**न च तस्य** साधोः **तेष्वप्याकारेषु तथा** अनुभवसिद्धरूपेण **निरभिष्वङ्गस्तु** निरभिष्वङ्ग एव सन् स्वयमन्यथारूपो **भवति परिणामः**, किन्तु तथारूप एव **प्रतीकारलिङ्गसिद्धस्तु नियमतोऽन्यथारूपः** । यदि पुनरन्यथारूपः कथञ्चिद् भवेत् ततोऽसौ प्रतीकारं प्रायश्चित्तग्रहणरूपं विधत्ते । तेन लिङ्गेन सिद्धे निरभिष्वङ्ग एव परिणामः । इदमत्र तात्पर्यम् । सर्वेष्वेव विशेषेष्वाहार-सेवना-ऽनासेवनरूपेषु वर्तमानस्य सामायिकवतस्तद्रूप एव परिणामो नान्यथात्वं भजते । यदि पुनरन्यथात्वभावःकथञ्चित् स्यात्ततोऽसौ परिणामस्य स्वसंवेदनसिद्धत्वादन्यथात्वं पश्यंस्तद्विशुद्धये प्रतीकारपरो भवेत् । [१]प्रतीकाराकरणात् तु निरभिष्वङ्गपरिणामावस्थित एवेति विज्ञायते ॥२२॥ (१. प्रतीकाराकरणात् - प्रत्यवायाभावे-दोषविशेषासेवने सति ।)

ननु चैवमाहारप्रत्याख्याने विशेषकरणेन प्रवर्तमानस्यौत्सर्गिकं समभावरूपं कथं न व्याहन्यत इत्याह -

**न य पढमभाववाघाय मो उ एवं पि अवि य तस्सिद्धी ।**
**एवं चिय होइ दढं, इहरा वामोहपायं तु ॥२१७॥ ५/२३**

**न च प्रथमभावस्य** सामायिकगतसमभावलक्षणस्य **व्याघातो** विघातो, **मो** इति निपातः, तुशब्दोऽवधारण । नैव च प्रथमभावस्याघात, **एवमप्या**हारविषयप्रत्याख्यानाऽऽकाराऽकरणे-वौत्सर्गिकस्य बाधा काचिदपि, यतः प्रवर्तते । **अपि च तत्सिद्धिः** समभावसिद्धिः, **एव-मे**वाहारविषयप्रत्याख्यानकरणेन **भवति** । **दृढमत्यर्थम्, इतरथा**ऽप्रमादवृद्धिजनकाहार-प्रत्याख्यानाऽनासेवनेन । **व्यामोहप्रायं तु** विमूढताप्रायमेव सामायिकं भवेत् । तस्मात् स्थितमेतत्, सामायिके सत्यपि गुणकरमेतदाहारप्रत्याख्यानमिति ॥२३॥

ननु च यदि यावज्जीवप्रतिज्ञया सामायिकं भवति, न पुनरित्वरकालम्, साधूनां तत्कथं समभावमोक्ष-ग्रहणनिरूपणायाम्(समभावस्य मोक्ष-ग्रहणयोरन्तराले काले अन्तर्मुहूर्त्तमपि

निरूपणायां)अपूर्वलाभे च क्वचिज्जघन्यतोऽन्तर्मुहूर्तमपि सामायिकपरिणाम इष्टः । स च यदा भवतीदृश एव शास्त्रोक्तो भवत्यनीदृशो वेत्याशङ्क्याह –

**उभयाभावे वि कुतो वि अग्गओ हंदि एरिसो चेव ।**
**तक्काले तब्भावो, चित्तखओवसमओ णेओ ॥२१८॥ ५/२४**

**उभयाभावेऽपि** प्रतिपातमाश्रित्य भावक्रिययोरभावेऽपि, **कुतोऽप्यनेकप्रकाराद्धेतोरग्रतः** पुरस्तात् क्रियापरिणामप्रतिपातकारणानि ह्यनेकानि सम्भवन्तीति कुतोऽपि ग्रहणम्। **हन्त** इत्यामन्त्रण। **ईदृश एव** शास्त्रोक्त एव न तद्विपरीतस्वरूपः। **तत्काले** विवक्षितान्तर्मुहूर्ते **तद्भावः** प्रकृतसामायिकाध्यवसायः समभावरूपः, **चित्रक्षयोपशमतो ज्ञेयः** चित्रस्वभावक्षयोपशमात् तत्कालमात्रावस्थायी तादृश एव बोद्धव्यः । एवं यत् केचिद् मन्यन्ते यावज्जीवसमभावप्रतिपालनाभावादन्यादृश एव जघन्यकालभावी सामायिकपरिणाम इति तन्निरस्तं भवति । चित्रक्षयोपशमिकात् तात्त्विकस्यापि सामायिकपरिणामस्य स्वल्पकालावस्थायिनः सम्भवात् शास्त्रोक्तत्वेन प्रतिनियतकालावस्थायिनोऽपि निषेधमशक्यत्वात् अन्यथा शास्त्रप्रामाण्यभावप्रसङ्गात्, तस्य च धर्माधर्मव्यवस्थामङ्गीकृतत्वात्। यत उक्तम् –

*धर्माधर्मव्यवस्थायाः शास्त्रमेव नियामकम् ।*
*तदुक्ताऽऽसेवनाद्धर्मस्त्वधर्मस्तद्विपर्ययात्* [ ] ॥२४॥

'भेदे विधिसमायुक्तम्' इत्युक्तम्, [५/४ गाथायाम्] तद्विवृण्वन्नाह –

**आहारजाइओ एस एत्थ एक्को वि होति चउभेओ ।**
**असणाइजाइभेया, नाणाइपसिद्धिओ णेओ ॥२१९॥ ५/२५**

**आहारजातित** आहारजातिमाश्रित्य, **एष** आहारः **अत्र** प्रस्तावे । **एकोऽपि** सन् तत्सामान्याङ्गीकरणेन **भवति चतुर्भेदः** चतुर्विकल्पः **अशनादिजातिभेदात्** अशन-पान-खाद्याऽऽस्वाद्यजातिविशेषात् । **ज्ञानादिप्रसिद्धितो** ज्ञान-श्रद्धाना-ऽऽचरणप्रसिद्धेः **ज्ञेयो** ज्ञातव्योऽन्यथाविविक्तरूपज्ञान-श्रद्धानाद्यभावात् ॥२५॥

एतदेवाह –

**नाणं सद्दहणं गहण पालणा विरतिवुड्ढि चेवं ति ।**
**होइ इहरा उ मोहा विवज्जओ भणियभावाणं ॥२२०॥ ५/२६**

**ज्ञानमवबोधरूपम्, श्रद्धानं** रूचिरूपम्, **ग्रहणं** शास्त्रीयनियमस्य, **पालना** गृहीतनियमस्यैव, **विरतिवृद्धि** विरतिपरिणामाभिवृद्धिरेवमित्याहारभेदावस्थापने। **भवतीति** सर्वेषु पदेष्वभिसम्बध्यत।

**इतरथा** त्वन्यथा तु **मोहात्** प्रत्याख्येयविषयविभागापरिज्ञानाद्**विपर्यया** वैपरीत्यम्। **भणितभावानां** ज्ञानश्रद्धानादीनां सम्यक् परिज्ञानाभावे सर्वेषामेव विपर्ययः स्यात्तस्माज्ज्ञानादिसम्पादनादिभेदोपादानां शास्त्रोक्तमविरुद्धम् ॥२६॥

अशनादिभेदनिरूपणायाह -

**असणं ओयणसत्तुगमुग्गजगाराइ खज्जगविही य ।**
**खीरादि सूरणादी, मंडगपभिती य विण्णेयं ॥२२१॥ ५/२७**

अश्यत इति **अशनम्**, रूढित **ओदन-सत्तुक-मुद्ग-यगारादि** [-जगार्यादि-अटी.] लोक-समयसिद्धम् **खाद्यकविधिश्च** लोकप्रतीतः **क्षीरादि**, आदिशब्दाद्दधिघृतादिपरिग्रहः। तथा 'सूरणादि [सूरणकन्दप्रभृति अटी.] **मण्डकप्रभृति च** मण्डकापूपादि च **विज्ञेयम्** ॥२७॥

अधुना पानमाह -

**पाणं सोवीरजवोदगाइ चित्तं सुराइयं चेव ।**
**आउक्काओ सव्वो, कक्कडगजलाइयं च तहा ॥२२२॥ ५/२८**

पीयत इति **पानम्**। **सौवीरयवोदकादि**, आदिशब्दात्तिलतुषोदकादिपरिग्रहः। **चित्रं** विविधं **सुरादिकम्**। **चैवा**दिशब्दात् सीधुप्रसन्नादिपरिग्रहः। **अप्कायः सर्व** आश्रयभेदेन सरित्सरोवरादि-गतः, **कर्कटक** जम्बूफलादिरसविशेषसन्मिश्रसलिलादिकं **च तथा** पानमिति वर्तते ॥२८॥

अधुना खादिममाह -

**भत्तोसं दन्ताई, खज्जूरं नालिकेरदक्खादी ।**
**कक्कडिगंबगफणसाइ बहुविहं खाइमं णेयं ॥२२३॥ ५/२९**

भक्तं च तदोषं च रूढ्या **भक्तौषं** परिभृष्टचनकधानादि। **दन्तादि** गुडसंस्कृतदन्तपवनादि देशविशेषप्रसिद्धम्, **खर्जूरं** प्रसिद्धमेव। **नालिकेरद्राक्षादि**, आदिशब्दाद्दाडिमादिपरिग्रहः। **कर्कटिकाम्रकपनसादि बहुविधं** बहुप्रकारं फलं जातं सर्वमपि **खादिमं ज्ञेयम्**। तृप्तिहेतुत्व-विशेषोपलक्षणेन खाद्यं ज्ञातव्यम् ॥२९॥

उक्तं खादिमम्, स्वादिममाह -

**दंतवणं तंबोलं, चित्तं तुलसीकुहेडगादी य ।**
**महुपिप्पलिसुंठादी य अणेगहा साइमं होइ ॥२२४॥ ५/३०**

**दन्तवनं** [1]दन्तकाष्ठं चेतनाचेतना(न)रूपम्। **ताम्बूलं** नागवल्लीपत्रजातम्। **चित्रं** नाना प्रकारम्।

**तुलसी** सुरसा । **कुहेटकः** प्रसिद्ध एव तावादी यस्य तत्तथा सुरसा-कुहेटकादि **च** द्रव्यजातम् । **मधु-पिप्पली-सुंठ्यादि चानेकधा स्वादिमं भवति**, स्वाद्यमित्यर्थः ॥३०॥ (१. यष्टिमधुः ।)

अशनादिगतव्यापकन्यायोपदर्शनायाह -

**लेसुद्देसेणेते, भेया एएसि दंसिया एवं ।**
**एयाणुसारओ च्चिय, सेसा सयमेव विण्णेया ॥२२५॥ ५/३१**

**लेशोद्देशेन** स्वल्पसामान्याभिधानेनैते **भेदा** ओदनसौवीरादयः । **एतेषामशनादीनां दर्शिता** उक्ता **एवमुक्तनीत्या एतदनुसारत एव** प्रदर्शितभेदानुसारत एव **शेषा** एतज्जातीयाः, **स्वयमेव** स्वबुद्ध्यैव **विज्ञेया** यथास्वमनुक्ताः ॥३१॥

अप्रमादवृद्धिजनकत्वमात्रमेवाहारप्रत्याख्यानस्य दर्शयन्निदमाह -

**तिविहाइभेयओ खलु, एत्थ इमं वण्णियं जिणिंदेहिं ।**
**एत्तो च्चिय भेएसु वि, सुहुमं ति बुहाणमविरुद्धं ॥२२६॥ ५/३२**

**त्रिविधादिभेदतः खल्वादिशब्दाच्चतुर्विधग्रहः, अत्राधिकारे इदं** प्रत्याख्यानं **वर्णितं** कथितं **जिनेन्द्रैः** क्षीणराग-द्वेष-मोहैः समुत्पन्नकेवलज्ञानैर्भगवद्भिः । **अत एव** हेतोः **भेदेष्वपि** परिहार्यद्रव्यगतेषु **सूक्ष्ममितिकृत्वा** प्रमादपरिहारस्यानेकधा सूक्ष्मत्वात् शास्त्रोक्तं प्रत्याख्यानम्, **बुधानामविरुद्धं** विदुषामप्रतिषेधनीयम् । सर्वविरतावनाहारभेदप्रत्याख्यानं सम्भवतीति भावः ॥३२॥

**अण्णे भणंति जतिणो, तिविहाहारस्स न खलु जुत्तमिणं ।**
**सव्वविरइओ एवं, भेयग्गहणे कहं सा उ ? ॥२२७॥ ५/३३**

**अन्ये** दिगम्बरादयः **भणन्ति** प्रतिपादयन्ति । **यतेः** साधोस्त्रि**विधाहारस्य** पानकरहितस्य, **न खलु** [युक्तं-सङ्गतम् अटी.] **प्रयुक्तमिद** नैव युक्तं प्रत्याख्यानं **सर्वविरतितः** सर्वविरतेः **एवं** त्रिविधाहारप्रत्याख्यानं **भेदग्रहण** वान्याहारपरिवर्जनेऽपि शेषग्रहणे **कथं** नैवेति गम्यते **सा त**, तु शब्दः पुनः शब्दार्थः । सा सर्वविरतिः कथं पुनरेवं भवति, साकल्येन सर्वस्मादाहाराद्विरत्यनुपपत्तेः ॥३३॥

एवं पराभिप्रायमाशङ्क्य परिहरन्नाह -

**अपमायवुड्ढिजणगं एयं एत्थं ति दंसियं पुव्वं ।**
**तब्भोगमित्तकरणे सेसच्चागा तओ अहिगो ॥२२८॥ ५/३४**

**अप्रमादवृद्धिजनकमेतदाहारप्रत्याख्यानमत्रेति** जैनमार्गे **दर्शितमेतत् पूर्वं** प्राक् **तद्भोगमात्रकरण** पानाहारपरिभोगमात्रनिवर्तने [सति-अटी.] **शेषत्यागादशनादित्रयत्यागात्, तको**ऽसावप्रमादः **अधिको** वर्तते त्रिविधाहारप्रत्याख्याने[अधिकः सर्वविरतिसामायिकप्रतिपत्ति-प्रभवाऽप्रमादापेक्षया अर्गलतरः - अटी.]। तेन यतेरपि [न] कश्चिद्दोषः सूत्रानुसारितया प्रवृत्तेः, तस्य च सर्वानुग्रहपरत्वात्। शक्तानां तु स्वयंकरणमधिकृत्य चतुर्विधाहारत्यागोऽपि न निवार्यते, न तु प्ररूपणमङ्गीकृत्यैष न्यायो विद्वत्प्रवृत्तिश्च साधनमत्र। ते हि यथामार्गं प्रवर्तमानाः शास्त्राराधनपरा एव ॥३४॥

पुनरप्याह परः -

**एवं कहंचि कज्जे, दुविहस्स वि तन्न होति चिंतमिदं ।**
**सच्चं जतिणो णवरं, पाएण न अण्णपरिभोगो ॥२२९॥ ५/३५**

**एवमप्रमादवृद्धिजनकत्वेनाहारप्रत्याख्याने भेदसेवनेऽभ्युपगम्यमाने, कथञ्चित्** केनचित् प्रकारेण देशकालरोगाद्यपेक्षया, **कार्ये** ग्लानत्वादौ **द्विविधस्याप्याहारस्याशनखाद्य**[खादिम]गतस्य **तत्प्रत्याख्यानं न भवति चिन्त्यमिदं** भवत्येवेति[परा]भिप्रायः सूरिराह **सत्यमवितथमेतत्** - **यतेः** साधोः शरीरापाटवादाविष्यत एव। द्विविधस्यापि प्रत्याख्यानमागमानुसारितया अनुमतत्वान्न बाधकमस्माकम्। **नवरं** केवलं **प्रायेण** बाहुल्येन, यतेः **नान्यपरिभोगो** न स्वाद्यपरिभोगः पुष्टालम्बनमन्तरेण तथा प्रवृत्तेरभावात् संसारविरक्तत्वात्तस्यैव यतिधर्माधिकारित्वादन्यस्य त्वनधिकृतत्वात् मध्यस्थो बुद्धिमानर्थी शास्त्रेऽधिक्रियत इति विद्वत्प्रवादः ॥३५॥

उक्तं भेदद्वारम्, अधुना भोगद्वारमाह -

**विहिणा पडिपुण्णम्मी, भोगो विगए य थेवकाले उ ।**
**सुहधाउजोगभावे, चित्तेणमणाकुलेण तहा ॥२३०॥ ५/३६**

**विधिनागमोक्तेन प्रतिपूर्णे** प्रत्यासन्ने, **भोगः** आहारपरिभोगः, **विगते च स्तोककाले तु** परिपूर्णतानन्तरं विगत एव कियत्यपि क्षणमात्रे। *'पूर्णेऽपि स्तोककालावस्थानात्तीरितं भवती*ति वचनात्। **शुभधातुयोगभावे** शुभानां वायुपित्तकफधातूनां भावे भवने, शुभयोगानां च कुशलमनोवाक्कायव्यापाररूपाणां भावे। **चित्तेन मनसाऽनाकुलेनाव्याक्षिप्तेन, तथा** चित्तेन चाकुलेन व्याकुलचित्ताहारपरिभोगेन दोषसद्भावात्-उक्तं च **सुश्रुत चिकित्साशास्त्रे**

*ईर्ष्याभयक्रोधपरिक्षतेन, लुब्धेन तृड्दैन्यनिपीडितेन ।*
*प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिणाममेति ॥३६॥*

कथं पुनः परिपूर्णेऽपि प्रत्याख्यानकाले **धर्मनिरता भुञ्जत** इत्याह [गाथायुगलेन] -

**काऊण कुसलजोगं, उचियं तक्कालगोयरं नियमा ।**
**गुरुपडिवत्तिप्पमुहं, मंगलपाढाइयं चेव ॥२३१॥ ५/३७**

**सरिऊण विसेसेणं, पच्चक्खायं इमं मए पच्छा ।**
**तह संदिसाविऊणं, विहिणा भुंजंति धम्मरया ॥२३२॥ ५/३८ जुग्गं ।**

**कृत्वा कुशलयोगं** कुशलव्यापारम् **उचितं** योग्यं **तत्कालगोचरं** भोजनकालविषयं **नियमान्नियमेन गुरुप्रतिपत्तिप्रमुखं** गुरुविनयादिकं **मङ्गलपाठादिकं चैव** मङ्गलपाठः पञ्चनमस्कारपाठः । आदिशब्दाद्धर्ममङ्गलादिप्रशस्तश्रुतपरिग्रहः तत्कालेऽन्यपाठस्यानुचितत्वान्निमित्त-शास्त्रेषु प्रतिषिद्धत्वाद् यदेव ह्युभयलोकहितं तदेव ततो प्रशस्यते । तत्पुरुषाचरितं [तत्वेन] च एतत्प्रवृत्तिर्न निरसनीया । तन्निरसने सदनुष्ठाननिरासप्रसङ्गान्महाऽऽशातनादोषप्रसङ्गाच्च । त एव हि सर्वथोचितज्ञाः प्रमाणीकरणीयास्तद्बहुमाने भगवद्बहुमानासेवनात्, यो गुरुं मन्यते स मामिति तदाज्ञाप्रामाण्यात् । तद्वचनान्यथाकरणे दोषप्रतिपादनात् । उक्तं च **चन्द्रकवेध्यप्रकीर्णके** चिरन्तनवाचनायाम् -

*छट्ठ-ऽट्ठम-दसम-दुवालसेहिं भत्तेहिं जो परक्कमइ ।*
*अकरेंतो गुरुवयणं, सो होइ अणंतसंसारी ॥१॥* [ चन्द्रवेध्य. गा.३५ ]

*धण्णा आयरियाणं, निच्चं आइच्च-चंदसरिसाणं ।*
*संसारमहण्णवपारयाण पाएसु निवयंति ॥२॥*

*इहलोइयं च कित्तिं, लभंते आयरियभत्तिरागेण ।*
*देवगइं च विसिट्ठं, धम्मे य अणुत्तरं बोहिं ॥३॥*

*देवा वि देवलोए, निच्चं दिव्वोहिणा वि जाणेत्ता ।*
*आयरियाण सरंता, आसणसयणाणि मुंचंति ॥४॥*

*देवा वि देवलोए, निग्गंथं पवयणं अणुसरंता ।*
*अच्छरगणमज्झगया, आयरिए वंदगा एंति ॥५॥* [ चन्द्रवेध्य. गा.३१-३४ ]

तस्मात्तत्प्रामाण्यादिदमनुसरणीयम् ॥३७॥

**स्मृत्वा विशेषेण प्रत्याख्यातमिदं** नमस्कारसहित-पौरुष्यादि **मया पश्चाद्** भोगादतीतकाले **तथा सन्देश्या**ऽनुज्ञाप्य 'अनुजानीत यूयमिदानीं पारयामि'इति **विधिना** भोजनविधिना वा ।

**भुञ्जते** पारयन्ति **धर्मरता** धर्मसक्तचेतोवृत्तयः ॥३८॥

स्वयंपालनायां विधिसमायुक्तमित्युक्तम् [५-४ गाथायाम्] तदङ्गीकृत्याह -

**सयपालणा य एत्थं, गहियम्मि वि ता इमम्मि अन्नेसिं ।**
**दाणे उवएसम्मि य, न हुंति दोसा जहऽण्णत्थ ॥२३३॥ ५/३९**

**स्वयंपालना चात्र** प्रत्याख्यानप्रस्तावे **गृहीतेप्य**ङ्गीकृतेऽपि सति । **ततस्तस्मादस्मिन्** प्रत्याख्याने **अन्येषा** भोक्तृणां साध्वादीनां **दाने** समानीयाहारदाने **उपदेशे च** वचनेन दान-श्राद्धकुलादेः **न भवन्ति दोषाः** । कारितानुमतिजनिता **यथान्यत्र** प्राणातिपातादिप्रत्याख्याने तद्धि कृतकारितानुमतिभिः सर्वं परिह्रियते । **इदं** त्वाहारप्रत्याख्यानं स्वयं पालनेनैव चरितार्थम्, तस्मात्स्वयमुपोषितोऽपि निर्जरार्थी दद्याद्दापयेद्[वा]आनुमन्येथागमोक्तयोग्येभ्यः ॥३९॥

तथा चाह -

**कयपच्चक्खाणो वि य, आयरियगिलाणबालवुड्ढाणं ।**
**देज्जाऽसणाइ संते, लाभे कयवीरियायारो ॥२३४॥ ५/४०**

**कृतप्रत्याख्यानोऽपि** चासेविताहारविषयप्रतिषेधोऽपि **च आचार्यग्लानबालवृद्धेभ्यः** स्वावस्थापूज्येभ्योऽधिकगुणत्वादुपष्टम्भनीयत्वाच्च **दद्यादशनादि** चतुर्विधमाहारजातं । **सति लाभ** लाभान्तरायक्षयोपशम-सम्भव । **कृतवीर्याचारः** स्वानुष्ठेयनिर्वर्तितवीर्यव्यापारः, विद्यमानं हि वीर्यं स्वफलसाधकव्यापारमन्तरेणातिक्रान्तं निष्फलमिति विद्यते नैतस्मिन्, स वीर्याचार एव भवेत् साधुः ॥४०॥

तथा चाह -

**संविग्गअन्नसंभोइयाण [1]देसेज्ज सड्ढगकुलाणि ।**
**अतरंतो वा संभोइयाण जह वा समाहीए ॥२३५॥ ५/४१**

**संविग्नानां** संसारभीरूणां मोक्षाभिलाषितया ज्ञानादिसम्पन्नानां **चान्यसाम्भोगिकानां** अन्यसामाचारीप्रतिपन्नानां भिन्नवाचनाचारक्रियास्थानानामिति यावत् । **देशयेद्**दर्शयेत् । **श्राद्धककुलानि** दानश्राद्धकुलानि **अतरंतो वा** ऽनिस्तरन् वाऽशक्नुवन्नित्यर्थः । **साम्भोगिका-नामे**कसामाचारीप्रतिपन्नां देशयेदिति वर्तते । अशक्तत्वान्नाऽऽनीय ददाति, तेषां ह्यानीय दातव्यं भवति । यतो न तत्र शैक्षादीनां मतिविभ्रमः अभिन्नत्वात्समाचारस्य **यथा वे**त्यनेन प्रकारसंसूचकः, **समाधिना** आत्मसमाधानेन । प्राकृतत्वात् स्त्रीलिङ्गनिर्देशः । यथात्मनः परेषां च साधूनां समाधिस्तथा तथा दद्याद्दर्शयेद् वा ॥४१॥ (१. दंसेज्ज पा.)

एवं भावसाधूनां अङ्गीकृत्य स्वयंपालनोक्ता सह दानोपदेशाभ्याम्, अधुना श्रावकानुररीकृत्याह-

**एवमिह सावगाण वि, दाणुवएसादि उचियमो णेयं ।**
**सेसम्मि वि एस विही, तुच्छस्स दिसादवेक्खाए ॥२३६॥ ५/४२**

**एवमिह** प्रत्याख्यानकरणे **श्रावकाणामपि** सम्यग्दृष्ट्यादीनां **दानोपदेशादिशब्दात्** प्रोत्साहनादिग्रहः । **उचितमेव ज्ञेयमवबोद्धव्यम्** । **शेषे**ऽप्याहारप्रत्याख्यानाधिकारादन्यस्मिन् दानोपदेशादौ । वस्त्रादिविषये **एष विधिः** वक्ष्यमाणः **तुच्छस्य** विभवमाश्रित्य **दिगाद्यपेक्षया** दानोपदेशादीति वर्तते । दिश्यन्ते तामिति दिग् गच्छोऽभिधीयते । आदिशब्दात्कुलगणपरिग्रहः । वस्त्रादिदाने हि निर्विभवस्य दिगाद्यपेक्षा, महाधनसम्पन्नस्य पुनरुदाराशयस्य न काचिदियम् ॥ यतः -

*सड्ढेणं सति विभवे, साहूणं वत्थमाइ दायव्वं ।*
*गुणवंताणऽविसेसा तुच्छस्स दिसादवेक्खाए ॥*

[ प्रत्याख्यानस्वरूपं गाथा-२६६ ] प्रकटोऽयमागमः ॥४२॥

एष विधिरित्यस्य विवरणायाह -

**संतेयरलद्धिजुएयरादिभावेसु होइ तुल्लेसु ।**
**दाणं [1]दिसाइभेए, तीएऽदेंतस्स आणादी ॥२३७॥ ५/४३**

एकस्य **सद्वस्त्रादि**, अपरस्य **त्वसदविद्यमानम्** । एको **लब्धियुक्तः** साधुरसदपि लब्धियुक्तत्वाल्लभते । **इतरस्त्वलब्धियुतो** न लब्धिसम्पन्नः । आदिशब्दात् क्लेशाऽक्लेशस्वपक्ष-परपक्ष लब्धियुक्तत्वपरिग्रहः । एतदादि**भावेषु** साधुगतविशेषेषु **भवति** विधेयतया, **तुल्येषु** सत्सु **दानं** वितरणं प्राज्ञस्य दातुरधिकारिणश्च **दिगाद्यभेदे** सति न दिगाद्यपेक्षया, साधुगतविशेषेषु सत्सु, यत्र यत्र धर्मं प्रत्यनिर्वाह्ये धर्माधिकारिणस्तत्र तत्र दानं प्रवर्तयितव्यम् । धर्मक्षतिमनपेक्ष्य **तया** दिगाद्यपेक्षया[1] **ऽददतः** सतः । **आज्ञादयो** दोषाः आज्ञाभङ्ग, अनवस्था, मिथ्यात्व, विराधनालक्षणाः समयोक्ताः । दानधर्माधिकारी चायं -

[१. अथ तुल्येऽपिभावे दिशमतिक्रम्य ददतः किंस्यादित्याह-**तया** दिशा। **अददतो**ऽप्रयच्छता। आज्ञादय... दोषा भवन्ति । 'दाणं दिसाए'त्ति पाठान्तरं । तत्र तुल्येषूक्तभावेषु दानं दिशा देयं भवति, अटी.] (१. दिसाए. अटी.)

*गुरुणाऽणुण्णायभरो णाओ वज्जियधणो य एयस्स ।*
*दायाऽतुच्छपरियणवग्गो सम्मं दयालू य ॥ [ विंशतिर्विंशिका गाथा-१३६ ]॥४३॥*

अनुबन्धभावे च विधिसमायुक्तमित्युक्तम्, [५-४ गाथायाम्] तत्प्रकटनायाह -

**भोत्तूणमुचियजोगं, अणवरयं जो करेइ अव्वहिओ ।**
**नियभूमिगाइ सरिसं, एत्थं अणुबंधभावविही ॥२३८॥ ५/४४**

**भुक्त्वा** प्रत्याख्यानपरिपूर्तेरनन्तरम्, **उचितयोग**मुचितव्यापारं स्वाध्यायध्यानादिकम् । **अनवरतं** सततं **यः करात्यव्यथितो**ऽपीडित एव विधत्ते । **निजभूमिकायाः सदृशं** स्वभूमिकानुगतम्, **अत्र** प्रक्रमे। **अनुबन्धभावविधिरयं** कुशलप्रवाहाविच्छेदभावविधिरिह च यः करोत्युचितयोगमित्य-भिधानेऽपि न वाक्यपरिपूर्णता, तेनार्थात्तस्येति गम्यते । तस्याय-मनुभावयोर्विधिः । परमार्थतः सातत्येन तत्प्रत्याख्यानमेवमनुपालितं भवति यदि भोजनानन्तर-मुचितयोगं स्वाध्यायादिकं विधत्त। गुरूपाध्याय-प्रवर्ति-स्थविर-गीतार्थ-साधु-श्रावकयोग्यम्, अन्यथा भोजनस्याऽकिञ्चित्करत्व-प्रसक्तेः। तत्त्वेवमर्थमाश्रीयते धर्मार्थिभिर्यथा तेनोपबृंहितानां विशिष्टगुणलाभः, तदभावे तु भोजनमभोजनमेवातत्फलत्वात् स्यात् । तस्मादनुबन्ध-मिच्छताऽवश्यमेवोचितयोगो विधेयो भावविधिसमा-युक्तत्वमपि प्रत्याख्यानस्यानुबन्ध-स्वरूपप्रदर्शनेनैवावेदितं द्रष्टव्यम्। भावप्रधानं ह्येवं त्रिविधमेव तद् भवति ततस्तत्प्रतिपादनेनैव सर्वत्र भाव उपलक्षितो भवति ॥४४॥

पुरुषभूमिकापेक्षया देशकालौचित्यापेक्षया च स्वाध्यायादिपरिहारेणापि व्यापारान्तरस्य निर्जराहेतुत्वमुपदर्शयन्नाह -

**गुरुआएसेणं वा, जोगंतरगं पि तदधिगं तमिह ।**
**[१]गुरुआणाभंगम्मी, सव्वेऽणत्था जओ भणितं ॥२३९॥ ५/४५**

**गुर्वादेशेन वा** सर्व एव गौरवार्हा गुरुत्वात् प्रन्य(प्रधान)स्थानीयास्तदादेशेन तदाज्ञया **योगान्तरमपि** स्वाध्यायादिवृद्धिहेतुं वस्त्रपात्रपरिकर्मरूपं करोतीति पूर्वेण सम्बन्धः । **तदधिकं** ततः स्वाध्यायादिरधिकं तत्काले **तदिह** योगान्तरं वर्तते। गुरुभिरादिष्टमन्यदपि योगान्तरं करोत्येवम्। तेनाप्यनुबन्धशुद्धताप्रत्याख्यानस्य स्वाध्यायादिवत् तस्याऽपि कर्मक्षयफलत्वात् । गुर्वाज्ञा-प्रतिपालनमेव च सर्वत्र कर्मक्षयफलम्। यतो **गुर्वाज्ञाभङ्गे** गुर्वदेशान्यथाकरणे **सर्वेऽनर्था** सम्भवतीति दृश्यम्, प्रत्युक्तत्वाद्, **यतो भणितमेत**दागमान्तरे ॥४५॥ (१. गुरुआणाभंगम्मि य-शा.)

तदेवाह -

**छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखमणेहिं ।**
**अकरेंतो गुरुवयणं, अणंतसंसारिओ होति ॥२४०॥ ५/४६**

**षष्ठाष्टमदशमद्वादशैः** समयोक्तैः तपोविशेषैः **मासार्धमासक्षपणैश्च** । व्यक्तिबहुत्वाद् बहुवचनम् । एतैर्युक्तोऽपीति गम्यते । **अकुर्वन् गुरुवचन**माज्ञाभङ्गेन **अनन्तसांसारिको भवति**, भूयांसं संसारं निर्वर्तयतीत्यर्थः ॥४६॥

भावप्राधान्येन किञ्चिदुपदिशन्नाह -

**बज्झाभावेऽवि इमं, पच्चक्खंतस्स गुणकरं चेव ।**
**आसवनिरोहभावा, आणाआराहणाओ य ॥२४१॥ ५/४७**

**बाह्याभावे**ऽपि आहारविषयविशिष्टपदार्थाभावेऽपि, सामान्येन वा धनधान्याद्यभावे **अपीदं** प्रत्याख्यानं **प्रत्याचक्षाणस्य** प्रत्याख्यातुः **गुणकरं चैव** गुणकरणशीलमेव भावविशुद्धहेतुत्वेन, **आश्रवनिरोधभावा**द्धेतोर्हिंसाद्याश्रवद्वारनिवृत्तिसद्भावात् । [आदिपदेन अनुबन्धहिंसा ज्ञेया] । **आज्ञाराधनातश्चा**ज्ञा भागवतीशास्त्ररूपा तत्परिपालनातश्च । आश्रवनिरोधो हि स्वसंवेदनेनानुभूयत । सत्स्वसत्सु वा बाह्यपदार्थेषु आज्ञाविराधनापि शब्दप्रत्याख्येयविषयत्वेन प्रसिद्धाः, अन्यथा हि न सर्वविषयं प्रत्याख्यानमाद्रियते । यान्येव स्वाधीनानि वस्तूनि तेष्वेव प्रत्याख्यानादरो भवेत् । सामान्येन च सर्वतोऽपि विरतिः श्रूयते जिनागमे तस्मान्न स्वाधीनमात्रविषयमेतत् ॥४७॥

अस्यैव समर्थनायाह -

**न य एत्थं एगंतो, सगडाहरणादि एत्थ दिट्ठंतो ।**
**संतं पि नासइ लहुं, होइ असंतं पि एमेव ॥२४२॥ ५/४८**

**न चात्राप्येकान्तो** यदुत बाह्यस्य सद्भाव एव । सद्भाव एवैकान्तेन **शकटोदाहरणाद्यत्र दृष्टान्त**स्तदुदाहरणमेवं श्रूयते-केनचित् ब्राह्मणेन नानाविधप्रत्याख्यानग्रहणे गृहस्थैः क्रियमाणेऽसम्भवविषयत्वेन धर्मफलमुपहास्यबुद्धिविषयं मन्यमानेन । यद्यसत्यपि वस्तुनि प्रत्याख्याये नियमं कुर्वतां धर्मः सम्पद्यते । ततो मम शकटभक्षणप्रत्याख्यानं भवन्नीत्याऽस्त्विति गृहीतम्, तस्य चान्तराले बहुभिर्वर्षैरतीतैः । कदाचित् कान्तारोत्तीर्णस्यातिबुभुक्षितस्य कदाचित् राजपुत्र्या समुत्सवननिमित्तं ब्राह्मणमन्वेषमाणया पक्वान्नीकृतशकटं भोजनपात्र्यां न्यस्तम् । ततस्तद् दृष्ट्वा स चिन्तयामास-साधूक्तं साधुभिः सर्वस्यापि वस्तुनः सम्भवोऽस्तीति सविषयमेव सर्वं प्रत्याख्यानम् । तदिदमनुप्राप्तं कथमहं स्ववाक्प्रतिज्ञाया लोपं करिष्यामीति परिहृतवान् तत्सम्बोधनार्थं च स्ववार्तां कथितवानिति सङ्क्षेपतो दृष्टान्तः । एतदेव स्फुटीकरोति **सदपि** विद्यमानमपि वस्तु स्वगृहादौ **नश्यत्य**पैति भाग्यविपर्ययेण, [लघु शीघ्रम् अटी.] **भवत्यसदपि** पूर्वमविद्यमानमपि **एवमेव** पुण्योदयेन, तस्मान्नात्रैकान्तः ॥४८॥

पुनरपि प्रत्याख्यानस्य निर्विषयतापरिहारार्थमाह -

**ओहेणाविसयं पि हु, न होइ एयं कहंचि नियमेण ।**
**मिच्छा[1]संसज्जियकम्मओ तहा सव्वभोगाओ ॥२४३॥ ५/४९**

**ओघेन** सामान्येन **अविषयमपि** विषयरहितमपि । हु शब्दो वाक्यालङ्कारे । **न भवत्येतत्** प्रत्याख्यानम्, किन्तु स्वविषयमेव न **कथञ्चित्** केनचित् प्रकारेण कर्मवैचित्र्यलक्षणेन । **नियमेनावश्यंतया** । कुत इत्याह-**मिथ्यासंसज्जितकर्मतस्तथा सर्वभोगात्** । मिथ्याभावेन संसज्जितम्, आसज्जितम् परिप्रापितम् जीवप्रदेशेषु यत्कर्म तत्तथोच्यते। इदमुक्तं भवति-जीवेन ह्यनेकविधानि कर्माण्यनेकफलानि विहितानि, तद्विपाकदोषाद् अनिच्छन्नपि सर्वं वस्तूपनतमुपभुङ्क्तेऽनाभोगात् । तेन सर्ववस्तुविषयसम्भोगसम्भवमाकलयद्भिः सर्वमेव वस्तु प्रत्याख्यानस्य विषयीक्रियते । तेनैकान्तविषयं तं (तद्) न भवति ॥४९॥ (१. संसंजित अटी.)

ननु यद्येवं स्वकृतकर्मफलविपाकमनुभवद्भिः प्राणिभिः सर्वमेव वस्तुविषयीकृत्य प्रत्याख्यानं क्रियते, ततो विरतिभङ्गः स्यात् कर्मण्यन्यथावेदनाद्वा । स्वफलदानासामर्थ्यम्, तत्र विरतिपक्षे कर्मण उपक्रमणीयस्वभावत्वेनान्यथावेदनेऽपि प्रत्याख्यानं सफलमुपदर्शयन्नाह -

**विरतीए संवेगा तक्खयओ भोगविगमभावेण ।**
**सफलं सव्वत्थ इमं, भवविरहं इच्छमाणस्स ॥२४४॥ ५/५०**

**विरतौ** सत्यां विरतेर्वा **संवेगाद्धे**तोस्तत्क्रियते । मिथ्यासंसज्जितकर्म**क्षयतः** संवेगस्याचिन्त्यसामर्थ्य-समन्वितत्वेन **भोगविगमभावेन** पूर्वमिथ्याकर्मपरिप्रापितभोगफलपरिक्षयसद्भावेन फलभावेन इति यावत् । **सफलं** विद्यमानफलं प्रत्याख्यातुः **सर्वत्र** द्रव्यक्षेत्रकालादौ **इदं** प्रत्याख्यानं **भवविरहम्** संसारविरहं **इच्छतः** सतः साधोरन्यस्य वा ॥५०॥ (१ इच्छमाणेणं जे.)

**॥ प्रत्याख्यानविधि-पञ्चाशकं पञ्चमं सम्पूर्णम् ॥**

# ॥ षष्ठं स्तवनविधि-पञ्चाशकम् ॥

पूजानन्तरं प्रत्यासत्त्या प्रत्याख्यानमभिहितं पुनः पूजाविशेषरूपत्वात् द्रव्य-भावस्तवयोः स्वरूपनिर्णयार्थमिदमाह -

**नमिऊण जिणं वीरं, तिलोगपुज्जं समासओ वोच्छं ।**
**थयविहिमागमसुद्धं, सपरेसिमणुग्गहट्ठाए ॥२४५॥ ६/१**

**नत्वा** मनो-वाक्-कायव्यापारसमानकर्तृकत्वमुपदर्शयन् क्त्वान्तेन 'वक्ष्ये' क्रियापदमभिसम्बध्नाति । नमस्कृत्य **जिनं** जितरागादिदोषसमुदयं **वीर** महाविक्रमं **त्रिलोकपूज्यं** देवासुरमनुजपूजनीयं **समासतः** सङ्क्षेपेण **वक्ष्ये**ऽभिधास्ये । **स्तवविधिं** स्तवप्रकारम् **आगमशुद्धं** सम्यक्परिच्छेदावदातं **स्वपरयोनुग्रहाथ**मनुग्रहकाम्यया ॥१॥

स्तवविधिमेवाह -

**दव्वे भावे य थओ, दव्वे भावथयरागओ सम्मं ।**
**जिणभवणादिविहाणं, भावथओ चरणपडिवत्ती ॥२४६॥ ६/२**

**द्रव्ये भावे च स्तवः** पूजाविशेषो **द्रव्ये** द्रव्यविषयः स्तवः । किमुच्यत ? इत्याह-**भावस्तवरागता** भावस्तवानुरागात् सर्वविरतिबहुमानात् । **सम्यग**वैपरीत्येन **जिनभवनादिविधानम्**, आदिशब्दाद् बिंबादिपरिग्रहः । **भावस्तवः चरणप्रतिपत्तिः** सर्वविरत्यभ्युपगमस्तत्प्रतिज्ञेति यावत् ॥२॥

द्रव्यस्तवस्वरूपप्रतिपिपादयिषयाऽऽह -

**जिणभवणबिंबठावणजत्तापूयादि सुत्तओ विहिणा ।**
**दव्वत्थउ त्ति णेयं, भावत्थयकारणत्तेण ॥२४७॥ ६/३**

**जिनभवनं** सिद्धायतनम्, **बिम्बस्थापनं** प्रतिमाप्रतिष्ठा, **यात्रा** जिनमहोत्सवः **पूजा** पुष्पवस्त्रादिभिः । जिनभवन-बिम्बस्थापन-यात्रा-पूजादि-समाहारस्यैकत्वादेकवचनम् । **सूत्रतः** सूत्रादागमाद् विधिना कर्तव्योपदेशरूपेण **द्रव्यस्तव इति ज्ञेयं** ज्ञातव्यं । **भावस्तवकारणत्वेन** सर्वविरतिपरिणामहेतुत्वेन, तदेव ह्यागमात् क्रियमाणं सर्वविरतिहेतुतां प्रतिपद्यते । तदनुरागत एव तत्र प्रवृत्तेः, न तन्निरपेक्षः परिणामो द्रव्यस्तवो नाम ॥३॥

कथं पुनरेतत् तद्धेतुता प्रतिपद्यते इत्याह -

**विहियाणुट्ठाणमिणं ति एवमेयं सया करेंताणं ।**
**होइ चरणस्स हेऊ, नो इहलोगादवेक्खाए ॥२४८॥ ६/४**

**विहितानुष्ठानं** पूर्वपुरुषकृतसुन्दरानुष्ठानम् **इदमित्येवमागमाकाराय** बुद्ध्या । **एवमेतज्जिन-** भवनादि **सदा कुर्वतां । भवति चरण[स्य]**चारित्रपरिणामस्य **हेतुः** । व्यवच्छेद्यमाह-**नो** नैव **इहलोकाद्यपेक्षया**ऽस्मदनुष्ठानादिहलोके मनुष्यभवे, आदिशब्दात् परलोके देवस्य भवे वा ममेदं फलं भविष्यतीति, एतत्परिहारेण चरणस्य हेतुः ॥४॥

**एवं चिय भावथए, आणाआराहणाउ रागोऽवि ।**
**जं पुण इयविवरीयं, तं दव्वथओ वि नो होइ ॥२४९॥ ६/५**

**एवमेवोक्तयैव** बुद्ध्या, **भावस्तवे** भावस्तवविषये । **आज्ञाराधनात्** आगमाराधनात् **रागोऽप्यनु**रागोऽपि बहुमान इत्यर्थः । **यत्पुन**र्जिनभवनादि **एतद्विपरीतं** विहितानुष्ठानबुद्धिविपरीतम्। **तद् द्रव्यस्तवोऽपि न भवति** भावस्तवाऽकारणत्वात् ॥५॥

**भावे अतिप्पसंगो, आणाविवरीयमेव जं किंचि ।**
**इह चित्ताणुट्ठाणं, तं दव्वथओ भवे सव्वं ॥२५०॥ ६/६**

**भावे** द्रव्यस्तवस्य **अतिप्रसङ्गो**ऽतिव्याप्तिरनिष्टापत्तिरित्यर्थः । **आज्ञाविपरीतमेवागम-** विपर्यस्तमेव तन्निराकृतमित्यर्थः । **यत्किञ्चि**दनियतस्वरूपम् **इह चित्रानुष्ठानं** हिंसादि **तद् द्रव्यस्तवो भवेत् सर्वम**विशेषेण ॥६॥

**जं वीयरागगामी, अह तं नणु गरहियं पि हु स एवं ।**
**सिय उचियमेव जं तं आणाआराहणा एवं ॥२५१॥ ६/७**

**यद्वीतरागगामि** यद्वीतरागविषयम्, **अथ तद**नुष्ठानं हिंसादि तद् द्रव्यस्तवो भवतीति सम्बध्यत। **ननु गर्हितमपि** तन्निन्दादिः **स** द्रव्यस्तव **एवं** प्राप्नोति । **स्यादे**तत्परमतमाशङ्कते । **उचितमेव यद**नुष्ठानं जिनपूजादि **तद्** द्रव्यस्तवः **आज्ञाऽऽराधना**गमाराधना । **एवं** द्रव्यस्तवः प्राप्तः, स चास्माभिरिष्ट एव ॥७॥

पूर्वोक्तमेव व्यनक्ति -

**उचियं खलु कायव्वं, सव्वत्थ सया नरेण बुद्धिमता ।**
**इय फलसिद्धी नियमा, एस च्चिय होइ आण त्ति ॥२५२॥ ६/८**

**उचितं खलूचितमेव कर्तव्यं** विधेयं **सर्वत्र** क्षेत्रादौ **सदा** सर्वकालम् । **नरेण** पुरुषेण **बुद्धिमता** विवेकिना **इति, फलसिद्धिरेवं** कार्यनिष्पत्तिः **नियमान्नियमेन । एषैव** च **भवत्याज्ञा** भवत्युचित करणरूपा । न ह्यनुचितानुष्ठानप्रवृत्तो भगवदाज्ञामाराधयति ॥८॥

**जं पुण एयविउत्तं, एगंतेणेव भावसुण्णं ति ।**
**तं विसयम्मि वि न तओ, भावत्थयाहेउओ णेयं ॥२५३॥ ६/९**

**यत्पुनरेतद्वियुक्तमा**ज्ञाराधनावियुक्तम्, **एकान्तेनैवा**ज्ञानुसार(सारित्व)विरहेण स्वाग्रहप्रवृत्त्या गुणदोषालोचननिरपेक्षया **भावशून्यमिति** क्षायोपशमिकभावशून्यमौदयिकभावप्रवृत्त्या ज्ञानो [ज्ञानावरणीयकर्मो]पशमादिविरहात् तद् **अनुष्ठानं, विषयेऽपि** वीतरागादौ न **तको** न द्रव्यस्तवो **भावस्तवाहेतुतो** भावस्तवाकारणत्वेन भावप्रधानत्वान्निर्देशस्यैवं **[ज्ञेयम्]** अवगन्तव्यम् ॥९॥

कथं पुनः द्रव्यस्तवो भावस्तवहेतुरिव सन्, नाऽभिमतः इत्याह –

**समयम्मि दव्वसद्दो, पायं जं जोग्गयाए रूढो त्ति ।**
**निरुवचरितो उ बहुहा, पओगभेओवलंभाओ ॥२५४॥ ६/१०**

**समये** सिद्धान्ते **द्रव्यशब्दो** द्रव्यार्थाभिधायी ध्वनिः **प्रायो** बाहुल्येन **यद्** यस्माद् **योग्यतायां** योग्यतावाचित्वे **रूढः** प्रसिद्धिमुपगतः **इति** हेतोः **निरूपचरितस्तू**पचरितान्निष्क्रान्तो निरूपचरितोऽनुपचरित इत्यर्थः **बहुधाऽ**नेकधा **प्रयोगभेदोपलम्भात्** प्रयुक्तिविशेषदर्शनात् ॥१०॥

एतदेव निदर्शनद्वारेण आह –

**मिउपिंडो दव्वघडो, सुसावगो तह य दव्वसाहु त्ति ।**
**साहू य दव्वदेवो, एमादि सुते जओ भणियं ॥२५५॥ ६/११**

**मृत्पिण्डो द्रव्यघटो** घटपरिणामहेतुत्वात् तस्यैव तथाभवनात् । **सुश्रावकः तथा च द्रव्यसाधुरिति** सुन्दरदेशविरतिपरिणामभावितस्य साधुपरिणामभवनात् प्रत्यासत्त्या देशविरति-कण्डकेभ्यः सर्वविरतिकण्डकप्राप्तेः । बाहुल्यापेक्षया तस्यैव तथावृत्तेः । **साधुश्च द्रव्यदेवो** देवायुर्निबन्धभाजनत्वेन । **एवमादि,** आदिशब्दाद् द्रव्यनारकपरिग्रहः । **श्रुते यतो भणितं** द्रव्यशब्दमाश्रित्य ॥११॥

प्रस्तुतद्रव्यस्तवस्वरूपनिगमनायाह –

**ता भावत्थयहेऊ, जो सो दव्वत्थओ इहं इट्ठो ।**
**जो उ न एवंभूओ, स अप्पहाणो परं होति ॥२५६॥ ६/१२**

**तत्** तस्माद् **भावस्तवहेतु**र्भावस्तवकारणं परम्परया । **यः द्रव्यस्तवः** हेतो[**इष्टो**]ऽभिमतः, **यस्तु** यः पुन**र्नैवम्भूतो** योग्यताविकलत्वेन, **सोऽप्रधानो** द्रव्यस्तवः, **परं** केवलं **भवति** । अप्रधानवृत्तित्वाद् द्रव्यशब्दस्य ॥१२॥

**अप्पाहण्णे वि इहं, कत्थइ दिट्ठो उ दव्वसद्दो त्ति ।**
**अंगारमद्दगो जह, दव्वायरिओ सदाऽभव्वो ॥२५७॥ ६/१३**

**अप्रधानेऽपीह** शास्त्रे **क्वचित्** प्रदेशे **दृष्टस्तु द्रव्यशब्द इति** हेतोः । **अङ्गारमर्दको यथा द्रव्याचार्यो**ऽप्रधानाचार्यः **सदा** सर्वदा **अभव्यो**ऽभव्यजीवस्वरूपो भव्यराशेरूत्तीर्णत्वेन ॥१३॥

**अप्पाहण्णा एवं, इमस्स दव्वत्थवत्तमविरुद्धं ।**
**आणाबज्झत्तणओ, न होइ मोक्खंगया नवरं ॥२५८॥ ६/१४**

**अप्राधान्याद्** हेतोः **एवमस्या**गमनिरपेक्षद्रव्यस्तवस्य प्रागुक्त**द्व्यस्तवत्वम**प्रधानस्तवत्वम् **अविरुद्धम**विरोधवत् । **आज्ञाबाह्यत्वादा**गमविकलत्वात् **न भवति मोक्षाङ्गता** मोक्षहेतुता । **नवरं** केवलमागमोक्तस्यैव मोक्षाङ्गत्वाभ्युपगमात् ॥१४॥

तत्किमस्मादप्रधानद्रव्यस्तवात् किञ्चित् फलं नास्तीत्याशङ्क्याह -

**भोगादिफलविसेसो, उ अत्थि एत्तो वि विसयभेदेण ।**
**तुच्छो उ तगो जम्हा, हवति पगारंतरेणावि ॥२५९॥ ६/१५**

**भोगादिफलविशेषस्तु** भोगोपभोगसम्पत्तिप्रभृतिफलभेदस्तु, **अस्ति** विद्यते सम्भवति **अतोऽप्य**प्रधानद्रव्यस्तवाद् **विषयभेदेन** वीतरागसर्वज्ञादिपूजारूपेण **तुच्छस्तु** फलमाश्रित्य स्वल्पस्तु वर्तते । **तकः** स भोगादिफलविशेषः **यस्माद् भवति प्रकारान्तरेणाप्य**कामनिर्जरा-बालतपो-ऽनुकम्पादिना ॥१५॥

ननु च द्रव्यस्तवयोः [= प्रधानाऽप्रधानयोः] शास्त्रोक्तत्वेन शुभपरिणामहेतुत्वे समाने सति कस्मादयं [आज्ञाप्रधान द्रव्यस्तवः] भावस्तव एव न भवतीत्येतदाशङ्क्याह -

**उचियाणुट्ठाणाओ, विचित्तजइजोगतुल्ल मो एस ।**
**जं ता कह दव्वत्थओ ? तद्दारेणऽप्पभावाओ ॥२६०॥ ६/१६**

**उचितानुष्ठानाच्च** स्वभूमिकायोग्यविहितानुष्ठानरूपत्वाद् **विचित्रयतियोग्य**[ ग ]**तुल्य एव एष** वर्तते [**'तुल्ल मा'** तुल्यः, मकारोऽत्र प्राकृतशैलीभवः - अटी.] । स्वाध्यायध्यानादियतिव्यापार-समानतया तद्वदागमविहितत्वादेवायं विधीयते । **यद्** यस्मात् [तत् तस्मात्-अटी.] **कथं**

**द्रव्यस्तवः तद्द्वारेण** द्रव्यस्तवमुखेन **अल्पभावादल्पश्चासौ** भावश्च, ततो भावाल्पत्वादित्यर्थः ॥१६॥

एतदेवाविर्भावयितुमाह -

**जिणभवणादिविहाणद्दारेणं एस होति सुहजोगो ।**
**उचियाणुट्ठाणं पि य, तुच्छो जइजोगओ नवरं ॥२६१॥ ६/१७**

**जिनभवनादिविधानद्वारेणैष** द्रव्यस्तवः **भवति शुभयोगः** शुभव्यापारः । **उचितानुष्ठानमपि च** भवत्येष **तुच्छो** भावस्तवगतिविशिष्टशुभव्यवसायविकलः **यतियोगतो** यतिव्यापारात् सर्वस्मादेव स्वाध्यायादेः **नवरं** केवलम् ॥१७॥

कथं पुनर्यतियोगात् तुच्छ इत्याह -

**सव्वत्थ निरभिसंगत्तणेण जइजोग मो महं होइ ।**
**एसो उ अभिस्संगा, कत्थइ तुच्छेऽवि तुच्छो उ ॥२६२॥ ६/१८**

**सर्वत्र** चेतनाचेतने द्रव्यक्षेत्रकालभावचतुष्टये वा **निरभिष्वङ्गत्वेन** सङ्गरहिततया, **यतियोगो** यतिव्यापारो मनोयोगादिः **महान् एव भवति** गुरुरित्यर्थः । **एष तु** द्रव्यस्तवः शुभयोगः **अभिष्वङ्गाद्** हेतोः **क्वचित्** स्त्र्यादौ **तुच्छेऽप्यसारेऽपि** स्वरूपेण **तुच्छस्तु** तुच्छ एव ॥१८॥

एतदेव समर्थयन्नाह -

**जम्हा उ अभिस्संगो, जीवं दूसेइ नियमओ चेव ।**
**तद्दूसियस्स जोगो, विसघारियजोगतुल्लो त्ति ॥२६३॥ ६/१९**

**यस्मात् त्वभिष्वङ्गो**ऽनुरागपरिणामो **जीवं दूषयति** विकारयति **नियमत एव** नियमेनैव । **तद्दूषितस्याभिष्वङ्गोपद्रुतस्य योगो** व्यापारो **विषग्रस्तयोगतुल्य इति** हेतोः । विषग्रस्तो हि यं व्यापारमारभते विह्वलत्वात्तं न सम्यगवस्थापयति । एवमस्याप्यभिष्वङ्गविषदूषितस्य विषग्रस्त-पुरुषव्यापारकल्प एव व्यापारः ॥१९॥

व्यतिरेकमाह -

**जइणो अदूसियस्सा, हेयाओ सव्वहा नियत्तस्स ।**
**सुद्धो उ उवादेए, अकलंको सव्वहा सो उ ॥२६४॥ ६/२०**

**यतेरदूषितस्य** रागादिभिरविकृतस्यामलिनस्येत्यर्थः **हेयात्** त्याज्याद्धिंसादेः **सर्वथा निवृत्तस्य शुद्धस्तु** शुद्ध एव **उपादेये** वस्तुनि सम्यग्ज्ञानादावाज्ञाप्रवृत्त्या **अकलङ्को** दोषरहितः **सर्वथा**

सर्वप्रकारैः **स तु** यतियोगः ॥२०॥

दृष्टान्तद्वारेणानयोश्चैव विशेषप्रतिपादनायाह -

**असुहतरंडुत्तरणप्पाओ दव्वत्थओऽसमत्तो य ।**
**नइमाइसु इयरो पुण, समत्तबाहुत्तरणकप्पो ॥२६५॥ ६/२१**

**अशुभतरकाण्डोत्तरणप्रायः** काण्डकोपचितशाल्मली तरुकाण्डोत्तरणतुल्यः **द्रव्यस्तवो-ऽसमाप्तश्च,** द्रव्यस्तवादेव न मोक्षनिष्पत्तेः । **नद्यादिषु** नदीह्रदप्रभृतिषु । **इतरः पुनर्भावस्तवः समाप्तः** स्वयमेव परिपूर्णो वा **बाहूत्तरणकल्पो**ऽशुभतरकाण्डादिपरिहारेण न हि भावस्तव-सम्पन्नोऽन्यतरकाण्डं समीहते, तस्यैव स्वकार्यनिवर्तनक्षमत्वात् ॥२१॥

दृष्टान्तभूयस्त्वदिगुपदर्शनार्थमाह -

**कडुओसहाइजोगा, मंथररोगसमसन्निभो वा वि ।**
**पढमो विणोसहेणं, तक्खयतुल्लो च बिइओ उ ॥२६६॥ ६/२२**

**कटुकौषधादियोगाद्,** आदिशब्दात् शिरावेधक्षारपातादिग्रहः । **मन्थररोगसमसन्निभो वापि** दीर्घकाल-सम्पात्यरोगप्रशमतुल्यः **प्रथमो** द्रव्यस्तवः, **विनौषधेन तत् क्षयतुल्यश्च** रोगक्षयतुल्यः **द्वितीयस्त** भावस्तवः। द्रव्यस्तवाद्धि न सर्वथा रोगोच्छेदः । तेन रोगप्रशमसाधर्म्यमभिहितम्, भावस्तवस्तु सर्वथा रोगक्षयकारीत्येवमभिधानम् ॥२२॥

द्रव्यस्तवजन्यफलविशेषप्रतिपादनायाह -

**पढमाउ कुसलबंधो, तस्स विवागेण सुगतिमादीया ।**
**तत्तो परंपराए, बितिओ वि हु होइ कालेण ॥२६७॥ ६/२३**

**प्रथमाद्** द्रव्यस्तवात् **कुशलबन्धः** पुण्यबन्धः **तस्य विपाकेना**नुभावेन फलप्रदानसामर्थ्येन। **सुगत्यादया** देव-मनुजगति-सम्पत्ति-सौभाग्यादयः सम्भवन्तीति शेषः **ततो** द्रव्यस्तवात् **परम्परया**ऽविच्छिन्नसन्तानरूपया **द्वितीयोऽपि** भावस्तवोऽपि **हु**र्वाक्यालङ्कारे **भवति** जायते **कालेन** कियतापि व्यतिक्रान्तेन कालस्यापि तथाभव्यत्वपरिपाकहेतुत्वादेवमभिधानम् ॥२३॥

कथं पुनर्द्रव्यस्तवाद् भावस्तवो गरीयानित्याशङ्क्याह -

**चरणपडिवत्तिरूवो, थोयव्वोचियपवित्तिओ गुरुओ ।**
**संपुण्णाणाकरणं, कयकिच्चे हंदि उचियं तु ॥२६८॥ ६/२४**

**चरणप्रतिपत्तिरूप**श्चरणाभ्युपगमरूपः । **स्तोतव्योचितप्रवृत्तितो गुरुकः,** स्तोतव्ये भगवति

सर्वज्ञे विषयभूते। उचितप्रवृत्तिस्तदाज्ञासम्पादनरूपा द्रव्यस्तवेऽपि हि प्रतिमापूजादिरूपे भगवदाज्ञैव निबन्धनम्, तत्प्रामाण्येन तत्प्रवृत्तेः अधिकारिवशात् तद्व्यवस्थापनात्, शास्त्रमन्तरेण प्रवृत्तेरप्य-प्रवृत्तिकल्पत्वात् हिंसाद्यारम्भसम्भवेऽपि शास्त्रोक्तत्वेन तत्करणात्, शास्त्रादेवाऽऽयव्यय-बहुत्वाल्प-त्वसिद्धेः गरीयान् भावस्तवः, तदपेक्षया **सम्पूर्णाज्ञाकरण** सर्वविरतिपरिपालनम् **कृतकृत्ये** भगवति, **हन्तोचितं तु** वर्तते। न हि भगवति कृतकृत्ये परमार्थेन किञ्चित्कर्तव्यमस्ति। केवल-मधिकारित्ववशाद् भावस्तव एव विधेयस्तदसामर्थ्ये द्रव्यस्तवः। सकलभावस्तवकरणे द्रव्यस्तवस्य तदन्तर्गतत्वेन सम्पादितत्वात् ॥२४॥

**णेयं च भावसाहुं, विहाय अण्णो चएति काउं जे ।**
**सम्मं तग्गुणनाणाभावा तह कम्मदोसा य ॥२६९॥ ६/२५**

'**न**' इति प्रतिषेधे **इदं च** सम्पूर्णाज्ञाकरणं **भावसाधुं** विहायागमोक्तयतिं **विहायान्योऽपरः शक्नोति कर्तुं** नैव शक्नोतीत्यर्थः। **जे** इति निपातोऽवधारणार्थः। **सम्यक् तद्गुणज्ञानाभावाद्**-वैपरीत्येनाऽऽज्ञागुणपरिज्ञानाभावात्। न हि यथा भावयतिराज्ञागुणान् वेत्ति तथाऽन्यः **तथा कर्मदोषाच्च** कथञ्चित्परिज्ञानसंभवे (आज्ञाकरणगुणपरिज्ञानेऽपि। अटी.) चारित्रमोहनीय-कर्मदोषाच्च ॥२५॥

**एत्तो च्चिय फुल्लामिसथुइपडिवत्तिपूयमज्झम्मि ।**
**चरिमा गरुई इट्ठा, अण्णेहि वि निच्चभावाओ ॥२७०॥ ६/२६**

**अत एव** संपूर्णाज्ञाकरणस्य भावसाधुसाध्यत्वादेव। '**फुल्लाऽऽमिसथुत्तीपडिवत्तिपूयमज्झम्मि**' **पुष्पामिष-स्तुतिप्रतिपत्तिपूजामध्ये** पुष्पाणि जात्यादीनि, उपलक्षणत्वाद् वस्त्ररत्नाद्यन्तर्भावः। आमिषमाहारः, उपलक्षणत्वात् पत्रफलपरिग्रहः। स्तुतिर्वाचा गुणकीर्तनम्। प्रतिपत्तिरनुष्ठान-प्रतिज्ञाऽहिंसावैराग्यलक्षणा। एता एव पूजाः। तन्मध्ये **चरमा** प्रतिपत्तिः पूजा **गुर्वी** मान्या बहुमानविषयत्वेन **इष्टा** हि मताऽन्यैरपि ग्रन्थकारः **नित्यभावाद्** ध्रुवभावेन सर्वदैव भावादिति यावत्। शेषास्तु कादाचित्क्यः भवन्ति ॥२६॥

**दव्वत्थयभावत्थयरूवं एयमिह होइ दट्ठव्वं ।**
**अण्णोऽण्णसमणुविद्धं, निच्छयतो भणियविसयं तु ॥२७१॥ ६/२७**

**द्रव्यस्तवभावस्तवरूपमे**तत्स्वरूपम्। **एतदिह** प्रागुक्तं **भवति द्रष्टव्यं** विज्ञेयम्। **अन्योन्यसमनुविद्ध** परस्परानुगतं **निश्चयतो** निश्चयेन शास्त्रपरिणामरूपेण परस्परवियुक्तत्वे-ऽनयोः सम्यक् शास्त्रपरिणतेः **भणितविषयं** तु प्रतिपादितविषयमेव स्वरूपं द्रष्टव्यम् ॥२७॥

कुत एतत्परस्परानुगतमित्याह -

**जइणो वि हु दव्वत्थयभेओ अणुमोयणेण अत्थि त्ति ।**
**एयं च एत्थ णेयं, इय [1]सुद्धं तंतजुत्तीए ॥२७२॥ ६/२८**

**यतेरपि द्रव्यस्तवभेदो** द्रव्यस्तवविशेषः कश्चिद् द्रव्यस्तव इत्यर्थः । **अनुमोदनेन** भगवत्पूजासन्दर्शनसमुल्लसत्प्रहर्षविशेषरूपानुमत्या **अस्तीति** विद्यत एवानुमोदनाजनित इति हेतोः । **एतच्च स्वरूपम् अत्र ज्ञेयम्** । द्रव्यस्तवभावस्तवयोरिति, शुद्धमेव **शुद्धं** परस्परानुगतत्वेन **तन्त्रयुक्त्या**गमनीत्या ॥२८॥ (१.सिद्धं-जे.)

**तंतम्मि वंदणाए, पूयणसक्कारहेउ उस्सग्गो ।**
**जतिणो वि हु निद्दिट्ठो, ते पुण दव्वत्थयसरूवे ॥२७३॥ ६/२९**

**तन्त्रे** शास्त्रे **वन्दनायां** चैत्यवन्दनायां **पूजनसत्कारहेतोः** पूजनसत्कारनिमित्तम् **उत्सर्गः** कायोत्सर्गः । **यतेरपि हु** [हु शब्दोऽलङ्कृतौ अटी.] **निर्दिष्टः** पठितः । **ते पुनः** पूजनसत्करणे **द्रव्यस्तवस्वरूपे** । प्राकृतत्वाद्वा बहुवचनम् । तौ पुनः पूजन-सत्कारौ द्रव्यस्तवस्वरूपौ ॥२९॥

**मल्लाइएहिं पूया, सक्कारो पवरवत्थमाईहिं ।**
**अण्णे विवज्जओ इह, दुहा वि दव्वत्थओ एत्थ ॥२७४॥ ६/३०**

**माल्यादिभिः पूजा** ग्रथिताग्रथितकुसुमैः । **सत्कारः** सत्क्रिया, **प्रवरवस्त्रादिभिः** । **अन्ये विपर्यय इह** पूजासत्कारस्वरूप इति मन्यन्ते **द्विधाप्युभयपक्षेऽपि द्रव्यस्तवोऽत्र** पूजासत्काररूपः ॥३०॥

ननु यतेः कथं द्रव्यस्तवभेदः ? अनुमोदनाद्वारेणास्तीत्युच्यते । कथञ्चिदारम्भरूपो ह्ययं गृहस्थविधेयस्तदनुमोदने च सर्वविरतिक्षतिप्रसङ्गः । शेषारम्भानुमतिवदिति पराभिप्रायमाशङ्क्याह -

**ओसरणे बलिमाई, न चेह जं भगवया वि पडिसिद्धं ।**
**ता एस अणुण्णाओ, उचियाणं गम्मई तेण ॥२७५॥ ६/३१**

**अवसरणे** समवसरणे देवनिष्पादिते, **बल्यादि** समयप्रसिद्धमेव । **न चेह यद् भगवतापि प्रतिषिद्ध** निराकृतम् । **तत्** तस्माद् **एष** द्रव्यस्तवोः **अनुज्ञातो**ऽनुमतः **उचितानाम**धिकारिणां गृहस्थानां राजामात्यादीनां **गम्यते** अवसीयते **तेन** भगवता ॥३१॥

**न य भगवं अणुजाणति, जोगं मुक्खविगुणं कदाचिदपि ।**
**न य तयणुगुणो वि तओ, न बहुमतो होति अण्णेसिं ॥२७६॥ ६/३२**

**न च भगवास्तीर्थकरः अनुजानात्यनुमन्यते योगं** व्यापारं **मोक्षविगुणं** मोक्षप्रतिकूलं **कदाचिदपि** सर्वदैव नानुजानातीत्यर्थः । **न च तदनुगुणोऽपि** सर्वज्ञाभिमतोऽपि मोक्षानुगुणो वा **तको** योगो **न बहुमता भवत्यन्येषाम्**, किन्तु बहुमत एवेष्ट एव ॥३२॥

इहैव भावार्थमाह -

**जो चेव भावलेसो, सो चेव य भगवओ बहुमतो उ ।**
**न तओ विणेतरेणं ति अत्थओ सो वि एमेव ॥२७७॥ ६/३३**

**य एव भावलेशो** द्रव्यस्तवसम्पाद्यः प्रहर्षातिशयः, **स एव च भगवतो बहुमतस्तु** आरम्भादिस्तु स्वयंव्यवस्थित एव तन्निवृत्तेरभावात् **न तको** भावलेशो **विनेतरेण** द्रव्यस्तवेन विना **इति** हेतोः **अर्थतो**ऽर्थमाश्रित्य **सोऽपि** द्रव्यस्तव **एवमेवा**नुमत एव वर्तते ॥३३॥

कुत इत्याह -

**कज्जं इच्छंतेणं, अणंतरं कारणं पि इट्ठं तु ।**
**जह आहारजतित्तिं, इच्छंतेणेह आहारो ॥२७८॥ ६/३४**

**कार्यमिच्छता** फलं वाञ्छता **अनन्तरं कारणमपि** तज्जनकम् **इष्टं तु** इष्टमेव वर्तते । कारणाविनाभावित्वात्कार्यस्य, **यथाहारजामा**हारजनितां **तृप्तिं** प्रीणनक्रियाम् **इच्छता**भिलषता [इहलोके-अटी.] **आहार** इष्टो भवतीति गम्यते ॥३४॥

अप्रतिषेधाच्चानुमतो द्रव्यस्तव इत्याह -

**जिणभवणकारणाइ वि, भरहादीणं न वारितं तेण ।**
**जह तेसिं चिय कामा, सल्लविसाईहिं णाएहिं ॥२७९॥ ६/३५**

**जिनभवनकारणाद्यपि** प्राक् प्रस्तुतं **भरतादीनां न वारित** न निषिद्धं **तेन** भगवता । **यथा तेषामेव** भरतादीनां **कामाः** कामभोगाः **शल्यविषादिभिर्ज्ञातैः** उदाहरणैः, यथोक्तम् -

*सल्लं कामा विसं कामा, कामा आसीविसोवमा ।*
*संसार वड्ढमाणा कामा कामा दोग्गइवड्ढणा [ ] ॥३५॥*

**ता तं पि अणुमयं चिय, अप्पडिसेहाओ तंतजुत्तीए ।**
**इय सेसाण वि एत्थं, अणुमोयणमाइ अविरुद्धं ॥२८०॥ ६/३६**

**तत्** तस्मात् **तदपि** जिनभवनकारणाद्यपि **अनुमतमेवा**नुज्ञातमेव **अप्रतिषेधाद्धेतोस्तन्त्र-युक्त्या**गमनीत्या **इति** हेतोः । **शेषाणामेव** यतीनां **अत्र** द्रव्यस्तवे, **अनुमोदनाद्यविरुद्धम्**, आदिशब्दात्कारणग्रहः, देशनया साधुर्द्रव्यस्तवं कारयति । फलनिर्देशेन प्रवर्तनात् । प्रवर्तकत्वमेव च द्रव्यस्तवप्रयोजककर्तृत्वम् । अनुमतिकारणे द्रव्यस्तवे न विरुद्धे यतेरपीत्यर्थः ॥३६॥

इतरश्च परस्परानुगतं द्रव्यभावस्तवस्वरूपमनुमोदनादि चाऽविरुद्धमित्याह -

**जं च चउद्धा भणिओ, विणओ उवयारिओ उ जो तत्थ ।**
**सो तित्थगरे नियमा, न होइ दव्वत्थयादण्णो ॥२८१॥ ६/३७**

**यच्च** यस्मात् **चतुर्धा** चतुःप्रकारो ज्ञानदर्शनचारित्रोपचारभेदात् **भणितो** वर्णितो **विनय औपचारिकस्त, यस्तत्र** चतुर्विधविनये **स** औपचारिकविनयः **तीर्थकरे** साक्षात्सर्वज्ञे तद्धि **तेष्वेव** [अर्हद्विषये - अटी.] **नियमान्नि**यमेन **न भवति द्रव्यस्तवादन्यो**ऽपरः ॥३७॥

**एयस्य उ संपाडणहेउं तह चेव वंदणाए उ ।**
**पूजणमादुच्चारणमुववन्नं होइ जतिणो वि ॥२८२॥ ६/३८**

**एतस्य तु** द्रव्यस्तवस्यैव **सम्पादनहेतोः** सम्पादननिमित्तम् । **तथा चैव वन्दनायां तु** चैत्यवन्दनायां **पूजनाद्युच्चारणं** पूजनसत्कारोच्चारणम् **उपपन्नं** युक्तं **भवति । यतेरपि** भावस्तवव्यवस्थितस्यापि ॥३८॥

**इहरा अणत्थगं तं, न य तदणुच्चारणेण सा भणिता ।**
**ता अभिसंधारणतो, संपाडणमिट्ठमेयस्स ॥२८३॥ ६/३९**

**इतरथा**ऽन्यथा **अनर्थकं** तत् पूजनाद्युच्चारणं तदर्थाभावात्, पूजनसत्कारौ हि तद् उच्चारण-स्यार्थकौ चेदनुमति-कारणाभ्यां नेष्यते, ततोऽभिधेयाभावान्निष्प्रयोजनं तदापद्यते । **न च** नैव **तदनुच्चारणेन** पूजाद्यनुच्चारणेन **सा** वन्दना **भणिता** प्रतिपादिता । यतः **तस्मादभिसन्धारणतो**-ऽभिसन्धेर्विशिष्टेच्छारूपेणाभिसन्धिना **सम्पादनम**नुमतिकारणाभ्याम् **इष्टमभि**प्रेतम् **एतस्य** द्रव्यस्तवस्य ॥३९॥

यद्येवं शास्त्रोक्तत्वादुपादेयरूपो द्रव्यस्तवः शुभपरिणामहेतुत्वाच्च भावस्तवहेतुस्तत्साक्षादेव स्वयं करणतः कस्मादयं [यतीनां] नेष्ट इत्याह -

**सक्खा उ कसिणसंजमदव्वाभावेहिं नो अयं इट्ठो ।**
**गम्मति तंतठितीए, भावपहाणा हि मुणउ त्ति ॥२८४॥ ६/४०**

**साक्षात्** [तु]स्वयं प्रवृत्तिमाश्रित्य **कृत्स्नसंयमद्रव्यभावाभ्यां** सर्वसंयमक्रियापरिणामाभ्याम्, क्रियया भावेन च सर्वसंयमो यतेः परिपालनीयत्वेन विहितः, तेन तदविरोधेन प्रवृत्तस्य । **ना** नैव **अयमिष्टो** द्रव्यस्तवः **गम्यते**ऽवसीयते **तन्त्रस्थित्या**ऽऽगमनीत्या । किमेवमभिधीयत इत्याह- **भावप्रधाना हि** उपसर्जनीकृतद्रव्यस्तवाः स्वयंकरणमङ्गीकृत्य यस्मा**न्मुनय इति** साधवो भवन्ति। तेषां हि शास्त्रविहितो भावस्तव एव प्रधानस्तदविरोधी द्रव्यस्तवोऽप्यभिमतः सर्वज्ञवचनानुसारित्वेन यथाविषयमवबोधाद्, इतरथा सर्वज्ञबहुमानानुपपत्तेः, नत्वेकं सर्वज्ञोक्तत्वे सत्यभिमतमितरच्च नाभिमतमित्यस्ति सम्यग्दृशां विभागो, विभागकरणे सम्यग्दृष्टित्वानुपपत्तेः ॥४०॥

**एएहिंतो अण्णे, जे धम्महिगारिणो उ तेसिं तु ।**
**सक्खं चिय विण्णेओ, भावंगतया जओ भणियं ॥२८५॥ ६/४१**

**एतेभ्यो** मुनिभ्यः कृत्स्नसंयमव्यवस्थितेभ्यः **अन्ये**ऽपरे **ये धर्माधिकारिणस्तु** श्रावकाः **तेषां तु** तेषां पुनः **साक्षादेव विज्ञेयो** द्रव्यस्तवः स्वयंकरणेन **भावाङ्गतया** कुशलपरिणामहेतुतया **यतो भणितमुक्तम्** ॥४१॥

किं तदुक्तमित्याह -

**अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो ।**
**संसारपयणुकरणे, दव्वथए कूवदिट्ठंतो ॥२८६॥ ६/४२**

**अकृत्स्नप्रवृत्तकानां** संयममधिकृत्याकृत्स्नं प्रवर्तन्ते ये तेषां **विरताविरतानां** देशविरतानाम् **एष खल युक्तो** द्रव्यस्तवः **संसारप्रतनुकरणः** प्राकृते पूर्वापरनिपातोऽतन्त्रमिति कृत्वा प्रतनुमल्पं संसारं करोतीति तथोच्यते **द्रव्यस्तवे कूपदृष्टान्तो** वर्णितः । यथा कूपे खन्यमाने तत्कालभाविनामन्यकालभाविनां पुरुषान्तरगतानां च परिश्रममलपिपासादीनां स्नान-पाना-ऽऽवगाहादिति तदुत्थसलिलप्रवाहादपगमो दृश्यते विवक्षितार्थसिद्धिश्च । एवमस्मिन्नपि द्रव्यस्तवे शास्त्रानुसारेण प्रवर्तमानानां तदुत्थशुभपरिणामादारम्भसमुत्थदोषापगमेनाभिषेधा [=लषिता]-र्थसिद्धिरुपलभ्यते । अतः पूर्वसूरिभिः कूपदृष्टान्तः कृतः ॥४२॥

आह परः -

**सो खलु पुप्फाईओ, तत्थुत्तो न जिणभवणमाई वि ।**
**आदीसद्दा वुत्तो, तयभावे कस्स पुप्फादी ? ॥२८७॥ ६/४३**

**स खलु** द्रव्यस्तवः **पुष्पादिकस्तत्रोक्तः** शास्त्र उक्तः **न जिनभवनादिरपि** । सूरिराह । **आदिशब्दादुक्तः**शास्त्रे प्रतिपादितः, **तदभावे** जिनभवनप्रतिमाद्यभावे **कस्य पुष्पादिद्रव्यस्तवो**

न कस्यचिन्निर्विषयत्वादिति भावः ॥४३॥

आह परः -

**णणु तत्थेव य मुणिणो, पुप्फादिनिवारणं फुडं अत्थि ।**
**अत्थि तयं सयकरणं पडुच्च नऽणुमोयणादी वि ॥२८८॥ ६/४४**

**नन्वित्यक्षमायाम् तत्रैव च शास्त्रे मुनेः** साधोः **पुष्पादिनिवारणं स्फुटमस्ति** प्रकटं विद्यत। सूरिराह **अस्ति तकवत्** तत्पुष्पादिनिवारणं **स्वयंकरणं प्रतीत्य नानुमोदनाद्यपि** नानुमोदना-कारणे ॥४४॥

इहैवाभ्युच्चयमाह -

**सुव्वइ य वइररिसिणा, कारवणं पि हु अणुट्ठियमिमस्स ।**
**वायगगंथेसु तहा, एयगया देसणा चेव ॥२८९॥ ६/४५**

**श्रूयते च** शास्त्रे **वज्ररिषिणा** वज्रस्वामिना सम्पूर्णदशपूर्वविदा प्रवचनप्रसिद्धेन तीर्थकल्पेन **कारणमपि** करणप्रयोजनकव्यापाररूपम्। **हु** शब्दो वाक्यालङ्कारे, **अनुष्ठितं** विहितम्, **अस्य** द्रव्यस्तवस्य [द्रव्यस्तवहेतुः] पुष्पादि, प्रासुकोप[क]रणानयनेनाप्रमादाद्देवादिसंयमतत्त्वेन **वाचकग्रन्थेषु तथा** देवता रक्षणीय **उमास्वातिवाचकविरचितधर्मरत्नावल्यादिश्च एतद्गता** द्रव्यस्तवगता **देशना चैव** श्रूयते । यथोक्तं- *"माल्यारोपण-धूप-प्रदीप-चिति-चामराऽऽतपत्राणामर्हत्पूजासत्कारनिमित्तं त्यागजो [ धनव्ययज इति ]धर्मः"* [ ] ॥४५॥

**दव्वत्थओ वि एवं, आणापरतंतभावलेसेण ।**
**समणुगओ च्चिय णेओऽहिगारिणो सुपरिसुद्धो त्ति ॥२९०॥ ६/४६**

**द्रव्यस्तवोऽप्येवमुक्तनीत्या आज्ञापरतन्त्र-भावलेशेना**ज्ञापरतन्त्रं भावप्रधानत्वान्निर्देशस्य भावलेशश्च द्रव्यस्तवसमुत्थः सर्वविरतिगतमहाभावापेक्षया, तत एकवद्भावस्तेन **समनुगत एव** समन्वित एव सन्, **ज्ञेया** ज्ञातव्यः **अधिकारिणो** गृहिणः। **सुपरिशुद्ध इति** सुविशुद्धस्वरूपोऽन्यस्तु न तथाऽऽज्ञापारतन्त्र्यवैकल्यात् तथाविधकुशलव्यवसायाभावाच्चैतद्दोषविकलस्तु यथोदितः ॥४६॥

अत एवाह -

**लोगे सलाहणिज्जो, विसेसजोगाउ उन्नतिनिमित्तं ।**
**जो सासणस्स जायइ, सो णेओ सुपरिसुद्धो त्ति ॥२९१॥ ६/४७**

**लोके** सर्वस्मिन्नैव जने **श्लाघनीयो** वर्णनीयः । प्रशंसास्पदत्वाद् **विशेषयोगाद्** विशेषसम्बन्धाद्विशिष्टत्वादित्यर्थः । **उन्नतिनिमित्तं** प्रभावनाहेतुः यः **शासनस्य** दर्शनस्य **जायते** उन्नतिनिमित्तं सम्भवति । **स** द्रव्यस्तवो **ज्ञेयः सुपरिशुद्ध इति** यः प्रागुक्तः ॥४७॥

ननु किं द्रव्यस्तवे कश्चिद्भावलेशोऽस्ति येनैवमभिधीयत इत्याह -

**तत्थ पुण वंदणाइम्मि, उचियसंवेगजोगओ नियमा ।**
**अत्थि खलु भावलेसो, अणुभवसिद्धो विहिपराणं ॥२९२॥ ६/४८**

**तत्र पुनर्द्रव्यस्तवे वन्दनादौ** वन्दनपूजासत्कारादौ देशविरत्यनुष्ठाने **उचितसंवेगयोग-** तस्तद्व्यापारसम्पाद्यसंवेगसम्बन्धेन **नियमादवश्यंतया अस्ति खलु भावलेशो**ऽस्त्येवा-ध्यवसायलेशो नापह्नोतुं शक्यः **अनुभवसिद्धः** स्वसंवेदनसिद्धः **विधिपराणां** विधिनिष्ठानां विधिप्रवृत्तानामित्यर्थः ॥४९॥

कथं पुनर्भावलेशोऽनुभवसिद्ध इत्याह -

**दव्वत्थयारिहत्तं, सम्मं नाऊण भगवओ तम्मि ।**
**तह उ पयट्टंताणं, तब्भावाणुमतिओ [१]सो य ॥२९३॥ ६/४९**

**द्रव्यस्तवार्हत्वं** द्रव्यस्तवयोग्यत्वं **सम्यग् ज्ञात्वा भगवतः** समग्रैश्वर्यादिसमन्वितस्य, **तस्मिन्** द्रव्यस्तवे । **तह उ** त्ति **तथैव प्रवर्तमानामुक्ता**ऽनतिक्रमेण **तद्भावानुमतितो** भावस्तवसद्भावानुमते-स्तद्भावप्रतिबन्धादित्यर्थः । **स च** प्रस्तुतो भावलेशो द्रव्यस्तवद्वारजन्यस्तस्मात् स्थितमेतत् परस्परानुगतमिदं द्वयम् ॥४९॥ (१. चेव अटी.)

अतः एव तत्कर्तव्यतानिर्देशार्थमाह -

**अलमेत्थ पसंगेणं, उचियत्तं अप्पणो मुणेऊणं ।**
**दो वि इमे कायव्वा, भवविरहत्थं बुहजणेणं ॥२९४॥ ६/५०**

**अलमत्र प्रसङ्गेन** वचनविस्तरेण **उचितत्वं** योग्यत्वमधिकारित्वापेक्षया **आत्मनो मत्वा** विज्ञाय **द्वावपीमौ कर्तव्यौ** द्रव्यस्तव-भावस्तवौ यथाविषयम् । **भवविरहार्थं** संसारविरहाय **बुधजनेन** यतिश्रावकजनेनेति ॥५०॥

**॥ द्रव्यस्तवपञ्चाशकं षष्ठं समाप्तम् ॥**

## ॥ सप्तमं जिनभवनविधि-पञ्चाशकम् ॥

जिनभवनादिविधानं द्रव्यस्तवोऽभिहितस्तत्कारणविधानमुपदिदिक्षुराह –

**नमिऊण वद्धमाणं, वोच्छं जिणभवणकारणविहाणं ।**
**संखेवओ महत्थं, गुरूवएसाणुसारेणं ॥२९५॥ ७/१**

**नत्वा वर्धमानं** स्वगुणैः प्रवर्धमानप्रवचनं **वक्ष्ये जिनभवनकारणविधानं** जिनभवन-प्रयोजकव्यापारविधिं **सङ्क्षेपतः** सङ्क्षेपेण, **महार्थं** महाप्रयोजनं पारम्पर्येण मुक्तिसाधनत्वात् । **गुरूपदेशानुसारेणा**गमज्ञ–सदनुष्ठाननिरताचार्यपारम्पर्यवचनानुसारेण ॥१॥

विधानमेव लेशत आह –

**अहिगारिणा इमं खलु, कारेयव्वं विवज्जए दोसो ।**
**आणाभंगाउ च्चिय, धम्मो आणाए पडिबद्धो ॥२९६॥ ७/२**

**अधिकारिणा** शास्त्रनियुक्तेन **इदं खलु कारयितव्यं** नान्येन, **विपर्यये दोषो**ऽनधिकारिणः करणे शास्त्रानुदितत्वेनापराधः, **आज्ञाभङ्गादेवा**ज्ञाविराधनादेव, **धर्म आज्ञायां प्रतिबद्धो** नियतो वर्तते । आज्ञायां सत्यां भवति, तदा(द)भावे न भवतीति तत्प्रतिबद्ध उच्यते ॥२॥

**आराहणाए तीए, पुण्णं पावं विराहणाए उ ।**
**एयं धम्मरहस्सं, विण्णेयं बुद्धिमंतेहिं ॥२९७॥ ७/३**

**आराधनायां** प्रतिपालनायां **तस्या** आज्ञायाः **पुण्यम्, पापं विराधनायां तु** विराधनायां वा एतत् प्रागुक्तं **धर्मरहस्यं** धर्मगुह्यं **विज्ञेयं बुद्धिमद्भिः** पुरुषैः ॥३॥

अधिकारिणेत्युक्तं तमेवाह [गाथाद्वयेन] –

**अहिगारी उ गिहत्थो, सुहसयणो वित्तसंजुओ कुलजो ।**
**अक्खुद्दो धितिबलिओ, मतिमं तह धम्मरागी य ॥२९८॥ ७/४**

**गुरुपूयाकरणरई, सुस्सूसाइगुणसंगओ चेव ।**
**णायाऽहिगयविहाणस्स धणियमाणापहाणो य ॥२९९॥ ७/५ जुग्गं ।**

**अधिकारी तु** जिनभवनादिकारणनियुक्तः पुनः **गृहस्थो** गृही गृहिधर्मनिरतः । **शुभा**

धर्मलोकधर्मव्यवहारपराः **स्वजना** यस्य स तथा [**शुभस्वजनतः**]। **वित्तसंयुतो** न्यायोपात्तवित्त-समन्वितः, **कुलजो**ऽन्वयशुद्धियुक्तः **अक्षुद्रो**ऽकृपणः, धृतिबलमस्यास्तीति **धृतिबलिकः धृतिबलि** र्वा । **मतिमान्** औत्पत्तिक्यादिबुद्धिसमन्वितः पूर्वापरालोचनपरो वा । **तथा धर्मरागी च** धर्मानुरागसम्पन्नश्च ॥४॥

**गुरुपूजाकरणरतिर्गुरवः** पूज्याः । सर्व एव लौकिकलोकोत्तराः । लौकिकाः पित्रादयो वयोवृद्धाश्च । लोकोत्तरा धर्माचार्यादयः तत्पूजासम्पादनप्रवणः, यथा यथा तेषां रतिरुत्पद्यते तथा तथा चेष्टते पूजानिरतत्वेन **शुश्रूषादिगुणसङ्गतश्चैव** । शुश्रूषादयोऽष्टौ प्रज्ञागुणाः । यथोक्तम् -

*शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ।*
*ऊहाऽपोहोऽर्थविज्ञानं, तत्त्वज्ञानं तु धीगुणाः ॥ [ आचारोपदेश गाथा-४३ ]*

तत्समन्वितः, **ज्ञाता अधिकृतविधानस्य** जिनभवनकारणविधानस्य, **धनिकमत्यर्थम्** **आज्ञाप्रधानश्चा**गमप्रधानश्च ॥५॥

**एसो गुणड्ढिजोगा, अणेगसत्ताण तीए विणिओगा ।**
**गुणरयणवियरणेणं, तं कारेंतो हियं कुणइ ॥३००॥ ७/६**

**एषो**ऽधिकृतोऽधिकारी, **गुणर्द्धियोगा**द्गुणसमृद्धिसम्बन्धाद् **अनेकसत्त्वानां तस्या गुणर्द्धेः विनियोगाद्** व्यापाराद् **गुणरत्नवितरणेन** पुण्यानुबन्धिपुण्यसम्यक्त्वादिसम्पादनेन **तज्जिनभवनं कारयन् हित करो**त्यनेकसत्त्वस्य, एवं श्रुतत्वात् ॥६॥

गुणरत्नवितरणमेवाह -

**तं तह पवत्तमाणं, दट्ठुं केइ गुणरागिणो मग्गं ।**
**अण्णे उ तस्स बीयं, सुहभावाओ पवज्जंति ॥३०१॥ ७/७**

**तम**धिकारिणं **तथा**ऽऽगमनीत्या **प्रवर्तमानं** जिनभवनकारणे । **दृष्ट्वा केचिद्गुणरागिणो** गुणानुरागसम्पन्ना **मार्गं** सम्यग्दर्शनादिलक्षणम्, **अन्येत्व**परे पुन**स्तस्य** मार्गस्य **बीजं** दर्शनप्रशंसादिकं **शुभभावा**च्छुभाध्यवसायात् **प्रपद्यन्त** अभ्युपगच्छन्ति ॥७॥

कस्मात् पुनर्गुणानुरागिणां शुभभावः प्रशस्यत इत्याह -

**जो च्चिय सुहभावो, खलु सव्वन्नुमयम्मि होइ परिसुद्धो ।**
**सो च्चिय जायइ बीयं, बोहीए तेणणाएण ॥३०२॥ ७/८**

**य एव शुभभावो** दर्शनप्रशंसादिः । **खलु**शब्दा वाक्यालङ्कारे । **सर्वज्ञमते** सर्वज्ञशासन-

विषयो(ये) **परिशुद्धः भवति**, परिशुद्धकर्ममलापगमेन जीववीर्योत्कर्षेण च। **स एव** शुभभावो **जायते**। **बीजं** कारणं **बोधेर्**बोधिलाभस्य सम्यग्दर्शनस्य। **स्तेनज्ञातेन** चौरोदाहरणेन-तच्चेदम् -

इह द्वौ, समाने वयसी वर्तमानौ दृढसंहननौ पुरुषकारसम्पन्नतयाऽक्लीबतां प्रतिपद्यमानौ प्रथमचौर्य एव तथाविधभवितव्यतया स्वकर्मसामर्थ्येन राजपुरुषैर्गृहीत्वा साधुप्रतिश्रयसामीप्येन निग्रहस्थानं नेतुमारब्धौ। तयोश्चैकस्य साधुक्रियादर्शनेन निराकुलभावतामुपलभमानस्याहो धन्याः खल्वेते सदा धर्मनिरतमानसाः, स्वहितप्रवणास्तिष्ठन्ति, अस्मादृशास्तु परद्रव्यापहारादिप्रवृत्ताः सङ्क्लिष्ट-मानसेहैव सुकृत-दुष्कृतफलविपाकमनुभवन्तः सुखं न प्रतिवेदयन्ते। तथाविधलोकोपहास्याश्च करुणास्पदभूता विदुषां स्वदोषानुतापमानसा दुःखमेव वेदयन्ते। तदेषां साधूनां सुजीवितं धर्मपराणाम्, नास्मदृशामिति चित्तवृत्तिरभूत्। अपरस्य तु तथारुच्यत्वपरिपाकमप्राप्नुवतः तथाविधकर्ममलभावेन जीववीर्योत्कर्षाभावादौदासीन्यमात्रमेव समजनिष्ट, ततस्तयोरध्यवसायभेदाद् दर्शनप्रशंसा-तदितरभावकृतं बोधिलाभाऽबोधिलाभफलं कर्मोपनिबन्धमाजगाम अतिक्लिष्ट-परिणामा-ऽभावतथाविधमनुष्यगतिप्रायोग्यकर्मबन्धेन मृदुस्वभावतया कथञ्चिदुच्चैर्गोत्रविपाकतः परनिन्दा-परिहारप्रवृत्तयोर्दानादिकृतशुभकर्मणोर्मनुष्यायुर्निबन्धपूर्वकं श्रेष्ठिकुलयोः **कौशाम्ब्यां** तथाविध-भोगसम्पत्समन्वितयोर्जन्माऽभूत् तयोश्च पूर्वजन्माऽभ्याससंस्कारवशात् परस्परानुगतमैत्री-भावयोः, बाल(ल्य)कालादेवारभ्य सहपांशुक्रीडितयोर्निरन्तरसाङ्गत्यमभवत्। तत्र च वर्तमानयोः समानकला-शिल्पग्रहणयोः सहदारदर्शिनोः समाऽऽरम्भपरिग्रहयोरेकत्राऽऽसीनयोर्भुञ्जानयोर्विचरतो वा चित्तवृत्तिः समैव स्वयं परिणमते, तथाविधाकारदर्शनाच्च भूयो भावेन लोकैः समचित्तावेताविति नामान्वर्थमकारि, ततस्तयोः प्रीतिपूर्वं भूयांसं कालमवतिष्ठमानयोः कदाचित् भगवांस्त्रिलोकैकदीपः सर्वज्ञः सर्वदर्शी सत्त्वहितरत **ईक्ष्वाकुकुलाम्बरशशाङ्को वर्धमानस्वामी कौशाम्ब्यामेव** समवसृतः, ततो देवासुरनरेन्द्रकृतमहिमानं सर्वलोकविदितं सर्वसंशयच्छेदिनमवेत्य तद्वन्दनार्थमुपागतौ। तयोश्चैकस्य भगवद्वन्दना-कर्णनासञ्जातविस्मयप्रहर्षातिरेकस्य सम्यग्दर्शनमाविरभूत्। द्वितीयस्यत्वौदासीन्यात्तदेवपरिणामोऽवस्थितो, न वृद्धिमुपजगाम, ततोऽस्य न बोधिलाभो जातः। अतश्चौरोदाहरणादेव प्रतिपत्तव्यमित्यर्थः। कौशाम्ब्यां स वणिग् भूत्वा बुद्धः एकः अपरो न तु यदिदमुक्तं तदप्यैतदर्थानुपात्येव द्रष्टव्यम्। तस्माज्जिनभवनं कारयन् शुभभावोत्पत्तिहेतुत्वादन्येषां बोधिलाभाय भवतीति सुस्थितम् ॥८॥

अधुना तद्विधिमाह -

**जिणभवणकारणविही सुद्धा भूमी दलं च कट्ठादी।**
**भितगाणतिसंधाणं सासयवुड्ढी य जयणा य ॥३०३॥ ७/९ दारगाहा।**

**जिनभवनकारणविधिः-शुद्धा भूमिर्दलं च काष्ठादि भृतकाऽनतिसन्धानं** कर्मकरा-

वञ्चनम् । [**स्वाशयः**] शोभन **आशयः**, शुभपरिणामस्तस्य **वृद्धिश्च** कुशलपरिणामवृद्धिश्च । विवेकवृद्धिरिति यावत् । **यतना च** कालोचितसम्भवाऽऽत्मप्रतिपन्नरूपा ॥९॥

शुद्धभूमिप्रतिपादनोपायानाह -

**दव्वे भावे य तहा, सुद्धा भूमी पएसऽकीला य ।**
**दव्वेऽपत्तिगरहिया, अण्णेसिं होइ भावे उ ॥३०४॥ ७/१०**

**द्रव्ये भावे च तथा शुद्धा भूमिः** द्रव्यशुद्धा भावशुद्धा चेत्यर्थः । साधु-श्रावकजनोचित-**प्रदेशवत्यकीला[लि]का चा**ऽस्थ्याद्यशुभकीलकलङ्कवर्जिता वास्तुविद्याविहितेति यावत् । **द्रव्य** द्रव्यविषया शुद्धाभूमिरिति वर्तते **अप्रीतिकरहिता**ऽनभिमतत्वरहिता **अन्येषामा**सन्नानां मनुष्यादीनां **भवति । भावे तु** भावविषया शुद्धा भूमिः ॥१०॥

इहैव हेतुमाह -

**अपदेसम्मि न वुड्ढी, कारवणे जिणघरस्स न य पूया ।**
**साहूणमणणुवातो, किरियानासो उ अववाए ॥३०५॥ ७/११**

**अप्रदेशे** शास्त्रप्रतिषिद्धप्रदेशेऽप्रशस्तप्रदेशेत्यर्थः, **न वृद्धिर्न** प्रतिदिनमुपचयः, **कारणनिर्वर्तनं जिनगृहस्य** जिनायतनस्य, **न च पूजा** तद्व्यवस्थितबिम्बानाम्, (**कारावणे**-विधापने अटी.) **साधुनामननुपातो**ऽसंपातोऽनागमनमित्यर्थः । **क्रियानाशश्च** साधुक्रियाध्वंसश्च **अवपाते** कथञ्चिदागमने साधूनामप्रदेशे एते दोषाः ॥११॥

इमे चान्ये -

**सासणगरहा लोए, अहिगरणं कुत्थियाण संपाए ।**
**आणादीया दोसा, संसारनिबंधणा घोरा ॥३०६॥ ७/१२**

**शासनगर्हा, लोके**ऽविगिताश्चैते श्वान रूपमाश्रयं गृह्णन्तीति वचनकुत्सा । **अधिकरणं** कलहः **कुत्सिताना** निन्द्यानां **सम्पाते** समागमे । **आज्ञादयश्च दोषा** आज्ञाभङ्गा-नवस्था-मिथ्यात्व-विराधनाख्याः । संसारं निबध्नाति **संसारनिबन्धना घोराः** परिणामदारुणाः ॥१२॥

**कीलादिसल्लजोगा, होंति अनिव्वाणमादिया दोसा ।**
**एएसि वज्जणट्ठा, जएज्ज इह सुत्तविहिणा उ ॥३०७॥ ७/१३**

**कीलकादि-शल्ययोगाद्**, आदिशब्दादङ्गरादिपरिग्रहः, **भवन्त्यनिर्वाणादयो दोषा,** अनिवृत्य-र्थहान्य-र्थासिद्ध्यादयः **एतेषां** दोषाणां **वर्जनार्थं यतेत** प्रयत्नं कुर्वीत **इह सूत्रविधिना**

त्वागमविधिनैव ॥१३॥

'भावे पराऽप्रीतिरहिता इत्युक्तम् [७/१० गाथायाम्] तदङ्गीकरणेनाह -

**धम्मत्थमुज्जएणं, सव्वस्सापत्तियं न कायव्वं ।**
**इय संजमोऽवि सेओ, एत्थ य भयवं उदाहरणं ॥३०८॥ ७/१४**

**धर्मार्थं** धर्मनिमित्तम् **उद्यतेन** उद्यमवता **सर्वस्य** जनस्य **अप्रीतिक**मरतिरूपं **न कर्तव्यम्** अप्रीतिर्न करणीया। **इत्येवमनेन** प्रकारेण **संयमोऽपि** भावस्तथापि किमुत द्रव्यस्तवः, **श्रेयान**तिशयप्रशस्य **अत्र चाथे भगवान् वर्धमानस्वाम्युदाहरणं** निदर्शनम् ॥१४॥

एतदेवाह -

**सो तावसासमाओ, तेसिं अप्पत्तियं मुणेऊणं ।**
**परमं अबोहिबीयं, तओ गओ हंतऽकाले वि ॥३०९॥ ७/१५**

**स भगवांस्तापसाश्रमात्** कुलपत्यधिष्ठितात् तापसनिवासात्, **तेषां** तापसानां **अप्रीतिकं** सङ्क्लेशं **मत्वा**वगम्य **परममबोधिबीजमु**त्कृष्टमबोधिलाभकारणम् । **ततस्तापसाश्रमाद् गतो** निष्क्रान्तो, **ह**न्तेत्यामन्त्रणे । **अकाले**ऽपि वर्षासमयेऽपि प्रथमार्धमासपर्यन्ते ॥१५॥

**इय सव्वेण वि सम्मं, सक्कं अप्पत्तियं सइ जणस्स ।**
**नियमा परिहरियव्वं, इयरम्मि सतत्तचिंता उ ॥३१०॥ ७/१६**

**इति** हेतौ **सर्वेणापि** धर्मार्थिना **सम्यक्** सन्यायेन **शक्यं** परिहर्तुं शकनीयं । मध्यस्थबुद्ध्या, **अप्रीतिकं** द्वेषकारणं **'सइ'** सदा सर्वकालं **जनस्य** लोकस्य **नियमा**न्नियमेन **परिहर्तव्यं** परिहरणीय**मितरस्मिन्** शक्यधर्मजीवितादिस्वरूपविषये, **स्वतत्त्वचिन्ता** तु स्वरूपचिन्तैव । ममैवायं दोष इति चिन्तनीयम्, नान्यस्मिन् जन्मान्तरेऽस्माभिः प्रकृष्टं पुण्यमुपार्जितम् । तेन मनोवाक्कायदोषरहितानामप्यस्माकं लोके न वृतिभाग् भवति, यदि पुनर्विशिष्टं पुण्यमस्माभिः कृतं स्यात्तत एषां शुभभावो धर्मव्यवस्थितानामस्माकमुपरि स्यात् ॥१६॥

दलमधिकृत्याह -

**कट्ठादी वि दलं इह, सुद्धं जं देवतादुववणाओ ।**
**नो अविहिणोवणीयं, सयं च कारावियं जं नो ॥३११॥ ७/१७**

**काष्ठाद्यपि**, आदिशब्दादिष्टकादिग्रहः, **दलमिह** प्रक्रमे **शुद्धं यद्देवताद्युपवनात्**, आदिशब्दात् सिंहमनुष्यादिग्रहः । **नो** नैव **अविधिना** बलीवर्दादिमहापीडारूपेण **उपनीत**मानीतम् । **स्वयं**

चात्मनैव **कारितम्** वृक्षादिपातनेन, यत् तेनैव तत्र महारम्भदोषात् ॥१७॥

कः पुनस्तस्य (शुद्धाशुद्धत्व अटी.) परिज्ञानोपाय इत्याह –

**तस्स वि य इमो णेओ, सुद्धासुद्धपरिजाणणोवाओ ।**
**तक्कहगहणाइम्मी, सउणेयरसन्निवाओ जो ॥३१२॥ ७/१८**

**तस्यापि च** प्रस्तुतदलस्य **अयं** वक्ष्यमाणो **ज्ञेयः शुद्धाशुद्धपरिज्ञानोपायः** शुद्धमिदमशुद्धमिति वा । अस्मिन् विषये **तत्कथाग्रहणादौ** तत्कथादलविषयकथाग्रहणं स्वीकारस्तस्यैवादि-शब्दादानयनविशिष्टदेशोपस्थापनग्रहः । **शकुनेतरसन्निपातो यः** शकुनानामितरेषां च तद्विपरीतानां लोकशास्त्रप्रसिद्धानां समागमस्तत्कालभावित्वम् ॥१८॥

शकुनेतरप्रतिपादनयैव लेशत आह –

**नंदादि सुहो सद्दो, भरिओ कलसोऽत्थ सुंदरा पुरिसा ।**
**सुहजोगाइ य सउणो, कंदियसद्दाइ इयरो उ ॥३१३॥ ७/१९**

**नन्दी** द्वादशविधस्तूर्यसंघातस्तदादिरन्योऽपि द्वित्र्यादिसंयोगतः केवलो वा, **शुभः शब्दो** निमित्तशास्त्रप्रसिद्धः ।

*सिद्धे इंदे चन्दे, सूरनरिन्दे तहेव गोविन्दे ।*
*सेल-समुद्दे गय-वसह सीह तह मेह सद्दे य ॥१॥*

इति वा । शुभशब्दः **भरितः** परिपूर्णसलिलादिना, भृतो वा । *इतजन्तस्तारकादिषु* [ ] भरशब्दस्य पाठात् । द्वितीयसूक्तात् **कलशो** घटः **अत्र** वा **सुन्दराः पुरुषाः** अहीनपाण्याद्यवयवा सुखाश्च [सुखप्रदः] शुभयोगश्चन्द्र-नक्षत्रादिशुभसम्बन्धः, आदिशब्दाच्छुभमुहूर्तादिपरिग्रहः, शुभयोग आदिर्यस्य स **शुभयोगादि** तथा **शुभशकुनः** । **क्रन्दितशब्दादितरस्तु**, क्रन्दितशब्दो विक्लवध्वनिरादिशब्दाद् रुदिताद्यमनोज्ञरूपादिपरिग्रहः क्रन्दितशब्द आदिर्यस्य स तथा इतरस्तद्विपरितः, अशकुन इत्यर्थः ॥१९॥

दलकथाग्रहणादौ शकुनेतरसन्निपातः शुद्धाशुद्धपरिज्ञानोपाय उक्तस्तदनन्तरं विधिमाह –

**सुद्धस्स वि गहियस्सा, पसत्थदियहम्मि सुहमुहुत्तेणं ।**
**संकामणम्मि वि पुणो, विण्णेया सउणमादीया ॥३१४॥ ७/२०**

**शुद्धस्यापि** शास्त्रोक्तदोषरहितस्यापि **गृहीतस्य** स्वीकृतस्य दलस्य **प्रशस्तदिवसे** शुक्लपञ्चम्यादौ **शुभमुहूर्तेन** सिद्धान्तोक्तेन **सङ्क्रामणेऽपि** विवक्षितदेशानयनेऽपि **पुनर्विज्ञेयाः**

शकुनादयः सर्वत्र शकुनपूर्वप्रवृत्तेरिष्टफलसाधनसंसूचकत्वात् ॥२०॥

शुद्धदलमुक्तमधुना भृतकानतिसन्धानमाह –

**कारवणे वि य तस्सिह, भितगाणऽतिसंधणं न कायव्वं ।**
**अवियाहिगप्पयाणं, दिट्ठादिट्ठप्फलं एयं ॥३१५॥ ७/२१**

**कारणेऽपि च** प्रयोजकव्यापाररूपे **तस्य** जिनभवनस्य **इह** प्रक्रमे, **भृतकानां** कर्मका[क]-राणाम् **अतिसन्धान** वञ्चनं **न कर्तव्यं** न विधेयम् । **अपि वाऽधिकप्रदानमुक्तादधिकस्य** द्रव्यस्य प्रदानं समधिकदानमित्यर्थः । **दृष्टादृष्टफलमेतदधिक**कर्मबोधिबीजादिफलमेतदधिकप्रदानम् ॥२१॥

एतदेव व्यक्तीकर्तुमाह –

**ते तुच्छगा वराया, अहिगेण दढं उवेंति परितोसं ।**
**तुट्ठा य तत्थ कम्मं, तत्तो अहिगं पकुव्वंति ॥३१६॥ ७/२२**

**ते** भृतकाः **तुच्छका** तुच्छविभवाशयाः **वराकाः** क्रियास्पदत्वात्, **अधिकेनाधिक**प्रदानेन **दृढमत्यर्थम् उपयान्ति** गच्छन्ति **परितोषं** हर्षम् । **तुष्टाश्च** परितोषवन्तः तत्रायतने **कर्म**व्यापाररूपे **ततः** पूर्वस्माद् **अधिकं प्रकुर्वन्ति** स्वमतिपरितोषाढ्यम् ॥२२॥

**धम्मपसंसाए तहा, केइ निबंधंति बोहिबीयाइं ।**
**अण्णे उ लहुयकम्मा, एत्तो च्चिय संपबुज्झंति ॥३१७॥ ७/२३**

**धर्मप्रशंसया तथा** भावगर्भया **केचिद्** भृतकाः **निबध्नन्ति** सम्पादयन्ति **बोधिबीजानि** बोधिलाभकारणपुण्यानि । **अन्ये**त्वपरे पुनर्भृतकाः **लघुकर्माणः** प्रतनुज्ञानावरणीयादिकर्मांशाः । **अत एवा**धिकदानात् **सम्प्रबुध्यन्ते** सम्यक्प्रबोधमुपयान्ति ॥२३॥

**लोगे य साहुवाओ, अतुच्छभावेण सोहणो धम्मो ।**
**पुरिसोत्तमप्पणीओ, पभावणा चेव तित्थस्स ॥३१८॥ ७/२४**

**लोके च साधुवादः** साध्वभिधानं यशोवाद इत्यर्थः । **अतुच्छभावेनो**दारभावेन । **शोभनो धर्मः**, सुन्दरो जैनधर्मः, **पुरुषोत्तमप्रणीतः** सर्वज्ञप्रणीतः । **प्रभावना चैव तीर्थस्य** प्रकाशना शासनस्योन्नतिरिति यावत् ॥२४॥

अधुना स्वाशयवृद्धिमाह –

**सासयवुड्ढी वि इहं, भुवणगुरुजिणिंदगुणपरिण्णाए ।**
**तब्बिंबट्ठवणत्थं, सुद्धपवित्तीएँ नियमेण ॥३१९॥ ७/२५**

**स्वाशयवृद्धिरपि** कुशलपरिणामवृद्धिरपि **इह** प्रस्तुते **भुवनगुरुजिनेन्द्रगुणपरिज्ञया** तीर्थकरगुणपरिज्ञानेन। **तद्बिम्बस्थापनार्थं** तीर्थकरबिम्बस्थापनार्थं **शुद्धप्रवृत्त्या** हेतुभूतया **नियमान्नियोगेन** ॥२५॥

**पेच्छिस्सं एत्थ अहं, वंदणगनिमित्तमागए साहू।**
**कयपुण्णे भगवंते, गुणरयणनिही महासत्ते ॥३२०॥ ७/२६**

**प्रेक्षिष्ये** द्रक्ष्यामि **अत्रायतने अहं वंदनकनिमित्तं** चैत्यवन्दनार्थम् **आगतान् साधून् कृतपुण्या**नन्यथा भावसाधुत्वायोगात् पूर्वजन्मविहितपुण्यान्, **भगवतो** विशिष्टभावैश्वर्यादिसम्पन्नान् **गुणरत्ननिधीन्** क्षान्त्यादिगुणरत्नाकरान् **महासत्त्वान्** महाव्यवसायान् ॥२६॥

**पडिबुज्झिस्संति इहं, दट्ठूण जिणिंदबिंबमकलंकं।**
**अण्णे वि भव्वसत्ता, काहिंति तओ परं धम्मं ॥३२१॥ ७/२७**

**प्रतिभोत्स्यन्ते** सम्यक्त्वं लप्स्यन्ते भावनिद्रापगम **इहाऽऽयतने दृष्ट्वा जिनेन्द्रबिम्बमकलङ्कं** दोषरहितम् **अन्येऽपि भव्यसत्त्वास्तथाविधपुण्यसामर्थ्यप्रेरिता। करिष्यन्ति ततस्तदनन्तरं परं** धम**मुत्कृष्टं** धर्मम् ॥२७॥

**ता एयं मे वित्तं, जमेत्थमुवओगमेति अणवरयं।**
**इय चिंताऽपरिवडिया, सासयवुड्ढी उ मोक्खफला ॥३२२॥ ७/२८**

**ततस्तस्माद्** एतदिदमेव **मे** [मदीयम् अटी.] **वित्तं** द्रव्यं **यदत्रायतने उपयोगमेत्युपयुज्यत। अनवरतं** सततम् **इत्येवंविधा चिन्ता** मनोवृत्तिः **अप्रतिपतिता**परिपतिता वा। **स्वाशयवृद्धिस्तु मोक्षफला** सिद्धिफला ॥२८॥

यतनां विवरीषुराह -

**जयणा य पयत्तेणं, कायव्वा एत्थ सव्वजोगेसु।**
**जयणा उ धम्मसारो, जं भणिया वीयरागेहिं ॥३२३॥ ७/२९**

**यतना च प्रयत्नेन कर्तव्याऽत्र** जिनायतनकारणे। **सर्वयोगेषु** सर्वव्यापारेषु **यतनैव धर्मसारो** धर्मोत्कर्षः। **यद्** यस्माद् **भणितो**क्ता **वीतरागैः** चार्हद्भिः ॥२९॥

तामेव स्तोतुमाह -

**जयणा उ धम्मजणणी, जयणा धम्मस्स पालणी चेव ।**
**तव्वुड्ढीकरी जयणा, एगंतसुहावहा जयणा ॥३२४॥ ७/३०**

**यतना च धर्मजननी** धर्ममाता । **यतना धर्मस्य पालनी चैव** धर्मरक्षणकारित्वेन । **तद्वृद्धिकरी यतना** धर्मोपचयकरणशीला । **एकान्तसुखावहा यतना** मोक्षावहेत्यर्थः ॥३०॥

**जयणाएँ वट्टमाणो, जीवो सम्मत्तनाणचरणाणं ।**
**सद्धाबोहासेवणभावेणाराहगो भणिओ ॥३२५॥ ७/३१**

**यतनायां वर्तमानो जीवः सम्यक्त्वज्ञानचरणानां** भावरत्नरूपाणाम्, **श्रद्धाबोधाऽऽसेवन-भावेन आराधका भणितः** । श्रद्धया सम्यक्त्वस्य बोधेन ज्ञानस्यासेवनेन चरणस्य संसाधक उक्तः ॥३१॥

एनामेव फलत आह -

**एसा य होइ नियमा, तदहिगदोसविणिवारणी जेण ।**
**तेण निवित्तिपहाणा, विण्णेया बुद्धिमंतेहिं ॥३२६॥ ७/३२**

**एषा च** यतना **भवति नियमात्तदधिकदोषनिवारण्यारम्भान्तराधिकदोषनिवारणी, येन** कारणेन **तेन निवृत्तिप्रधाना विज्ञेया बुद्धिमद्भिः** । अन्यदा हि स्वारम्भेषु प्रवर्तमानो गृही यतनां नापेक्षते । यथाकथञ्चित् स्वाभिप्रेतं करोत्येव, धर्मेऽनुवर्तमानः सर्वं यतनापूर्वकं विधत्त। धर्मपक्षपातात् तेनाऽऽरम्भान्तरेभ्योऽधिकदोषेभ्यो निवृत्तिफलेयं यतना सम्पद्यते ॥३२॥

कीदृशी पुनः सा प्रस्तुतवस्तुनीत्याऽऽह -

**सा इह परिणयजलदलविसुद्धिरूवा उ होति नायव्वा ।**
**अन्नारंभनिवित्तीए अप्पणाहिट्ठणं चेव ॥३२७॥ ७/३३**

**सा** यतना **इह** प्रस्तुतजिनभवनकारणे **परिणतजलदलविशुद्धिरूपा तु** परिपूत-त्रसादिरहित-जलविशुद्धरूपैव **भवति ज्ञातव्या** अन्यारम्भेभ्यो गृहादिगतेभ्योऽनिवृत्तिः निरावृत्तिस्तदानीं तया-**अन्यारम्भनिवृत्त्यात्मना** स्वयमेव **अधिष्ठानमध्यासनं चैव** जिनायतनारम्भाणां स्वयमेवाधिष्ठातृत्वं प्रतिपद्यते । तेन कृष्याद्यारम्भेभ्यो निवृत्तिफलेयं भवति ॥३३॥

**एवं च होति एसा, पवित्तिरूवा वि भावतो नवरं ।**
**अकुसलनिवित्तिरूवा, अप्पबहुविसेसभावेणं ॥३२८॥ ७/३४**

**एवं चोक्तनीत्या भवत्येषा** यतना **प्रवृत्तिरूपाप्याथा**रम्भद्वारेण हिंसाप्रवृत्तिस्वभावा **अपि भावतः** परमार्थेन **नवरं** केवलम् **अकुशलनिवृत्तिरूपा**धिकारम्भनिवृत्तिस्वभावा **अल्पबहुविशेषभावेन** प्रवृत्त्यल्पत्वविशेषलक्षणेन ॥३४॥

**एत्तो चिय निद्दोसं, सिप्पादिविहाणमो जिणिंदस्स ।**
**लेसेण सदोसं पि हु, बहुदोसनिवारणत्तेण ॥३२९॥ ७/३५**

**अत एव** अधिकदोषनिवृत्तिः **निर्दोषं** निरवद्यतौचित्येन **शिल्पादिविधानं** शिल्पाद्युपदेशो, **मो** इति निपातः । **जिनेन्द्रस्य** आदिदेवस्य **लेशेन** मात्रया **सदोषमपि**, हुशब्दो वाक्यालङ्कारे । **बहुदोषनिवारणत्वेना**धिकरागद्वेषप्रवृत्तिनिवर्तकत्वेन ॥३५॥

ननु तस्यैव कथञ्चित्सदोषवस्तुप्रवर्तने कथमदोष इत्याह –

**वरबोहिलाभतो सो, सव्वुत्तमपुण्णसंजुओ भयवं ।**
**एगंतपरहितरतो, विसुद्धजोगो महासत्तो ॥३३०॥ ७/३६**

**जं बहुगुणं पयाणं, तं नाऊणं तहेव दंसेइ ।**
**ते रक्खंतस्स ततो, जहोचियं कह भवे दोसो ? ॥३३१॥ ७/३७ जुग्ग ।**

**वरबोधिलाभत**स्तीर्थकरजीवप्रधानबोधिलाभात् । **स** आदिदेवः **सर्वोत्तमपुण्यसंयुक्तो भगवान् एकान्तपरहितरत** एकान्तेनैव परहितप्रवृत्तः, **विशुद्धयोगो** विशुद्धमनोवाक्कायव्यापारः, **महासत्त्व** उत्तमसत्त्वः ॥३६॥

**यद् बहुगुणं प्रजानां** प्राणिनां सामान्येन **तज्ज्ञात्वा तथैव दर्शयति** प्रकाशयति, **तान्** प्रजा [शब्दपर्यायान् लोकान् अटी.] **रक्षतः**सतः **ततस्तस्माच्छि**ल्पादिविधानाद् वा **यथोचितं** पालयतः **कथं भवेद्दोषो** भगवतो नैव कथञ्चित्, प्राणिबहुगुणदर्शनप्रवृत्तत्त्वात्तस्य ॥३७॥

ननु च तत्रापि शिल्पादिविधाने परिदृष्टारम्भदोषो विद्यत एव, तमन्तरेण शिल्पाद्य-योगादित्याशङ्क्याह –

**तत्थ पहाणो अंसो, बहुदोसनिवारणाउ जगगुरुणो ।**
**नागाइरक्खणे जह, कड्ढणदोसे वि सुहजोगो ॥३३२॥ ७/३८**

**तत्र** शिल्पादिविधाने **प्रधानांश:** प्रवर्तकोऽवयव: **बहुदोषनिवारणात्त्व**धिकदोषनिवारणैव, **जगद्गुरार्भ**गवत:, **नागादिरक्षणे** नागादे: सर्पादिरुपद्रवहेतो: सकाशाद् रक्षणे। **यथा कर्षणदोषे**ऽप्या-कर्षणजनितापराधेऽपि मात्रादे: सुतादिविषये **शुभयोग:** शुभव्यापार:, तथैव भगवत: शुभयोगो वर्तते। नागादिरक्षणेऽधिकदोषाभावेन शुभयोग एव ॥३८॥

दृष्टान्तगतं विवरीतुमाह -

**खड्डातडम्मि विसमे, इट्ठसुयं पेच्छिऊण कीलंतं ।**
**तप्पच्चवायभीया, तदाणणट्ठा गया जणणी ॥३३३॥ ७/३९**

**दिट्ठो य तीए नागो, तं पति एंतो दुओ उ खड्डाए ।**
**तो कड्ढितो तगो तह, पीडाए वि सुद्धभावाए ॥३३४॥ ७/४० जुम्म।**

**श्वभ्रतटे विषमे** निम्नोन्नतादिरूपे, **इष्टसुतमिष्टपुत्रं प्रेक्ष्य क्रीडन्तं** स्वेच्छया विचरन्तं **तत्प्रत्यवायभीता** सुतापायभीता, **तदानयनार्थं** तनयानयनार्थं **गता जननी** ॥३९॥

**दृष्टश्च** साक्षात् प्रत्यक्षत: **तया** जनन्या **नागो** भुजङ्ग:, **तं प्रति** पुत्रं प्रति यन् व्रजन् आगच्छन्नित्यर्थ:, **द्रुतस्त्** शीघ्रगति द्रुतं वा **गर्तेन** निम्नस्थानेन **ततस्तदनन्तर कृष्ट** आकृष्ट: **तक:** पुत्र: तच्छब्दस्याकच्प्रत्ययसहितस्य विकल्पेन शतृविधानाच्छब्दसिद्धि:, पाणिनीयोपनिबद्ध-मुण्डकेष्वभिधानात्। **तथा पीडायामपि** निम्नोन्नतकण्टकशाखावमर्दनादिजनितबाधायामपि सत्याम्, **शुद्धभावया** हितपरिणामोपेताध्यवसायया जनन्या। एवं भगवताप्यधिकदोषेभ्यो रक्षिता: प्राणिन:। सामान्यस्तु दोषे प्रवृत्तिस्तेषां स्वयमेवावस्थिता न तत्र भगवान्निमित्तम्, स्वयमेव हि शरीराद्यर्थे दु:खप्रतीकाराय प्राणिन: प्रवर्तन्ते, अभ्यवहारादिषु भगवाँस्तु स्वौचित्यं विज्ञाय किञ्चिदुपदिशति, तावतैव तेऽनुग्रहं मन्यन्ते। केवलज्ञानोत्पत्तौ च भगवतो (वान्) धर्माधर्मयो: प्रवृत्ति-निवृत्ती विदधति इति निर्दोषं शिल्पादिविधानम् ॥४०॥

प्रस्तुतवस्तुसमर्थनायाह -

**एयं च एत्थ जुत्तं, इहराहिगदोसभावओऽणत्थो ।**
**तप्परिहारेऽणत्थो, अत्थो च्चिय तत्तओ णेओ ॥३३५॥ ७/४१**

**एतच्च** शिल्पादिविधानम् **अत्र युक्तं** न्यायोपपन्नम् **इतरथा**ऽन्यथा, **अधिकदोषभावतो**ऽधिकदोषसद्भावाद् **अनर्थ: तत्परिहारे** विशिष्टप्रत्यवायपरिहारे, अधिकदोषपरिहारे सतीत्यर्थ:। **अनर्थ:** स्वल्परूप: कश्चित् सुतपीडान्यायेन **अर्थ एव तत्त्वतो ज्ञेय:** समीहितकार्यसिद्ध्या। सर्वत्रापि हि समीहितार्थसिद्धिरेव परमार्थेनार्थो भवति, तत्प्राप्तौ शेषक्लेशाऽगणनात् ॥४१॥

एवं जिनभवनविधानगतायाः प्रवृत्तेर्निर्दोषत्वमापाद्याऽहिंसारूपतामुपदर्शयन्नाह –

**एवं निवित्तिपहाणा, विण्णेया भावओ अहिंसेयं ।**
**जयणावतो उ विहिणा, पूजादिगया वि एमेव ॥३३६॥ ७/४२**

**एवं निवृत्तिप्रधाना** बहुसत्त्वसंरक्षणप्रधाना **विज्ञेया** अवबोद्धव्या **भावतः** परमार्थेन **अहिंसेयं** जिनभवनगता । **यतनावतस्तु** प्रयत्नवत एव, **विधिना** शास्त्रोक्तेन **पूजादिगताप्येवमेव** पूजास्नात्रविलेपनादिगतापि प्रवृत्तिः, अहिंसैवेति वर्तते ॥४२॥

तदनन्तरविधिमाह –

**निप्फाइऊण एवं, जिणभवणं सुंदरं तहिं बिंबं ।**
**विहिकारियमह विहिणा, पतिट्ठवेज्जा लहुं चेव ॥३३७॥ ७/४३**

**निष्पाद्य** परिसमाप्य **एवं जिनभवन** जिनायतनं **सुन्दरं** श्रेष्ठं **तत्रायतने बिम्बं** प्रतिमाख्यं **विधिकारित** शास्त्रोक्तविधिनिष्पादितम् **अथ विधिना** शास्त्रोक्तेनैव **प्रतिष्ठापयेत्** । **लघु चैव** शीघ्रमेव ॥४३॥

**एयस्स फलं भणियं, इय आणाकारिणो उ सड्ढस्स ।**
**चित्तं सुहाणुबंधं, नेव्वाणंतं जिणिंदेहिं ॥३३८॥ ७/४४**

**एतस्य** सर्वस्यैव पूर्वोक्तस्य, **फलं भणितमित्येवम् आज्ञाकारिणस्तु** सर्वज्ञाज्ञाकारिणः **श्राद्धस्य** श्रद्धावतः, **चित्रं** नाना प्रकारं देवमनुजजन्मसु तथाविधाभ्युदयरूपं **शुभानुबन्धम्** शुभोऽनुबन्धः सन्तानोऽस्येति कल्याणपरंपरारूपम्, **निर्वाणान्तम**पवर्गान्तं **जिनेन्द्रैः** सर्वज्ञैः ॥४४॥

पूर्वोक्तस्यैव विषयविभागख्यापनायाह –

**जिणबिंबपइट्ठावणभावज्जियकम्मपरिणइवसेणं ।**
**सुगतीइ पइट्ठावणमणहं सइ अप्पणो चेव ॥३३९॥ ७/४५**

**जिनबिम्बप्रतिष्ठापनम्** तस्मिन् **भाव**स्तेन **अर्जितं कर्म** पुण्यं **तत्परिणतिवशात्त**त्परिपाकसामर्थ्यात् । **सुगतौ** स्वर्गादिगतौ **प्रतिष्ठापनम**वस्थापनम् **अनघं** अनिर्दोषम्, **सदा** सर्वदा **आत्मन एव** स्वजीवस्यैव ॥४५॥

**तत्थ वि य साहुदंसणभावज्जियकम्मओ उ गुणरागो ।**
**काले य साहुदंसणमहक्कमेणं गुणकरं तु ॥३४०॥ ७/४६**

**तत्रापि चायतनकरणे, साधुदर्शने भावोऽभिलाषः तदर्जितकर्मतस्तु** तदुपात्तपुण्यकर्मतस्तु **गुणरागा** गुणप्रीतिः, **काले चा**वसरे च **साधुदर्शन** साध्ववलोकनम्, **अथ क्रमेणा**नुपूर्व्या यथाक्रमेण वा। यो योऽनुरूपः क्रमस्तेन, वीप्सायामव्ययीभावो, विभक्तेश्चालुक्। गुणकरणशीलं-**गुणकर**मेव पुण्यसामर्थ्येन भवतीति सम्बन्धनीयम् ॥४६॥

**पडिबुज्झिस्संतऽन्ने, भावज्जियकम्मओ य पडिवत्ती ।**
**भावचरणस्स जायइ, एगंतसुहावहा नियमा ॥३४१॥ ७/४७**

**प्रतिभोत्स्यन्ते**ऽवभोत्स्यन्ते प्रतिबोधं यास्यन्तीत्यर्थः । **अन्ये** जीवा । एवंविध **भावार्जित-कर्मतश्च** विशिष्टभावार्जितपुण्यकर्मतः **प्रतिपत्तिर**भ्युपगमो, **भावचरणस्य** चारित्रपरिणामस्य **जायते** सम्पद्यते। **एकान्तसुखावहा** एकान्तसुखो मोक्षः, तमावहतीति कृत्वा, तदवन्ध्यकारणत्वेन, **नियमान्नि**यमेन पारम्पर्याव्यभिचारात् ॥४७॥

**अपरिवडियसुहचिंताभावज्जियकम्मपरिणईए उ ।**
**गच्छति इमीए अंतं, तओ य आराहणं लहइ ॥३४२॥ ७/४८**

**अपरिपतिता**ऽप्रतिपतिता, **शुभचिन्ता** शुभाध्यवसायः **तद्भावेन**, तत्प्रत्ययात् तत्परिणामेन वा **अर्जितमुपात्तं यत्कर्म** पुण्यं **तत्परिणते**स्तद्विपाकात्, पुनः **गच्छत्यस्याः** शुभचिन्तायाः चरणप्रतिपत्तेर्वा **अन्त** पर्यवसानं प्रकर्षे **ततस्तु** ['**य**' = **च** अटी.] प्रकर्षाद् **आराधनां** ज्ञानादिनिष्पत्तिः **लभते** प्राप्नोति ॥४८॥

**निच्छयनया जमेसा, चरणपडिवत्तिसमयओ पभिति ।**
**आमरणंतमजस्सं, संजमपरिपालणं विहिणा ॥३४३॥ ७/४९**

**निश्चयनया**न्निश्चयनयाभिप्रायाद् **यद्** यस्माद् **एषा**राधना **चरणप्रतिपत्तिसमयतः प्रभृति** चरणप्रतिपत्तिकालादारभ्य **आमरणान्तमजस्त्रं संयमपरिपालनं विधिना**गमोक्तेन ॥४९॥

**आराहगो य जीवो, सत्तट्ठभवेहिं पावए नियमा ।**
**जम्मादिदोसविरहा, सासयसोक्खं तु निव्वाणं ॥३४४॥ ७/५०**

**आराधकश्च जीव**श्चरणप्रतिपत्तेः **सप्ताष्टभवैः** सप्तभिरष्टभिर्वेत्यर्थः । **प्राप्नोति** लभते **नियमान्नि**योगेन। **जन्मादिदोषविरहा**ज्जन्मजरामरणदोषविगमात् **शाश्वतसौख्यं तु** ध्रुवसौख्यमेव **निर्वाणं** सिद्धपदम् ॥५०॥

**॥ जिनभवनकारणविधान-पञ्चाशकं सप्तमं समाप्तम् ॥**

# ।। अष्टमं बिम्बप्रतिष्ठाविधि-पञ्चाशकम् ।।

जिनभवनकारणविधेरन्तरं तदशून्यतापादनाय बिम्बप्रतिष्ठासम्भवे तद्गतविधिमभिधातुमाह-

**नमिऊण देवदेवं, वीरं सम्मं समासओ वोच्छं ।**
**जिणबिंबपइट्ठाए, विहिमागमलोगनीतीए ।।३४५।। ८/१**

**नत्वा देवदेवं** देवस्तुत्यं **वीरं** महावीरस्वामिनं **सम्यक्** प्रशस्तम् **समासता वक्ष्य जिनबिम्बप्रतिष्ठायां विधिं** विधानम् **आगमलोकनीत्या** लोकनीत्या च [क्वचिज्जिनमताऽविरुद्धा लोकनीतिरपि आश्रयणीया - अटी.] ।।१।।

**जिणबिंबस्स पइट्ठा, पायं कारावियस्स [1]जत्तेण ।**
**तक्कारवणंमि विहिं, पढमं चिय वण्णिमो ताव ।।३४६।। ८/२**

**जिनबिम्बस्य** प्रतिमारूपस्य **प्रतिष्ठा** न्यासो भवति, **प्रायः कारितस्य** विधापितस्य **यत्नेन** सर्वादरेण **तत्कारण** जिनबिम्बविधापने **विधिं** कर्तव्योपदेशं **प्रथममेवादावेव वर्णयामः** प्रतिपादयामस्तावत् क्रमोद्योतने तावच्छब्दः । पूर्वं बिम्बकरणविधिं तदनु प्रतिष्ठाविधिम् ।।२।।

१. जं तेण अटी. ।

उत्सर्गापवादाभ्यां जिनबिम्बकारणविधिमेवाङ्गीकृत्याह -

**सोऊं नाऊण गुणे, जिणाण जायाए सुद्धबुद्धीए ।**
**किच्चमिणं मणुयाणं, जम्मफलं एत्तियं एत्थ ।।३४७।। ८/३**

**गुणपगरिसो जिणा खलु, तेसिं बिंबस्स दंसणं पि सुहं ।**
**कारावणेण तस्स उ, अणुग्गहो अत्तणो परमो ।।३४८।। ८/४**

**मोक्खपहसामियाणं, मोक्खत्थं उज्जएण कुसलेणं ।**
**तग्गुणबहुमाणादिसु, जतियव्वं सव्वजत्तेणं ।।३४९।। ८/५**

**तग्गुणबहुमाणाओ, तह सुहभावेण बज्झती नियमा ।**
**कम्मं सुहाणुबंधं, तस्सुदया सव्वसिद्धि त्ति ।।३५०।। ८/६**

**श्रुत्वा** पूर्वं तदनन्तरं **ज्ञात्वा गुणां**स्तीर्थप्रवर्तकत्वादीन् **जिनानां** भगवतां **जातायामुत्पन्नायाम्-**

भिनिवृत्तायां **शुद्धबुद्धौ** शास्त्रानुसारिविमलप्रज्ञायां सत्याम्, **कृत्यमिदं** बिम्बकारणं **मनुजानां** पुरुषाणाम्, प्रायो धर्माधिकारिण एत इति ख्यापनार्थं मनुजग्रहणम्, अन्यथा देवानामपि कृत्यमिदं वर्तते बोधिलाभफलत्वात् तथाश्रुतेः । **जन्मफल** जीवितफलम् **एतावदत्र** नान्यदस्तीति भावः ॥३॥

**गुणप्रकर्षो** गुणपर्यन्तः **जिनाः खलु** जिना एव, **तेषां** जिनानां **बिम्बस्य** प्रतिकृतेः **दर्शनमपि** चक्षुर्विषयकरणमपि **शुभं** शुभहेतुत्वाद् वर्तते । **कारणेन** करणहेतुभावेन **तस्य तु** बिम्बस्य **अनुग्रह** उपकार **आत्मनः परमः** प्रधानः ॥४॥

**मोक्षपथस्वामिनां** सम्यग्दर्शनज्ञानचारित्राभिधानमोक्षमार्गाधिपतीनां **मोक्षार्थ**मपवर्गार्थम् **उद्यतेनो**द्यमवता **कुशलेन** बुद्धिमता **तद्गुणबहुमानादिषु** मोक्षपथस्वामिनां गुणबहुमानादिष्वान्तर-प्रीतिभक्तिपूजादिषु **यतितव्य** प्रवर्तितव्यं **सर्वप्रयत्नेन** सर्वादरेण ॥५॥

**तद्गुणबहुमाना**ज्जिनगुणबहुमानात् **तथा शुभभावेन** विचित्रशुभाध्यवसायेनोत्तरोत्तर-प्रकर्षवर्तिना **बध्यते** स्वीक्रियते **नियमा**न्नियमेन **कर्म शुभानुबन्धं** पुण्यानुबन्धिपुण्यमित्यर्थः । **तस्योदयात् सर्वसिद्धिरिति** सर्वकार्यनिष्पत्तिः ॥६॥

**इय सुद्धबुद्धिजोगा, काले संपूइऊण कत्तारं ।**
**विभवोचियमप्पेज्जा, मोल्लं अणहस्स सुहभावो ॥३५१॥ ८/७**

**इति शुद्धबुद्धियोगा**देवंविधविमलमतिसम्बन्धात् तद्व्यापाराद् वा । **काले** शुभे **सम्पूज्य** समभ्यर्च्य भोजन-वस्त्र-पत्र-पुष्प-फलादिभिः **कर्तारं** शिल्पिनं **विभवोचितं** विभावानुरूपम् **अर्पयेत्** समर्पयेद् दद्यात्, **मूल्यमनघस्या**ऽव्यसनस्य शिल्पोपाध्यायस्य **शुभभावः** कारयिता, प्रवर्धमानशुभपरिणाम उदारतया ॥७॥

व्यतिरेकगुणावहं विधिमाह -

**तारिसयस्साभावे, तस्सेव हितत्थमुज्जुओ नवरं ।**
**नियमेज्ज बिंबमोल्लं, जं उचियं कालमासज्ज ॥३५२॥ ८/८**

**तादृशस्योपाध्यायस्य अभावे तस्यैव** शिल्पिनः **हितार्थं** हितनिमित्तम् **उद्यतः** प्रयतः **नवरं** केवलं **नियमये**न्निकाचयेद् **बिम्बमूल्यं** प्रतिमामूल्यम् । त्रिस्कन्धकादिक्रमेणादिमध्यावसानेषु कर्मर्णः, **यदुचितं** यद् योग्यं **कालं** संव्यवहारिकं **आसाद्या**श्रित्य यथाऽसौ शिल्पी न पीड्यते ॥८॥

यदि पुनरनघस्येव सद्व्यसनस्यापि मूल्यमर्पयति ? ततः को दोष इत्याह -

**देवस्स परीभोगो, अणेगजम्मेसु दारुणविवागो ।**
**तंमि स होइ णिउत्तो, पावो जो कारुओ इहरा ॥३५३॥ ८/९**

**देवस्य** देवार्थमर्प्पितद्रव्यम्, कारणे कार्योपचारात् **परिभोगो**ऽभ्यवहारो, देवस्य परिभोगो वा । देवार्थोपकल्पितधनपरिभोगो **अनेकजन्मसु** बहुषु भवेषु, **दारूणविपाक**स्तीव्रविपाको वर्तत । **तस्मिन्** परिभोगे **स भवति नियुक्तो** व्यापारितोऽबुद्धिमता कारयित्रा, **पापः** व्यसनोपहतः **यः कारकः** शिल्पी, **इतरथा**न्यथा ॥९॥

किमित्येतदेवमित्याह -

**जं जायइ परिणामे, असुहं सव्वस्स तं न कायव्वं ।**
**सम्मं निरूविऊणं, गाढगिलाणस्स वाऽपत्थं ॥३५४॥ ८/१०**

**यज्जायते** संभवति **परिणामे** भाविकाले **अशुभम**सुन्दरं कर्मबन्धहेतुः, **सर्वस्य** सत्त्वसङ्घातस्य **तन्न कर्तव्यम्** । निमित्तभावोपगतेन तत्कर्मबन्धं प्रति सहकारिभावोपगमदोषात्, तस्यापि शास्त्रबाधया कर्मबन्धनिमित्तत्वात् । शास्त्राराधने तु तत्कर्मबन्धनेऽपि स्वकर्मबन्धा-भावादात्मीय एव हि परिणामः शास्त्राराधनप्रवृत्तः कर्मबन्धदोषापहारी परदोषे प्रवृत्तिस्तु निमित्तमात्रं शास्त्रवाक्यात् तस्याः निमित्तभावोपगमात्केवलात् तं तं कर्मबन्धं प्रति, **सम्यङ्**न्यायेन **निरूप्य** समालोच्यायमेवं शिल्पी कर्मबन्धभाजनं न भवतीति भवत्येवं स्वबुद्ध्या **गाढग्लानस्येव** तीव्रग्लानस्येव **अपथ्यमहितं** न कर्तव्यमिति वर्तते । यथाऽतिपीडिताऽपटुशरीरस्याऽपथ्यं ज्ञात्वा परिणामसुन्दरं न भवतीति परिह्रियते, एवमिदमपीति भावः ॥१०॥

नन्वनघस्यापि बिम्बमूल्यसमर्प्पणे यदि कथञ्चिद् विपर्यासः स्यात्तदा सव्यसनमूल्यसमर्पण-मिव तत्रापि दोषः स्यान्न वेत्येतदाशङ्क्य नास्ति तत्र दोषः कारयितुरित्याह -

**आणागारी आराहणेण तीए ण दोसवं होति ।**
**वत्थुविवज्जासम्मि वि, छउमत्थो सुद्धपरिणामो ॥३५५॥ ८/११**

**आज्ञाका**र्यागमोपदेशवर्ती **आराधनेन** सम्पा[द]नेन **तस्या** आज्ञाया न **दोषवान्** सापराधो **भवति** । **वस्तुविपर्ययासे**ऽप्यनघशिल्पिनोऽन्यथाकरणेऽपि । **छद्मस्थः** कारयिता । **शुद्धपरिणामो** विशुद्धाध्यवसायः । स हि तदनुकम्पया प्रवृत्तस्तु संसारं न बहु मन्यते ततो निर्दोषोऽयम् ॥११॥

कुतः पुनः शुद्धपरिणामोः भवतीत्याह –

**आणापवित्तिओ च्चिय, सुद्धो एसो ण अण्णहा णियमा ।**
**तित्थगरे बहुमाणा, तदभावाओ य णायव्वो ॥३५६॥ ८/१२**

**आज्ञाप्रवृत्तित एव** सर्वज्ञाज्ञानुसारि प्रवृत्तेरेव **शुद्धो** निरवद्यः **एष** परिणामः, **नान्यथा**ऽन्येन प्रकारेण शुद्धो **नियमा** नियमेन **तीर्थकरे बहुमानाद्धेतोः तदभावाच्च** तीर्थकरबहुमानाभावाच्च **ज्ञातव्यो** विज्ञेयो यत्र तीर्थकरबहुमानः स शुद्धपरिणामोऽन्यस्त्वशुद्धः ॥१२॥

किं पुनरेतदेवमाश्रियत इत्याह –

**समतिपवित्ती सव्वा, आणाबज्झ त्ति भवफला चेव ।**
**तित्थगरुद्देसेण वि, न तत्तओ सा तदुद्देसा ॥३५७॥ ८/१३**

**स्वमतिप्रवृत्तिः** स्वबुद्धिप्रवृत्तिः, **सर्वा** निरवशेषा **आज्ञाबाह्येति** कृत्वा **भवफलैव** संसारफलैव **तीर्थकरोद्देशेनापि** तीर्थकराङ्गीकरणेनापि **न तत्त्वतः सा तदुद्देशात्र** परमार्थेन सा आज्ञाबाह्यस्वमतिप्रवृत्तिः तदुद्देशात्तीर्थकरोदेशाद् वर्तते । किंतूपचरिततदुद्देशा आज्ञाविराधन-प्रवृत्तस्तीर्थकरोद्देशेन किञ्चित्स्वमत्या कुर्वन्नपि न तीर्थकरोद्देशेन करोति तदाज्ञाविराधनप्रवृत्तत्वात् ॥१३॥

अमुमेवार्थं समर्थयन्नाह –

**मूढा अणादिमोहा, तहा तहा एत्थ संपयट्टंता ।**
**तं चेव य मण्णंता, अवमण्णंता न याणंति ॥३५८॥ ८/१४**

**मूढाः** पुमांसो **अनादिमोहाद्धेतोस्तथा तथा** आज्ञाविराधनेन **अत्र** तीर्थकरविषये **सम्प्रवर्त्तमाना** बिम्बादौ प्रवृत्तिं कुर्वन्तः । **तमेव च** तीर्थकरं **मन्यमाना** बहुमानविषयीकुर्वन्तः । **अवमन्यमानाः** परिभवन्तो **न जानन्ति** नावबुध्यन्ते । आज्ञाबहुमानात् तद्बहुमान इत्यर्थः ॥१४॥

प्रस्तुतवस्तु निगमयन्नाह –

**मोक्खत्थिणा तओ इह, आणाए चेव सव्वजत्तेणं ।**
**सव्वत्थ वि जतियव्वं, संमं ति कयं पसंगेण ॥३५९॥ ८/१५**

**मोक्षार्थिना**ऽपवर्गाभिलाषिणा **ततस्तस्माद् इह** प्रक्रमे **आज्ञायामेव** सर्वज्ञसम्बन्धिन्यां **सर्वयत्नेन** सर्वादरेण **सर्वत्रापि** शुभानुष्ठाने **यतितव्यं** चेष्टितव्यम् । **सम्यक्** सङ्गतं यथा भवति । **इति कृतं प्रसङ्गेन** पर्याप्तं विस्तरेण ॥१५॥

एवं बिम्बकारणगतं विधिमभिधाय प्रस्तुतप्रतिष्ठाविधिमाह -

**निप्फण्णस्स य सम्मं, तस्स पइट्ठावणे विही एस ।**
**सुहजोएण पवेसो, आयतणे ठाणठवणा य ॥३६०॥ ८/१६**

**निष्पन्नस्य च** संसिद्धस्य च **सम्यक्** न्यायेन **तस्य** बिम्बस्य **प्रतिष्ठापने** स्थापनायां **विधिरेष** वर्तते। **शुभयोगेन** साधकचन्द्रनक्षत्रादिसम्बन्धेन प्रशस्तमनोवाक्कायव्यापारेण वा **प्रवेशः** प्रवेशनं बिम्बस्येति गम्यते **आयतने** भवने **स्थानस्थापना** च उचितन्यासश्च ॥१६॥

**तेणेव खेत्तसुद्धी, हत्थसयादिविसया निओगेण ।**
**कायव्वो सक्कारो, य गंधपुप्फादिएहिँ तहिं ॥३६१॥ ८/१७**

**तेनैव** शुभयोगेन **क्षेत्रशुद्धिः** समन्तात् क्षेत्रविशुद्धिरस्थि-मांसाद्यशुभद्रव्यापहारेण **हस्तशतादिविषया,** आदिशब्दादधिकतरपरिग्रहः । **नियोगेनावश्यंतया कर्तव्यः सत्कारश्च** सत्क्रिया पूजेति यावत्, **गन्धपुष्पादिकैः** सुरभिगन्धद्रव्यपुष्पवस्त्रादिभिः, **तत्र** क्षेत्रे **तस्मिन्** वा प्रतिष्ठाकाले ॥१७॥

**दिसिदेवयाण पूया, सव्वेसिं तह य लोगपालाणं ।**
**ओसरणकमेणऽण्णे, सव्वेसिं चेव देवाणं ॥३६२॥ ८/१८**

**दिग्देवतानामिन्द्रादीनां पूजा सर्वेषां तथा च लोकपालानां** सोम-यम-वरुण-कुबेराणां शक्रसम्बन्धिनां पूर्वादिदिग्व्यवस्थितानाम्। तथाहि पूर्वस्यां दिशि सोमो धनुःपाणिः कमण्डलुहस्तश्च शान्तिकर्मविधायि शक्रादिदेशादा(शेना)गमे श्रूयते, यमो दक्षिणस्यां दण्डपाणिः, अपरस्यां वारुणः पाशपाणिः, उत्तरस्यां कुबेरो गदापाणिः। **समवसरणक्रमेण, अन्ये** [सूरयः अटी.] **सर्वेषां चैव देवानां** पूजा कर्तव्येति सम्बध्यते ॥१८॥

किं पुनरेषां पूजा क्रियत इत्याह -

**जमहिगयबिंबसामी, सव्वेसिं चेव अब्भुदयहेऊ ।**
**ता तस्स पइट्ठाए, तेसिं पूयादि अविरुद्धं ॥३६३॥ ८/१९**

**यद्** यस्माद् **अधिकृतबिम्बस्वामी** जिनबिम्बस्वामी **सर्वेषां चैवेन्द्रादिदेवानाम् अभ्युदय-हेतुर्वृद्धिहेतुर्वर्तते** । **तत्तस्मात् तस्य** भगवतः **प्रतिष्ठायां** प्रस्तुतायां **तेषामिन्द्रादीनां पूजादि** पूजासत्कारबहुमानादि **अविरुद्धं** शास्त्राविरुद्धं भवतीति शेषः ॥१९॥

इतश्च पूजाद्यविरुद्धमित्याह –

**साहम्मिया य एते, महड्डिया सम्मदिट्ठिणो जेण ।**
**एत्तो च्चिय उचियं खलु, एतेसिं एत्थ पूजादी ॥३६४॥ ८/२०**

**साधर्मिकाश्च** समानधार्मिकाश्च **एते** देवेन्द्रलोकपालादयो देवा: **महर्द्धिका** महती ऋद्धिर्विभूतिर्येषां ते तथा **सम्यग्दृष्टयो येन** समीचीनदृष्टिर्दर्शनं येषां ते, तथा । **अत एव** साधर्मिकादित्वादेव, **उचितं खलु** योग्यमेव । **एतेषां** प्रस्तुतानाम् **अत्र** प्रतिष्ठाविधाने **पूजादि** पूजासत्कारबहुमानादि ॥२०॥

**तत्तो सुहजोएणं, सट्ठाणे मंगलेहिँ ठवणा उ ।**
**अभिवासणमुचिएणं, गंधोदगमादिणा एत्थ ॥३६५॥ ८/२१**

ततस्तदन्तरं **शुभयोगेन** पूर्वोक्तेनेष्टकालविशेषेण **स्वस्थाने**ऽभिवासनयोग्ये **मङ्गलैः** प्रशस्तरूपैः **स्थापना तु** न्यास: **अभिवासन**मधिवासनं वा । **उचितेन गन्धोदकादिना**, आदिशब्दाच्छुभ-पुष्पोदकपरिग्रहः **अत्र** प्रतिष्ठायाम् ॥२१॥

**चत्तारि पुण्णकलसा, पहाणमुद्दाविचित्तकुसुमजुया ।**
**सुहपुण्णचत्तचउतंतुगोच्छया होंति पासेसु ॥३६६॥ ८/२२**

**चत्वार: पूर्णकलशाः** अखण्डकलशा:, प्रधानमुद्रया रूप्य-सुवर्ण-रत्नरूपया, विचित्रकुसुमैश्च नानाविधपुष्पैश्च युता: संयुक्ता: **प्रधानमुद्राविचित्रकुसुमयुता: शुभपूर्णचत्रचतुस्तन्तुका-वस्तृता:** । चत्रं तर्कुं, पुण्यं [पूर्ण-अटी.] शुभकर्मप्रवृत्तं पुण्य (पूर्ण) चत्रात् समुत्पन्नं चतुस्तन्तुकम् । समाहारद्वन्द्वादेकत्वं कन् प्रत्ययश्च शुभं निरवद्यं [पूर्ण चत्रचतुस्तन्तुक, तेन] पूर्णचत्रचतुस्तन्तुकेना-वस्तृता आच्छादिता, ग्रीवाप्रदेशेषु कृतकण्ठे गुणा: चतुर्षु पार्श्वेषु चतुसृषु दिक्षु पुरस्तात् प्रतिष्ठाप्यप्रतिमाया: ॥२२॥

**मंगलदीवा य तहा, घयगुलपुण्णा [१]सुभिक्खुभक्खा य ।**
**जववारयवण्णयसत्थिगादि सव्वं महारंमं ॥३६७॥ ८/२३**

**मङ्गलदीपाश्च तथा घृत-गुडपूर्णास्तत्समन्विता:** । खरविस(श)दमभ्यवहार्यं भक्ष इत्यभिधीयते, भोज्यं तु सामान्येन द्रवादिस्वरूपमपि, **शोभने भक्ष-भोज्ये** येषु मङ्गलदीपेषु ते तथा । पाठान्तरं वा **शुभेक्षुवृक्षाश्च** इक्षुवृक्षा इक्षुयष्टय: शुभाश्च ते इक्षुवृक्षाश्च । **यवका[वा]रका:** शरावादिरोपितयवाङ्कुरा: । तेषां बीजावसानत्वात् । **वर्णकश्च**न्दनं श्रीखण्डमन्यद् वा सुन्दरम् ।

**स्वस्तिकः** प्रसिद्ध एव चतुरस्रादिरूपः । यवका(वा)रक-वर्णक-स्वस्तिकादि **सर्वं महारम्यं** महारमणीयमेतत्कर्तव्यम् ॥२३॥ (१. सुभेक्खुरुक्खा अटी. ।)

**मंगलपडिसरणाइं, चित्ताइं रिद्धिविद्धिजुत्ताइं ।**
**पढमदियहंमि चंदणविलेवणं चेव गंधड्ढं ॥३६८॥ ८/२४**

**मङ्गल[प्रतिसरणानि]**स्तुतिपरकाणि मङ्गलात्मककङ्कणानि **विचित्राणि** नानाविधानि **ऋद्धिवृद्ध्यौषध्यौ**, शास्त्रप्रसिद्धे **तद्युक्तानि । प्रथमदिवस** आद्यदिने **चन्दनं विलेपनं चैव गन्धाढ्यं** कर्पूरकस्तूर्यादिपरिमलपरिपूर्णम् ॥२४॥

**चउनारीओमिणणं, नियमा अहिगासु नत्थि उ विरोहो ।**
**नेवत्थं च इमासिं, जं पवरं तं इहं सेयं ॥३६९॥ ८/२५**

**चतसृभिर्नारीभिः** प्रशस्ताभिः । **'ओमिणणं'** ओवेणकं लोकशास्त्रप्रसिद्धं [= अवमानं प्रोंखनकं - (अटी) पोंखणा] **नियमान्नियमेन अधिकासु नास्ति तु** नास्त्येव **विरोधः** शास्त्र-व्याघातः । **नेपथ्यं च** वस्त्राभरणरूपम् **आसां** नारीणां **यत्प्रवरं** प्रधानं तन्नेपथ्य**मिह** प्रतिष्ठाप्रस्तावे **श्रेयो**ऽतिशयप्रशस्यं प्रवरादन्यन्नेष्यते इति भावः ॥२५॥

कथं पुनर्भोगाभिष्वङ्गान्न दोष इत्याशङ्क्याह -

**जं एयवइगरेणं, सरीरसक्कारसंगयं चारु ।**
**कीरइ तयं असेसं, पुण्णनिमित्तं मुणेयव्वं ॥३७०॥ ८/२६**

यत् नेपथ्यादि **एतद्व्यतिकरेण** देवप्रतिष्ठासम्बन्धेन **शरीरसत्कारसङ्गतं** शरीरविभूषासहचरित-वृत्ति **चारु** शोभनं **क्रियते** निर्वर्त्यते **तकं** ते पथ्यादि **अशेषम**खिलम् । **पुण्यनिमित्तं** पुण्यहेतुः **मुणितव्यं** मन्तव्यम् । न तत्प्रस्तावोपनतभोगादपि बन्धभावो देवपूजानिमित्तत्वात्तस्य, अन्यथात्वे-भक्तेराशातना । तस्मात्पुण्यहेतुरेव तदिति ॥२६॥

कुतः पुण्यनिमित्तमित्याह -

**तित्थगरे बहुमाणा, आणाआराहणा कुसलजोगा ।**
**अणुबंधसुद्धिभावा, रागादीणं अभावा य ॥३७१॥ ८/२७**

**तीर्थकरे** भगवति **बहुमानाद्धेतोः आज्ञाराधनादागमाराधनात्, कुशलयोगात्** कुशल-व्यापारात्, शास्त्रोक्तत्वेन । **अनुबन्धशुद्धिभावात्**सन्तानकर्मक्षयभावाद् **रागादिनामभावाच्च** । न हि रागादिकलुषितचेता इत्थं प्रवर्त्तते । तत्प्रवृत्तेरशास्त्रपूर्वकत्वाद्, यथाकथञ्चित्परोपघातेनापि

तस्य प्रवृत्तेः । प्रस्तुतस्य तु सङ्क्लेशाभावाद् रागाद्यभावः ॥२७॥

**दिक्खियजिणोमिणणओ, दाणाओ सत्तितो तहेयम्मि ।**
**वेधव्वं दारिद्दं, च होइ न कयाति नारीणं ॥३७२॥ ८/२८**

**दीक्षितजिनावमानतो**ऽभिवासितजिनप्रोङ्खणात्, सिद्धादेव **दानाच्छक्तितः** शक्त्यनुरूपं **तथै-तस्मिन्** भगवति विषयभूते, **वैधव्यं** विधवत्वं **दारिद्र्यं च** दौर्गत्यं च **भवति न कदाचिन्नारीणा** तथाविधपुण्ययुक्तत्वाद्भावसम्पन्नत्वेन तद्गुणोपपत्तेरन्यथा त्वनियमः ॥२८॥

**उक्कोसिया य पूजा, पहाणदव्वेहिं एत्थ कायव्वा ।**
**ओसहिफलवत्थसुवण्णमुत्तरयणाइएहिं च ॥३७३॥ ८/२९**

**उत्कर्षवती च पूजा प्रधानद्रव्यै**श्चन्दनकुङ्कुमागरुकर्पूरादिभिः, **अत्र** प्रस्तावे **कर्तव्या । औषधि-फल-वस्त्र-सुवर्ण-मुक्ता-रत्नाधिकैश्चौ**षध्यः फलपाकान्ताः फलानि दाडिम-मातुलुं(लिं)ग-नालिकेरादीनि । वस्त्र-सुवर्ण-मुक्ताफल-रत्नानि तु प्रसिद्धान्येव ॥२९॥

**चित्तबलिचित्तगंधेहिं चित्तकुसुमेहिं चित्तवासेहिं ।**
**चित्तेहिं विऊहेहिं, भावेहिं य विहवसारेण ॥३७४॥ ८/३०**

**चित्रबलि-चित्रगन्धैः**, बलिरूपहारो, गन्धाः कोष्टपुटादयः [कोष्ठपुटपाकादयः - अटी.] तैः **चित्रकुसुमै**र्विचित्रपुष्पैः **चित्रवासैः** सुरभिगन्धिचूर्णरूपैवस्त्वन्तरवासकस्वभावैः । **चित्रैः व्यूहै**र्विरचनाविशेषैः **भावैश्च** विरचनागतैः प्रक्रीडितप्रमुदितालिङ्गितादिभिः **विभवसारेण** विभूत्युत्कर्षेण ॥३०॥

**एयमिह मूलमंगलमेत्तो च्चिय उत्तरा वि सक्कारा ।**
**ता एयम्मि पयत्तो, कायव्वो बुद्धिमंतेहिं ॥३७५॥ ८/३१**

**एतदिह मूलमादिमङ्गलमत एवोत्तराऽपि सत्काराः** प्रवर्तन्ते । **तत्तस्माद् एतस्मिन्** प्रस्तुते **प्रयत्नतः कर्तव्यो बुद्धिमद्भिः** पुंभिः ॥३१॥

**चितिवंदण थुतिवुड्ढी, उस्सग्गो साहु सासणसुराए ।**
**थयसरण पूय काले, ठवणा मंगलगपुव्वा उ ॥३७६॥ ८/३२**

**चैत्यवन्दनं** देववन्दनं कर्तव्यम् । **स्तुतिवृद्धिः** प्रवर्धमानस्तुतिपाठरूपा करणीया । **उत्सर्गः** कायोत्सर्गो विधेयः । **साधुर्**यथा भवत्यसंमूढः इत्यर्थः । संमोहमुक्तस्य तत्त्वतः कायोत्सर्गत्वात्

तत्स्वरूपान्यथात्वापत्तेस्तया कार्याविसंवादात्तस्माद् यथा फलवांस्तथा करणीयः। **शासनसुरायाः** श्रुतदेवतायाः शासनाधिष्ठातृदेव्या इति यावत्। न ह्यनधिष्ठितो मौनीन्द्र आगम इति कृत्वा, उक्तं च परममुनिभिः -

*सलक्खणमिणं सुत्तं, जेण सव्वण्णुभासियं।*
*सव्वं च लक्खणोवेयं समहिट्ठिंति देवया ॥[ - ]*

**स्तवः** सत् स्तवपाठो विधेयः, **स्मरणं** चैत्य-गुर्वादीनां स्वाऽनुग्रहकारिणां प्रतिष्ठापयितुरधिकारिणः सूरेः **पूजा** विधेयाः स्मर्तव्यानां देवस्य वा, **काले** देशकाले अभिमतेष्टांशरूपे **स्थापना** प्रतिष्ठा **मङ्गलपूर्वा** त, पञ्चनमस्कारपूर्वैव शेषमङ्गलपूर्वा वा ॥३२॥

**पूया वंदणमुस्सग्ग पारणा भावथेज्जकरणं च।**
**सिद्धाचलदीवसमुद्दमंगलाणं च पाढो उ ॥३७७॥ ८/३३**

**पूजा** स्थापितबिम्बस्य, **वन्दनं** चैत्यवन्दनम्, **उत्सर्गः** कायोत्सर्गो निरुपसर्गनिमित्तं [प्रतिष्ठादेवताया इत्यन्ये अटी.] परिणामः **पारणा** परिसमाप्तिः कायोत्सर्गस्यैव, **भावस्थैर्यकरणं च** चित्तस्थिरतासम्पादनं च विधेयम्। **सिद्धाचलद्वीपसमुद्रमङ्गलानां च** सिद्धिक्षेत्राधिरूढकुलपर्वतजम्बूद्वीपादिलवणमहोदधिप्रभृतीनां **पाठः** स्तुतिपाठः पुनर्विधेयः ॥३३॥

तमेव दर्शयितुमाह -

**जह सिद्धाण पतिट्ठा, तिलोगचूडामणिम्मि सिद्धिपदे।**
**आचंदसूरियं तह, होउ इमा सुप्पतिट्ठ त्ति ॥३७८॥ ८/३४**

**यथा सिद्धानां** परमात्मनां **प्रतिष्ठा**ऽवस्थानं **त्रिलोकचूडामणौ** लोकमस्तकस्थे **सिद्धिपदे** [१]सिद्धिक्षेत्रे **आचन्द्रसूर्यः** आचन्द्रसूर्यावभिवाप्य तत्कालावस्थानं यावत् **तथा भवत्वियं** प्रतिमा **सुप्रतिष्ठेति** शोभनप्रतिष्ठा ॥३४॥ (१. सिद्धिं प्राप्तुं योग्यस्थलम् - सिद्धिक्षेत्रम्-तस्मिन्।)

**एवं अचलादीसु वि, मेरुप्पमुहेसु होति वत्तव्वं।**
**एते मंगलसद्दा, तम्मि सुहनिबंधणा दिट्ठा ॥३७९॥ ८/३५**

**एवमचलादिष्वपि** कुलशैलशाश्वतक्षेत्रसरित्प्रभृतिष्वपि। **मेरुप्रमुखेषु** मेरुप्रभृतिषु **भवति** वक्तव्य तद्व्यपदेशेन।

*जह मेरुस्स पइट्ठा, जम्बूदीवस्स मज्झयारम्मि।*
*आचंदसूरियं तह, होउ इमा सुप्पइट्ठ त्ति ॥१॥*

*जम्बूदीवपइट्ठा, जह सेसदीवमज्झयारंमि ।*
*आचंदसूरियं तह, होउ इमा सुप्पइट्ठ त्ति ॥२॥*

*जह लवणस्स पइट्ठा, सव्वसमुद्दाण मज्झयारंमि ।*
*आचंदसूरियं तह, होउ इमा सुप्पइट्ठ त्ति ॥३॥ इत्यादि ।[ ]*

**एते मङ्गलशब्दा** मङ्गलध्वनयः **तस्मिन्** प्रतिष्ठाकाले **शुभनिबन्धना** शुभहेतवः **दृष्टाः** समयज्ञैः ॥३५॥

**सोउं मंगलसद्दं, सउणंमि जहा उ इट्ठसिद्धि त्ति ।**
**एत्थं पि तहा संमं, विण्णेया बुद्धिमंतेहिं ॥३८०॥ ८/३६**

**श्रुत्वा मङ्गलशब्दं** प्रशस्तम्, **शकुने** शकुनविषये **यथा तु** यथैव **इष्टसिद्धिरिति** लोकविदितमेतद्, **अत्रापि** प्रतिष्ठायां **तथापि** तेनैव प्रकारेण, **सम्यग् विज्ञेया**, इष्टसिद्धिः **बुद्धिमद्भिः** प्रज्ञावद्भिः ॥३६॥

**अण्णे उ पुण्णकलसादिठावणे उदहिमंगलादीणि ।**
**जंपंतऽण्णे सव्वत्थ भावतो जिणवरा चेव ॥३८१॥ ८/३७**

**अन्ये तु सूरयः पूर्णकलशादिस्थापने** पूर्णकलशप्रदीपादिस्थापने **उदधिमङ्गलादीनि** चतुःसमुद्राग्नित्रय-प्रभृतीनि **जल्पन्ति** वदन्ति, नामग्राहं प्रतिपादयन्ति **अन्ये** सूरय एवं **सर्वस्मिन्नेव भावतः** परिणामेन **जिनवरा एव मङ्गलं** तेन तन्नामैव ग्रहीतव्यमिति भावः ॥३७॥

प्रतिष्ठानन्तरं विधिमाह -

**सत्तीएँ संघपूजा, विसेसपूजाउ बहुगुणा एसा ।**
**जं एस सुए भणिओ, तित्थयराणंतरो संघो ॥३८२॥ ८/३८**

**शक्त्या** यथाशक्ति **सङ्घपूजा** चतुर्विधसङ्घपूजा विधेयेतिशेषः, **विशेषपूजा** एकदिग्गताया सकाशाद् **बहुगुणैषा** सङ्घपूजा, **यद्** यस्माद् **एष श्रुते भणितः** श्रुत उक्तः **तीर्थकरानन्तरं सङ्घः** पूज्यतामङ्गीकृत्य तीर्थकरस्थानान्तरं द्वितीयस्थानवर्ती तत्प्रवर्त्तितगणधरादिसमुदायः । अथवानन्तरं विशेषो न विद्यते अन्तरमस्येति तीर्थकरानन्तरः तन्निर्विशेषस्तत्तुल्य इति यावत् । विशिष्टागमाभिप्रायेण प्रभु-समुहयोरभेदादनादिनिधनमहासमुदायत्वमङ्गीकृत्य तीर्थकरोऽनन्तरोऽस्येति तीर्थकरानन्तर-स्तस्यापि पूज्यतम इत्यर्थः ॥३८॥

अमुमेवार्थं समर्थयन्नाह -

**गुणसमुदाओ संघो, पवयण तित्थं ति होंति एगट्ठा ।**
**तित्थगरोऽवि य एयं, णमए गुरुभावतो चेव ॥३८३॥ ८/३९**

**गुणानां** सम्यग्दर्शनादीनां **समुदायो** मेलकः **सङ्घः, प्रवचनम्, तीर्थमिति भवन्त्येकार्थाः** शब्दाः **तीर्थकरोऽपि चैनं सङ्घं नमति** नमस्करोति **गुरुभावत** एव (**चैव**) गुणगौरवादेव गुर्वाध्यवसायादेव ॥३९॥

श्रुतोक्तमेवाह -

**तप्पुव्विया अरहया, पूजितपूया य विणयकम्मं च ।**
**कयकिच्चो वि जह कहं, कहेति नमते तहा तित्थं ॥३८४॥ ८/४०**

**तत्पूर्विका** श्रुतज्ञानपूर्विका तदाधारसङ्घपूर्विका वा अर्हताम् **अर्हता पूजितपूजा च** लोके भगवद्भिः पूजितस्य पूजा प्रवर्तते। **विनयकर्म च** कृतं भवति। 'विनयमूलमयो धर्मः प्रवर्तयितव्य' इत्यभिप्रायात् स्वयं विनयं प्रयुङ्क्ते । **कृतकृत्योऽपि** कृतार्थोऽपि नयाभिप्रायाद् **यथा कथां कथयति** देशनां करोति **तथा नमति तीर्थं** श्रुतज्ञानं सङ्घं वा ॥४०॥

**एयम्मि पूजियम्मी, नत्थि तयं जं न पूजियं होइ ।**
**भुअणे वि पूयणिज्जं, न गुणट्ठाणं ततो अण्णं ॥३८५॥ ८/४१**

**एतस्मिन्** सङ्घे **पूजिते** सति **नास्ति तकद् यन्न पूजितं भवति** । सर्वमेव पूजितमिति भावः। **भुवनेऽपि** लोकेऽपि **पूजनीयं** पूज्यतमं **न गुणस्थानं** यद् अतो सङ्घादन्यद् अपरमेतदेव पूज्यतमम् ॥४१॥

**तप्पूयापरिणामो, हंदि महाविसयमो मुणेयव्वो ।**
**तद्देसपूयणम्मि वि, देवयपूयादिणाएण ॥३८६॥ ८/४२**

**तत्पूजापरिणामः** सङ्घपूजापरिणामो **हन्ते**त्यामन्त्रणे । **महाविषयो** अनल्पविषयो [**'मो'** मकारः प्राकृतत्वात् - अटी.] **मन्तव्यो** विज्ञेयः **तद्देशपूजनेऽपि** विवक्षितक्षेत्रवर्त्ति-सङ्घैकदेशपूजनेऽपि **देवतापूजादिज्ञातेन** देवतापूजास्नानविलेपनाद्युदाहरणेन । यथा पादाद्येकदेशपूजनेन सकलदेवतापूजा, एवं सङ्घैकदेशपूजनेनापि सर्वसङ्घपूजा ॥४२॥

**आसन्नसिद्धियाणं, लिंगमिणं जिणवरेहिं पण्णत्तं ।**
**संघंमि चेव पूया, सामण्णेणं गुणनिहिम्मि ॥३८७॥ ८/४३**

**एसा उ महादाणं, एस च्चिय होति भावजण्णो त्ति ।**
**एसा गिहत्थसारो, एस च्चिय संपयामूलं ॥३८८॥ ८/४४**

**एतीएँ फलं णेयं, परमं निव्वाणमेव नियमेण ।**
**सुरणरसुहाइं अणुसंगियाइं इह किसिपलालं व ॥३८९॥ ८/४५ तिगं ।**

**आसन्नसिद्धिकानां** प्रत्यासन्नमुक्तीनां **लिङ्गं** चिह्नम् **इदं जिनवरैः प्रज्ञप्तं** कथितम् । **सङ्घे चैव पूजा सामान्येन** तदध्यवसायात् **गुणनिधौ** सकलगुणनिधाने ॥४३॥

**एषा तु** सङ्घपूजा **महादानं** तदपरदानापेक्षया । **एषैव च भवति भावयज्ञ इति** भावपूजेत्यर्थः । **एषा गृहस्थसारो** गृहस्थधर्मसार इत्यर्थः । **एषैव च सम्पन्मूलं** सर्वसम्पद्धेतुरित्यर्थः ॥४४॥

**एतस्याः** सङ्घपूजायाः, **फलं विज्ञेयं परमं** प्रधानं **निर्वाणमेव** सिद्धिपदमेव, **नियमेन** नियमाद् । न च **सुरनरसुखान्यानुषङ्गिकाण्यनुषङ्ग**रूपाण्यप्रधानानीत्यर्थः । **इह** फलप्रस्तावे **कृषिपलालवत्** । यथा कृषौ पलालमप्रधानम्, धान्यावाप्तिः प्रधाना, तन्निमित्तं लोकप्रवृत्तेश्च, एवमिहापि ॥४५॥ (सङ्घपूजाप्रकरणमुपसंहरन्नाह – अटी.)

**कयमेत्थ पसंगेणं, उत्तरकालोचियं इहऽण्णं पि ।**
**अणुरूवं कायव्वं, तित्थुण्णतिकारगं नियमा ॥३९०॥ ८/४६**

**कृतमत्र प्रसङ्गे**नालमत्र विस्तरेण **उत्तरकालोचितमिहान्यदप्यनुरूपं** योग्यं **कर्त्तव्य तीर्थोन्नतिकारक**मनुकम्पादानम्, **नियमा**न्नियोगेन ॥४६॥

**उचिओ जणोवयारो विसेसओ णवर सयणवग्गम्मि ।**
**साहम्मियवग्गम्मि य [1]एयं खलु परमवच्छल्लं ॥३९१॥ ८/४७**

**उचितो** योग्यो **जनोपचारः, सामान्येन,** लोकपूजा **विशेषतो** विशेषेण **नवरं स्वजनवर्गे** प्रत्यासन्नतरत्वात् । **साधर्मिकवर्गेऽपि च** स्वजनादन्यस्मिन् **एतत् खलु परमवात्सल्यं** साधर्मिक-वर्गोपचार एव प्रधानवात्सल्यम् ॥४७॥ (१. एवं अटी.)

**अट्ठाहिया य महिमा, सम्मं अणुबंधसाहिगा केई ।**
**अण्णे उ तिण्णि दियहे, निओगओ चेव कायव्वा ॥३९२॥ ८/४८**

**अष्टाह्निका च महिमा** पूजा महिमाशब्दः स्त्रीलिङ्गोऽप्यस्ति ।

यत् - *महान्त्यपि रत्नानि, पङ्कमग्नानि शेरते ।*

*नावज्ञा नापरिज्ञानम्, जलधेर्महिमैव सा ॥*

प्रयोगदर्शनात्, **सम्यगनुबन्धसाधिका** अविपरीतस्वरूपसातत्यनिवर्तिका **केचित्** कर्तव्येति मन्यन्ते । **अन्ये तु सूरयस्त्रीन्** दिवसान्नियोगत **एव कर्तव्या** महिमेति वर्तते ॥४८॥

**तत्तो विसेसपूयापुव्वं विहिणा पडिस्सरोमुयणं ।**

**भूयबलिदीणदाणं, एत्थं पि ससत्तिओ किंचि ॥३९३॥ ८/४९**

**ततस्तदन्तरं विशेषपूजापूर्वं** प्राक्तनदिनापेक्षया **विधिना** शास्त्रोक्तसम्प्रदायागतमन्त्र-पूर्वक[केण]-पूर्वरूपेण **परिसरोन्मोचनं** कङ्कणोन्मोचनं विधेयम् । भूतेभ्यो बलिः सिद्धान्नप्रक्षेपरूपः[प्रेतोपहारः-अटी.] पत्रपुष्पफलाक्षताढ्यः सुरभिगन्धोन्मिश्रः, दीनेभ्यो दानमनुकम्पया, भूतबलिषु दीनदानं च भूतबलिदीनदान**मत्रापि** कङ्कणोन्मोचने **स्वशक्तितो** विभवानुरूपं **किंचि** किंचित्कर्तव्यम् ॥४९॥

**तत्तो पइदिणपूयाविहाणओ तह तहेह कायव्वं ।**

**विहिताणुट्ठाणं खलु, भवविरहफलं जहा होति ॥३९४॥ ८/५०**

**ततः** कङ्कणोन्मोचनान्तरं **प्रतिदिनपूजाविधानतः** प्रतिदिवसपूजासम्पादनेन । **तथा तथा** विचित्ररूपतया **इह** प्रतिष्ठायां **कर्तव्यम्** । **विहितानुष्ठानं खलु** विहितानुष्ठानमेव, नासावद्यपूर्वं सम्भवति, उक्ताऽत्र उपहाररूपम्, शिष्टसमाचरि[त]त्वाद् **भवविरहफलं** निःश्रेयसफलं **यथा भवति** यथा सम्पद्यते ॥५०॥

**प्रतिष्ठाविधिः पञ्चाशकं अष्टमं समाप्तम् ॥८॥**

## ॥ नवमं यात्राविधान-पञ्चाशकम् ॥

प्रतिष्ठानन्तरं यात्राविधानमाह –

**नमिऊण वद्धमाणं, सम्मं संखेवओ पवक्खामि ।**
**जिणजत्ताएँ विहाणं, सिद्धिफलं सुत्तनीतीए ॥३९५॥ ९/१**

**नत्वा** प्रणम्य **वर्धमानं** प्रवर्धमानकल्याणत्वात्तथाकृतनामानम्, **सम्यङ्**मनोवाक्कायैः **सङ्क्षेपतः प्रवक्ष्यामि** वचनविस्तरमुत्सृज्य, **जिनयात्रा**[याः]**विधानं** विधिं **सिद्धिफलं** मुक्तिफलं **सूत्रनीत्या**गमनीत्या ॥१॥

किं पुनः यात्राविधानमुच्यत इत्याह –

**दंसणमिह मोक्खंगं, परमं एयस्स अट्ठहाऽऽयारो ।**
**निस्संकादी भणितो, पभावणंतो जिणिंदेहिं ॥३९६॥ ९/२**

**दर्शनमिह** सम्यक्त्वमिह **मोक्षाङ्गं** मोक्षकारणं **परमं** प्रधानमेतस्य दर्शनस्य **अष्टधाऽ**ष्टभेदः **आचारो निःशङ्कादिःभणितः प्रभावनान्तः** प्रभावनापर्यन्तो **जिनेन्द्रैः** सर्वज्ञैः यथोक्तम् –

*निस्संकिय निक्कंखिय निव्वितिगिच्छाऽमूढदिट्ठी य ।*
*उववूह थिरीकरणे वच्छल्ल पभावणेऽट्ठ ॥ [ दशवैकालिक नि.गा.१८२ ] ॥२॥*

**पवरा पभावणा इह, असेसभावंमि तीएँ सब्भावा ।**
**जिणजत्ता य तयंगं, जं पवरं ता पयासोऽयं ॥३९७॥ ९/३**

**प्रवरा** प्रधाना **प्रभावनेह** दर्शनाचारे **अशेषभावे** निःशङ्कितादिगुणसद्भावे, **तस्याः** प्रभावनायाः **सद्भावात्** सम्भवाद्धेतोः **जिनयात्रा च तदङ्गं** प्रभावनाकारणं **यद्** यस्मात् **प्रवरमु**त्तमं **तत्** तस्मात् **प्रयासः** प्रयत्नो **अय**-वक्ष्यमाणः ॥३॥

**जत्ता महूसवो खलु, उद्दिस्स जिणे [१]स कीरई जो उ ।**
**सो जिणजत्ता भण्णइ, तीएँ विहाणं तु दाणादी ॥३९८॥ ९/४**

**यात्रा** का ? **महोत्सव** उच्यते। **खलु**शब्दो वाक्यालङ्कारे। **उद्दिश्या**ङ्गीकृत्य **जिना**स्तीर्थकरान् **स क्रियत** विधीयते **यस्तु यः** पुनः, **स** महोत्सवस्तदुद्देशे प्रवृत्तः, **जिनयात्रा भण्यत** अभिधीयत।

**तस्या** जिनयात्राया **विधानं** तु विधिश्च **दानादि** वर्तते ॥४॥ (१. उ. अटी.)

एतदेव सप्रपञ्चं व्याचष्टे -

**दाणं[१] तवोवहाणं[२], सरीरसक्कार मो[३] जहासत्ति ।**
**उचितं च गीतवाइय[४], थुतिथोत्ता[५] पेच्छणादी[६] य ॥३९९॥ ९/५ दारगाहा।**

**दानं** वितरणं **तपउपधानं** तपःकर्म **शरीरसत्कारश्च** शरीरविभूषा च । **मो** इति निपातो । **यथाशक्ति** न तद्धान्याधिक्याभ्याम्, सर्वं दानादि कर्तव्यमिति शेषः । **उचितं च** योग्यं च **गीतवादित्रमिति** प्राकृतत्वाद् लुप्तविभक्तिकम् । **स्तुतिस्तोत्राणि** प्रसिद्धानि **प्रेक्षणादि** प्रसिद्धम् ॥५॥

पूर्वोक्तमेव वस्तु विवरीतुमाह -

**दाणं अणुकंपाए, दीणाणाहाण सत्तिओ णेयं ।**
**तित्थंकरणातेणं, साहूण य पत्तबुद्धीए ॥४००॥ ९/६**

**दानमनुकम्पया** दया दीनाऽनाथानां दीनाः **क्षीणविभवाः**, समानेऽपि दीनत्वे शक्तिसामर्थ्य-रहिता अनाथाः तेषां । **शक्तितः** स्वशक्त्यनुसारेण **ज्ञेयं** ज्ञातव्यम् । **तीर्थकरज्ञातेन** यथा भगवान् समस्तदैत्यामरार्चितो गृहवासराज्यमुत्सृजन् सर्वेषामनुकम्पादाने प्रवर्तते संवत्सरं यावत् । तदुदाहरणेन **साधूनां च** यात्रासमागतानां **पात्रबुद्ध्या** पात्रधिया दानमिति वर्तते ॥६॥

उक्तं दानम्, तपउपधानमाह -

**एकासणाइ नियमा, तवोवहाणं पि एत्थ कायव्वं ।**
**तत्तो भावविसुद्धी, नियमा विहिसेवणा चेव ॥४०१॥ ९/७**

**एकाशनादिकभक्तादि । नियमान्नियमेन, तपउपधानमपि** तपःकर्मापि **अत्र** यात्रायां **कर्तव्यम्। ततः** तपसः, **भावविशुद्धिः**, अध्यवसायविशुद्धिराहारलाघवा-ऽप्रमादाभ्याम्, **नियमाद्विधिसेवना चैव** कर्तव्योपदेशसेवा चैव जायते ॥७॥

उक्तं तपउपधानमधुना शरीरसत्कारमाह -

**वत्थविलेवणमल्लादिएहिं विविहो सरीरसक्कारो ।**
**कायव्वो जहसत्ति, पवरो देविंदणाएणं ॥४०२॥ ९/८**

**वस्त्र-विलेपन-माल्यादिकैर्लोकसिद्धैः विविधो** अनेकप्रकारः, **शरीरसत्कारः** शरीरविभूषारूपः **कर्तव्यो** विधेयः, **यथाशक्ति** न शक्त्यतिक्रमेण । **प्रवरः** सर्वोत्तमः, **देवेन्द्रज्ञातेन**

देवेन्द्रोदाहरणेन। यथा भगवतामर्हतां जन्म-निष्क्रमण-केवलज्ञानोत्पत्त्यादिषु सुरेन्द्रः सर्वविभूत्या सर्वादरेण च शरीरसत्कारं विधत्ते तद्वदन्यैरपि विधेयः ॥८॥

शरीरसत्कारः उक्तः। साम्प्रतं गीतवादितमाह -

**उचियमिह गीयवाइयमुचियाण वयाइएहिं जं रम्मं ।**
**जिणगुणविसयं सद्धम्मबुद्धिजणगं अणुवहासं ॥४०३॥ ९/९**

उचितं योग्यमिह यात्रायां गीतवादितं गेयवाद्यम् **उचितानां** स्वभूमिकापेक्षया। **वयआदिकैर्वयः**प्रभृतिभिर्वयो-वैचक्षण्य-रूप-सौभाग्यौदार्यैश्वर्यादिभिर्भावैः यद् **रम्यं** रमणीयं **जिनगुणविषयं** क्षान्त्यादिगुणगोचरं **सद्धर्मबुद्धिजनकं** सुन्दरधर्ममतिकारणम्, **अनुपहासम**-विद्यमानोपहासम्, न हास्यप्रायमित्यर्थः ॥९॥

स्तुतिस्तोत्रप्रतिपादनायाह -

**थुइथोत्ता पुण उचिया, गंभीरपयत्थविरइया जे उ ।**
**संवेगवुड्ढिजणगा, समा य पाएण सव्वेसिं ॥४०४॥ ९/१०**

**स्तुति-स्तोत्राणि पुनरूचितानि** योग्यानि यात्रायां **गम्भीरैः** सूक्ष्मबुद्धिगम्यैः साभिप्रायत्वात् **पदैः** शब्दैः **अर्थैश्च** तद्वाच्यैः **विरचितानि** कृतानुपूर्वीनिवेशानि गम्भीरपदार्थविरचितान्येव **यानि तु** तुशब्दस्य भिन्नक्रमस्यावधारणार्थत्वात्। **संवेगवृद्धिजनकानि** मोक्षाभिलाषातिशयजनकानि। **समानि च** पाठस्वरादिभिः। **प्रायेण** बाहुल्येन **सर्वेषां** स्तोतॄणाम् ॥१०॥

साम्प्रतं प्रेक्षणायाह -

**पेच्छणगा वि नडादी, धम्मियनाडयजुया इहं उचिया ।**
**पत्थावो पुण णेओ, इमेसिमारंभमादीओ ॥४०५॥ ९/११**

**प्रेक्षणकान्यपि** प्रेक्षणकमार्गाभिहितानि। **नटादीनि** लोकप्रसिद्धानि। **धार्मिकनाटकयुक्तानि** जिनजन्मातिशयप्रभृतिनाटकसमन्वितानि **इह** यात्रायाम् **उचितानि** योग्यानि यत्र तेषां सम्भवोऽस्ति। **प्रस्तावः पुनर्ज्ञेयो**ऽधिकारः पुनर्विज्ञेयः, **एषां** प्रेक्षणकानां **आरम्भादिको** यात्रारम्भमध्यप्रकर्षरूपः ॥११॥

दानादियात्राविधानमुक्तम्, तत्र सर्वस्यामेव यात्रायां दानं विधेयमिह पुनर्विशेषार्थमाह -

**आरंभे च्चिय दाणं, दीणादीण मणतुट्ठिजणणत्थं ।**
**रण्णाऽमाघायकारणमणहं गुरुणा ससत्तीए ॥४०६॥ ९/१२**

**आरम्भे** चादौ एव **दानं** प्रवर्तनीयं **दीनाना** दीनानाथप्रभृतीनां **मनस्तुष्टिजननार्थं** मनःपरितोषसमुत्पत्तये **राज्ञा** नृपतिना**ऽमाघातकारण**मवधकारणमभयप्रदानमित्यर्थः [मा लक्ष्मीः, सा च द्वेधा - (१) धनलक्ष्मीः, (२) प्राणलक्ष्मीश्च, अतस्तस्या घातो हननं तस्याऽभावो**ऽमाघातः** - अटी.] । **अनघं** निर्दोषम् । वधप्रवृत्त-भोजनप्रवृत्तिमात्रसम्पादनेनान्यथा तद्वृत्त्युच्छेदापत्तेः । **गुरुणा** प्रावचनिकेन **स्वशक्त्या** स्वसामर्थ्येन ॥१२॥

प्रस्तुतवस्तुसमर्थनायाऽऽगमविधिमाह -

**विसयपवेसे रण्णो, उ दंसणं उग्गहादिकहणा य ।**
**अणुजाणावण विहिणा, तेणाणुण्णाएँ संवासो ॥४०७॥ ९/१३**

**विषयप्रवेशे** देशप्रवेशे **राज्ञस्तु** नृपतेः **दर्शनं** कार्यमिति शेषः । **अवग्रहादिकथना च** । किं दीयतां भवद्भ्य इत्यादिप्रश्ने, देवेन्द्रराजाद्यवग्रहधर्मभागावासिकथनं च, **अनुज्ञापनम**वग्रहादेः **विधिना**गमोक्तेन प्रभोः प्रभुसन्दिष्टस्य वा, **तेनानुज्ञातेन** प्रभुणा प्रभुसन्दिष्टेन वा, **संवासो** निवासस्तत्र क्षेत्रे कल्पते ॥१३॥

**एसा पवयणणीती, एवं वसंताण णिज्जरा विउला ।**
**इहलोगम्मि वि दोसा, न होंति णियमा गुणा होंति ॥४०८॥ ९/१४**

**एषा प्रवचननीति**रागमन्यायः **एव**मनुज्ञायां **वसता**मवतिष्ठमानानां **निर्जरा विपुला** विस्तीर्णा । **इहलोकेऽपि दोषाः** प्रत्यनीकोपद्रवादयः **न भवन्ति, नियमाद् गुणाः** शासनोन्नत्त्यादयो **भवन्ति** ॥१४॥

**दिट्ठो पवयणगुरुणा, राया अणुसासिओ य विहिणा उ ।**
**तं नत्थि जण्ण वियरइ, कित्तियमिह आमघाउ त्ति ? ॥४०९॥ ९/१५**

**दृष्टः प्रवचनगुरुणा**ऽनुयोगज्ञेनाचार्येण **राजा अनुशासित**श्चानुशिष्टश्च **विधिना तु** लोकलोकोत्तर संमतेन, पुनः **तन्नास्ति यन्न वितरति** सर्ववस्तूपयोगी प्रयच्छत्येव **कियत्** किंपरिमाण**मिह** यात्रायाम् **अमाघात** इत्यभयप्रदानम् ॥१५॥

**एत्थमणुसासणविही, भणिओ सामण्णगुणपसंसाए ।**
**गंभीराहरणेहिं, उत्तीहि य भावसाराहिं ॥४१०॥ ९/१६**

**अत्रानुशासनविधिर्भणित** उक्तो राज्ञ इति गम्यते । **सामान्यगुणसंशया**, लोकलोकोत्तरा-विरुद्ध-विनयदाक्षिण्यसौजन्यादिगुण[स्तुत्या । तथा **गंभीरोदाहरणैः** अतुच्छज्ञातैः महापुरुषगतैः

**उक्तिभिश्च** भणितिभिश्च । **भावसाराभिः** भावगर्भाभिः – पाठोऽयं अटीतः ।] ॥१६॥

[अनुशासन अटी.]विधिमेवाह –

**सामण्णे मणुयत्ते, धम्माउ णरीसरत्तणं णेयं ।**
**इय मुणिऊणं सुंदर !, जत्तो एयम्मि कायव्वो ॥४११॥ ९/१७**

**सामान्य** साधारणे **मनुजत्वे**ऽन्यमनुष्यैः **धर्मान्नरेश्वरत्वं** प्रभुत्वं **ज्ञेयम्** । **इत्येवं मत्वा सुन्दरः** प्रधान **यत्न एतस्मिन्** धर्मे **कर्तव्यो** विधेयः ॥१७॥

किमिति यत्नः कर्तव्य इत्याह –

**इड्ढीण मूलमेसो, सव्वासिं जणमणोहराणं ति ।**
**एसो य जाणवत्तं, णेओ संसारजलहिम्मि ॥४१२॥ ९/१८**

**ऋद्धिमूलमभ्युदयानामकारणम् एष धर्मः, सर्वासां जनमनोहराणामिति** लोकमनोहारिणीणामेव **एष च धर्मो यानपात्र** सन्तरणोपायरूपं **ज्ञेयः संसारजलधौ** तदुत्तितीर्षूणाम् ॥१८॥

एषो धर्मः कथं भवतीत्याह –

**जायइ य सुहो एसो उचियत्थापायणेण सव्वस्स ।**
**जत्ताएँ वीयरागाण विसयसारत्तओ पवरो ॥४१३॥ ९/१९**

**जायते च** सम्पद्यते च **शुभः** शुभनिमित्तत्वाद् **एष धर्मः । उचितार्थापादनेन सर्वस्य** योग्यप्रयोजनसम्पादनेन **यात्रयोत्सवेन वीतरागाणा** भगवतां **विषयसारत्वतो** वीतरागा एव विषयस्तद्यात्रास्तत्प्रधानत्वतो विषयमाहात्म्यात् **प्रवरो** धर्मः ॥१९॥

**एतीएँ सव्वसत्ता, सुहिया खु अहेसि तंमि कालंमि ।**
**एण्हिं पि आमघाएण कुणसु तं चेव एतेसिं ॥४१४॥ ९/२०**

**एतया** यात्रया **सर्वसत्त्वाः** सर्वप्राणिनः **सुखिताः** सुखिन **एवाभूवन्** संवृत्ताः **तस्मिन् काले** भगवद्विहारसमये, **इदानीमपि** साम्प्रतमपि **अमाघातेन** अवधेन **कुरु** सम्पादय । **तदेव** सुखितत्वमेतेषां सर्वसत्त्वानां प्राक्प्रस्तुतानाम् ॥२०॥

यदा तु प्रावचनिकस्तथाविधाचार्यो न सन्निहितस्तदा को विधिरित्याह –

**तम्मि असंते राया, दट्ठव्वो सावगेहि वि कमेणं ।**
**कारेयव्वो य तहा, दाणेण वि आमघाउ त्ति ॥४१५॥ ९/२१**

**तस्मिन्** प्रावचनिके असत्यसन्निहिते **राजा** नृपतिः **द्रष्टव्यः श्रावकैरपि क्रमेण** नीत्या **कारयितव्यश्च तथा दानेनापि** तदाह्लादकेन **अमाघात इति** अवधः ॥२१॥

परोपतापपरिहारार्थमाह –

**तेसिं पि घायगाणं, दायव्वं सामपुव्वगं दाणं ।**
**तत्तियदिणाण उचियं, कायव्वा देसणा य सुहा ॥४१६॥ ९/२२**

**तेषामपि घातकानां** प्राणिवधजीविनां **दातव्यं** देयम् । **सामपूर्वकं** प्रीतिपूर्वकं दानमन्नपानादेस्तावद्दिनानामुचितं यात्रादिनयोग्यम् । **कर्तव्या देशना च शुभा** भवतामप्येवं धर्मावाप्तिर्भविष्यतीति ॥२२॥

एवं क्रियमाणे को गुण इत्याह –

**तित्थस्स वण्णवाओ, एवं लोगम्मि बोहिलाभो य ।**
**केसिंचि होइ परमो, अण्णेसिं बीयलाभो त्ति ॥४१७॥ ९/२३**

**तीर्थस्य** शासनस्य **वर्णवादो** गुणवादः । **एवमुक्तनीत्या लोके** सर्वजने **बोधिलाभश्च** सम्यक्त्वलाभश्च **केषाञ्चिल्लघुकर्मणां भवतीति परमः** प्रधानः । **अन्येषां बीजलाभ** इति पुण्यानुबन्धिपुण्यसम्पत्तिः ।२३॥

किमिति वर्णवाद एवेष्यते इत्याह –

**जा चिय गुणपडिवत्ती, सव्वण्णुमयम्मि होइ परिसुद्धा ।**
**स च्चिय जायति बीयं, बोहीए तेणणाएणं ॥४१८॥ ९/२४**

**यैव च गुणप्रतिपत्तिर्गुणाभ्युपगतिः सर्वज्ञमते** सर्वज्ञशासने **भवति परिशुद्धा** भावगर्भा प्रशंसादिरूपा **सैव च जायते बीजं** कारणं **बोधेर्बोधिलाभस्य स्तेनज्ञातेन** चौरोदाहरणेन । तच्च प्रागुक्तम् (७-८ गाथायाम्) ॥२४॥

व्यतिरेकमाह –

**इय सामत्थाभावे, दोहि वि वग्गेहिं पुव्वपुरिसाणं ।**
**इय सामत्थजुयाणं, बहुमाणो होति कायव्वो ॥४१९॥ ९/२५**

**इति सामर्थ्याभाव** एवंविधशक्त्यभावे **द्वाभ्यामपि वर्गाभ्यां** साधुश्रावकसमूहाभ्यां **पूर्वपुरूषाणां** स्ववर्गान्तःपातिनां प्राक्तनकालभाविनां स्वकीयवर्तमानकालापेक्षया । **इति सामर्थ्ययुतानामेवंविधसामर्थ्योपेतानां बहुमानस्तेषु** प्रीतिविशेषः **भवति कर्तव्यः** ॥२५॥

बहुमानमेवाह -

**ते धण्णा सप्पुरिसा, जे एयं एवमेव णिस्सेसं ।**
**पुव्विं करिंसु किच्चं, जिणजत्ताए विहाणेणं ॥४२०॥ ९/२६**

ते पूर्वपुरुषा **धन्या सत्पुरुषा** वर्तन्ते **ये एतदेवमेवोक्तवद् निःशेषं** सकलं **पूर्वं** प्राक् **अकार्षुः** कृतवन्तः **कृत्यं** कर्तव्यम् । **जिनयात्राया** उक्तस्वरूपाया **विधानेन** कारणेन ॥२६॥

**अम्हे उ तह अधण्णा, धण्णा उण एत्तिएण जं तेसिं ।**
**बहु मण्णामो चरियं, सुहावहं [१]धम्मपुरिसाणं ॥४२१॥ ९/२७**

**वयं [ तु ] पुनस्तथा** तद्वद् **अधन्या**, नास्माकं तथा धन्यतास्तीति भावः । **धन्याः पुनरेतावता** इयन्मात्रेण **यत्तेषां बहु मन्यामहे चरितं** विहितं **सुखावहं** शुभावहं वा **धर्मपुरूषाणां धीरपुरूषाणाम्** ॥२७॥ (१. वीरपुरिसाणं अटी.)

**इय बहुमाणा तेसिं, गुणाणमणुमोयणा णिओगेणं ।**
**तत्तो तत्तुल्लं चिय, होइ फलं आसयविसेसा ॥४२२॥ ९/२८**

**इति बहुमानादेव** स्वरूपप्रीतिविशेषात् **तेषा** पूर्वपुरुषाणां सम्बन्धिनां **गुणानामनुमोदना**-नुमतिः, **नियोगेनावश्यंतया ततो** विकलाऽनुष्ठानादनुमोदनातो वा [तत्] **तुल्यमेव भवति** । **फलमाशयविशेषात्परिणामविशेषात्** कृतकारितानुमतिभेदभिन्ने हि पुण्यपापे वनछेतृ-बलदेव-मृगोदाहरणेन, भावतस्तु तदविकलानुष्ठानमेव स्वसत्क्रियाप्रवृत्तेः, तथाविधपुण्याभावस्तु तत्कार्यप्रतिबन्धकः, न पुरुषापराधः कश्चित्, प्रदात्रा यत्नेन परिहर्तव्य इति तत्तुल्यमेव फलम् ॥२८॥

उपसञ्जिहीर्षुराह -

**कयमेत्थ पसंगेणं, तवोवहाणादिया वि नियसमए ।**
**अणुरूवं कायव्वा, जिणाण कल्लाणदियहेसु ॥४२३॥ ९/२९**

**कृतमत्र प्रसङ्गेनालमत्र** प्रसक्त्या आहाराभयदानादिविषयया **तप उपधानादिकाऽपि** तपःकर्मादयोऽपि **निजसमये** स्वीयकाले **अनुरूपमौचित्येन कर्तव्या** करणीया **जिनानां** भगवतां चतुर्विंशतेः **कल्याणदिवसेषु** पञ्चमहाकल्याणप्रतिबद्धेषु ॥२९॥

एतद्विभावनायाह -

**पंच महाकल्लाणा, सव्वेसिं जिणाण होंति णियमेण ।**
**भुवणच्छेरयभूया, कल्लाणफला य जीवाणं ॥४२४॥ ९/३०**

**पञ्च महाकल्याणानि** देवभवावतार-जन्म-दीक्षा-केवलज्ञानोत्पत्ति-निर्वाणाख्यानि, **जिनानां सर्वेषां भवन्ति नियमेन** नियोगेन, **भुवनाश्चर्यभूतानि** सकललोकाद्भुतरूपाणि **कल्याणफलानि च जीवानां** सर्वेषामेवैकेन्द्रियपञ्चेन्द्रियतिर्यङ्मनुष्यदेवानां कल्याणप्रतिबद्धदिवससमयानामनादिभावेन सर्वावसर्पिण्यादिषु प्रतिनियतत्वाख्यानात्, तेषु च तद्भावप्रवृत्तेः ॥३०॥

तान्येव निर्दिदिक्षुराह -

**गब्भे जम्मे य तहा, निक्खमणे चेव नाणनिव्वाणे ।**
**भुवणगुरूण जिणाणं, कल्लाणा होंति णायव्वा ॥४२५॥ ९/३१**

**गर्भे**ऽवतारसमये, **जन्मनि च तथा निष्क्रमणे च** चारित्रप्रतिपत्तौ **ज्ञाने निर्वाणे भुवनगुरूणां** जगत्पूज्यानां **जिनानां** तीर्थकराणां **कल्याणानि भवन्ति ज्ञातव्यानि** ॥३१॥

**तेसु य दिणेसु धन्ना, देविंदादी करिंति भत्तिनया ।**
**जिणजत्तादिविहाणा, कल्लाणं अप्पणो चेव ॥४२६॥ ९/३२**

**तेषु च दिनेषु धन्याः** पुण्यभाजः, **देवेन्द्रादयो** देवासुराद्यधिपतयः **कुर्वन्ति** विदधति **भक्तिनता** भक्तिप्रह्वा **जिनयात्रादिविधानाद्** विधिना **कल्याणं** श्रेयोहेतुः **आत्मनश्चैवास्माकं** श्रेय इति मन्यमानाः ['**चैव**'शब्दस्य समुच्चयार्थत्वेन परेषां च-अटी.] ॥३२॥

**इय ते दिणा पसत्था, ता सेसेहिं पि तेसु कायव्वं ।**
**जिणजत्तादि सहरिसं, ते य इमे वद्धमाणस्स ॥४२७॥ ९/३३**

**एतानि** [इय' इत्यतो हेतोः पूर्वोक्तात्... अटी.] कल्याणसम्बन्धीनि **दिनानि प्रशस्तानि** मङ्गल्यानि, **तत्तस्मात् शेषैरपि** मनुष्यैः **तेषु** दिनेषु **कर्तव्यं जिनयात्रादि सहर्षं** सप्रमोदं यथा भवति । **तानि चेमानि** कल्याणदिनानि **वर्धमानस्य** भगवतः ॥३३॥

**आसाढसुद्धछट्ठी, चेत्ते तह सुद्धतेरसी चेव ।**
**मग्गसिरकिण्हदसमी, वइसाहे सुद्धदसमी य ॥४२८॥ ९/३४**

**कत्तियकिण्हे चरिमा, गब्भाइदिणा जहक्कमं एते ।**
**हत्थुत्तरजोएणं चउरो, तह सातिणा चरमो ॥४२९॥ ९/३५ जुम्म ।**

**आषाढ शुद्धषष्ठ्या** आषाढशुक्लपक्षषष्ठीतिथिः, **चैत्रे तथा शुद्धत्रयोदशी चैव मार्गशीर्षकृष्णदशमी वैशाखे शुद्धदशमी च** ॥३४॥

**कार्तिककृष्णे चरमाऽमावास्या, गर्भादिदिनानि यथाक्रमानुपूर्व्यैतानि**। हस्त उत्तरो यासां ता हस्तोत्तरा उत्तराफाल्गुन्यः ताभिर्योगश्चन्द्रमस इति गम्यते तेन **हस्तोत्तरयोगेन चत्वारो** दिवसा **तथा स्वातिना** स्वातिनक्षत्रेण **चरमो** दिवसो युक्त इति गम्यते ॥३५॥

**अहिगयतित्थविहाया, भगवंति णिदंसिया इमे तस्स ।**
**सेसाण वि एवं चिव, णियणियतित्थेसु विण्णेया ॥४३०॥ ९/३६**

**अधिकृततीर्थस्य विधाता भगवानिति निर्दशितानीमानि तस्य** दिनानीति सम्बध्यते । **शेषाणामपि** तीर्थकृताम् **एवमेव निजनिजतीर्थेषु विज्ञेयानि**। संस्कृते दिनशब्दः पुल्लिङ्गोऽप्यस्ति, तदनुरोधेनापि ग्रन्थो नेयः ॥३६॥

किमित्येवं विधानमुपदिश्यत इत्याह [गाथायुगलेन] -

**तित्थगरे बहुमाणो, अब्भासो तह य जीयकप्पस्स ।**
**देविंदादिअणुगिती, गंभीरपरूवणा लोए ॥४३१॥ ९/३७**

**वण्णो य पवयणस्सा, इयजत्ताए जिणाण नियमेणं ।**
**मग्गाणुसारिभावो, जायइ एत्तो च्चिय विसुद्धो ॥४३२॥ ९/३८ जुग्गं ।**

**तीर्थंकरे बहुमानो** भावविशेषः, **अभ्यास** आम्नायः **तथा च जीतकल्पस्या**चरितकल्पस्य **देवेन्द्राद्यनुकृतिर्**देवासुरेन्द्राद्यनुकरणम्, तद्वत्प्रवृत्तिरनुकारः, **गम्भीरप्ररूपणा लोके** उत्तमाऽऽसेवितोऽयं धर्मः कथमन्यथेदृशी सत्प्रवृत्तिः ॥३७॥

**वर्णश्च** प्रशंसा च वर्णवाद इत्यर्थः। **प्रवचनस्य** [१]समान्यस्य **इतियात्रया** एवंविधयात्रया **जिनानां** सम्बन्धिनां क्रियमाणया **नियमेनावश्यं**भावेन, **मार्गानुसारीभावो जायते** सम्पद्यते । **अत एव** बहुमानादिगुणसमूहादेव जिनयात्रात एव वा **विशुद्धो** निष्कलङ्कः ॥३८॥ (१. समान्यस्य- सुष्ठु मान्यस्य ।)

**तत्तो सयलसमीहियसिद्धी णियमेण अविकलं जं सो ।**
**कारणमिमीएँ भणिओ, जिणेहिं जियरागदोसेहिं ॥४३३॥ ९/३९**

**ततो** मार्गानुसारिभावात् **सकलसमीहितसिद्धिः** सर्वेष्टफलनिष्पत्तिः, **नियमेन** नियमात् । **अविकलं** परिपूर्णम् । **यद्** यस्मात् **स** मार्गानुसारिभावः । **कारणं** हेतुः **अस्याः** सकलसमीहित- सिद्धेः **भणित** उक्तः **जिनैर्**भगवद्भिः **जितरागद्वेषैर्**जितमोहविकारैः ॥३९॥

किं पुनर्मार्गानुसारीभावः स्तूयत इत्याह -

**मग्गाणुसारिणो खलु, तत्ताभिणिवेसओ सुभा चेव ।**
**होइ समत्ता चेट्ठा, असुभा वि य णिरणुबंध त्ति ॥४३४॥ ९/४०**

**मार्गानुसारिणः** खलु पुरुषस्य विशिष्टक्षयोपशमसम्पन्नस्य, **तत्त्वाभिनिवेशतस्**तत्त्वाधाराद्धेतोः **शुभा चैव** निरवद्यैव **भवति । समस्ता चेष्टा** क्रिया, **अशुभापि च** सावद्यापि च **निरनुबन्धेति** निरूपक्रमक्लिष्टकर्मविगमात् तद्भावेनैवानुबन्धक्षपणात् ॥४०॥

प्रस्तुतहेतुमाह -

**सो कम्मपारतंता, वट्टइ तीए ण भावओ जम्हा ।**
**इय [१]जत्ताइ य बीयं, एवंभूयस्स भावस्स ॥४३५॥ ९/४१**

**सो** मार्गानुसारी पुमान् **कर्मपारतन्त्र्याद्धेतोः वर्त्तते । तस्या**मशुभचेष्टायां द्रव्यतः, **न भावतो यस्मात्** मार्गानुसारिणो हि न भावतोऽशुभचेष्टावृत्तिः कर्मक्षयोपशमसामर्थ्येन । **इति यात्रादि च** बीजमवन्ध्यकारणं **एवंभूतस्य** सकलश्रेयोनिधान[स्य]**भावस्य** ॥४१॥ १. जत्ता इय. अटी. ।

**ता रहणिक्खमणादि वि, एते उ दिणे पडुच्च कायव्वं ।**
**जं एसो च्चिय विसओ, पहाण मो तीए किरियाए ॥४३६॥ ९/४२**

**तत्** तस्मात्, **रथनिष्क्रमणादि [अपि]**आदिशब्दाच्चित्रपटपरिग्रहः । **एतानि तु** प्राक्प्रस्तुतानि **दिनानि प्रतीत्य कर्तव्यम् । यद्** यस्माद् **एष एवो**क्तदिनलक्षणो **विषयः** क्रियागोचरः, **प्रधानः** सुन्दरः **मो** इति निपातः **तस्याः क्रियाया** रथनिर्गमादिकायाः ॥४२॥

किं पुनः पञ्चमहाकल्याणप्रतिबद्धदिवसाश्रयणमुपदिश्यत इत्याह -

**विसयप्पगरिसभावे, किरियामेत्तं पि बहुफलं होइ ।**
**सक्किरिया वि हु णं तहा, इयरम्मि अवीयरागि व्व ॥४३७॥ ९/४३**

**विषयप्रकर्षभावे** विषयातिशयसद्भावे, **क्रियामात्रमपि** स्वशक्त्यानुसारेण **बहुफलं भव**त्यधिकफलं सम्पद्यते । **सत्क्रियापि** विशेषक्रियापि । **हुः** पुरणे । **न तथा इतरस्मिन्**नविषये, **अवीतराग इ**वावीतरागवत् ॥४३॥

**लद्धूण दुल्लहं ता, मणुयत्तं तह य पवयणं जइणं ।**
**उत्तमणिदंसणेसुं, बहुमाणो होइ कायव्वो ॥४३८॥ ९/४४**

**लब्ध्वा**ऽवाप्य **दुर्लभं** दुष्प्राप्यं **तत्**तस्मात् **मनुजत्वं** मानुषत्वम्। **तथा च प्रवचनं** जिनानामिदं **जैनम्**। **उत्तमनिदर्शनेषू**त्तमज्ञातेषु **बहुमानः** प्रीतिविशेषः **भवति कर्तव्यः** ॥४४॥

**एसा उत्तमजत्ता, उत्तमसुयवण्णिया सदि बुहेहिं ।**
**सेसा य उत्तमा खलु, उत्तमरिद्धीएँ कायव्वा ॥४३९॥ ९/४५**

**एषा** पूर्वोक्ता **उत्तमयात्रा** प्रधानयात्रा **उत्तमश्रुतवर्णिता** कल्पादिश्रुतवर्णिता। **सदा** सर्वकालं **बुधैर्विद्वद्भिः शेषा चोक्त**दिनेभ्योऽन्या **उत्तमा खलू**त्तमैव **उत्तमर्ध्या** प्रधानर्ध्या **कर्तव्या** ॥४५॥

व्यतिरेकदोषमाह -

**इयराऽतब्बहुमाणोऽवण्णा य इमीएँ निउणबुद्धीए ।**
**एयं विचिंतियव्वं, गुणदोसविहावणं परमं ॥४४०॥ ९/४६**

**इतरथाऽतद्बहुमानो**ऽनन्तरस्थानबहुमानो हीनगुणबहुमान इत्यर्थः। **अवज्ञा च** परिभवश्च **अस्यामु**त्तमयात्रायां **निपुणबुद्ध्या** सूक्ष्मधिया। **एवं विचिन्तयितव्य**मालोचनीयम्। **गुणदोष-विभावनं** वस्तुस्वरूपगुणदोषप्रकाशकम्। **परमं** प्रधानम् ॥४६॥

एतदेवाह -

**जेट्ठंमि विज्जमाणे, उचिए अणुजेट्ठपूयणमजुत्तं ।**
**लोगाहरणं च तहा, पयडे भगवंतवयणम्मि ॥४४१॥ ९/४७**

**ज्येष्ठे** प्रथमे **विद्यमाने** सम्भवत्यविरोधेन, **उचिते** योग्ये **अनुज्येष्ठस्या**नन्तरस्थानीयस्य **पूजनमा**श्रयणमत्यहितत्वापादनम् **अयुक्तं लोकाहरणं च** लोकोदाहरणं च। **तथा** प्रथमस्थानवर्तितयाऽ**युक्तम्, प्रकटे** प्रकाशे **भगवद्वचने** प्रथमस्थानवर्त्तिनि सति, निदर्शनरूपेण तु द्वितीयस्थाने लोकोदाहरणमप्याश्रियते ज्येष्ठाविरोधेन ॥४७॥

किमित्येवमुपदिश्यत इत्याह -

**लोगो गुरुतरगो खलु, एवं सति भगवतो वि इट्ठो त्ति ।**
**मिच्छत्तमो य एयं, एसा आसायणा परमा ॥४४२॥ ९/४८**

**लोको गुरुतरकः खलु** गौरवार्हः **एवं सत्य**नुज्येष्ठपूजने **भगवतोऽपि** सकाशाद् **इष्ट** इत्यभिप्रेतः। **मिथ्यात्वमेव** ['ओकारो निपातः पूरणार्थः अटी.] **चैतत्** सर्वज्ञादपि लोकोत्तमत्वाश्रयणम् **एषा आशातना परमा** सर्वज्ञावज्ञासम्पादनेन तस्मात्, सर्वत्र प्रथमं सर्वज्ञवचनमेवाङ्गीकर्तव्यम्, तदनु लोकस्तदविरोधि ॥४८॥

**इय अण्णत्थ वि सम्मं, णाउं गुरुलाघवं विसेसेणं ।**

**इट्ठे पयट्टियव्वं, एसा खलु भगवतो आणा ॥४४३॥ ९/४९**

**इत्येवमन्यत्रापि** प्रस्तुतादन्यत्रार्थे **सम्यक् ज्ञात्वा गुरुलाघवं** गुणगौरवं दोषलाघवम्, **विशेषेण** परस्य च विवेकेन **इष्टे प्रवर्तितव्यम**भिमत एव प्रवृत्तिर्विधेया । **एषा खलु** एषैव **भगवत आज्ञा** सर्वज्ञस्योपदेशः ॥४९॥

प्रकरणमुपसञ्जिहीर्षुराह -

**जत्ताविहाणमेयं, णाऊणं गुरुमुहाउ धीरेहिं ।**

**एवं चिय कायव्वं, अविरहियं भत्तिमंतेहिं ॥४४४॥ ९/५०**

**यात्राविधानमेतत्** प्रागुक्तं **ज्ञात्वा** विज्ञाय **गुरुमुखाद्** गुरुवचनाद्, **धीरैः** स्थिरैः (धीमद्भिः अटी.) **एवमेव कर्तव्यमविरहितं** निरन्तरं **भक्तिमद्भि**र्भक्तिसम्पन्नैः ॥५०॥

**॥ यात्राविधि-पञ्चाशकं नवमं समाप्तम् ॥**

# ॥ दशमं उपासकप्रतिमा-पञ्चाशकम् ॥

यात्राविध्यनन्तरं श्रावककर्तव्यतयोपासकप्रतिमा दर्शयन्नाह -

**नमिऊण महावीरं, भव्वहियट्ठाए लेसओ किंपि ।**
**वोच्छं समणोवासगपडिमाणं सुत्तमग्गेणं ॥४४५॥ १०/१**

**नत्वा** भावतो नमस्कृत्य **महावीरं** महावीर्यविराधनाद्[1] भगवन्तं वर्धमानस्वामिनम्, **भव्यहितार्थाय** भव्यहितोपकाराय, **लेशतः** सङ्क्षेपेण **[ किमपि ] किञ्चित्** स्वल्पं **वक्ष्ये श्रमणोपासकप्रतिमानां** श्रावकप्रतिमानां **सूत्रमार्गेणा**गमपथेन ॥१॥ (१. विराधनाद् - विशेषेण आराधना, इति विराधना, तस्मात् ।)

कियत्यस्ताः श्रमणोपासकप्रतिमा ? इत्याह -

**समणोवासगपडिमा, एक्कारस जिणवरेहिं पण्णत्ता ।**
**दंसणपडिमादीया, सुयकेवलिणा जतो भणियं ॥४४६॥ १०/२**

श्रमणान् साधूनुपासते सेवते ये ते **श्रमणोपासका**स्तेषां **प्रतिमा**गमोक्ता **एकादशा** एकेनाधिका दश, **जिनवरैः प्रज्ञप्ताः** कथिता **दर्शनप्रतिमादिकाः श्रुतकेवलिना** भद्रबाहुस्वामिना **यतो भणित**मुक्तम् ॥२॥

ता एवाह -

**दंसणवयसामाइयपोसहपडिमाअबंभसच्चित्ते ।**
**आरंभपेसउद्दिट्ठवज्जए समणभूए य ॥४४७॥ १०/३ दारगाहा ।**

**दर्शन**प्रतिमा । **व्रत**प्रतिमा **सामायिक**प्रतिमा । **पोषध**प्रतिमा । **प्रतिमा**प्रतिमा । **अब्रह्मवर्ज**प्रतिमा । **सचित्तवर्ज**प्रतिमा । **आरम्भवर्ज**प्रतिमा । **प्रेष्यारम्भवर्ज**प्रतिमा । **उद्दिष्टभक्त**प्रतिमा । **श्रमणभूत**प्रतिमा **च** ॥३॥

तत्राद्या व्याचिख्यासुराह -

**दंसणपडिमा णेया, सम्मत्तजुयस्स जा इहं बोंदी ।**
**कुग्गहकलंकरहिया, मिच्छत्तखओवसमभावा ॥४४८॥ १०/४**

**दर्शनप्रतिमा ज्ञेया सम्यक्त्वयुक्तस्य** सम्यग्दर्शनिकोपासकरूपा सामान्येन[ **या** ]**इह** प्रक्रमे

**बोंदी** तनुः **कुग्रहकलङ्करहिता** कुत्सिताभिनिवेशदोषवर्जिता । **मिथ्यात्वक्षयोपशमभावात्** मिथ्यादर्शन मोहनीयकर्मक्षयोपशमभावेन ॥४॥

कारणाभावात् कार्याभावमाह -

**मिच्छत्तं कुग्गहकारणं ति खओवसममुवगए तम्मि ।**
**ण तओ कारणविगलत्तणेण सदि विसविगारो व्व ॥४४९॥ १०/५**

**मिथ्यात्वं** कर्म **कुग्रहकारणमितिकृत्वा क्षयोपशममुपगते** आगते **तस्मिन्** मिथ्यात्वे **न तको** न स कुग्रहः । **कारणविकलत्वेन** मिथ्यादर्शनप्रतिबद्धशक्तित्वेन **सर्वदा विषविकारवत्**। यथा प्रतिबद्धसामर्थ्ये विषे मन्त्रादिना तद्विकारभावस्तद्वद् मिथ्यात्वे प्रतिस्खलितशक्तिके कुग्रहाभावः ॥५॥

कीदृक् प्रथमप्रतिमाव्यवस्थित इति प्रतिपादनायाह -

**होइ अणाभोगजुओ, ण विवज्जयवं तु एस धम्मम्मि ।**
**अत्थिक्कादिगुणजुतो, सुहाणुबंधी णिरतियारो ॥४५०॥ १०/६**

**भवति अनाभोगयुतो**ऽपरिज्ञानसमन्वितो **न विपर्ययवांस्तु** न विपरीतपरीज्ञानोऽभिनिवेशाद् **एष** सम्यग्दृष्टिः, **धर्मे** धर्मविषये श्रुतचारित्रधर्म इत्यर्थः । **आस्तिक्यादिगुणयुतः** आस्तिक्याऽनुकम्पा-निर्वेद-संवेग प्रशमगुणान्वितः । सूत्रे तु यथा प्राधान्यमुपन्यासः प्रशमादीनां लाभे तु पश्चानुपूर्वी । शुभोऽनुबन्धो विद्यतेऽस्येति **शुभानुबन्धी, निरतिचारः** शङ्काद्यतिचार-रहितः ॥६॥

**बोंदी य एत्थ पडिमा, विसिट्ठगुणजीवलोगओ भणिया ।**
**ता एरिसगुणजोगा, सुहो उ सो खावणत्थं ति ॥४५१॥ १०/७**

**बोन्दिश्च मूर्तिः चात्र प्रतिमा विशिष्टगुणजीवलोकतो** विशिष्टगुणजीवतत्वाद् **भणितोक्ता**। **तत्** तस्माद्, **ईदृशगुणयोगात्** पूर्वोक्तसम्बन्धात्, **शुभस्तु** शुभ एव जीवलोकः विशिष्टजीवितरूपः **ख्यापनार्थमित्यस्यार्थस्य** ख्यापनाय विशिष्टगुणजीवलोकतः प्रतिमोच्यते इति सम्बन्धः । तदभावे तु न तत्वतः प्रतिमा, दर्शनीयत्वादिगुणाभावेन, गुणवत एव हि मूर्तिः प्रशंसनीया लोके नान्यस्य, इयं चाचाराङ्गदशाश्रुतस्कन्धानुसारेण तद्विहितानुष्ठानसम्पन्नाऽवसेया, शब्दार्थोऽपि तदनुसारेणैव विज्ञेयो न प्रतिपादितमात्र एव । मूलागमस्य प्रमाणत्वोपपत्तेस्तदविरुद्धस्य चान्यस्याप्यविरुद्धश्चायम्। तेनोपादेय एव शब्दार्थोपपत्तेः सूरिणैवं विवक्षितत्वात् ॥७॥

उक्ता दर्शनप्रतिमा, तदनन्तरमिदमाह -

**एवं वयमादीसु वि, दट्ठव्वमिणं ति नवरमेत्थ वया ।**
**घेप्पंतऽणुव्वया खलु, थूलगपाणवहविरयादी ॥४५२॥ १०/८**

**एवं व्रतादिष्वपि** व्रतप्रतिमादिष्वपि **दृष्टव्यमिदमिति** प्रतिमाशब्दार्थप्रयोजनम्, व्रतधरस्य मूर्तिः सामयिकवतो मूर्तिरिति **नवरमत्र व्रतानि, गृह्यन्त अणुव्रतानि खलु स्थूलकप्राण-वधविरत्यादीनि** सर्वाण्येव ॥८॥

तानि च भावतः कदा भवन्तीत्याह -

**सम्मत्तोवरि ते सेसकम्मणो अवगए पुहुत्तम्मि ।**
**पलियाण होंति नियमा, सुहायपरिणामरूवा उ ॥४५३॥ १०/९**

**सम्यक्त्वस्य** सम्यग्दर्शनस्य तल्लाभकालापेक्षयोपर्युपरितनकाले तानि व्रतानि **शेषकर्मणस्तदा-**वारकस्य **अपगते** प्रच्युते जीवप्रदेशेभ्यः कालतो जीववीर्याद् वा। **पृथक्त्वे पल्यानां** पल्योपमानां समयप्रसिद्धानामद्धापल्योपमानां यैर्नारक-तिर्यग्-मनुष्य-देवायुंषि निरूप्यन्ते, तेषां **भवन्ति** व्रतानि। **नियमान्नियमेन शुभात्मपरिणामरूपाणि तु** शुभश्चासावात्मपरिणामश्चतद्रूपाणि ॥९॥

पुनस्तानि के तत्सत्तासम्पाद्यफलमाह -

**बंधादि असक्किरिया, संतेसु इमेसु पहवइ न पायं ।**
**अणुकंपधम्मसवणादिया उ पहवति विसेसेण ॥४५४॥ १०/१०**

**बन्धादि,** बन्धवधच्छविच्छेदादिः **असत्क्रिया**ऽसच्चेष्टा, **सत्सु** विद्यमानेषु **एषु** व्रतेषु परिणामरूपेषु **प्रभवति** प्रकल्पते **न प्रायो** बाहुल्येन स्थूलहिंसादिविरत्यात्मकत्वात् तेषाम् **अनुकम्पाधर्मश्रवणादिका** तु सत्क्रिया तु **प्रभवति** प्रभविष्णुतामनुभवति **विशेषेणा**तिशयेन ॥१०॥

उक्ता व्रतप्रतिमा, अधुना सामायिकमाह -

**सावज्जजोगपरिवज्जणादिरूवं तु होइ विण्णेयं ।**
**सामाइयमित्तरियं, गिहिणो परमं गुणट्ठाणं ॥४५५॥ १०/११**

सावद्ययोगाः सापायमनोवाक्कायव्यापारास्तेषां परिवर्जनम्, आदिशब्दान्निरवद्ययोगासेवनमेवंरूपं तु **सावद्ययोगपरिवर्जनादिरूपं तु पुनर्भवति विज्ञेयम् । सामायिकं** समभावरूपमित्वरः स्वल्पकालः सोऽस्यास्तीति **इत्वरिकं** प्रतिनियतकालानुष्ठेयमित्यर्थः । **गृहिणो** गृहस्थस्य **परमं** प्रधानं **गुणस्थानं** गुणभाजनम् ॥११॥

**सामाइयंमि उ कए, समणो इव सावओ जतो भणितो ।**
**बहुसो विहाणमस्स य, तम्हा एयं जहुत्तगुणं ॥४५६॥ १०/१२**

**सामायिके तु कृते** प्रतिपन्ने, **श्रमण इव** तस्यामवस्थायां **श्रावको** गृही **यतो भणितो** यस्मादुक्तो **बहुशो**ऽनेकशो **विधानं** क्रियारूपम् **अस्य च** सामायिकस्य, यतो भणितमिति वर्तते, **तस्मादेतत्** सामायिकं **यथोक्तगुणं** शास्त्रोक्तगुणं परमगुणस्थानरूपमित्यर्थः ॥१२॥

**मणदुप्पणिहाणादी न होंति एयम्मि भावओ संते ।**
**सतिभावावट्ठियकारिया य सामण्णबीयं ति ॥४५७॥ १०/१३**

**मनोदुष्प्रणिधानादीनि** आदिशब्दाद् वाक्कायपरिग्रहः, **न भवन्ति** न जायन्ते । **एतस्मिन्** सामायिके **भावतो** भावमाश्रित्य **सति** विद्यमाने, **स्मृतिभावः** स्मृत्यन्तर्धानपरिहाररूपः **अवस्थितकारिता चानवस्थितत्वदोषपरिहारः श्रामण्यबीजमिति** श्रमणभावबीजं प्रव्रज्यापरिणामकारणमित्यर्थः ॥१३॥

उक्तं सामायिकम्, अधुना पोषधमाह -

**पोसेइ कुसलधम्मे, जं ताऽऽहारादिचागणुट्ठाणं ।**
**इह पोसहो त्ति भण्णति, विहिणा जिणभासिएणेव ॥४५८॥ १०/१४**

**पोषयति** पुष्टिं नयति **कुशलधर्मान्** कुशलव्यापारान् *यद्* यस्मात् **तत्** तस्माद् **आहारादित्यागानुष्ठान**माहारादित्यागस्य विधानम् **इह** प्रक्रमे **पोषध इति भण्यते** । पोषं धत्ते पोषध इत्युच्यते **विधिनो**पायेन **जिनभाषितेनैवा**ऽऽप्तोक्तेन ॥१४॥

निरूक्तमभिधाय भेदानाह -

**आहारपोसहो खलु, सरीरसक्कारपोसहो चेव ।**
**बंभव्वावारेसु य, एयगया धम्मवुड्ढि त्ति ॥४५९॥ १०/१५**

**आहारपोषधः खलु** पूर्वोक्तः **शरीरसत्कारपोषधश्चैव** निर्दिष्टस्वरूप एव **ब्रह्माव्यापारयोश्च** ब्रह्मचर्यपोषधोऽव्यापारपोषधश्चेत्यर्थः । एतद्गताहारादिगता **धर्मवृद्धि**रिति धर्मपुष्टिरिति यावत् ॥१५॥

पोषधविवर्जनीयमाह -

**अप्पडिदुप्पडिलेहियसेज्जासंथारयाइ वज्जेति ।**
**सम्मं च अणणुपालणमाहारादीसु एयम्मि ॥४६०॥ १०/१६**

**अप्रत्यवेक्षित-दुष्प्रत्यवेक्षित-शय्या-संस्तारकं विवर्जयत्युपलक्षणत्वादप्रत्यवेक्षित-**

दुष्प्रत्यवेक्षितोच्चारणप्रश्रवणभूमिं च विवर्जयति । **सम्यक् च** क्रियाभावाभ्याम् **अननुपालन**-मपरिपालनम् **आहारादिषु एतस्मिन्** पोषधे चतुर्विधेऽपि सामायिक-पोषधयोः प्रतिदिनानुष्ठेयत्वेन स्वल्पकालयोर्व्रतान्तर्गतत्वेऽपि सामायिक-पोषधप्रतिमयोः पुनरूपादानं बहुतरकालावस्थान-प्रतिपादनार्थं यावज्जीवसम्भवोपदर्शनार्थं चाविरुद्धमत एव केषुचित् प्रकरणान्तरेषु महती योग्यता वर्ण्यते । अभेदे तु योग्यताविशेषोपादानं न स्यात् ॥१६॥

उक्ताश्चतस्रः प्रतिमाः, साम्प्रतं पञ्चमीमाह –

**सम्ममणुव्वयगुणवयसिक्खावयवं थिरो य नाणी य ।**
**अट्ठमिचउद्दसीसुं, पडिमं ठाएगराईयं ॥४६१॥ १०/१७**

**सम्यग**वैपरीत्येन **अणुव्रतगुणपदशिक्षापदवान् स्थिरश्च** धीरश्च **ज्ञानी च** सम्यग्ज्ञान-सम्पन्नः **अष्टमी-चतुर्दश्यो** रूपलक्षणत्वात्पर्वदिवसेषु **प्रतिमां** कालाभिग्रहरूपां **तिष्ठत्य**नुतिष्ठत्यासेवते, **एकरात्रिकीं** सर्वरात्रिकीमित्यर्थः ॥१७॥

**असिणाणवियडभोई, मउलियडो दिवसबंभयारी य ।**
**रत्तिं परिमाणकडो, पडिमावज्जेसु दियहेसु ॥४६२॥ १०/१८**

न विद्यते विवक्षितकालावधिं यावत् स्नानं शरीरप्रक्षालनमस्येति-**अस्नानः** । विकटं प्रकटं भोक्तुं शीलमस्येति **विकटभोजी** विकृतभोजी वा । प्राकृते पूर्वापरनिपातोऽतन्त्रमिति कृत्वा **कृतमौलिः** कृतवस्त्रमुकुटो विहितशिरोवेष्टन इत्यर्थः । **दिवसं** सकलं यावत् **ब्रह्मचारी च** दिवसब्रह्मचारी, **रात्रौ कृतपरिमाणः** कृतकालाभिग्रहविशेषः प्रतिमावर्जेषु दिवसेषु सर्वेष्वेव ॥१८॥

**झायइ पडिमाएँ ठिओ, तिलोगपुज्जे जिणे जियकसाए ।**
**णियदोसपच्चणीयं, अण्णं वा पंच जा मासा ॥४६३॥ १०/१९**

**ध्यायति** चिन्तयति मनसा **प्रतिमायां** प्रतिमादिवसे **स्थितस्त्रिलोकपूज्यान्** लोकत्रयपूज्यान् **जिनान्** भगवतो **जितकषायान्** जितक्रोधादीन् **जित[ निज ]दोषप्रत्यनीकं** स्वकीयबाधकरागादि-दोषप्रतिपक्षभूतम् **अन्यद् वा** वस्तु **पञ्च यावन्मासान्** आप्रतिमा-परिसमाप्तेः सर्वदिवसेषु रात्र्यौ ध्यानं कुर्यादितिभावः ॥१९॥

उक्ता पञ्चमी, षष्ठीमाह –

**पुव्वोइयगुणजुत्तो, विसेसओ विजियमोहणिज्जो य ।**
**वज्जइ अबंभमेगंतओ उ राइं पि थिरचित्तो ॥४६४॥ १०/२०**

**पूर्वोदितगुणयुक्तः** पूर्वप्रतिमागुणसमन्वितः **विशेषतो** विशेषेण **विजितमोहनीयश्च वर्जयत्य**

**ब्रह्माब्रह्मचर्यम् एकान्ततस्त्वेकान्तेन रात्रावपि स्थिरचित्तः** स्थिरधीः ॥२०॥

**सिंगारकहाविरओ, इत्थीए समं रहम्मि नो ठाइ ।**
**चयइ य अतिप्पसंगं, तहा विहूसं च उक्कोसं ॥४६५॥ १०/२१**

**श्रृङ्गारकथाविरत** उज्वलवेषादिकथानिवृत्तः **स्त्रिया समं** सार्धं **रहस्येकान्ते न तिष्ठति** नास्ते **त्यजति चातिप्रसङ्गम**तिसम्पर्कमालापादिकम्, **तथा विभूषां** वाऽलङ्क्रियां **चोत्कृष्टा**मुत्कर्षवतीम् ॥२१॥

**एवं जा छम्मासा, एसोऽहिगओ उ इहरहा दिट्ठं ।**
**जावज्जीवं पि इमं, वज्जइ एयम्मि लोगम्मि ॥४६६॥ १०/२२**

एवमुक्तनीत्या **यावत्षण्मासानेषो**ऽब्रह्मपरिहारप्रतिष्ठितः**अधिकृत**स्त्वधिकृत एव **इतरथा**ऽन्यथा **यावज्जीवमपीदम**ब्रह्म **वर्जयत्येतस्मिन् लोके** मनुष्यलोक इत्यर्थः ॥२२॥

उक्ता षष्ठी, सप्तमीमाह –

**सच्चित्तं आहारं, वज्जइ असणादियं णिरवसेसं ।**
**असणे चाउलउंबिगचणगादी सव्वहा सम्मं ॥४६७॥ १०/२३**

**सचित्तमाहारं वर्जयत्यशनादिकं** चतुर्भेदं **निरवशेषं** सकलम् **अशने**ऽशनविषये **तण्डुलोम्बिकाचणकादि** स्वभावत एवायमुपनतमपि **सर्वथा** सर्वैः प्रकारैः **सम्यग्** न्यायेन न च स लोलुपतया, स्वयमेव विध्वंस्य भुङ्क्ते सचित्तापरिहारप्रसङ्गात्। इयं च स्वभाविकेष्वचित्तेषु लोकव्यवहारपतितेषु च सचित्तवर्जिनः प्रतिमावतो भावदोषो वक्ष्यः ॥२३॥

**पाणे आउक्कायं, सचित्तरससंजुअं तहऽण्णंपि ।**
**पंचुंबरिकक्कडिगाइयं च तह खाइमे सव्वं ॥४६८॥ १०/२४**

**पाने** पानाहारे **अप्कायं** व्यवहारसचित्तं **सचित्तरससंयुतम्। तथाऽन्यद**प्यामफलसम्भवं पानाहारं वर्जयतीति सम्बन्धः। **पञ्चोन्दुम्बरी** प्रसिद्धा। **कर्कटिका** लोकप्रसिद्धा एव फलरूपा। **आदि**शब्दाद् दाडिमादिग्रहः, सा आदिर्यस्य तत्तथा, **तथा खादिमे** खाद्ये **सर्वं** निरवशेषम् ॥२४॥

**दंतवणं तंबोलं, हरेडगादी य साइमे सेसं ।**
**सेसपयसमाउत्तो, जा मासा सत्त विहिपुव्वं ॥४६९॥ १०/२५**

**दन्तवनं** दन्तकाष्ठं दन्तशोधनम्। **ताम्बूलं** पत्ररूपं, **हरीतक्यादि च,** आदिशब्दादामल-

कादिग्रहः । **स्वादिमे** स्वाद्ये, **अशेषं** सकलं सचित्तं वर्जयतीति सम्बन्धः । **शेषपदसमायुक्तः** शेषगुणाभिधायिपदसमन्वितः । **यावन्मासान् सप्त विधिपूर्वं** विहितन्यायेन ॥२५॥

उक्ता सप्तमी अष्टमीमाह -

**वज्जइ सयमारंभं, सावज्जं कारवेइ पेसेहिं ।**
**पुव्वप्पओगओ च्चिय, वित्तिणिमित्तं सिढिलभावो ॥४७०॥ १०/२६**

**वर्जयति स्वयमारम्भं सावद्यं** सपापम्, **कारयति प्रेषैः** प्रयोक्तृतया **पूर्वप्रयोगत एव** पूर्वनियुक्तव्यापारादेव **वृत्तिनिमित्तं** वर्तनोपायनिमित्तं **शिथिलभावः** स्वयं शिथिलाध्यवसायः ॥२६॥

ननु स्वयमारम्भपरिहारः (रे) किमर्थमुद्य[त]ते । यावता स्वयंकरणे प्रयत्नः सम्भवति, न परेषाम्, तत् स्वयंकरणमेव युक्ततरं लक्ष्यते । नैष दोषो, न ह्यसौ पूर्वमारम्भं कारयति । केवलं पूर्वप्रवृत्तं प्रेष्यविषयमेव नियमयति । प्राक्तनं स्वयमपि कृतवान्,(वन्तं) नृ(नुः)पुरुषादिदानीं स्वयं वर्जयतीत्यभिप्रायवान् गुणोपदर्शनायाह -

**निग्घिणतेगंतेणं, एवं वि हु होइ चेव परिचत्ता ।**
**एद्दहमेत्तोऽवि इमो, वज्जिज्जंतो हियकरो उ ॥४७१॥ १०/२७**

**निर्घृणता** निष्करुणता **एकान्तेनैवमपि** स्वयमकरणेऽपि हुर्वाक्यालङ्कारे **भवत्येव परित्यक्तो**त्सृष्टा **एवावन्मात्रोऽप्ययमारम्भः** स्वयंकरणरूपः **वर्ज्यमानो हितकरस्तु** हितकर एव श्रेयस्कर एव ॥२७॥

अत्रैव हेतुमाह -

**भव्वस्साणावीरियसंफासणभावतो णिओगेणं ।**
**पुव्वोइयगुणजुत्तो, ता वज्जति अट्ठ जा मासा ॥४७२॥ १०/२८**

**भव्यस्य** योग्यस्य, **आज्ञावीर्ययोः संस्पर्शनं** तद्**भावतो नियोगेन** नियमेनारम्भो, वर्ज्यमान, इयानपि हितकरः । एवं हि कुर्वताज्ञा संस्पर्शिता भवति वीर्यं च । **पूर्वोदितगुणयुक्तः** पूर्वप्रतिमागुणान्वितः **तावद् वर्जयत्यारम्भमष्ट ( ष्टौ )यावन्मासान्** ॥२८॥

उक्ता अष्टमी, अधुना नवमीमाह -

**पेसेहि वि आरंभं, सावज्जं कारवेइ णो गुरुयं ।**
**अत्थी संतुट्ठो वा, एसो पुण होति विण्णेओ ॥४७३॥ १०/२९**

**प्रेषैरपि** प्रेषणीयैर्भृत्यैरपि **आरम्भं सावद्यं कारयति । नो** नैव **गुरुकं** महान्तम् **अर्थी** अर्थयति

बहुधनः सन्तुष्टो वा स्वल्पद्रव्योऽपि सन्तोषवान् एष प्रेष्यारम्भवर्जकः पुनर्भवति विज्ञेयः ॥२९॥

किमिति महान्तमारम्भं न कारयतीत्याह –

**निक्खित्तभरो पायं, पुत्तादिसु अहव सेसपरिवारे ।**
**थेवममत्तो य तहा, सव्वत्थ वि परिणओ नवरं ॥४७४॥ १०/३०**

**निक्षिप्तभरः** समर्पितभरः **प्रायो** बाहुल्येन **पुत्रादिषु** पुत्रपौत्रप्रभृतिषु **अथवा शेषपरिवारे** तद्व्यतिरिक्त–योग्यपरिवारे **स्तोकममत्वश्च तथा सर्वत्रापि** गृहक्षेत्रवनादौ, **परिणतो परिणतः** परिणतबुद्धिः **नवर** केवलम् ॥३०॥

**लोगववहारविरओ, बहुसो संवेगभावियमई य ।**
**पुव्वोदियगुणजुत्तो, णव मासा जाव विहिणा उ ॥४७५॥ १०/३१**

**लोकव्यवहारविरतो** लोकव्यवहारनिवृत्तो धर्मव्यवहार एव भूयसा स्थितः । **बहुशो**ऽनेकशः **संवेगभावितमतिश्च । पूर्वोदितगुणयुक्तः** पूर्वाभिहितप्रतिमागुणान्वितो **नव मासान् यावद्विधिना तु** शास्त्रोक्तविधिनैव ॥३१॥

उक्ता नवमी साम्प्रतं दशमीमाह –

**उद्दिट्ठकडं भत्तं पि वज्जती किमुय सेसमारंभं ? ।**
**सो होइ उ खुरमुंडो, सिहलिं वा धारती कोई ॥४७६॥ १०/३२**

**उद्दिष्टकृत**मुद्दिश्य कृतं **भक्त**मप्यशनाद्यपि **वर्जयति किमुत शेषमारम्भं** सावद्यम्, **स** दशमप्रतिमाव्यवस्थितो **भवत्येव क्षुरमुण्डो** मुण्डितशिरा, **शिखां वा धारयति कश्चित्** ॥३२॥

**जं णिहियमत्थजायं, पुट्ठो णियएहिं णवरं सो तत्थ ।**
**जइ जाणइ तो साहे, अह ण वि तो बेइ ण वि जाणे ॥४७७॥ १०/३३**

**यं निहितं** निक्षिप्तं भूम्यादिषु **अर्थजातम् । पृष्टो**ऽभिहितः सन् **निजकैः** स्वजनैः **नवरं स** प्रतिमावान् । **तत्रार्थव्यतिकरे यदि जानात्य**र्थजातम्, **ततः साधयति** कथयति । तेषां धर्मानुपालनार्थम् । तेन विना धर्मव्यवहारक्षतिप्रसङ्गात् । **अथापि न जानाति ततो ब्रवीति न जाने** नाहं जानामि ॥३३॥

कीदृक् तस्यामयमित्याह –

**जतिपज्जुवासणपरो, सुहुमपयत्थेसु णिच्चतल्लिच्छो ।**
**पुव्वोदियगुणजुत्तो, दस मासा [1]कालमासेणं ॥४७८॥ १०/३४**

**यतिपर्युपासनपरः** साधुसेवनपरः, **सूक्ष्मपदार्थेषु** बन्ध-मोक्षादिषु **नितान्तलिप्सो** नित्यतत्परः **पूर्वोदितगुणयुक्तः** प्रागभिहितगुणान्वितो **दश मासान्**, यावदिति गम्यते, [१]**कालमासेन** कालपरिमाण विशेषरूपेण समयप्रसिद्ध्या चैतदभिहितं- '*दुविहा मासा पण्णत्ता धण्णमासा य कालमासा य*॥३४॥ (१. कालमाणेणं कालमानेन - कालप्रमाणापेक्षयेत्यर्थः । अ. टी.)

उक्ता दशमी, एकादशमीमाह -

**खुरमुंडो लोएण व, रयहरणं उग्गहं व घेत्तूण ।**
**समणब्भूओ विहरइ, धम्मं काएण फासंतो ॥४७९॥ १०/३५**

**क्षुरमुण्ड** पूर्वोक्तः । **लोचेन वा** मुण्ड इति गम्यते । **रजोहरणं** जीवरक्षाहेतुरूपम् । **अवग्रहं च** प्रतिग्रहकं पात्रमित्यर्थः । **गृहीत्वो**पादाय धर्मोपकरणबुद्ध्या, **श्रमणभूतः** श्रमणकल्पो **विहरति** चेष्टते । **धर्मं** श्रमणोपासकधर्मम् । **कायेन** शरीरेण **स्पृशन्ना**सेवमानः पालयन्निति यावत् ॥३५॥

अस्यैव विहारविधिमाह -

**ममकारेऽवोच्छिण्णे, वच्चति सण्णायपल्लिं दट्ठुं जे ।**
**तत्थ वि जहेव साहू, गेण्हति फासुं तु आहारं ॥४८०॥ १०/३६**

**ममकारे** ममत्वे **अव्यवच्छिन्ने**ऽनपगतेऽप्रच्युते, **व्रजति सञ्ज्ञातपल्लिं** स्वजननिवासभूमिं **द्रष्टुं** निरीक्षितुम् । **जे** इति निपातः । **तत्रापि** स्वजनपल्यां व्यवस्थितः सन् **यथैव साधुर्गृह्णाति** उपादत्त । **प्रासुं** प्रासुकं निर्जीवं **पुनराहार**मशनादिकम् ॥३६॥

**पुव्वाउत्तं कप्पति, पच्छाउत्तं तु ण खलु एयस्स ।**
**ओदणभिलिंगसूवादि सव्वमाहारजायं तु ॥४८१॥ १०/३७**

**पूर्वायुक्तं** पूर्वकल्पितं स्वार्थं कृतमित्यर्थः तत् **कल्पते । पश्चादायुक्तं** [तु] पश्चात्कृतं पुनस्तदर्थ-निष्पादितमित्यर्थः । **न खल्वेतस्य** श्रमणभूतस्योदनश्च भिलिङ्गसूपो मसूरसूपश्च तावादी यस्य तद्,**ओदनभिलिङ्गसूपादि । सर्वमाहारजातं तु** प्रसिद्धम् । यत उक्तं- *कप्पइ से पुव्वाउत्ते चाउलोयणे णो खलु पच्छाउत्ते भिलिङ्गसुवे* [श्री कल्पसूत्रे सूत्र-२६६] ॥३७॥

**एवं उक्कोसेणं, एक्कारस मास जाव विहरेइ ।**
**एगाहादियरेणं, एवं सव्वत्थ पाएणं ॥४८२॥ १०/३८**

एवमुक्तनीत्यो**त्कर्षे**णायुर्व्याघाताभावे **एकादश मासान् यावद्विहरति । एकाहादि** एकं च तदहश्च एकाहमेकदिवसः, स आदिर्यस्य तत्तथा । **इतरेण** जघन्येन **एवं** [एतच्च अटी.] **सर्वत्र**

**प्रायेण** प्राक्प्रतिमास्वपि चिरजीविनामेष क्रमः सम्भवतीति भावः ॥३८॥

एवं प्रतिमां निर्दिश्य तदनन्तरं विधिमाह –

**भावेऊणऽत्ताणं, उवेइ पव्वज्जमेव सो पच्छा ।**
**अहवा गिहत्थभावं, उचियत्तं अप्पणो णाउं ॥४८३॥ १०/३९**

**भावयित्वात्मानं** प्रतिमानुष्ठानेन **उपैत्युपगच्छति प्रव्रज्यामेव**-यतित्वमेव श्रमणभूतः **स** [श्रावकः, अटी.] **पश्चात्प्रतिमोत्तरकालम्। अथवा गृहस्थभावं** गृहस्थत्वं प्रतिमानुष्ठानविश्रान्त्या **उचितत्वं** योग्यत्व**मात्मनो ज्ञात्वा** ॥३९॥

**गहणं पव्वज्जाए, जओ अजोगाण णियमतोऽणत्थो ।**
**तो तुल्लिऊणऽप्पाणं, धीरा एयं पवज्जंति ॥४८४॥ १०/४०**

**ग्रहणं** स्वीकारः, **प्रव्रज्यायाः** लोकधर्मेभ्यो लोकोत्तरधर्मगमनरूपायाः, **यतो** यस्माद्, **अयोग्यानाम**नुचितानाम्, **नियमतोऽनर्थो** नियमादनर्थहेतुः, **तत्** तस्मात् **तुलयित्वा** परीक्ष्य, **आत्मान धीराः** स्थिरा **एतां** प्रव्रज्यां **प्रतिपद्यन्ते** स्वीकुर्वन्ति ॥४०॥

**तुलणा इमेण विहिणा, एत्तीए हन्दि नियमतो णेया ।**
**नो देसविरइकंडगपत्तीए विणा जमेस त्ति ॥४८५॥ १०/४१**

**तुलना**ऽऽत्मपरीक्षा **अनेन विधिना** प्रतिमागतेन, **एतस्याः** प्रव्रज्याया **हन्त नियमतो ज्ञेया। नो** नैव **देशविरतिकण्डकप्राप्त्या विना यद्** यस्माद् **एषैति** प्रव्रज्या ॥४१॥

**तीए य अविगलाए, बज्झा चेट्ठा जहोदिया पायं ।**
**होति णवरं विसेसा, कत्थति लक्खिज्जए न तहा ॥४८६॥ १०/४२**

**तस्यां च** प्रव्रज्यायाम् **अविकलायां** भावतः सम्पूर्णायां **बाह्या चेष्टा यथोदिता** यथोक्ता **प्रायो** बाहुल्येन **भवति** जायते। **नवरं** केवलम्। **विशेषा**दपवादात् **क्वचि**द्देशकालादौ **लक्ष्यत**। **न तथा** प्रागिव बाह्या क्रिया न दिश्यत इत्यर्थः। तस्यामदृश्यमानायामप्यविकलैव प्रव्रज्या पुष्टालम्बनादन्यथाऽप्रवृत्तेर्न, क्रियान्यथात्वेऽपि च परिणामो नान्यथा भवति। तस्यैव च तत्त्वतः प्रव्रज्यारूपत्वात्, तदङ्गभावेन क्रियाविधानात्, परिणामप्रेरिता हि क्रिया परमार्थेन। न च कार्याभावात् कारणाभावः। धूमवह्न्यादिषु तथाप्रतीतेः सकललोकपरीक्षकन्यायसिद्धत्वात् ॥४२॥

कथं पुनरनर्थहेतुः प्रव्रज्याग्रहणमयोग्यानामित्याह –

**भवणिव्वेयाउ जतो, मोक्खे रागाउ णाणपुव्वाओ ।**
**सुद्धासयस्स एसा, ओहेण वि वण्णिया समए ॥४८७॥ १०/४३**

**भवनिर्वेदात्** संसारनिर्वेदाद्, **यतो** यस्मान् **मोक्षे रागान्**मोक्षाभिलाषात् **ज्ञानपूर्वात्** सम्यग्ज्ञानमूलात् **शुद्धाशयस्य** शुद्धाध्यवसायस्य **एषा** प्रव्रज्या **ओघेनापि** सामान्येनापि **वर्णिता** कथिता **समय** सिद्धान्ते ॥४३॥

एतदेवाह -

**तो समणो जइ सुमणो, भावेण य जइ न होइ पावमणो ।**
**सयणे य जणे य समो, समो य माणावमाणेसु ॥४८८॥ १०/४४**

**ततः श्रमणो यदि सुमना** वैमनस्यविरहितः कथञ्चित्सौमनस्येऽपि **भावेन च यदि न भवति पापमनाः** सावद्यप्रवृत्तमना इत्यर्थः । **स्वजने च जने च समः** स्वजनपरजनयोस्तुल्यः **समश्च मानावमानयोः** पूजावज्ञयोस्तुल्यचित्तः ॥४४॥

ननु च न सर्वस्यापि प्रतिमाक्रमप्रतिपत्त्या सर्वविरतिः, तत्कथमेतदुच्यत इत्याह -

**ता कम्मखओवसमा, जो एयपगारमंतरेणावि ।**
**जायति जहोइयगुणो, तस्सवि एसा तहा णेया ॥४८९॥ १०/४५**

**तत्तस्मात् कर्मक्षयोपशमाद्धेतोर्य एतत्प्रकारमन्तरेणापि** प्रतिमाविधानमन्तरेणापि, **जायते यथोदितगुणः** शास्त्रोक्तगुणः **तस्यापि** [प्राणिनः, अटी.] प्रतिमाव्यतिरेकवृत्तेः **एषा प्रव्रज्या, तथा** विशिष्ट परिणामोत्कर्षेण प्रतिमाप्रतिपत्तुरिव **ज्ञेया** । योऽपि संहननादिविधौ बाल्याच्छास्त्रोक्त-प्रतिमाक्रियापरिपालनेऽसमर्थस्तस्यापि सर्वविरतिप्रतिपत्तौ तद्वदिवाध्यवसायविशुद्धिर्विज्ञेया देशविरत्यध्यवसायस्थानानन्तरवर्तित्वात् सर्वविरत्यध्यवसायस्थानानाम् ॥४५॥

**एत्तो च्चिय पुच्छादिसु, हंदि विसुद्धस्स सति पयत्तेणं ।**
**दायव्वा गीतेणं, भणियमिणं सव्वदंसीहिं ॥४९०॥ १०/४६**

**अत एव** हेतोर्विसुद्ध्युत्कर्षाद् वा **पृच्छादिषु**, आदिशब्दाद्धर्माभिप्रायपरिग्रहः । **हन्त विशुद्धस्याधिकारिणो** नान्यस्य, **सदा** सर्वकालं **प्रयत्नेन** शास्त्रोक्तेन निमित्तशुद्ध्यादिना, **दातव्या** प्रव्रज्या **गीतेन** गीतार्थेन गुरुणा **भणितमिदं** प्रतिपादितमेत् **सर्वदर्शिभिः** सर्वज्ञैः ॥४६॥

अस्यैवार्थस्याभ्युच्चयमाह -

**तह तम्मि तम्मि जोए, सुत्तुवओगपरिसुद्धभावेण ।**
**दरदिण्णाए वि जओ, पडिसेहो वण्णिओ एत्थ ॥४९१॥ १०/४७**

**तथा** तस्मिन् **तस्मिन् योगे** प्रव्रज्याव्यापारे **सूत्रोपयोगपरिशुद्धभावेना**गमसमवधानविवक्ता-

ध्यवसायेन, गुरुणा **ईषद्दत्तायामपि** प्रव्रज्यायां **यतः प्रतिषेधो वर्णितोऽत्र** सूत्रे ॥४७॥

एतदेव व्यक्तीकर्तुमाह –

**पव्वाविओ सिय त्ति य, मुंडावेउमिच्चाइ जं भणियं ।**
**सव्वं च इमं सम्मं, तप्परिणामे हवति पायं ॥४९२॥ १०/४८**

**प्रव्राजितोऽ**भ्युपगमितो धर्ममिति गम्यते, **स्यादिति च** कथञ्चित् **मुण्डयितुमित्यादि यद् भणितं** [कल्पभाष्ये अटी.] विधिप्रतिषेधाभ्यां **सर्वं चेदं** सूत्रोक्तं विधिप्रतिषेधरूपं **सम्यग्**न्यायेन **तत्परिणामे** प्रव्राजनीयपरिणामे योगे(ग्ये)तररूपे **भवति प्रायो** नान्यथा परिणाम एव प्रधानं कारणं प्रव्राजनमुण्डनशिक्षादिषु तदानुरूप्येण तत्प्रवृत्तेः॥४८॥

**जुत्तो पुण एस कमो, ओहेणं संपयं विसेसेणं ।**
**जम्हा असुहो कालो, दुरणुचरो संजमो एत्थ ॥४९३॥ १०/४९**

**युक्तः पुनरेषक्रमः** आनुपूर्वीरूपः **ओघेन** साम्येन योऽभिहितः । **साम्प्रत**मिदानींतनकाले **विशेषेणा**तिशयेन **यस्मादशुभः कालो** दुःषमाख्यो **दुरनुचरः संयमोऽत्रे**दानीं वर्तते, तस्मादुत्तरोत्तरगुणानुपूर्वी समाश्रयणं विधेयम् ॥४९॥

प्रकृतानुपूर्वीसमर्थनायैवाह –

**तंतंतरेसु वि [१]इमो, आसमभेओ पसिद्धओ चेव ।**
**ता इय इह जइयव्वं, भवविरहं इच्छमाणेहिं ॥४९४॥ १०/५०**

**तन्त्रान्तरेष्वपि** शास्त्रान्तरेष्वपीतो जैनशास्त्रात्सर्वनयसमूहात्मकात् ['इमो' अयं अनन्तरोक्तः,..... **इओ** 'इति पाठान्तरं, तत्र इतोऽशुभकाल-दुरनुचरसंयमलक्षणाद्..... अथवा इतो जैनप्रवचनात्-तन्त्रान्तरेष्विति, अटी.] **आश्रमभेदा** ब्रह्मचारिगृहस्थादिरूपः **प्रसिद्ध एव,** न तु साध्यो विप्रतिपत्त्यभावात् । **तत्तस्माद् इति** पूर्वोक्तन्यायेन **इह** प्रव्रज्यायां **यतितव्यं** प्रयत्नः करणीयः प्रथमप्रतिपत्तावपि न यथाकथञ्चित्सा अङ्गीकर्तव्या, **भवविरहमिच्छद्भिः** संसारवियोगमभिलषद्भिः पुंभिः ॥५०॥ (१. इओ अटी.)

**॥ श्रावकधर्मविधिप्रकरणं पञ्चाशकं दशमं समाप्तम् ॥**
**[ उपासकप्रतिमाप्रकरणं ] ॥**

# ॥ एकादशं साधुधर्मविधि-पञ्चाशकम् ॥

एवं तावदादित आरभ्य दशभिः प्रकरणैः श्रावकधर्म उक्तः । साम्प्रतं साधुधर्माचिख्यासयाह-

**नमिऊण वद्धमाणं, मोक्खफलं परममंगलं सम्मं ।**
**वोच्छामि साहुधम्मं, समासओ भावसारं तु ॥४९५॥ ११/१**

**नत्वा वर्धमानं** चरमतीर्थङ्करम् । मोक्षः फलमस्येति **मोक्षफलं परममङ्गलं** प्रधानमङ्गल-स्वभावम्, ज्ञानादीनां भावमङ्गलत्वात् । **सम्यक्** प्रशस्तं **प्रवक्ष्यामि साधुधर्मं समासतो भावसारं तु** भावप्रधानमेव ऐदम्पर्यसारं समासाभिधानं प्रकरणस्य प्रयोजनम्, सामान्येन तु साधुधर्मोऽभिहित एव, विस्तरतस्तत्र, विस्तरभीरवः केचित्, केचिदैदंपर्यानभिज्ञाः, तदनुग्रहार्थमिदं प्रस्तुतम् ॥१॥

तत्र कः साधुर्यस्यायं धर्मोऽभिधीयत इत्याह -

**चारित्तजुओ साहू, तं दुविहं देससव्वभेएण ।**
**देसचरित्ते न तओ, इयरम्मि उ पंचहा तं च ॥४९६॥ ११/२**

**चारित्र**माचारः **तद्युक्तः साधुः तच्चारित्रं द्विविधं** द्विप्रकारम् **देशसर्वभेदेन** देशसर्वचारित्र-विशेषेण **देशचारित्रे**ऽनिन्दितक्रियाहेतौ श्रावकयोग्ये, **न तको** न स साधुर्भवति । **इतरस्मिंस्तु** इतरस्मिन्नेव सर्वचारित्रे तथाविधक्रियाकारणभूतभावे वर्तमानस्तको भवति । **पञ्चधा तच्च** सर्वचारित्रम् ॥२॥

पञ्चविधत्वमेवाह -

**सामाइयत्थ पढमं, छेओवट्ठावणं भवे बीयं ।**
**परिहारविसुद्धीयं सुहुमं, तह संपरायं च ॥४९७॥ ११/३**

**तत्तो य अहक्खायं, खायं सव्वम्मि जीवलोगम्मि ।**
**जं चरिऊण सुविहिया, वच्चंति अणुत्तरं मोक्खं ॥४९८॥ ११/४ जुग्ग।**

**सामायिकमथ प्रथमं** । प्राकृतत्वादथशब्दस्याकारलोपो निपात एव वा । **छेदोपस्था[ प ]नं भवेद् द्वितीय** सातिचारनिरतिचारमहाव्रतारोपणरूपम् । परिहारेण तपसा समयोक्तेन विशुद्धाः साधवस्तेषामिदं, ग्रहादेराकृतिगणत्वाद् **परिहारविशुद्धीयम्** । **सूक्ष्मं तथा सम्परायं च** सूक्ष्मसम्परायमथवा प्राक्तनगुणस्थानापेक्षया सूक्ष्माध्यवसायरूपत्वात् सूक्ष्मं तथा कृत्तिगतः सम्परायः

संसारपरिभ्रमणहेतुलोभो यत्र तत्तथा सम्परायं हेतु-फलभावेन चारित्रविशेषणम्, पदद्वयं नाम त्वेकमेव [सुहुमं च तह संपरायं च 'इत्यत्र **तथा**शब्दः आनन्तर्यार्थः, गाथाभङ्गभयाच्च व्यवहितोऽस्योपन्यासः, अनुस्वारश्चेहालाक्षणिकः अटी.] ॥३॥

ततस्तदनन्तरं **यथाख्यातं** यथाख्यातं वाऽकषायम्, **ख्यातं** प्रथितं **सर्वस्मिन् जीवलोके** प्रत्यासन्नसर्वज्ञत्वात् । **यच्चरित्वा**ऽऽसेव्य **सुविहिताः** सदनुष्ठानाः साधवो **व्रजन्ति** गच्छन्ति **अनुत्तरं** सर्वप्रधानं **मोक्षं** सिद्धक्षेत्ररूपं स्वावस्थारूपं वा ॥४॥

तत्त्वतः सर्वचारित्रं सामायिकरूपमेवेति मन्यमानो विशेषास्तु तत्सञ्ज्ञाभेदाः किञ्चिद्विशेषकृता इत्यतस्तत्परित्यागेन तदेव व्याख्यातुमाह -

**समभावो सामइयं, तणकंचणसत्तुमित्तविसओ त्ति ।**
**निरभिस्संगं चित्तं, उचियपवित्तिप्पहाणं च ॥४९९॥ ११/५**

समश्चासौ भावश्च मध्यस्थोचितवृत्तिरूपः **समभावः सामायिकं** प्रवृत्तिनिमित्तमन्त्यम्, शब्दव्युत्पत्तिनिमित्तं तु बहुधा। कीदृक् समभावः सामायिकमुच्यते ? **तृणकाञ्चनशत्रुमित्रविषय इति** । तृणकाञ्चनेऽजीवस्वरूपे शत्रुमित्रे जीवलक्षणे, तद्गोचरः सर्ववस्तुविषय इति यावत् चेतनाचेतनव्यतिरेकेण वस्तुन एवापरस्याभावात् । **निरभिष्वङ्गं** रागद्वेषाकरणेन निःसङ्गम्, (चित्तं मनः, अटी.) **उचितप्रवृत्तिप्रधानं च** पुण्यापुण्यवत् स्वौचित्यप्रवृत्तिसारम्। क्षीणमोहानामपि योग्यतापेक्षयोपकारनिष्पत्तिसिद्धेः ॥५॥

**सति एयम्मि उ णियमा, नाणं तह दंसणं च विण्णेयं ।**
**एएहिं विणा एयं, न जातु केसिंचि सद्धेयं ॥५००॥ ११/६**

**सत्येतस्मिन्** सामायिके **तु नियमाद् ज्ञानं तथा दर्शनं च** सम्यग्दर्शनं च **विज्ञेयम्, एताभ्यां** ज्ञानदर्शनाभ्यां **विना एतत्** सामायिकं **न जातु** कदाचित् **केषाञ्चित्** जीवानां **श्रद्धेयं** श्रद्धातव्यम् ॥६॥

**गुरुपारतंत नाणं, सद्दहणं एयसंगयं चेव ।**
**एत्तो उ चरित्तीणं, मासतुसादीण निद्दिट्ठं ॥५०१॥ ११/७**

**गुरुपारतन्त्र्यं** गुर्वायत्तत्वं [एव अटी.] **ज्ञानम्**, व्यापकत्वान्माषतुषादीनामपि सम्भवात् । (श्रद्धानम्) **श्रद्धामेतत्सङ्गतमेव** ज्ञानसङ्गतमेव । **अत एव चारित्रिणां माषतुषादीनां निर्दिष्टमेतद्द्वयम्** ॥७॥

उक्तः साधुः, अधुनाऽस्य धर्म उच्यते –

**धम्मो पुण एयस्सिह, संमाणुट्ठाणपालणारूवो ।**
**विहिपडिसेहजुयं तं, आणासारं मुणेयव्वं ॥५०२॥ ११/८**

**धर्मः पुनरेतस्य** साधोः **इहाधिकारे सम्यगनुष्ठानपालनारूपः** सम्यक् च तदनुष्ठानं च तस्य पालना रक्षणं तद्रूपस्तल्लक्षणः । **विधिप्रतिषेधयुतं** ध्यानाध्ययनहिंसामृषाद्यासेवापरिहारसमन्वितं तत्सम्यगनुष्ठानं **आज्ञासार** सर्वज्ञाज्ञाप्रधानं **मन्तव्यम्** ॥८॥

**अग्गीयस्स इमं कह ? गुरुकुलवासाउ, कह तओ गीओ ? ।**
**गीयाणाकरणाओ, कहमेयं ? णाणतो चेव ॥५०३॥ ११/९**

**अगीतस्यागीतार्थस्य इदं** ज्ञानं **कथमिति** प्रश्नः, **गुरुकुलवासादित्युत्तरम्, कथं तकः ?** स **गीतो** गीतार्थो गुरुकुलावासादेव, **गीताज्ञाकरणाद्** गीतार्थाज्ञासेवनात्, **कथमेतद्** गीतार्थाज्ञाकरण ? **ज्ञानत एव** तत्पारतन्त्र्यरूपात् । न हि ज्ञानाभावे स तद्वदुपदिष्टे प्रवर्त्तते ॥९॥

**चारित्तओ च्चिय दढं, मग्गणुसारी इमो हवइ पायं ।**
**एत्तो हिते पवत्तति, तहणाणातो सदंधो व्व ॥५०४॥ ११/१०**

**चारित्रत एव दृढमत्यर्थं मार्गानुसारी** स्वभावेन, **अयं** साधुः **भवति । प्रायो** बाहुल्येन, **अतो** मार्गानुसारित्वाद्, **हिते प्रवर्तते** अहितपरित्यागेन । **तथाज्ञानादुभयाविसंवादगतात् सदन्ध इव** तथाविधपुण्यसमेतान्धवत् – यथाहि कश्चित् मार्गानुसारी चक्षुर्विकलोऽपि मार्ग एव स्वरस-प्रवृत्त्या प्रवर्तते तथाऽयमगीतार्थोऽपि यतिस्तथाविधमार्गानुसारित्वादेव हिते प्रवृत्तिं विदधाति ॥१०॥

**अंधोऽणंधो व्व सदा, तस्साणाए तहेव लंघेइ ।**
**भीमं पि हु कंतारं, भवकंतारं इय अगीतो ॥५०५॥ ११/११**

**अन्धश्चक्षुर्विकलो अनन्ध इव** चक्षुष्मानिव **सदा** सर्वकालं **तस्य** चक्षुष्मतः **आज्ञया** उपदेशरूपया **तथैव** चक्षुष्मानिव **लङ्घयति** अतिक्रामति तत्पदानुसारी **भीममपि** गहनमपि, हुर्वाक्यालङ्कारे **कान्तारमटवीम्** । **भवकान्तारं** संसारारण्यम् **इत्येवम् अगीतो**ऽगीतार्थः । लङ्घयतीति सम्बन्धः ॥११॥

अगीतार्थो गीतार्थाज्ञाकारणादित्युक्तम्, तत्राज्ञाप्राधान्येनैवाह। अथवा सम्यगनुष्ठानमाज्ञासारं धर्म इत्युक्तम्, तदेवोद्दिश्यमाह -

**आणारुइणो चरणं, आणाए च्चिय इमं ति वयणाओ ।**
**एत्तोऽणाभोगम्मि वि, पण्णवणिज्जो इमो होइ ॥५०६॥ ११/१२**

**आज्ञारुचेश्चरणं आज्ञात एवेदमिति वचनात् अत** आज्ञारुचित्वाद्, **अनाभोगेऽप्य**-परिज्ञानेऽपि विशेषतः क्वचिदस्तुत्यानुष्ठाने विषयीकृते **प्रज्ञापनीयो**ऽवबोधनीयः सुखसम्पाद्यावबोधः, **अयम**गीतार्थो **भवति** ॥१२॥

**एसा य परा आणा, पयडा जं गुरुकुलं न मोत्तव्वं ।**
**आचारपढमसुत्ते, एत्तो च्चिय दंसियं एयं ॥५०७॥ ११/१३**

**एषा** चैवंरूपा **परा** प्रधाना, **आज्ञा** भागवती, **प्रकटा**ऽनावृतस्वरूपा '**यत् गुरुकुल** गुरुसन्ततिः **न मोक्तव्यम्**' न त्याज्यम्। **आचारप्रथमसूत्रे** आचाराङ्गप्रारम्भसूत्रे *'सुयं मे आउसंतेण'* इत्यादा। **अत एवा**ज्ञाप्राधान्यादेव **दर्शितमेतत्** गुरुकुलामोचनम् ॥१३॥

**एयम्मि परिच्चत्ते, आणा खलु भगवतो परिच्चत्ता ।**
**तीए य परिच्चागे, दोण्ह वि लोगाण चागो त्ति ॥५०८॥ ११/१४**

**एतस्मिन्** गुरुकुले **परित्यक्ते** प्रोज्झिते, **आज्ञा खलु भगवतः परित्यक्ता**नङ्गीकृता। **तस्याश्चाज्ञायाः परित्यागे** समुत्सर्गे **द्वयोरपि लोकयोस्त्याग** इतीहपरलोकयोर्वैकल्यापादनात् ॥१४॥

**ता न चरणपरिणामे, एयं असमंजसं इहं होति ।**
**आसण्णसिद्धियाणं, जीवाण तहा य भणियमिणं ॥५०९॥ ११/१५**

**तत्** तस्मात् **न चरणपरिणामे**ऽभ्यन्तरे तथाविधकर्मक्षयोपशमसमुत्थे **एतत्** गुरुकुल-त्यागादिकम्, **असमञ्जस**मयुक्तम् **इह** साधुधर्मे **भवति** । **आसन्नसिद्धिकानां** प्रत्यासन्नपरमपदप्राप्तीनां **जीवाना** भव्यराश्यन्तर्वर्तिनाम्। **तथा च** भणितमुक्तमेतत् ॥१५॥

**नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य ।**
**धण्णा आवकहाए, गुरुकुलवासं न मुंचंति ॥५१०॥ ११/१६**

**ज्ञानस्य** श्रुतात्मकस्य **भवति भागी** भाजनं पुरुष इति गम्यते। **स्थिरतरको** दृढतरको **दर्शने** सम्यक्त्वे **चरित्रे च** पूर्वोक्ते। **धन्या यावत्कथया** यावज्जीवं **गुरुकुलवासं न मुञ्चन्ति** नोत्सृजन्ति ॥१६॥

**तत्थ पुण [१]संठिताणं, आणाआराहणा ससत्तीए ।**
**अविगलमेयं जायति, बज्झाभावेऽवि भावेणं ॥५११॥ ११/१७**

**तत्र पुनर्गुरुकुले [संस्थितानाम्]**, तिष्ठतां [पाठान्तरे] वसतां नाम, **आज्ञाराधनाद्**, आज्ञासत्याकरणात् **स्वशक्त्या** स्वसामर्थ्येन, **अविकलं** सम्पूर्णम् **एतच्चरणं जायते** सम्भवति **[बाह्याभावे] बाह्याज्ञाभावेऽप्याज्ञो**क्तबाह्यक्रियाभावेऽपि **भावेन** भावमाश्रित्य द्रव्यतोऽसम्पूर्णतायामपि भावतः परिपूर्णमेव ॥१७॥ (१. वसतां अटी.)

**कुलवहुणायादीया, एत्तो च्चिय एत्थ दंसिया बहुगा ।**
**एत्थेव संठियाणं, खंतादीणं पि सिद्धि त्ति ॥५१२॥ ११/१८**

**कुलवधूज्ञातादीन्यत एव** गुरुकुलवासप्राधान्यादेव **अत्राधिकारे** शास्त्रे **दर्शितानि भूयांसि**। यथा कुलवधूः कुले वसन्ती शीलरक्षाविभवाधिपत्यादीनां गुणादीनां भाजनम्, एवं साधुरपि गुरूकुले वसन् ज्ञानादीनां भाजनं भवति । यथा स राजानुजीवी राजकुले तत्पश्यतो वसन् राजकृतप्रसादानां भाजनमेवं साधुरपि । यथा च कलाचार्योपासक(न)प्रवृत्तस्तत्कृतानां कलापरिज्ञानादीनाम्, **अत्रैव** गुरुकुले सम्यग्व्यवस्थितानां **संस्थिताना** साधुनां **क्षान्त्यादीनामपि** यतिधर्मगुणानां **सिद्धिरि**त्यभिनिष्पत्तिर्भवति ॥१८॥

धर्मः पुनरेतस्येत्युक्तं तत्प्रदर्शनायाह –

**खंती य मद्दवऽज्जव, मुत्ती तव संजमे य बोद्धव्वे ।**
**सच्चं सोयं आकिंचणं च बंभं च जतिधम्मो ॥५१३॥ ११/१९**

क्षमणं सहनं **क्षान्तिः** क्रोधनिग्रहः । **च** शब्द मार्दवादिषु लुप्तविभक्तिकेषु योजनीयः । मृदुसत्त्वः तथा विनीतस्तद् भावो **मार्दवं** मानप्रतिपक्षः । ऋजुरवक्रः स्वच्छाशयस्तद्भाव **आर्जवं** मायानिग्रहः । मोचनं **मुक्ति**रलोभता लभ्यमानस्यापि परित्यागो लोभप्रतिपक्षः । **तपः** समयप्रसिद्धमनशनप्रायश्चित्तादि बाह्याभ्यन्तरभेदम् । **संयमश्च** मनोवाक्कायसंयमरूपस्त्रिविधो **बोद्धव्यो**ऽवसेयः । **सत्य**मविसंवादं मनोवाक्कायर्जुतारूपम् चतुर्विधं **शौचं** बाह्याभ्यन्तरभेदम् द्विविधम् । **आकिञ्चन्यं** चाकिञ्चनभावरूपं पञ्चविषयविरक्ततास्वभावम् । **ब्रह्म च** ब्रह्मचर्यं च । **यतिधर्मः** साधुधर्मः ॥१९॥

**गुरुकुलवासच्चाए, णेयाणं हंदि सुपरिसुद्धि त्ति ।**
**सम्मं णिरूवियव्वं, एयं सति णिउणबुद्धीए ॥५१४॥ ११/२०**

**गुरुकुलवासत्यागे नैतेषां** क्षान्त्यादीनां **हन्त सुपरिशुद्धिरिति** दोषरहितता बहिरन्तर्दोष-

वियुक्ततेति यावत्। **सम्यग्निरूपयितव्यं** निरूपणीयम् **एतत्**प्रस्तुतवस्तु क्षान्त्यादिषु परिशुद्धाख्य। **सदा** सर्वकालं **निपुणबुद्ध्या** सूक्ष्मधिया ॥२०॥

गुरुकुलवासत्यागे दोषमुपदर्शयन्नाह -

**खंतादभावओ च्चिय, णियमेणं तस्स होति चाउ त्ति ।**
**बंभं न गुत्तिविगमा, सेसाणि वि एव जोइज्जा ॥५१५॥ ११/२१**

**क्षान्त्याद्यभावत एव** क्रोधादिकषायोदयादेवेत्यर्थः। **नियमेना**वश्यंतया **तस्य** गुरुकुलस्य **भवति त्याग इति** परिहारः। **ब्रह्म** ब्रह्मचर्यं **न** गुरुकुलत्यागे **गुप्तिविगमात्**, नव ब्रह्मचर्यगुप्तिविरहात्। **शेषाण्यपि** तपः संयमसत्यशौचाकिञ्चनानि **एवं योजयेद्** यथा न सम्भवन्ति ॥२१॥

गुरुकुलवासगुणमाह -

**गुरुवेयावच्चेणं, सदणुट्ठाणसहकारिभावाओ ।**
**विउलं फलमिब्भस्स व, विसोवगेणावि ववहारे ॥५१६॥ ११/२२**

**गुरुवैयावृत्त्येन** गुरुकार्यव्यावृतभावेन, **सदनुष्ठानसहकारिभावात्**। सदनुष्ठानं प्रति गुरूणां सहकारित्वोपगमाद्, **विपुलं फलं** विशालं पुण्यं मुक्त्याख्यम्, **इभ्यस्येव** महाधनस्येव **विंशोपकेनापि** विंशत्युपगभागेनापि **व्यवहारे** गृहादागतस्योपचारे विनयपूजाकर्मरूपे ॥२२॥

तदभावे दोषमाह -

**इहरा सदंतराया, दोसोऽविहिणा य विविहजोगेसु ।**
**हंदि पयट्टंतस्सा, तदण्णदिक्खावसाणेसु ॥५१७॥ ११/२३**

**इतरथा**ऽन्यथा गुरुकुलवासत्यागेन **सतः** सम्भविनो ज्ञानादेः शिष्यगतस्य **अन्तरायाद्** विघ्नकरणाद् **दोष**स्तदभावापत्तिलक्षणः, **अविधिना च** शास्त्रोक्तबाधारूपेण **विविधयोगेषु** नानाप्रकारव्यापारेषु, **हन्त प्रवर्त्तमानस्य** प्रवृत्तिं विदधतः **तदन्यदीक्षावसानेषु** ततो गुरुकुलवासिनोऽन्यस्य दीक्षा स एवान्यं प्रव्राजयति तदवसानेषु तत्पर्यन्तेषु, न केवलमसौ स्वयं यच्चेष्टते तदसाधु, यस्तेन दीक्षितोऽपि तथाविधं शास्त्रबाधाप्रधानं विधत्ते तदपि ततो गरीयः। सुतरां शास्त्रात्पथः परिभ्रष्टत्वात्तेनास्य, स्वयं प्रवृत्तेरपि शास्त्रनिराकृतायाः परप्रवृत्तिर्गरीयसी दोषहेतुरित्येवमुच्यते। सकलशासनस्यैव वितथप्रवृत्त्याम्लानत्वापादनात् तस्मात् गुरुकुलवास एव श्रेयान् पूर्वोक्तहेतुभ्यः ॥२३॥

**गुरुगुणरहिओ उ गुरू, न गुरु विहिचायमो उ तस्सिट्ठो ।**
**अण्णत्थ संकमेणं, ण उ एगागित्तणेणं ति ॥५१८॥ ११/२४**

**गुरुगुणा** ज्ञानक्षान्त्यादयस्तद् **रहितस्तु** तद्विकलः **पुनः गुरुर्न गुरुर्न** तथाविधगौरवार्हः, **विधित्यागस्तु** विधिना त्यागः **पुनस्तस्येष्टो** न त्वविधिना विधित्यागः [तेन] शास्त्रोक्तदोषप्रसङ्गात् स्वयमगुणभाजनत्वापत्तेश्च, केन पुनर्विधिना त्याग इष्यते गुरोः ? **अन्यत्र** गच्छान्तरे पुरुषान्तरे वा **सङ्क्रमेण** सङ्क्रान्त्याश्रयणे **न त्वेकाकित्वेनेति** न तु गुरुं परित्यज्यैकाकिना विहर्तव्यमित्यनेन ॥२४॥

**जं पि य न या लभेज्जा, एक्कोऽविच्चादि भासियं सुत्ते ।**
**एयं विसेसविसयं, णायव्वं बुद्धिमंतेहिं ॥५१९॥ ११/२५**

**यदपि च न लभेतेत्युपलक्षणमिदं**-ण या लभेजा णिउणं सहायं गुणाहियं वा गुणओ समं वा॥ इत्यस्य **'एक्कोऽपीत्यादि'**भाषितं सूत्रे दशवैकालिकश्रुतस्कन्धे – **'[1]एक्को वि पावाइं अणायरंतो विहरेज्ज कामेसु असज्जमाणो'** । **एतद्विशेषविषयं ज्ञातव्यं बुद्धिमद्भिः** विचारकुशलैः ॥२५॥

**पावं अणायरंतो, तत्थुत्तं ण य इमं अगीयस्स ।**
**अण्णाणी किं काहीच्चादीसुत्ताउ सिद्धमिणं ॥५२०॥ ११/२६**

**पापमनाचरन्** वर्जयन् **तत्रोक्तं** सूत्रम् । **न चेदं** पापपरिवर्जनम्, **अगीतस्याऽ**गीतार्थस्य सम्भवति ज्ञानविकलत्वाद्, एतदेव समर्थयते । **'[2]अज्ञानी किं करिष्यति'** [दशवैकालिकसूत्रे] **इत्यादिसूत्रात् सिद्धमिद** पापपरिवर्जनप्रतिषेधरूपं दूषणम् ॥२६॥

पुनरपि विशेषविषयत्वोपदर्शनायाह –

**जाओ य अजाओ य, दुविहो कप्पो उ होइ णायव्वो ।**
**एक्केक्को वि य दुविहो, समत्तकप्पो य असमत्तो ॥५२१॥ ११/२७**

**जातश्च** स्वनिष्पन्नः **अजातश्चा**निष्पन्नप्रायः **द्विविधः कल्पस्तु भवति ज्ञातव्यः । एकैकोऽपि च द्विविधा** द्विभेदः । **समाप्तकल्पः** परिपूर्णः, चशब्दो भिन्नक्रमे असमाप्तश्चेत्यत्र द्रष्टव्यः, **असमाप्तश्चा**परिपूर्णः ॥२७॥

---

१. न वा लभेज्जा निउणं सहायं; गुणाहिअं वा गुणओ समं वा ।
इक्को वि पावाइं विवज्जयंतो; विहरिज्ज कामेसु असज्जमाणो ॥ [दश० द्वितीया चूलिका गा.१०]

२. पढमं नाणं तओ दया, एवं चिट्ठइ सव्व-संजए ।
अन्नाणी किं काही ? किं वा, नाहीइ छेअ-पावगं ? ॥ [दश० अध्य० ४ गा० १०]

जाताजातसमाप्ताऽसमाप्तकल्पानामागमिकं शब्दप्रवृत्तिनिमित्तं लक्षणमाह –

**गीयत्थो जायकप्पो, अग्गीओ खलु भवे अजाओ उ ।**
**पणगं समत्तकप्पो, तदूणगो होइ असमत्तो ॥५२२॥ ११/२८**

गीतार्थविषयत्वाद् **गीतार्थो जातकल्पोऽगीतः** **खल्वगीतार्थविषयो** भवेद् **अजातस्तु पञ्चकं** **साधूना समाप्तकल्पस्तदूनको** भवति **असमाप्तः** ॥२८॥

**उउबद्धे वासासु उ, सत्त समत्तो तदूणगो इयरो ।**
**असमत्ताजायाणं, ओहेण ण [१]किंचि आहव्वं ॥५२३॥ ११/२९**

**ऋतुबद्धे** तावत् प्रागुक्तम् । **वर्षासु तु** वर्षासमये **सप्त समाप्तस्तदूनकस्त्वितरः**, **असमाप्ताजातयोरोघेन किञ्चिदाभाव्यम्**। यदागमविहितं तन्नास्तीति भावः ॥२९॥ [१. होइ- अटी.]

**एत्तो पडिसेहाओ, सामण्णणिसेहमोऽवगंतव्वो ।**
**एएसि अतो वि इमं, विसेसविसयं मुणेयव्वं ॥५२४॥ ११/३०**

**अतः प्रतिषेधात् सामान्यनिषेध एवावगन्तव्यो** विहारस्य **एतेषामगीतार्थानाम् अतो-ऽपीदमे**काकि विहारप्रतिपादकसूत्रं **विशेषविषयं मन्तव्यं** विज्ञेयम् ॥३०॥

**एगागियस्स दोसा, इत्थीसाणे तहेव पडिणीए ।**
**भिक्खविसोहि महव्वय, तम्हा सबितिज्जए गमणं ॥५२५॥ ११/३१**

**एकाकिनः** सतो विहरतः **दोषाः स्त्री श्वा तथैव प्रत्यनीकः**, स्त्रियाः शुनः प्रत्यनीकाच्च। **भिक्षाविशुद्धौ** गृहत्रयादेकदा भिक्षानयने, **महाव्रतेषु** च पालनीयेषु सर्वेषु एवाहिंसादिष्वेकाकिनो दोषाः । सहाय समन्वितस्य तु तल्लज्जयापि पालनं सम्भवति, **तस्मात्सद्वितीये गमनं** विहारः ॥३१॥

**गीयत्थो य विहारो, बीओ गीयत्थमीसओ भणिओ ॥**
**एत्तो तइयविहारो, नाणुण्णाओ जिणवरेहिं ॥५२६॥ ११/३२**

**गीतार्थश्च विहार** एक इति गम्यते, **द्वितीयो गीतार्थमिश्रको भणितो** गीतार्थेतररूप [गीतार्थः, तदेतरश्च] उक्तः । **आभ्या तृतीयविहारो नानुज्ञातो जिनवरैः** ॥३२॥

**ता गीयम्मि इमं खलु, तदण्णलाभंतरायविसयं [१]तु ।**
**सुत्तं अवगंतव्वं, णिउणेहिं तंतजुत्तीए ॥५२७॥ ११/३३**

**तत्**तस्माद् **गीते** गीतार्थे **इदं खल्विति** खलुशब्दस्यावधारणत्वाद् गीतार्थ एव। **तस्मादात्मनः अन्यो** यो गीतार्थस्तस्य **लाभः** प्राप्तिः **तदन्तरायविषयं तु** तदभावविषयमेव **सूत्रम्**, एकोऽपीत्यादिरूपम् **अवगन्तव्यं** विज्ञेयं प्रतिनियतविषयमेव, **निपुणैः** पूर्वापरवेदिभिः **तन्त्र-युक्त्या**ऽऽगमयुक्त्या ॥३३॥ (१. ति.-अटी.)

विषयविभागेन सूत्रार्थो व्यवस्थापनीयोऽन्यथा -

**जं जह सुत्ते भणियं, तहेव जइ तं वियालणा णत्थि ।**
**किं कालियाणुओगो, दिट्ठो दिट्ठिप्पहाणेहिं ? ॥५२८॥ ११/३४**

**यद् यथा सूत्रे** दशवैकालिकादौ **भणितमुक्तं तत् तथा** श्रौतेनार्थेन **यदि तद्विचारणा नास्ति** विषयविभागव्यवस्था न विद्यते । **किमिति** कुतो हेतोर्न कुतश्चिदिति भावः । **कालिक**मेकादशाङ्गरूपं तस्या**नुयोगा** व्याख्याक्रमो **दृष्टो**ऽनुमतो **दृष्टिप्रधानै**र्दृष्टिवादप्रवरैः दर्शनप्रधानैर्वा । तस्माद्विचार्य सूत्रं पौर्वापर्येण विषये व्यवस्थापनीयम् ॥३४॥

गुरुगुणरहितस्तु गुरुर्न गुरुरिति यत् [११/२४ गाथायाम्] प्रागुक्तं तत्स्वरूपकथनायाह -

**गुरुगुणरहिओ वि इहं, दट्ठव्वो मूलगुणविउत्तो जो ।**
**न उ गुणमेत्तविहीणो त्ति चंडरुद्दो उदाहरणं ॥५२९॥ ११/३५**

**गुरुगुणरहितोऽपि गुरुर्दृष्टव्यो** विज्ञेयः **मूलगुणै**र्महाव्रतरूपैः **वियुक्तो** विरहितो **यो न तु गुणमात्रेण** विशिष्टक्रोधनिग्रहादिना **विहीन इति** विरहितः, **चण्डरुद्राचार्य उदाहरणं** प्रस्तुतेऽर्थे निदर्शनं समयप्रसिद्धम् । स हि किल न बहु समीक्षते विधेयाविधे[य] योर्द्रागेन[व] प्रवृत्तेर्निवृत्तेश्च अधिकतरगुणपुरुषालाभे च गुरुभिस्तस्यैव कालाद्यपेक्षया आश्रयणात् साधुभिश्च तद्बहुमानात् ॥३५॥

तथा चाह -

**जे इह होंति सुपुरिसा, कयण्णुया न खलु तेऽवमण्णंति ।**
**कल्लाणभायणत्तेण गुरुजणं उभयलोगहियं ॥५३०॥ ११/३६**

**ये इह** लोके **भवन्ति सुपुरुषाः** सत्पुरुषाः **कृतज्ञाः** कृतवेदिनः, **न खलु** नैव **ते अवमन्यन्ते** अवज्ञयन्ति **कल्याणभाजनत्वेन** कल्याणपात्रतया **गुरुजनं** पूज्यजनम्, **उभयलोकहितं** इहपरलोकाविरोधिनम् ॥३६॥

अत्रैव व्यतिरेकमाह -

**जे उ तह विवज्जत्था, सम्मं गुरुलाघवं अयाणंता ।**
**सग्गाहा किरियरया, पवयणखिंसावहा खुद्दा ॥५३१॥ ११/३७**

**ये तु** ये पुनः **तथा** तेनात्माभिमानप्रकारेण, **विपर्यस्ता** विपरीतमतयः, **सम्यग्**न्यायेन गुणानां **गौरव** दोषाणां च **लाघवमजानन्तः** स्वरूपेणापश्यन्तः **स्वग्रहात्** स्वाभिनिवेशात् **क्रियारताः** तथाविधबाह्यक्रियासक्ताः **प्रवचनखिंसावहा**स्तत्पूर्वापरानालोचनेन तन्निन्दाहेतवः **क्षुद्राः** कृपणस्वभावा अनुदाराशया इत्यर्थः ॥३७॥

**पायं अभिण्णगंठी, तमाउ तह दुक्करं पि कुव्वंता ।**
**बज्झा व ण ते साहू, धंखाहरणेण विण्णेया ॥५३२॥ ११/३८**

**प्रायो** बाहुल्येना**भिन्नग्रन्थयो**ऽकृतग्रन्थिभेदाः **तमसो**ऽज्ञानात् **तथा दुष्कर**मप्यानुष्ठानं तपःप्रभृति **कुर्वन्तः** सन्तो **बाह्या इव** परतीर्थिका इव, **न ते साधवः** साधुगुणाप्रतिष्ठितत्वात् । **ध्वाङ्क्षाहरणेन** ध्वाङ्क्षोदाहरणेन **विज्ञेया** ज्ञातव्यास्तच्चेदम् -

*दंखा वावीए तडे विरला ते उण तिसाए अभिभूया ।*
*पुरओ मायासरदंसणेण तह संपयट्टंति ॥ [ उपदेशपद-गाथा-८२४ ]*

सद्वस्तुपरित्यागेनासद्वस्त्वभिलाषिणो ध्वाङ्क्षप्रायाः सत्साधवो न भवन्तीत्यवसेयम् ॥३८॥

**तेसिं बहुमाणेणं, उम्मग्गऽणुमोयणा अणिट्ठफला ।**
**तम्हा तित्थगराणाठिएसु जुत्तोऽत्थ बहुमाणो ॥५३३॥ ११/३९**

**तेषां** तथाविपर्यस्तानां **बहुमानेना**न्तरप्रीत्या, **उन्मार्गानुमोदनो**न्मार्गानुमतिः, [अनागमिकाचारानुमतिः अटी.] **अनिष्टफला**ऽनभिप्रेतफला **तत्** तस्मात् **तीर्थकराज्ञास्थितेषु** भ[ग]वदाज्ञाव्यवस्थितेषु साधुषु **युक्तः** सङ्गतः **अत्रा**धिकारे **बहुमानो** बहुमतत्वम् ॥३९॥

**ते पुण समिया गुत्ता, पियदढधम्मा जिइंदियकसाया ।**
**गंभीरा धीमंता, पण्णवणिज्जा महासत्ता ॥५३४॥ ११/४०**

**ते पुनः** साधवः **समिताः** पञ्चभिः समितिभिः **गुप्ता**स्त्रिसृभिर्गुप्तिभिः **प्रियदृढधर्माः** प्रियधर्माणो दृढधर्माणश्च **जितेन्द्रियकषायाः** जितः स्पर्शन-क्रोधादय **गम्भीराः** परैरलब्धमध्याः, विकारैरक्षोभ्या वा[हर्ष-दैत्याविभावाः अटी.]

*"यस्य प्रभावादाकाराः, क्रोधहर्षभयादिषु।*
*भावेषु नोपलभ्यन्ते, तद् गाम्भीर्यमुदाहृतम्" ॥१॥* [ ] इत्युक्तेः ।

**धीमन्तो** बुद्धिमन्तः **प्रज्ञापनीयाः** सुखावबोधनीयाः **महासत्त्वा** अविक्लवाध्यवसायवन्तः *आपत्स्ववैक्लव्यकरमध्यवसानकरं च सत्त्वम्'* [ ] इत्युक्तेः ॥४०॥

**उस्सग्गववायाणं, वियाणगा सेवगा जहासत्ति ।**
**भावविसुद्धिसमेता, आणारुइणो य सम्मं ति ॥५३५॥ ११/४१**

**उत्सर्गापवादयोर्विज्ञाप[य]का** विज्ञातारः, उत्सर्गापवादपदानां वा भूयसां **सेवका** अनुष्ठातारो **यथाशक्ति** तदनतिक्रमेण **भावविशुद्धिसमेता** अध्यवसायशुद्धिसमन्विताः, **आज्ञारुचयश्चा**-गमाभिलाषवन्तश्च **सम्यगिति** सङ्गतन्यायेन । भावविशुद्धिसमेतत्वं चैवम् -

*अज्झवसायविसुद्धीविवज्जिया जे तवं विगिट्ठमवि ।*
*बाललेसा न होइ सा केवला सुद्धी कुव्वंति ॥*

*[ आराहणापडागा गाथा-१६ ] इत्युक्तेः ॥४१॥*

**सव्वत्थ अपडिबद्धा, मेत्तादिगुणण्णिया य नियमेण ।**
**सत्ताइसु होंति दढं, इय आययमग्ग तल्लिच्छा ॥५३६॥ ११/४२**

**सर्वत्र** द्रव्यक्षेत्रकालभावेषु, **अप्रतिबद्धाः** प्रतिबन्धरहिताः **मैत्र्यादिगुणान्विताश्च** मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यगुणयुक्ताश्च **नियमेन सत्त्वादिषु** सत्त्वगुणाधिकक्लिश्यमानाऽविनेयेषु विषयभूतेषु यथासङ्ख्यं **भवन्ति दृढमत्यर्थम्, इत्येवं** भावकालसदाभावित्वाद् **आयतो** मोक्षस्तस्य **मार्गः** सम्यग्दर्शनादिरत्नत्रयरूपः । **आयतो** वाऽतिप्रयत्नसमेतो यो **मार्गस्तल्लिप्सास्तत्पराः** ॥४२॥

**एवंविहा उ णेया, सव्वणयमतेण समयणीतीए ।**
**भावेण भाविएहिं, सइ चरणगुणट्ठिया साहू ॥५३७॥ ११/४३**

**एवंविधास्त्वेवंविधा** एव **ज्ञेया** ज्ञातव्याः, **सर्वनयमतेन** ज्ञानक्रियान्तर्गतसर्वनयाभिप्रायेण **समयनीत्यागमनीत्या, भावेन** सदन्तःकरणलक्षणेन **भावितैर्वासितैः** पुरुषैरागमतत्त्ववेदिभिरिति यावत् । **सदा** सर्वकाल। **चरणं** चारित्रपरिणामः, **गुणो** ज्ञानदर्शनरूपः **तयोः स्थिताश्चरण**-गुणस्थिताः **साधवः** पौरुषेयीभिर्ज्ञान-दर्शन-चारित्रशक्तिभिर्मोक्षं साधयन्ति इति निरुक्तात् ॥४३॥

**नाणम्मि दंसणम्मि य, सति नियमा चरणमेत्थ समयम्मि ।**
**परिसुद्धं विण्णेयं, नयमयभेया जओ भणियं ॥५३८॥ ११/४४**

ज्ञानेऽववोधस्वभावे, **दर्शने च** तत्त्वरुचिस्वभावे **सति** विद्यमाने **नियमान्नियमेन चरणमत्र समये परिशुद्ध** भाविकं **विज्ञेयमवबोद्धव्यम्**। **नयमतभेदाद् यतो भणितमुक्तं** समय एव ॥४४॥

**निच्छयणयस्स चरणायविघाए नाणदंसणवहो वि ।**
**ववहारस्स उ चरणे, हयम्मि भयणा उ सेसाणं ॥५३९॥ ११/४५**

**निश्चयनयस्य चरणात्मविघाते** चरणात्मनो विनाशे **ज्ञानदर्शनवधोऽपि** ज्ञानदर्शनापायोऽपि, **व्यवहारस्य तु** नयस्य, **चरणे हते** परिणामक्रियाभ्यां **भजना [तु]शेषयोर्ज्ञान**-दर्शनयोः, क्वचित् सम्भवः क्वचिन्नेति ॥४५॥

निश्चयमतमेवाह –

**जो जहवायं न कुणति, मिच्छद्दिट्ठी तओ हु को अण्णो ? ।**
**वड्ढेइ य मिच्छत्तं, परस्स संकं जणेमाणो ॥५४०॥ ११/४६**

**यो यथावादं** यथोक्तं **न करोति** यथागममित्यर्थः। **मिथ्यादृष्टिस्ततो हु,** ततस्तु, **कोऽन्यः?** स एवाऽयथागमकारी मिथ्यादृष्टिरिति निश्चयस्य गर्भः। **वर्धयति च मिथ्यात्व**मागमविषयं वितथत्वं **परस्य शङ्कां जनयन्** 'किमेवमयं चेष्टते' यद्ययमागमः सत्यो भवति, नूनमस्याप्ययमसत्य इवाभाति तेनान्यथा चेष्टते, एवं स्फुटैव परस्य वितथत्वे शङ्का, इति निश्चयाभिप्रायः ॥४६।

**एवं च अहिनिवेसा, चरणविघाए न नाणमादीया ।**
**तप्पडिसिद्धासेवणमोहासद्दहणभावेहिं ॥५४१॥ ११/४७**

**एवं चाभिनेवेशादत्यन्ताग्रहात् चरणविघाते** चरित्रपरिणामे विनाशे, **न ज्ञानादयो** गुणाः **तत्प्रतिषिद्ध**मागमप्रतिषिद्धं, तस्या**सेवन** करणम्, **मोहो**ऽज्ञानम् **अश्रद्धान**मश्रद्धा **तत्प्रतिषिद्धा-ऽऽसेवन-मोहाऽश्रद्धानानि** तेषां **भावाः** सद्भावा उत्पादा वा तै[ते तथा]तै[रिति] ॥४७॥

**अणभिनिवेसाओ पुण, विवज्जया होंति तव्विघाएऽवि ।**
**तक्कज्जुवलंभाओ, पच्छातावाइभावेण ॥५४२॥ ११/४८**

**अनभिनिवेशात्** आग्रहाभावात्, **पुनरविपर्ययात्** विपर्यायाभावादविपर्यस्तमतित्वाद् **भवन्ति** सम्भवन्ति। **तद्विघातेऽपि** चरणविघातेऽपि, **ज्ञानादय** इति सम्बन्ध्यते। **तत्कार्योपलम्भाद्** ज्ञानदर्शनकार्योपलम्भात्, **पश्चात्तापादिभावेन** पश्चात्तापप्रतीकारप्रायश्चित्तादिसद्भावेन ॥४८॥

**तम्हा जहोइयगुणो, आलयसुद्धाइलिंगपरिसुद्धो ।**
**पंकयणातादिजुओ, विण्णेओ भावसाहु त्ति ॥५४३॥ ११/४९**

**तस्माद्यथोदितगुणः** शास्त्रोक्तगुणः, **आलयशुद्ध्यादिलिङ्गपरिशुद्धः** आलयविहारस्थान-चङ्क्रमण-भाषाविनयादिचिह्नविशुद्धः, **पङ्कजज्ञातादियुतः** पङ्कोत्पत्तिजलस्थितिभावेऽपि कामविषयलोकापेक्षया तद्वत्तदस्पर्शनेन, आदिशब्दात् शरत्सलिलगगनादिपरिग्रहः, **विज्ञेयो** ज्ञातव्यो भावप्रधानः साधुः **भावसाधुरिति** ॥४९॥

**एसो पुण संविग्गो, संवेगं सेसयाण जणयंतो ।**
**कुग्गहविरहेण लहुं, पावइ मोक्खं सयासोक्खं ॥५४४॥ ११/५०**

**एष पुनः संविग्नः** संसारभीरुः, तद्विरक्तत्वात्, **संवेगं** संसारभयं मोक्षाभिलाषं वा । शेषा एव **शेषकास्तेषां** [आत्मनोऽन्येषां अटी.] **जनयन्** सम्पादयन् **कुग्रहविरहेण** कुत्सिताभिनिवेशत्यागेन **लघु** शीघ्रं यथा भवतीति क्रियाविशेषणम्, **प्राप्नोति मोक्षं** लभते अपवर्गम्, **सदासौख्यम्** ॥५०॥

**॥ साधुधर्मविधिपञ्चाशकं एकादशं समाप्तम् ॥११॥**

# ।। द्वादशं साधुसामाचारी-पञ्चाशकम् ।।

साधुधर्मानन्तरं तत्सामाचारीमाह -

**नमिऊण महावीरं, सामायारीं जतीण वोच्छामि ।**
**संखेवओ महत्थं, दसविहमिच्छादिभेदेण ।।५४५।। १२/१**

**नत्वा महावीरम**नन्यसदृशं वीरं **सामाचारीं** शिष्टाचरितक्रियाकलापरूपां **यतीनां** सम्बन्धिनीं **वक्ष्यामि** निर्देक्ष्यामि, **सङ्क्षेपतः** सङ्क्षेपेण **महार्थां** महाप्रयोजनां मोक्षफलत्वात्, महाविधेयां वा । प्रशक्तान् [प्रशस्तान्] प्रशक्त्या, **दशविधां** दशप्रकाराम् **इच्छादिभेदेन** वक्ष्यमाणेन ।।१।।

दशविधत्वमेवाह -

**इच्छा१ मिच्छा२ तहक्कारो३, आवस्सिया४ य निसीहिया५ ।**
**आपुच्छणा६ य पडिपुच्छा७, छंदणा८ निमंतणा९ ।।५४६।। १२/२**

**उपसंपया१० य काले, सामायारी भवे दसविहा उ ।**
**एएसिं तु पयाणं, पत्तेयपरूवणा एसा ।।५४७।। १२/३ जुग्गं ।**

**इच्छा-मिथ्या-तथाकारः** । कारशब्दः प्रत्येकमभिसम्बध्यते, स च प्रयोगवचनः-इच्छाकारो मिथ्याकारस्तथाकारश्चेति । **आवश्यिका च निषीधिका आपृच्छना च प्रतिपृच्छा छन्दना च निमन्त्रणा च** ।।२।।

**उपसम्पत् च काले** कालविषये प्रस्तुतत्वात् त्रिविधकालस्य, ओघ-दशधा-पदविभाग-सामाचार्युपक्रमरूपस्य, अन्यथा सामान्यनैव **सामाचारी भवेद्दशविधा तु** दशप्रकारा, **एतेषां तु पदानां** दशानामपीच्छादीनां **प्रत्येकप्ररूपणा** विषयविभागकथनरूपा **एषा** वक्ष्यमाणा ।।३।।

तत्रेच्छाकारविषयमाह -

**अब्भत्थणाइ करणे य कारवणेणं तु दोण्ह वि उचिए ।**
**इच्छक्कारो कत्थइ, गुरुआणा चेव य ठिति त्ति ।।५४८।। १२/४**

**अभ्यर्थनायां करणे च कारणेन तु द्वयोरप्युचिते इच्छाकारः क्वचिद्विषये गुर्वाज्ञा चैव च स्थितिरिति** मर्यादा इतीयं सूचा गाथा चिरन्तनी ।।४।।

अस्याः प्रत्यवयवमन्वय-व्यतिरेकाभ्यामन्वाख्यानायाह -

**सइ सामत्थे एसो, नो कायव्वो विणाऽहियं कज्जं ।**
**अब्भत्थिएण वि विहा, एवं खु जइत्तणं सुद्धं ॥५४९॥ १२/५**

**सति** विद्यमाने **सामर्थ्ये** कार्यकारणशक्तत्वरूपे **एष** इच्छाकारो **ना** नैव **कर्तव्यो विनाधिकं कार्यम्**। स्वयंसमर्थेनापि गुणाधिकं कार्यं विहाय तत्र स्वपरयोरर्थसिद्धेः । **अभ्यर्थितेनाप्य**भ्यर्थनाविषयीकृतेनाप्यपरसाधुना, **वृथाऽ**भ्यर्थना न कर्तव्येति गम्यते । **एवं** **खल्वे**वमेव **यतित्वं** साधुत्वं **शुद्धं** निरूपचरितं निरवद्यमिति भावः ॥५॥

करणेनेत्यादेर्व्याचिख्यासयाह -

**कारणदीवणयाइ वि, पडिवत्तीइऽवि य एस कायव्वो ।**
**राइणियं वज्जेत्ता, तगोचिए तम्मि वि तहेव ॥५५०॥ १२/६**

**कारणदीपनायामपि** कारणप्रकाशनायाम्, अहं गुरुभिरन्यस्मिन् गुरुतरकार्ये नियुक्त इत्येवंरूपायाम्, देशकालज्ञतया, **प्रतिपत्तावपि च** परस्य स्वयंकरणाभ्युपगमरूपायाम् **एष कर्तव्य** इच्छाकारो विधेयः । ज्ञान-दर्शन-चारित्ररत्नैश्चरतीति रात्निको **रत्नाधिकस्तं वर्जयित्वा** तस्य ज्येष्ठत्वान्नेच्छाकारः, सामान्येन, **तका** रत्नाधिकस्तस्योचिते **तदुचिते** कार्ये ज्ञानदर्शनप्रभावकशास्त्रग्रहणादौ, **तस्मिन्नपि** रत्नाधिके **तथैवे**च्छाकारः कर्तव्यः ॥६॥

**एवं आणाऽऽराहणजोगाओ आभिओगियखओ त्ति ।**
**उच्चागोयनिबंधो, सासणवण्णो य लोगम्मि ॥५५१॥ १२/७**

एवमुक्तनीत्या **आज्ञाराधनयोगाद्** गुरुवचननिष्पादनयोगात् सर्वज्ञाज्ञानिष्पादनव्यापाराद् वा **आभियोगिकक्षय इति** पराभियोगजनितकर्मक्षयः सम्पद्यते। **उच्चैर्गोत्रनिबन्धः** परपरिभवपरिहारेण तदुन्नतिसम्पादनात्, स्वयं च समताऽनतिवृत्तेः । समभावस्य च देशविरतिगतस्यापि, उच्चैर्गोत्रनिबन्धहेतुत्वेन नियमेन प्रसिद्धेः, न हि भावतो देशविरतस्यापि नीचैर्गोत्रनिबन्धः श्रूयत। गुणप्रत्ययस्तूदयस्तस्यैव, किं पुनः सर्वविरतस्य। **शासनवर्णश्च** दर्शनवर्णवादश्च **लोके**, सामान्येनैव 'निपुणभावप्रतिपादकमिदं जैनशासनम्' इति बहुमानात् ॥७॥

किं पुनरियं मर्यादेत्युपदिश्यत इत्याह -

**आणाबलाभिओगो, निग्गंथाणं न कप्पए काउं ।**
**इच्छा पउंजियव्वा, सेहे तह चेव राइणिए ॥५५२॥ १२/८**

**आज्ञाबलाभियोग**, आज्ञाबलात्कारः अथवाज्ञानियोगो बलाभियोगो बलात् प्रयोगः, **निर्ग्रन्थानां न कल्पते**, परविषये कर्तुं विधातुम् **इच्छा प्रयोक्तव्या** स्वकीयेच्छा भवतामत्र वस्तुनीत्येवंरूपा, **शैक्षे** अचिरदीक्षिते **तथा चैव रात्निके** रत्नाधिकेष्वेवेत्यर्थः ॥८॥

अत्रैव विशेषमाह -

**जोग्गेऽवि अणाभोगा, खलियम्मि खरंटणा वि उचिय त्ति ।**
**ईसिं पण्णवणिज्जे, गाढाजोगे उ पडिसेहो ॥५५३॥ १२/९**

**योग्येऽपि** गुणवत्यपि पुरुषे **अनाभोगा**दनुपयोगात् **स्खलिते** मार्गात् प्रच्युते, **खरण्टणापि**-खिंसापि **उचिते**त्यहैव, **ईष**न्मनाक् **प्रज्ञापनीये** प्रबोधनीये, **गाढायोग्ये** त्वप्रज्ञापनीये **प्रतिषेधः** खिंसाया इति गम्यते । तस्य तीव्रतरसङ्क्लेशोपपत्तेरात्महिताऽपरिज्ञानात् । तन्निमित्त-कर्मबन्धभावोपपत्तेः, तस्य च परिहार्यत्वात् ॥९॥

उक्त इच्छाकारः, साम्प्रतं मिथ्याकारविषयमाह -

**संजमजोगे अब्भुट्ठियस्स जं किंचि वितहमायरियं ।**
**मिच्छा एतं ति वियाणिऊण तं दुक्कडं देयं ॥५५४॥ १२/१०**

**संयमयोगे** संयमव्यापारे, **अभ्युत्थितस्योद्यमवतः, यत्किञ्चिद् वितथ**मन्यथा **आचरितं** सञ्जातम्, **मिथ्या**ऽनृतम्, मे **एतदिति विज्ञाय तद् दुष्कृतं देयं** मिथ्यादुष्कृतं कार्यम् ॥१०॥

ननु यत् दुष्कृतेन कर्मोपनिबद्धम्, तदनुभवनीयमेव । कस्तत्र गुण इत्याशङ्क्याह -

**सुद्धेणं भावेणं, अपुणकरणसंगतेण तिव्वेणं ।**
**एवं तक्कम्मखओ, एसो से अत्थनाणंमि ॥५५५॥ १२/११**

**शुद्धेन भावेनो**पनिबद्धकर्मक्षयकरणयोग्येन, **अपुनःकरणसङ्गतेन**, न पुनर्मयेदं कर्तव्यमिति प्रकारान्वितेन **तीव्रेण** उत्कृष्टेन **एवं** मिथ्यादुष्कृतदानात् **तत्कर्मक्षयो** दुष्कृतकर्मक्षयो भवतीति शेषः । **एष च** कर्मक्षयः, **से** तस्य मिथ्यादुष्कृतस्य, **अर्थज्ञाने** तद्वाच्यार्थपरिज्ञाने सति, तेन तदर्थोऽभिधीयते ॥११॥

['मिच्छा मि दुक्कडं' इत्येतत् प्राकृतपदमाश्रित्य-] पूर्वसूरिकृतव्याख्यया-[गाथायुगलेनाह] -

**मि त्ति मिउमद्दवत्ते, छ त्ति उ दोसाण छादणे होति ।**
**मे त्ति य मेराएँ ठिओ, दु त्ति दुगुंछामि अप्पाणं ॥५५६॥ १२/१२**

**क त्ति कडं मे पावं, ड त्ति य डेवेमि तं उवसमेणं ।**
**एसो मिच्छादुक्कडपयक्खरत्थो समासेणं ॥५५७॥ १२/१३ जुग्गं ।**

'**मि**'इत्येकमक्षरम्, **मृदुनो** भावः **मार्दवं,** क्रियारूपं विनयावनतिलक्षणं तद्भावस्तत्त्वं तस्मिन् वर्तते । '**च्छा**' **इति च दोषाणां च्छादने भवति । 'मे' इति च मर्यादायां स्थितो**ऽहं पुनस्तदुल्लङ्घनाभावेन। 'दु' त्ति 'दु' इत्यक्षरं **जुगुप्सा**ऽस्य **आत्मानमित्यर्थे** वर्त्तते ॥१२॥

'**क**' **इत्यक्षरं कृतं मया पापम्,** न त्वकृतमित्यभ्युपगमे । '**ड**' **इति डिये** अन्तर्भावितण्यर्थ-त्वादुल्लङ्घयामि, तत्पापम् **उपशमेन** क्रोधादिप्रशमेन । **एषो**ऽनन्तरोक्तः **मिथ्यादुष्कृतपदे अक्षराणि** तेषाम् **अर्थो**ऽभिधेयः **समासेन** सङ्क्षेपेण, प्रत्येकमपि अक्षराणामर्थोऽस्ति, अन्यथा तत्समुदायेऽप्य-भावप्रसङ्गात्, सिकतासु तैलवत्, समुदाये त्वर्थः प्रकट एव । मिथ्या अलीकं यन्मया कृतं मतं वा । प्रज्ञापनीयविषयं दुष्कृतं च, न सुकृतं ममैतदिति विधेयविषयं तस्मादुभयमपि सङ्गतमेव ॥१३॥

उक्तो मिथ्याकारः साम्प्रतं तथाकारमाह -

**कप्पाकप्पे परिणिट्ठियस्स ठाणेसु पंचसु ठियस्स ।**
**संयमतवड्डगस्स उ, अविगप्पेणं तहक्कारो ॥५५८॥ १२/१४**

**कल्प्याऽकल्प्ययोर्**वस्तुनोरथवा कल्पो द्वादशविधः, तद्विपरीतस्त्वकल्पः। सोऽपि तथैव, तयोः **परिनिष्ठितः** सूत्रार्थोभयपारगतः । तस्यन आस्थीयते यतिभिर्येषु तानि **स्थानानि** महाव्रतानि तेषु **पञ्चसु स्थितस्य** प्रतिष्ठितस्य । संयमश्च तपश्च संयमतपसी । अभ्यर्हितत्वात्संयमस्य पूर्वनिपातो, यथा दीक्षातपसी । ताभ्यामाढ्यः परिपूर्णः । स्वार्थिककन्प्रत्ययोपादानात्, **संयमतपआढ्यकस्तस्य,** तरेवकारार्थे । **अविकल्पेन** विकल्पाभावेन निर्विकल्पमित्यर्थः । **तथाकारस्तथाकारस्तथाशब्दः** प्रयोक्तव्योऽन्योऽपि तदर्थाभिधायी, शास्त्रे तथा श्रवणात्-

*'तहमेयं भंते ! अवितहमेयं भंते ! असंदिद्धमेयं भंते'।*
*से एवं भंते ! एवं भंते !' [श्री कल्पसूत्र-सूत्र-१४] एवं पदसन्दर्भात् ॥१४॥*

क्व पुनर्विषयेऽयं कर्तव्यमित्याह -

**वायणपडिसुणणाए, उवएसे सुत्तअत्थकहणाए ।**
**अवितहमेयं ति तहा, अविगप्पेणं तहक्कारो ॥५५९॥ १२/१५**

**वाचनायाम**पूर्वसूत्रोद्देशरूपायाम्, **प्रतिश्रवणे** च कार्याभ्युपगमविषये, **उपदेशे** सामान्येनैव, **सूत्रार्थकथनाया** सम्यक् सूत्रार्थव्याख्यायाम् **अवितथमेतदिति । तथैतदिति अविकल्पेना**ऽसन्देहेन ।

**तथाकारा** भवतीति शेषः ॥१५॥

यस्त्वेवंविधो गुरुर्न भवति, तत्र को विधिरित्याह –

**इयरम्मि विकप्पेणं, जं जुत्तिखमं तहिं न सेसम्मि ।**
**संविग्गपक्खिगे वा, गीए सव्वत्थ [१]इयरेण ॥५६०॥ १२/१६**

**इतरस्मिन्** पूर्वोक्तगुणवैकल्यवति, **विकल्पेन** भजनया **यद् वस्तु युक्तिक्षमं** प्रतीत्युपारोहि, **तस्मिंस्त**थाकारो, **न शेषे**ऽयुक्तिक्षमे, **संविग्नपाक्षिके वा गीते** गीतार्थे **सर्वत्र** वस्तुनि **इतरेणा**गीतार्थेन तथाकारः कार्य इति वर्त्तते ॥१६॥ (१. इयरे ण अटी.)

किमित्येवमुपदिश्यत इत्याह –

**संविग्गोऽणुवएसं, न देइ दुब्भासियं कडुविवागं ।**
**जाणंतो तम्मि तहा, अतहक्कारो उ मिच्छत्तं ॥५६१॥ १२/१७**

**संविग्नः** संसारभीरुर्गुरुः, स्वयमेवा**नुपदेश**मनुचितोपदेशं **न ददाति, दुर्भाषितं** दुष्टं भाषितमस्मिन्निति तं **कटुविपाकं** दारुणविपाकम्, **जानन्न**वबुध्यमानः **तस्मिन्** गुरौ **तथा** तेन रूपेण । **अतथाकारस्त**, विपरीतसामाचारीप्ररूप्ये **मिथ्यात्वं** वर्त्तते । तस्मात्तत्राप्यविकल्पेन तथाकारः ॥१७॥

उक्तस्तथाकारः, साम्प्रतमावश्यकस्वरूपनिरूपणायाह –

**कज्जेणं गच्छंतस्स गुरुणिओएण सुत्तणीईए ।**
**आवस्सिय त्ति णेया, सुद्धा अण्णत्थजोगाओ ॥५६२॥ १२/१८**

**कार्येण** ज्ञानादिसम्बन्धेन, **गच्छतः** सतः साधोरिति गम्यते । **गुरुनिर्देशेन** गुर्वाज्ञया, **सूत्रनीत्या**ऽऽगमन्यायेन **आवश्यिका ज्ञेया** ज्ञातव्या । **शुद्धा** निरवद्या, **अन्वर्थयोगाद**-वश्यकर्तव्याऽन्वर्थसम्बन्धात् ॥१८॥

कार्येण गच्छतः इत्युक्तम् , किं पुनस्तदित्याह –

**कज्जं पि नाणदंसणचरित्तजोगाण साहगं जं तु ।**
**जइणो सेसमकज्जं, न तत्थ आवस्सिया सुद्धा ॥५६३॥ १२/१९**

**कार्यमपि ज्ञानदर्शनचारित्रयोगानां साधकं यत्तु, यतेः** साधोः **शेषमकार्यं** ज्ञानादिविरहेण । **न तत्र** ज्ञानादिरहितकार्ये, **आवश्यिका शुद्धा** किन्त्वशुद्धैवाऽऽगमबाधया प्रवृत्तेः ॥१९॥

**वइमेत्तं निव्विसयं, दोसाय मुस त्ति एव विण्णेयं ।**
**कुसलेहिं वयणाओ, वइरेगेणं जओ भणियं ॥५६४॥ १२/२०**

**वाङ्मात्रं** वचनमात्रं **निर्विषयम**भिधेयशून्यं **दोषाय** दोषार्थं भवति । **'मृषा' इत्येव विज्ञेयं, कुशलैर्बुद्धिमद्भिः, वचनादागमाद् व्यतिरेकेण यतो भणितमुक्तम्** ॥२०॥

**आवस्सिया उ आवस्सिएहिं सव्वेहिं जुत्तजोगस्स ।**
**एयस्सेसो उचिओ, इयरस्स न चेव नत्थि त्ति ॥५६५॥ १२/२१**

**आवश्यिका त्वावश्यकै**र्नित्यकर्त्तव्यैः **सर्वैर्युक्तयोग्यस्य** युक्तोत्साहस्य **एतस्य** प्रस्तुतस्य, **एष** वाग्व्यापारः, **उचितो** योग्यः, **इतरस्य** उत्साहविकलस्य **न चैवो**चितः, अनुचित इत्यर्थः । तदर्थो **नास्तीति** कृत्वा ॥२१॥

उक्ता आवश्यिका, अधुना निषीधिकां [नैषेधिकीं-अटी.]आह-

**एवोग्गहप्पवेसे, निसीहिया तह निसिद्धजोगस्स ।**
**एयस्सेसो उचिओ, इयरस्स न चेव नत्थि ति ॥५६६॥ १२/२२**

**एवमवग्रहप्रवेशे** वसत्यादिप्रवेशे, **निषीधिका** समाचारी, **तथा निषिद्धयोगस्य** आगमोक्तप्रकारनिषिद्धसावद्यव्यापारस्य, **एतस्य** साधोः **एष** निषीधिकावाग्व्यापारः **उचितो** योग्यः **इतरस्यानिषिद्धयोगस्य न चैवो**चितः **नास्तीति** कृत्वा, तदर्थाभावादिति भावः ॥२२॥

किमेवं प्रयत्नवत एव निषीधिकोच्यत इत्याह –

**गुरुदेवोग्गहभूमीएँ जत्तओ चेव होति परिभोगो ।**
**इट्ठफलसाहगो सइ, अणिट्ठफलसाहगो इहरा ॥५६७॥ १२/२३**

**गुरुदेवावग्रहभूमेः** समयप्रसिद्धायाः, **यत्नत एव** प्रयत्नादेव **भवति परिभोगः**, तदनुप्रवेशरूप **इष्टफलसाधकः**, अभिप्रेतफलनिवर्त्तकः, **सदा** सर्वकालम् । **अनिष्टफलसाधको**ऽनिष्टफलविधायी **इतरथा**ऽन्यथा गुरुदेवावग्रहभूमेः परिभोग इति सम्बन्धः ॥२३॥

अमुमेवार्थं समर्थयन्नाह

**एत्तो ओसरणादिसु, दंसणमेत्ते गयादिओसरणं ।**
**सुव्वइ चेइयसिहराइएसु सुस्सावगाणं पि ॥५६८॥ १२/२४**

**एतस्मादेव** हेतोः परिभोगयत्नाख्याद्, **अवसरणादिषु** समवसरणादिषु तीर्थकरगतेष्टादिशब्दा-

द्धर्मकथादिपरिग्रहः। **दर्शनमात्र** उपलम्भनमात्रे समवसरणच्छत्रातिच्छत्रभगवत्सिंहासनादीनाम्, **गजादिभ्यो** गजाऽश्वरथादिभ्योऽपसरणमुत्तरणमेभ्यः पृथग्भवनमित्यर्थः। **श्रूयते चैत्यशिखरादिषु** निषीधिका, **शोभनाः श्रावकास्तेषामपि** न केवलं यतीनामेवेत्यभिप्रायः ॥२४॥

यस्येयं भावतो भवति, तमधिकारिणं निर्दिदिक्षुराह –

**जो होइ निसिद्धप्पा, निसीहिया तस्स भावतो होइ ।**
**अणिसिद्धस्स उ एसा, वइमेत्तं होइ दट्ठव्वा ॥५६९॥ १२/२५**

**यः** पुमान् **भवति निषिद्धात्मा** निषिद्धसावद्यव्यापारो, **निषीधिका तस्य भावतो** भावमाश्रित्य **भवति। अनिषिद्धस्य त्व**निषिद्धात्मन **एषा** निषीधिका **वाङ्मात्र**मेवार्थशून्यं **द्रष्टव्या,** तत्साध्याऽकरणात् ॥२५॥

उक्ता निषीधिका, आपृच्छामाह –

**आपुच्छणा उ कज्जे, गुरुणो गुरुसम्मयस्स वा नियमा ।**
**एवं खु तयं सेयं, जायति सति णिज्जराहेऊ ॥५७०॥ १२/२६**

आपृच्छां करोति–आपृच्छयति (आपृच्छकः) तस्य, न्यासः तन्त्रयुक्तिरूपम् **आपृच्छना तु** शब्दः पुनः शब्दार्थे। **कार्ये** क्वचिद्विशेषविषये, **गुरोर्गुरुसंमतस्य वा** गुरुनिर्दिष्टस्येत्यर्थः। **नियमा**न्नियमेन विधेयः। **एव खु** एवमेव **तत्**कार्यं वैशेषिकं, **श्रेयो**ऽतिशयप्रशस्यं **जायते** सम्भवति, **सदा** सर्वकालं **निर्जराहेतुः** निर्जराकारणं, नाऽऽपृच्छामन्तरेण श्रेयस्त्वं निर्जराहेतुत्वं चेति भावः ॥२६॥

किमेवमुच्यत इत्याह –

**सो विहिनाया तस्साहणंमि तज्जाणणा सुणायं ति ।**
**सन्नाणा पडिवत्ती, सुहभावो मंगलं तत्थ ॥५७१॥ १२/२७**

**स** गुर्वादिविधरुपायस्य, **ज्ञाता, तत्साधने** कार्यसाधने **तज्ज्ञानाद्** गुरुज्ञानात्, **सुज्ञातमिति** तत्कार्ये सुन्दरावबोधरूपं **सुज्ञानात्** सम्यग्ज्ञानात् [स्वज्ञानात्, अटी.] **प्रतिपत्तिः** क्रियायाः, **शुभभावः** शुभपरिणामो **मङ्गलं** तत्सिद्धिसूचकं **तत्र** कार्ये ॥२७॥

इहैवान्वयप्रधानमाह –

**इट्ठपसिद्धिऽणुबंधो, धण्णो पावखयपुण्णबंधाओ ।**
**सुभगइगुरुलाभाओ, एवं चिय सव्वसिद्धि त्ति ॥५७२॥ १२/२८**

**इष्टप्रसिद्धेरनुबन्धो**ऽभिमतसिद्धेरव्यवच्छेदः, **धन्यः** प्रशस्तः, **पापक्षयश्च पुण्यबन्धश्च**

इत्येकवद्भावः, तस्मात् पापक्षयपुण्यबन्धाभ्यामित्यर्थः । **शुभगतिश्च गुरुलाभश्च** तस्माच्छुभगतिः पापक्षयाद्, गुरुलाभः पुण्यबन्धात्, तयोरेव कार्यनिर्देशोऽयम्, **एवमेवानेनैव** प्रकारेण **सर्वसिद्धिरिति** सर्वसाध्यसिद्धिरूपः जायते ॥२८॥

व्यतिरेकप्रधानमाह –

**इहरा विवज्जतो खलु, इमस्स सव्वस्स होइ जं तेणं ।**
**बहुवेलाइक्कमेणं, सव्वत्थाऽऽपुच्छणा भणिया ॥५७३॥ १२/२९**

**इतरथा**ऽन्यथा **विपर्ययः खलु** विपर्यय एव, **अस्य** प्रस्तुतस्य **सर्वस्य** गुणकलापस्य **भवति यद्** यस्मात्, **तेन** कारणेन, **बहुवेलादिक्रमेण** सामान्यविशेषगतेन । **सर्वत्राऽऽपृच्छना** समाचारी **भणिता** प्रतिपादिता ॥२९॥

उक्ताऽऽपृच्छा, प्रतिपृच्छामाह –

**पडिपुच्छणा उ कज्जे, पुव्वणिउत्तस्स करणकालम्मि ।**
**कज्जंतरादिहेउं, णिद्दिट्ठा समयकेऊहिं ॥५७४॥ १२/३०**

**प्रतिपृच्छना तु** पुनः **कार्ये** विशिष्ट एव, **पूर्वनियुक्तस्य** साधोः **करणकाले** तन्निवर्तनावसरे, **कार्यान्तरादिति हेतोः** [द्वितीयायाः पञ्चम्यर्थत्वात् - अटी.] कार्यान्तरं ततोऽन्यद्गुणाधिकम्, आदिशब्दान्निमित्तस्खलनपरिग्रहः । **निर्दिष्टा** कथिता **समयकेतुभिः** समयचिह्नैरागमविद्भिरित्यर्थः ॥३०॥

'कार्यान्तरादिहेतोः' इत्युक्तम्, तदेव व्यक्तीकर्तुमाह –

**कज्जंतरं न कज्जं, तेणं कालंतरे व कज्जं ति ।**
**अण्णो वा तं काहिति, कयं व एमादिया हेऊ ॥५७५॥ १२/३१**

**कार्यान्तरमधिकं** समुत्पन्नं **न कार्यम्** । **तेन** प्राक्तनेन **कालान्तरे वा कार्यमिति** कालान्तरे वा तत्करणीयं भविष्यति न कदाचित् क्षतिः **अन्यो वा** साधुः **तत्कार्यं करिष्यति** सम्पादयिष्यति, तत्करणसमर्थत्वात् । **कृतं वा**ऽन्येन साधुना **तदेवमादिका हेतवः** प्रतिपृच्छायां सम्भविनोऽन्येऽपि द्रष्टव्याः ॥३१॥

**अहवा वि पयट्टस्सा तिवारखलणाए विहिपओगेऽवि ।**
**पडिपुच्छण त्ति णेया, तहिं गमणं सउणवुड्ढीए ॥५७६॥ १२/३२**

**अथवा** प्रकारान्तरे **प्रवृत्तस्यापि** सतः, **त्रिवारस्खलनायां** त्रीन् वारान् यावत् स्खलनायां

सत्यां निमित्तादिनेति गम्यते। **विधिप्रयोगेऽपि** विधिप्रयुक्तावप्यविध्यभावेऽपीत्यर्थः। **प्रतिपृच्छनेति ज्ञेया** निर्दिष्टविषये समाचारी, **तस्मिन् गमनं शकुनवृद्ध्या** त्रिवारस्खलनयापि कार्ये गमनं शकुनवृद्ध्याऽऽश्रीयते, न पुनस्तदभावे-

*पढमं अट्ठुस्सासा, बीयं जाणाहि सोलसुस्सासा।*
*अह तइयं उट्ठेज्जा, अण्णं सउणं वि मग्गेज्जा॥ इत्यादि वचनात्॥३२॥*

विषयान्तरनिर्देशायाह -

**पुव्वणिसिद्धे अण्णे, पडिपुच्छा किल उवट्ठिए कज्जे।**
**एवं पि नत्थि दोसो, उस्सग्गाईहिं धम्मठिई॥५७७॥ १२/३३**

**पूर्वनिषिद्धे** कार्ये, **अन्ये** सूरयः **प्रतिपृच्छा** कर्तव्येति मन्यन्ते। **किल**(-इत्याप्तप्रवादसंसूचनार्थः, अटी.)**उपस्थिते कार्ये** तस्मिन्नेव साम्प्रतकालकरणीये, **एवमपि नास्ति दोषो**ऽनतिशयिनाम् **उत्सर्गादिभि**रुत्सर्गापवादाभ्यां **धर्मस्थिति**रिति हेतोः, न हि धर्मस्थितिरुत्सर्गापवादौ विहाय वर्त्तते॥३३॥

प्रतिपृच्छोक्ता, अधुना छन्दनामाह -

**पुव्वगहिएण छंदण, गुरुआणाए जहारिहं होति।**
**असणादिणा उ एसा, णेयेह विसेसविसय त्ति॥५७८॥ १२/३४**

**पूर्वगृहीतेन** अन्नपानादिना **छन्दन** उपमन्त्रणं **गुर्वाज्ञया यथार्हं** यथायोग्यं **भवति**। **अशनादिना त्वेषा** छन्दना **ज्ञेयेह विशेषविषय इति** साधुविशेषगोचरा। न तु कश्चित् सामान्येनैवं विधत्ते॥३४॥

एतदेव व्यनक्ति -

**जो अत्तलद्धिगो खलु, विसिट्ठखमगो व पारणाइत्तो।**
**इहरा मंडलिभोगो, जतीएँ तह एगभत्तं च॥५७९॥ १२/३५**

**यः** कश्चिद् **आत्मलब्धिकः खलु** अनुज्ञातात्मलब्धिरेव गुरुभिस्तद्विषयसूत्रार्थोभयपारगत्वेन **विकृष्टक्षमका**[**विशिष्टक्षपका** अ.टी.]**वा**ऽष्टमादेः कर्त्ता, **पारणावित्तः** पारणया प्रतीतः पारणिक इत्यर्थः। **इतरथा**ऽन्यथोत्सर्गेण **मण्डलीभोगः** समूहभोगः, साधारणत्वाल्लभ्यस्य, विशेषतो दानधर्मानधिकारात् गुर्वनुज्ञयैव स्वीकृतस्य तत्र दानप्रवृत्तेः, **यतीनां** साधूनां। **तथैकभक्तं च** एकाशनरूपं तेनापि पृथग्भोगः॥३५॥

आत्मलब्धिरेव स्वपोषाधिकं कस्माद् गृह्णाति ? येनास्य दानसम्भव इत्याशङ्क्याह –

**नाणादुवग्गहे सति, अहिगे गहणं इमस्सऽणुण्णायं ।**
**दोण्ह वि इट्ठफलं तं, अतिगंभीराण धीराण ॥५८०॥ १२/३६**

**ज्ञानाद्युपग्रहे** ज्ञानदर्शनचारित्रोपष्टम्भे, **सति** सम्भवति **अधिके**ऽधिकविषयं **ग्रहणमस्य** आत्मलब्धिकस्य, **अनुज्ञातमनुमतं द्वयोरपि** दातृप्रतिगृहीत्रोः साध्वोरिति गम्यते । **इष्टफलं** तदभिप्रेतफलं दानं ग्रहणं च कीदृशोः द्वयोः **अतिगम्भीरयो**रुत्कृष्टगम्भीराशययोः **धीरयोः** स्थिरयोर्भावप्राधान्यात् ॥३६॥

तदेवोपदर्शयितुमाह –

**गहणे वि णिज्जरा खलु, अग्गहणे वि य दुविहा वि बंधो य ।**
**भावो एत्थ णिमित्तं, आणासुद्धो असुद्धो य ॥५८१॥ १२/३७**

**ग्रहणेऽप्या**दानेऽप्यन्यसाधुना भक्तादेः, **निर्जरा खलु** कर्मनिर्जरैव दानपरिणामवतः । **अग्रहणेऽपि चान्यसाधुना**, निर्जरैवेति वर्तते । **द्विविधापि** ग्रहणाऽग्रहणाभ्यां **बन्धश्चा**शुद्धपरिणामस्य कर्मबन्धश्च, **भावो**ऽध्यवसायः **अत्र निमित्तं** कारणम्, निर्जरा-बन्धयोः प्रत्येकम् **आज्ञाशुद्धोऽशुद्धश्चा**गमिक इतरश्च ॥३७॥

उक्ता च्छन्दना, निमन्त्रणामाह –

**सज्झायादुव्वाओ, गुरुकिच्चे सेसगे असंतम्मि ।**
**तं पुच्छिऊण कज्जे, सेसाण णिमंतणं कुज्जा ॥५८२॥ १२/३८**

**स्वाध्यायात्** स्वाध्यायकरणात् **उव्वाउ** त्ति [१]श्रान्तो, **गुरुकृत्ये** गुरुकार्ये **शेषके** कृतशेषे, **असति** अविद्यमाने, तदानीं **तं** गुरुं **पृष्ट्वा कार्ये** कार्यनिमित्तं **शेषाणां** साधूनां **निमन्त्रणं कुर्याद्** गृहीतेन भक्तादिनेति शेषः ॥३८॥ १. [उव्वाअ परिश्रान्तः – दे. १०२]

किमेवमुत्साहः कार्यत इत्याह –

**दुलहं खलु मणुयत्तं, जिणवयणं वीरियं च धम्मम्मि ।**
**एयं लद्धूण सया, अपमाओ होइ कायव्वो ॥५८३॥ १२/३९**

**दुर्लभं खलु** दुर्लभमेव, **मनुजत्वं** मानुष्यम् । **जिनवचनं** सर्वज्ञवचनं **वीर्यं च धर्मे** धर्मविषयम्-एतत्त्रितयं **लब्ध्वा सदा** सर्वकालम्, **अप्रमादो** यत्नातिशयः **भवति कर्तव्यः** ॥३९॥

एतच्च चिन्तनीयमित्युपदिशन्नाह –

**दुग्गतरयणागररयणगहणतुल्लं जईण किच्चं ति ।**
**[१]आयतिफलमद्धुवसाहणं च णिउणं मुणेयव्वं ॥५८४॥ १२/४०**

दुर्गतस्य दरिद्रस्य रत्नाकरे प्राप्ते, रत्नग्रहणमिति लालसया, यथा तत्तुल्यं **दुर्गतरत्नाकर-रत्नग्रहणतुल्यम्, यतीनां** साधूनां **कृत्यमिति** कर्तव्यम् । न तत्र साधोरभिलाषो परमोऽस्ति । **आयतिफलमा**गामिकालभाविकफलम्, अध्रुवाणि साधनानि वीर्यादीनि यस्मिस्तत्तथा **अध्रुवसाधनं च निपुणं** सूक्ष्मं यथा भवत्येवं **मन्तव्यं** ज्ञातव्यं । परिणामसुन्दरं फलं यतीनां कृत्यमध्रुवमनो-वाक्-काय-वीर्य-बुद्धि-पाटव-क्षयोपशमादिसाधनञ्चेतिभावः ॥४०॥ (१. आयतफलं अटी.)

शेषसाधुनिमन्त्रणप्रवृत्तेनापि गुरुपृच्छाऽवश्यं विधेयेत्युपदिशन्नाह –

**इयरेसिं अक्खित्ते, गुरुपुच्छाए णिओगकरणं ति ।**
**एवमिणं परिसुद्धं, [१]वेयावच्चं तु अकएऽवि ॥५८५॥ १२/४१**

**इतरेषामपि** साधूनां सम्बन्धिनि **आक्षिप्ते** ढौकिते कार्य इति गम्यते । साधुभिरेव विधेयतया निर्दिष्ट इत्यर्थः **गुरुपृच्छा[याः] नियोगकरणमिति** नियमविधानम् । **एवमिदं परिशुद्धम**नवद्यं **वैयावृत्त्यं तु** व्यावृत्तभावरूपम् **अकृतेऽपि** तं कथञ्चित्कार्ये, गुरवो हि न यथा कथञ्चित् साधुकार्यं प्रतिषेधन्ति, अतोऽधिकृतेऽपि निर्जरैव साधोः, निर्व्याजपरिणामत्वेन प्रवृत्तत्वात्, अधिकगुणापेक्षया त्वन्यथाप्रवृत्तेः, तत्र तु गुरवः स एव च साधुः ज्ञात्वा प्रमाणम् ॥४१॥ (१. वैयावच्चे अटी.)

उक्ता निमन्त्रणा, उपसम्पत् समाचारीमाह –

**उवसंपया य तिविहा, नाणे तह दंसणे चरित्ते य ।**
**दंसणनाणे तिविहा, दुविहा य चरित्तमट्ठाए ॥५८६॥ १२/४२**

**उपसम्प**च्चात्मनिवेदनारूपा **त्रिविधा । ज्ञाने** ज्ञानविषया **तथा दर्शने चारित्रे च, दर्शन-ज्ञाने** दर्शन-ज्ञानविषया **त्रिविधा, द्विविधा च चरित्रार्थाय** चारित्रप्रयोजनाय ॥४२॥

एतद्विवरणायाह –

**वत्तणसंधणगहणे, सुत्तत्थोभयगया उ एस त्ति ।**
**वेयावच्चे खमणे, काले पुण आवकहियादी ॥५८७॥ १२/४३**

**वर्तन-सन्धान-ग्रहणे ।** वर्तनं परावर्त्तनमाम्नायतद्विषया । सन्धानं विच्छिन्नस्य पुनरनुसन्धान-मनुस्यूतता । ग्रहणं वाचना । एतदर्थमुपसम्पत् । पुनरैकैका त्रिविधा । **सूत्रार्थोभयगता तु** ज्ञान-

चारित्र-प्रभावकसूत्रा-र्थोभयविषया **एषेत्युपसम्पत्**। **वैयावृत्ते**[त्त्ये]वैयावृत्त्यविषया [१]**क्षमणे** क्षमणविषया। **काले पुनः** विचार्ये **यावत्कथिकादिः**, आदिशब्दादित्वरपरिग्रहः। चारित्रविषया वैयावृत्त्योपसम्पद् यावत्कथिकीत्वरकाला च क्षमणेऽप्येवम् ॥४३॥ (१. क्षपणे- चतुर्थादिरूपक्षपणविषया, अटी.)

कथं पुनः शुद्धोपसम्पदिष्यत इत्याह -

**संदिट्ठो संदिट्ठस्स चोवसंपज्जई उ एमाई ।**
**चउभंगो एत्थं पुण, पढमो भंगो हवइ सुद्धो ॥५८८॥ १२/४४**

**सन्दिष्टो** विवक्षितोऽनुज्ञाविषयीकृत इत्यर्थः। **सन्दिष्टस्य चैव** विवक्षितस्यैव गुरोः, **सम्पद्यत त्वेवमादिश्चतुर्भङ्गश्चतुर्विधः** प्रकारः, **अत्र पुनश्चतुर्षुभङ्गेषु प्रथमो भङ्गो भवति शुद्धो** निर्दोषः ॥४४॥

वर्तनादीन्येव सर्वाणि व्याचष्टे -

**अथिरस्स पुव्वगहियस्स वत्तणा जं इहं थिरीकरणं ।**
**तस्सेव पएसंतरणट्ठस्सऽणुसंधणा घडणा ॥५८९॥ १२/४५**

**अस्थिरस्या**परिचितस्य **पूर्वं गृहीतस्य** वाचनया **वर्तना यदिह स्थिरीकरण**मन्यसमीपे, **तस्यैव** पूर्वगृहीतस्य, **प्रदेशान्तरनष्टस्या**न्तराविच्छिन्नस्य **अनुसन्धना**ऽनुसन्धानमुच्यते। का **घटना** नैरन्तर्यापादनम् ॥४५॥

**गहणं तप्पढमतया, सुत्तादिसु नाणदंसणे चरणे ।**
**वेयावच्चे खमणे, सीदणदोसादिणाऽण्णत्थ ॥५९०॥ १२/४६**

**ग्रहणं** वाचना **तत्प्रथमतया** अपूर्वपाठेन **सूत्रादिषु** सूत्रार्थोभयरूपेषु विषयभूतेषु, **ज्ञानदर्शने चरणे व्यावृत्य क्षमणे सीदनदोषादिना** ज्ञानादिसन्नतादिना दोषेणाक्रान्ते स्वगच्छे, **अन्यत्र** गच्छान्तरे सङ्क्रमे सत्युपसम्पच्चारित्रविषया ॥४६॥

पूर्वोक्तगाथोक्तशेषं व्याचष्टे -

**इत्तरियादिविभासा, वेयावच्चम्मि तह य खवगे वि ।**
**अविगिट्ठविगिट्ठंमि य, गणिणा गच्छस्स पुच्छाए ॥५९१॥ १२/४७**

**इत्वरिकादिविभाषा** कियत्कालोपसम्पदो यावत्कथिकोपसम्पदश्च विभाषा व्याख्या कर्तव्या। **वैयावृत्त्य** गुर्वादिव्यावृतकर्मणि, **तथा च क्षमकेऽपि** क्षपणार्थौ विधये [अविकृष्ट-विकृष्टे]

**अविकृष्टतपःकर्मकारिणि** षष्टभक्ताद्यतपमासेविनि विकृष्टेऽपि च **विकृष्टतपः कर्मकारिण्य**ष्टमादितपःकर्मसमासेविनि **गणिना** गणाधिपतिना । **गच्छस्य** साधुसमूहस्य, **पृच्छ्यो**पसम्पदङ्गीकर्तव्या ॥४७॥

दशविधसमाचारीमभिधायोपसञ्जिहीर्षुराह -

**एवं सामायारी, कहिया दसहा समासओ एसा ।**
**संजमतवड्ढगाणं, णिग्गंथाणं महरिसीणं ॥५९२॥ १२/४८**

एवमुक्तनीत्या **सामाचारी** शिष्टाचरितक्रियाकलापरूपा, **कथितोक्ता दशधा समासतः** सङ्क्षेपेण **एषा** । **संयम-तपोभ्यामाढ्यकास्तेषां निर्ग्रन्थानां** साधूनां **महर्षीणां** ज्ञानसम्पन्नानाम् ॥४८॥

अस्याः फलमाह -

**एयं सामायारीं, जुंजंता चरणकरणमाउत्ता ।**
**साहू खवेंति कम्मं, अणेगभवसंचियमणंतं ॥५९३॥ १२/४९**

**एतां सामाचारीं युञ्जन्तः** प्रयुञ्जानाः **चरणकरणायुक्ता**श्चरणकरणयोरागमप्रसिद्धयोरायुक्ता अप्रमत्ताः, **साधवः क्षपयन्ति कर्म** ज्ञानावरणादि, **अनेकभवसञ्चित**मनेकभवोपात्तम्, **अनन्तम्** अपरिमितम् ॥४९॥

व्यतिरेकसारमाह -

**जे पुण एयविउत्ता, सग्गहजुत्ता जणंमि विहरंति ।**
**तेसिं तमणुट्ठाणं, नो भवविरहं पसाहेइ ॥५९४॥ १२/५०**

**ये पुनरेतद्वियुक्ता** दशविधसामाचारीवियुक्ताः, **स्वाग्रहयुक्ता** शास्त्रनिरपेक्षयाऽऽत्मीयाभिनिवेशसमन्विता, **जने** लोके **विहरन्ति** चेष्टन्ते **तेषां** स्वग्रहयुक्तानां **तदनुष्ठानं** क्रियमाणं **नो** नैव **भवविरहं** मोक्षं **प्रसाधयति** निष्पादयति ॥५०॥

**॥ साधुसामाचारी पञ्चाशकं द्वादशं समाप्तम् ॥**

# ॥ त्रयोदशं पिण्डविधान-पञ्चाशकम् ॥

सामाचार्यन्तर्गतत्वात् पिण्डविशुद्धेः तत्स्वरूपप्रतिपादनायाह -

**नमिऊण महावीरं, पिंडविहाणं समासओ वोच्छं ।**
**समणाणं पाउग्गं, गुरूवएसाणुसारेणं ॥५९५॥ १३/१**

**नत्वा महावीरं** महावीर्यं विराजनाद्, भगवन्तम्, **पिण्डविधानं** पिण्डविधिं **समासतो वक्ष्य**। **श्रमणाना** साधूनां **प्रायोग्य**मुचितम्। **गुरूपदेशानुसारेण** गुरुवचनान्वयेन ॥१॥

**सुद्धो पिंडो विहिओ, समणाणं संजमायहेउ त्ति ।**
**सो पुण इह विण्णेओ, उग्गमदोसादिरहितो जो ॥५९६॥ १३/२**

**शुद्धो** निरवद्यः, **पिण्डो विहित**स्तीर्थकरादिभिः, **श्रमणानां** साधूनां **संयमात्मा** चारित्रात्मा, तस्य **हेतुरिति** कृत्वा, **स** पिण्डः **पुनरिह विज्ञेय उद्गमादिदोषरहितो यः** उद्गमादिदोषविकल इति यावत् ॥२॥

उद्गमादीनेवाह -

**सोलस उग्गमदोसा, सोलस उप्पायणाए दोसा उ ।**
**दस एसणाइ दोसा, बायालीसं इय हवंति ॥५९७॥ १३/३**

**षोडशोद्गमदोषाः, षोडशोत्पादनाया दोषास्तु, दशैषणा दोषा, द्वाचत्वारिंशदिति भवन्ति** सर्वे चैते समुदिताः ॥३॥

उद्गमशब्दार्थमाह -

**तत्थुग्गमो पसूती, पभवो एमादि होंति एगट्ठा ।**
**सो पिंडस्साहिगतो, इह दोसा तस्सिमे होंति ॥५९८॥ १३/४**

**तत्रोद्गमः प्रसूतिः प्रभव एवमादयो भवन्ति एकार्थाः** शब्दाः, **स उद्गमः पिण्डस्याधिकृतः**। **इह** प्रस्तावे **दोषास्तस्योद्गमस्य इमे** वक्ष्यमाणा **भवन्ति** ॥४॥

उद्गमदोषानेवाह -

**आहाकम्मुद्देसिय, पूतिकम्मे य मीसजाए य ।**
**ठवणा पाहुडिया या, पाओयर-कीअ-पामिच्चे ॥५९९॥ १३/५**

**परियट्टिए अभिहडे, उब्भिण्णे मालोहडे इय ।**
**अच्छेज्जे अणिसट्ठे, अज्झोयरए य सोलसमे ॥६००॥ १३/६ जुग्ग।**

**आधाकर्मौद्देशिकं पूतिकर्म च मिश्रजातं च स्थापना च प्राभृतिका च** [‘या’ = चः समुच्चये, तस्य च दीर्घता छन्दोऽर्था अटी.] **प्रादुष्कारः क्रीतमपमितम्( त्यम् )** ॥५॥

**परिवर्तितमभिहृतमुद्भिन्नं मालोपहृतमिति च आच्छेद्यमनिसृष्टमध्यवपूरकश्च षोडशः** ॥६॥

व्याप्य-व्यापिलक्षणगतं विशेषं विहाय सामान्येनाह -

**सच्चित्तं जमचित्तं साहूणऽट्ठाएँ कीरए जं च ।**
**अच्चित्तमेव पच्चति आहाकम्मं तयं भणियं ॥६०१॥ १३/७**

**सचित्तं** धान्यफलादि, **यदचित्तम**चेतनं, **साधूनामर्थे** साधून् मनस्याधाय, **क्रियते** तदाधाकर्म । **यच्च अचित्तमेव** यद् ‘भुइकणिकादि’ **पच्यते**ऽग्निना संस्क्रियते **आधाकर्म तकद्** भणितमुक्तम् ॥७॥

अधुनौद्देशिकमाह -

**उद्देसिय साहुमाई, ओमच्चए भिक्खवियरणं जं च ।**
**उव्वरियं मीसेउं, तविउं उद्देसियं तं तु ॥६०२॥ १३/८**

**उद्दिश्य साध्वादीन्** निर्ग्रन्थ-शाक्य-तापस-गैरिकाऽऽजीवाख्यान् श्रमणान्, **अवमात्यये** दुर्भिक्षात्यये **भिक्षावितरणमाहारदानम्** । **यच्चोव्वरितं मिश्रयित्वा** ओदनादि दध्यादिना, कृताख्यभेदाऽन्तःपाति । **तप्त्वा** प्रताप्य गुडमोदकचूर्णादि यत् संस्क्रियते तच्च कर्मौद्देशिकान्तःपाति । **औद्देशिकं तत्तु** तत्पुनः सकलमेवेदमौद्देशिकम् ॥८॥

पूतिदोषमाह -

**कम्मावयवसमेयं संभाविज्जति जयं तु तं पूइं ।**
**पढमं चिय गिहिसंजयमीसोवखडाइ मीसं तु ॥६०३॥ १३/९**

आधाकर्मावयवसमन्वितं **कर्मावयवसमेतं सम्भाव्यते** ज्ञायते **यकद्** यदाहारजातं **तत्** पूति। उक्तं पूति । मिश्रमाह **प्रथममेवा**धिश्रयणकाल एव, गृहिणश्च संयताश्च तयोः मिश्रकं तदुपस्कृतादि च **गृहसंयतमिश्रोपस्कृतादिमिश्रं तु** मिश्रं पुनरेवंविधमभिधीयते ॥९॥

स्थापनादोषमाह -

**साहोभासियखीराइठावणं ठवण साहुणऽट्ठाए ।**
**सुहुमेयरमुस्सक्कणमवसक्कणमो य पाहुडिया ॥६०४॥ १३/१०**

**साधुनाऽवभाषितं** याचितं यत् क्षीरादि, तस्य **स्थापनं** गृहस्थेन यत्क्रियते स **स्थापनादोषः**। **साधूनामथं** साधुनिमित्तम् । [अवष्वष्कणं] प्राभृतिकामाह-**सूक्ष्मेतरा** च[ल्प]बादर [**उत्ष्वष्कणम्**][**अवष्वष्कणम्-**] उत्सर्पणं पुरस्ताद् अभिसर्पणं पश्चाच्च **मो** इति निपातः **प्राभृतिका** नाम दोषः ॥१०॥

प्रादुष्कारदोषमाह -

**नीयदुवारंधयारे गवक्खकरणाइ पाउकरणं तु ।**
**दव्वाइएहिं किणणं, साहूणट्ठाएँ कीयं तु ॥६०५॥ १३/११**

**नीचद्वारान्धकारे गवाक्षकरणादि,** आदिशब्दान्मणिप्रदीपपरिग्रहः । **प्रादुष्करणं तु** प्रकाशकरणं। क्रीतमाह-**द्रव्यादिभि**र्द्रव्यभावाभ्यां **क्रयणं** विनिमयरूपम्। **साधूनामर्थे क्रीतं तु**-क्रीत पुनर्नाम दोषः ॥११॥

अपमित्यमाह -

**पामिच्चं जं साहूणऽट्ठा उच्छिदिउं दियावेइ ।**
**पल्लट्टिउं च गोरवमादी परियट्टियं भणियं ॥६०६॥ १३/१२**

**अपमित्यं** याचितकं **यत्साधूनामर्थे** साधुनिमित्तम्, **उच्छिद्य** याचित्वा 'अहं पुनर्वितरिष्यामि' इत्येवं चेतयते **ददाति । परिवर्तितमाह-परावर्त्य वा** पूर्वापेक्षया । **वा** शब्दः चशब्दार्थे । **गौरवादिना**भ्यर्हितत्वादिना साधोः । कोद्रवौदनादिप्रक्षेपेण शाल्योदनादि ददतः । **परिवर्त्तितं भणितम्**। परिवर्त्तितं नाम दोषस्तदुक्तम् [जिनैः। अटी.] ॥१२॥

अभ्याहृतमाह -

**सग्गामपरग्गामा, जमाणिउं आहडं तु तं होइ ।**
**छगणादिणोवलित्तं, उब्भिदिय जं तमुब्भिण्णं ॥६०७॥ १३/१३**

**स्वग्राम-परग्रामाद् यदानीतमाहृतं तु तद् भवत्यभ्याहृतमित्यर्थः।** उद्भिन्नमाह-**छगणादिना** गोमय-जतु-मदनादिना, **उपलिप्तं** लाञ्छितं मुद्रितम्, **उद्भिद्य यद्ददाति तदुद्भिन्नमुच्यते** ॥१३॥

मालोपहृतमाह -

**मालोहडं तु भणियं, जं मालादीहि देति घेत्तूणं ।**
**अच्छेज्जं चाच्छिदिय, जं सामीभिच्चमादीणं ॥६०८॥ १३/१४**

[मालापहृतं-उपनीतम् अटी.] **मालोपहृतं तु भणितमुक्तम्, यन्मालादिभ्यो ददाति गृहीत्वा** उत्तार्य निश्रेण्यादिना। आच्छेद्यमाह-**आच्छेद्य च** नामाहारदोषः। **आच्छिद्य** गृहीत्वा **यत्क्षीरादि, स्वामी** नायकः **भृत्यादीनां** गोपालादीनां साधवे ददाति ॥१४॥

अनिसृष्टमाह -

**अणिसिट्ठं सामण्णं, गोट्ठिगभत्तादि ददउ एगस्स ।**
**सट्ठा मूलद्दहणे, अज्झोयर होइ पक्खेवो ॥६०९॥ १३/१५**

**अनिसृष्टं** नाम दोषः, **सामान्यं** साधारणं **गोष्ठिकभक्तादि** घटाभक्तादि, [समुदायभोजनादि-अटी.] **ददतस्तेषामेव एकस्य** कस्यचित्। अध्यवपूरकमाह-**स्वार्थ**मात्मार्थं **मूलाऽद्दहणे** [अद्दहणं स्थापनम्-तुला- "अद्दहियः स्थापित" (विपाकसूत्र १.६)] सजलस्थाल्यधिरोहणे, **अध्यवपूरको भवति प्रक्षेपः**, तन्दुलमुद्गादिकणप्रक्षेपः, बहुसाध्वागमनापेक्षया ॥१५॥

एष्वेवोद्गमदोषेष्वविशोधि-विशोधिकोटिद्वयविभागमाह -

**कम्मुद्देसिगचरमतिग पूइयं मीस चरमपाहुडिया ।**
**अज्झोयर अविसोही, विसोहिकोडी भवे सेसा ॥६१०॥ १३/१६**

**कर्म** आधाकर्म **औद्देशिकचरमत्रिकं** यावदर्थिकपरित्यागेन, समुद्देशा-ऽऽदेश-समादेशरूपम्। **पूतिकं मिश्र चरमप्राभृतिका** बादरप्राभृतिका, **अध्यवपूरकः, अविशोधिरित्यविशोधिकोटी** उक्ता। सर्वापि **विशोधिकोटीभवेच्छेषा** प्रागुक्तस्थानपरिहारेण ॥१६॥

उक्ताः षोडशोद्गमदोषाः साम्प्रतमुत्पादनादोषानाह -

**उप्पायण संपायण, निव्वत्तण मो य होंति एगट्ठा ।**
**आहारस्सिह पगता, तीए य दोसा इमे होंति ॥६११॥ १३/१७**

**उत्पादना सम्पादना निर्वर्तना च, मो** इति निपातो, **भवन्त्येकार्थाः** शब्दाः। **आहारस्येह प्रकृतास्तस्याश्चोत्पादनायाः दोषा इमे** वक्ष्यमाणा **भवन्ति** ॥१७॥

तान्येव प्रतिव्यक्ति निर्दिशति -

**धाती दूति निमित्ते, आजीव वणीमगे तिगिच्छा य ।**
**कोहे माणे माया, लोभे य हवंति दस एते ॥६१२॥ १३/१८**

**पुव्विपच्छासंथव, विज्जा मंते य चुण्ण जोगे य ।**
**उप्पायणयाएँ दोसा सोलसमे मूलकम्मे य ॥६१३॥ १३/१९ जुग्गं ।**

**धात्री, दूती, निमित्तं, आजीवनमाजीवः । वनीपकः** सम्बन्धकारी कृपि(प)णः, **चिकित्सा च । क्रोधा मानो माया लोभश्च भवन्ति दशैते** ॥१८॥

**पूर्व-पश्चात्संस्तवः** मातृ-पितृ-श्वसुरादिपरिचयः । **विद्या मन्त्रश्च । चूर्णो योगश्चोत्पादनाया** दोषा एते । **षोडशो मूलकर्म च** ॥१९॥

एतान्येव स्वरूपतो व्याचष्टे -

**धाइत्तणं करेती, पिंडट्ठाए तहेव दूतित्तं ।**
**तीतादिनिमित्तं वा, कहेति जच्चाइ वाऽऽजीवे ॥६१४॥ १३/२०**

**जो जस्स कोइ भत्तो, वणेइ तं तप्पसंसणेणेव ।**
**आहारट्ठा कुणति व, मूढो सुहुमेयरतिगिच्छं ॥६१५॥ १३/२१**

**कोहप्फलसंभावणपडुपण्णो होइ कोहपिंडो उ ।**
**गिहिणो कुणदऽहिमाणं, मायाए दवावती तह य ॥६१६॥ १३/२२**

**अतिलोभा परियडती, आहारट्ठाएँ संथवं दुविहं ॥**
**कुणइ पउंजइ विज्जं, मंतं चुण्णं च जोगं च ॥६१७॥ १३/२३**

**[1]अन्नमिह कोउगादि व, पिंडत्थं कुणइ मूलकम्मं तु ।**
**साहुसमुत्था एते, भणिया उप्पायणादोसा ॥६१८॥ १३/२४ पंचगं।**

**धात्रीत्वं** स्तन-मण्डन-क्षीरप्रदाना-ङ्कधारण-क्रीडनरूपं पञ्चविधं **करोति पिण्डार्थमा-**हारार्थम् । **तथैव दूतीत्व** दूतीभावम् । **अतीतादि निमित्तं वा कथयति** त्रिविधम् । **जात्यादि वा** जातिकर्मशिल्पादि **वा आजीवति** ॥२०॥

**यो** भिक्षूपासकादिः **यस्य** रक्तभिक्ष्वादेः (शाक्यादेः) **कश्चिद् भक्तो** भक्तिमान्, **वनति** सम्भजते, तमुपासकादिम् । **तत्प्रशंसनैव** भिक्षादिप्रशंसनेनैव **आहारार्थ**माहारनिमित्तं **करोति,**

**वा मूढो** मोहवान् **सूक्ष्मेतरचिकित्सां** सूक्ष्मबादरव्याधिप्रतीकारम्, यथागमं तु [न] तन्निषेधः साधर्मिकवात्सल्यादेरुच्चैर्गोत्रनिबन्धादाराधकत्वाच्च ॥२१॥

**क्रोधफलसम्भावनया प्रत्युत्पन्नः** सम्पन्नः तथाविधक्षपकर्षेरिव **भवति, क्रोधपिण्डस्तु, गृहिणा** गृहस्थस्य कुर्वन्नुत्पादयन् **अभिमानं** मानपिण्डो यतेर्भवतीति शेषः, **सेवतिकासाधोरिव, मायया दापयति** तथा च मायापिण्डो भवत्याषाढभूतेरिव ॥२२॥

**अतिलोभाल्लो**भातिशयात् **पर्यटत्ययं** लोभपिण्डः, **सिंहकेसरमोदकाभिग्रहयतेरिव, आहारार्थं संस्तवं** परिचयं **द्विविधं** पूर्वपश्चात्संस्तवरूपं **करोति** संस्तवपिण्डोऽयम्। **प्रयुङ्क्ते विद्यां** स्त्रीदेवताधिष्ठिताम्, **मन्त्रं** देवपुरुषाधिष्ठितम्, **चूर्णं** चाञ्जनादिकं श्लक्ष्णरूपम्, **योगं च** तथाविधद्रव्यसंयोगम्, **विद्यापिण्डो मन्त्रपिण्डश्चूर्णपिण्डो योगपिण्डः** ॥२३॥

**अन्यदप्येवजातीयं कौतुकादि** वा विशिष्टप्रभावौषधिस्नानादि वा ['अन्नमह'त्ति पाठान्तरं, तत्रान्यत् अथापरम्-अटी.] **पिण्डार्थं करोति । मूलकर्म तु** अपत्योत्पत्तिहेतुविशिष्टौषधि-संयोगक्रियादिरूपम्। **साधुसमुत्था एते भणिता उत्पादनादोषाः** ॥२४॥ (१. अन्नमह, अटी.)

अधुनैषणादोषानाह -

**एसण गवेसणऽण्णेसणा य गहणं च होंति एगट्ठा ।**
**आहारस्सिह पगता, तीइ य दोसा इमे होंति ॥६१९॥ १३/२५**

एषणं गवेषणा अन्वेषणा च ग्रहणं च भवन्त्येकार्थाः **शब्दाः**। आहारस्येह प्रकृता प्रस्तुता। तस्याश्चै**षणाया** दोषा इमे **वक्ष्यमाणा** भवन्ति ॥२५॥

**संकिय मक्खिय निक्खित्त पिहिय साहरिय दायगुम्मीसे ।**
**अपरिणय लित्त छड्डिय, एसणदोसा दस हवंति ॥६२०॥ १३/२६**

**शङ्कितं म्रक्षितं निक्षिप्तं पिहितं संहृतं दायक उन्मिश्रमपरिणतं लिप्तं छर्दितमेषणा-दोषा दश भवन्ति** ॥२६॥

एतामेव व्याचष्टे -

**कम्मादि संकति तयं, मक्खियमुदगादिणा उ जं जुत्तं ।**
**निक्खित्तं सजियादो, पिहियं तु फलादिणा ठइयं ॥६२१॥ १३/२७**

**मत्तगगयं अजोग्गं, पुढवादिसु छोढु देइ साहरियं ।**
**दायग बालादीया, अजोग्ग बीजादिउम्मीसं ॥६२२॥ १३/२८**

**अपरिणयं दव्वं चिय, भावो वा दोण्ह दाण एगस्स ।**
**लित्तं वसादिणा छड्डियं तु परिसाडणावंतं ॥६२३॥ १३/२९ तिगं ।**

**कर्माद्या**धाकर्मादि **शङ्क्ते तच्छङ्कितं** भवति । **म्रक्षितमुदकादिना तु यद् युक्तं निक्षिप्तं सजीवादा** सचित्ताचित्तमिश्रेषु, **पिहितं तु फलादिना** बीजपूरकादिना, **स्थगितमाच्छादितम्** ॥२७॥

**मात्रकगत** मात्रगतं भाजनगतमित्यर्थः । **अयोग्यम**दानोचितं तुषादि, **पृथिव्यादिषु क्षिप्त्वा ददाति** [तत्] **संहृतमुच्यते** । **दायका** दातारो बालवृद्धरोग्यनधिकारिप्रभृतयः **अयोग्या** दाने, दातृदोषोऽयम्, **बीजादिभिरुन्मिश्रमुत्प्राबल्येन** मिश्रीकृतमुन्मिश्रमुच्यते ॥२८॥

**अपरिणतं द्रव्यमेव** न प्रासुकं **भावो वा** न परिणतो दातुः, **द्वयोर्दान एकस्य लिप्तं वसादिना** द्रव्यजातेन लिप्तमुच्यते **छर्दितं तु परिशाटनावत्** । यत्रानीयमानेऽवयवाः परिशटन्ति छर्दितमित्युच्यते ॥२९॥

**एयद्दोसविसुद्धो, जतीण पिंडो जिणेहिऽणुण्णाओ ।**
**सेसकिरियाठियाणं, एसो पुण तत्तओ णेओ ॥६२४॥ १३/३०**

**एतद्दोषविशुद्धो** द्विचत्वारिंशद्दोषविरहितो, **यतीनां पिण्डो जिनैरनुज्ञातो**ऽनुमतः, **शेषक्रियास्थिताना** सूत्रार्थपौरुष्यादिस्थितानाम्, **एष** पिण्डः **पुनस्तत्त्वतो ज्ञेयो** न तद्विकलानाम् ॥३०॥

एतदेव समर्थयते -

**संपत्ते इच्चाइसु, सुत्तेसु निदंसियं इमं पायं ।**
**जतिणो य एस पिंडो, ण य अन्नह हंदि एयं तु ॥६२५॥ १३/३१**

**सम्यक्** स्वाध्यायकरणादिना, प्राप्ते भिक्षाकाले **इत्यादिषु** [1]**सूत्रेषु निदर्शितमिदं** शेषक्रियात्वम् **प्राया** बाहुल्येन, **यतेश्चैष पिण्डः, न चान्यथा**ऽन्येन प्रकारेण, **हन्तैतत्तु** यतित्वम् । तेन शेषक्रियास्थितस्य पिण्डदोषपरिहारिणः सम्यग् यतित्वमित्यावेदितं भवति ॥३१॥

कथं पुनर्दोषज्ञानं भवतीत्याह -

**दोसपरिण्णाणं पि हु, एत्थं उवओगसुद्धिमादीहिं ।**
**जायति तिविहनिमित्तं, तत्थ तिहा वण्णियं जेण ॥६२६॥ १३/३२**

१. संपत्ते भिक्खकालम्मि, असंभंतो अमुच्छिओ ।
इमेण कमजोगेण, भत्तपाणं गवेसए ॥ [दश.अ.५.उद्देश-१ गा.१]

**दोषपरिज्ञानमपि** दोषावगमनमपि । हुर्वाक्यालङ्कारे । **अत्र** पिण्डे **उपयोगशुद्ध्यादिभिः** प्रकारैः **जायते, त्रिविधनिमित्तं** कायिक-वाचिक-मानसिकभेदात् । **तत्र** पिण्डविषये **त्रिधा**ऽतीत-प्रत्युत्पन्नाऽनागतभेदेन, **वर्णितं** कथितम्, **येन** तेन दोषपरिज्ञानमपि जायते ॥३२॥

**भिक्खासद्दोऽवेवं, अणियतलाभविसउ त्ति एमादी ।**
**सव्वं चिय उववन्नं, किरियावंतंमि उ जतिम्मि ॥६२७॥ १३/३३**

**'भिक्षाशब्दोऽप्येवमनियतलाभविषय इत्येवमादि'** यदुक्तम्, **सर्वमेवोपपन्नं** युक्तम् । तत् **क्रियावति तु** शास्त्रोक्तक्रियायुक्ते **यतौ** साधौ सर्वदोषविरहितस्यानियतलाभात्मकस्याहारस्य भिक्षाशब्दवाच्यत्वादिति भावः ॥३३॥

पराशङ्क्यमाह -

**अण्णे भणंति समणादत्थं उद्देसियादि संचाए ।**
**भिक्खाए अणडणं चिय, विसेसओ सिट्ठगेहेसु ॥६२८॥ १३/३४**

**अन्ये** केचन **भणन्ति** वदन्ति, **श्रमणाद्यर्थं** श्रमणादिनिमित्तम् कृतस्य **उद्देशिकादिसंत्यागे** परिहारे भवद्भिरिष्यमाणे, **भिक्षाया अनटनमेवा**ऽपर्यटनमेव, **विशेषतो** विशेषेण **शिष्टगेहेषु** ब्राह्मणादिकुलेषु ॥३४॥

इहैव हेतुमाह -

**धम्मट्ठा आरंभो, सिट्ठगिहत्थाण जमिह सव्वो वि ।**
**सिद्धो त्ति सेसभोयणवयणाओ तंतणीतीए ॥६२९॥ १३/३५**

**धर्मार्थं** पुण्यार्थम् **आरम्भ** आहारपाकविषयः **शिष्टगृहस्थानां** स्मृत्याद्यनुसारिणाम्, **यद्** यस्माद् **इह सर्वोऽपि** निरवशेषोऽपि **सिद्ध** इति प्रतिष्ठितः । **शेषभोजनवचनात्** । *गुर्वादिभ्यः शेषं भोक्तव्यम्* ['गुरुदत्तविशेषं भुञ्जीत' - अटी.] इति वचनात्, **तन्त्रनीत्या** श्रुतिस्मृतिनीत्या ॥३५॥

**तम्हा विसेसओ चिय, अकयाइगुणा जईण भिक्ख त्ति ।**
**एयमिह जुत्तिजुत्तं, संभवभावेण न तु अन्नं ॥६३०॥ १३/३६**

**तस्माद्विशेषत एवाकृतादिगुणा**कृताकारितऽसङ्कल्पिता [तत्व] गुणा **यतीनां भिक्षेति** । **एतदिह युक्तियुक्तं** युक्तिसङ्गतं **सम्भवभावेन** सम्भवसद्भावेन, **न त्वन्यत्** । सामान्यत एवाकृताकारितासङ्कल्पितरूपत्वम् ॥३६॥

अत्रोत्तरमाह -

**भण्णति विभिण्णविसयं, देयं अहिगिच्च एत्थ विण्णेओ ।**
**उद्देसिगादिचाओ, न सोचिआरंभविसओ उ ॥६३१॥ १३/३७**

**भण्यतेऽत्र** समाधिः, **विभिन्नविषयं देयं** दातव्यमन्नादि, **अधिकृत्यात्र** प्रस्तावे **विज्ञेयो** ज्ञातव्य **औद्देशिकादित्याग** औद्देशिकादिपरिहारः, **न स्वोचितारम्भविषयस्तु** स्वस्यै स्वार्थमुचित-श्चासावारम्भश्च स्वोचितारम्भः, प्रतिदिनकरणीयस्तद्विषयस्तु तद्गोचरः । पुनर्नौद्देशिकादित्यागः ॥३७॥

**संभवइ य एसो वि हु, केसिंची सूयगादिभावे वि ।**
**अविसेसुवलंभाओ, तत्थ वि तह लाभसिद्धीओ ॥६३२॥ १३/३८**

**सम्भवति चैषोऽपि हुः**, स्वोचितारम्भः **केषाञ्चिच्छिष्टगृहस्थानां सूतकादिभावेऽपि** सूतकादिप्रतिषिद्धप्रवेशकारणसद्भावेऽपि, **अविशेषोपलम्भात्** स्वोचितारम्भस्य । **तत्रापि** सूतकादौ **तथा** सूतकाद्यवस्थायामिव **लाभसिद्धेः** । कृपि(प)णानाथदुःखितप्रवृत्तीनामाहार-लाभदर्शनात् ॥३८॥

**एवंविहेसु पायं, धम्मट्ठा णेव होइ आरंभो ।**
**गिहिसु परिणाममेत्तं, संतं पि य नेव दुट्ठं ति ॥६३३॥ १३/३९**

**एवंविधेषु** मध्यस्थशिष्टगृहस्थेषु **प्रायो** बाहुल्येन, **धर्मार्थं** धर्मनिमित्तं, **नैव भवत्यारम्भः** स्वोचितारम्भः, **गृहिषु** गृहस्थेषु **परिणाममात्रं** शुभाध्यवसायमात्रं 'धर्माय ममैतत् स्यात्' इत्यादीत्येवंरूपमधिकारम् परिहारेण **सदपि च** विद्यमानमपि च **नैव दुष्टमिति**, आहारदोषेष्व-नधिकृतत्वात्तस्य, न हि धर्मसङ्कल्पमात्रमधिकाऽऽरम्भान्तरविरहितं क्वचिदाहारदोषत्वेन प्रसिद्धम्, तस्माददुष्टमेवेति ॥३९॥

**तहकिरियाऽभावाओ, सद्धामेत्ताउ कुसलजोगाओ ।**
**असुहकिरियादिरहियं, तं हंदुचितं तदण्णं व ॥६३४॥ १३/४०**

**तथा क्रियाभावादधिकाऽऽरम्भक्रियाया** असम्भवाद्धेतोः, **श्रद्धामात्रात्**, 'सर्वं धर्माय मम सम्पद्यताम्' इत्येवं मनोव्यापारात् **कुशलयोगात्** सुन्दरवाक्कायव्यापाररूपाद् **अशुभक्रियादि-रहित** सावद्यक्रियावाग्व्यापाराभिसन्धिवर्जितं **तत्** परिणाममात्रं **हन्तोचितं** योग्यमप्रतिषिद्धं वर्त्तत । **तदन्यवत्** चैत्यवन्दनादिशुभपरिणामवत्, न खल्वस्य धर्मदानसङ्कल्पपरिणाममात्रस्य

चैत्यवन्दनादेश्च निरवद्यत्वं प्रतिविशेषः ॥४०॥

एतदेव समर्थयितुमाह –

**न खलु परिणाममेत्तं, पदाणकाले असक्किरियारहियं ।**
**गिहिणो तणयं तु जइं, दूसइ आणाएँ पडिबद्धं ॥६३५॥ १३/४१**

**नैव परिणाममात्रं** शुभसङ्कल्परूपं कर्तृ **प्रदानकाले**, सामान्येनैव **असत्क्रियारहित**-मधिकाऽऽरम्भरहितम्, **गृहिणः** सम्बन्धि [**तणयं** सत्कं अ.टी.] **पुनर्यतिं** कर्मतापन्नं **दूषयति** । नैव दूषयतीत्यर्थः । कीदृशं यतिं? **आज्ञायां** सर्वज्ञवचनरूपायां **प्रतिबद्धं** व्यवस्थितम् ॥४१॥

विशेषतः शिष्टगेहेष्वनटनम्[१४/३४ गाथायाम्] इत्युक्तम्, तन्निराकरणायाह –

**सिट्ठा वि य केइ इहं, विसेसओ धम्मसत्थकुसलमती ।**
**इय न कुणंति वि अणडणमेवं भिक्खाएँ वतिमेत्तं ॥६३६॥ १३/४२**

**शिष्टा अपि केचिदिह विशेषतो** विशेषेण **धर्मशास्त्रकुशलमतयो** धर्मागमनिष्णातबुद्धय इत्येवं स्वरूपमारम्भं **न कुर्वन्त्यपि** न निर्वर्त्तयन्त्यपि, **अनटनमेव**मुक्तनीत्या **भिक्षाया वाङ्मात्रं** परोक्तम् ॥४२॥

**दुक्करयं अह एयं, जइधम्मो दुक्करो चिय पसिद्धं ।**
**किं पुण ? एस पयत्तो, मोक्खफलत्तेण एयस्स ॥६३७॥ १३/४३**

**दुष्करमेव** दुष्करम् **अथैतदा**कृताकारितासङ्कल्पितरूपग्रहणम्। सूरिराह। **यतिधर्मः** साधुधर्मो **दुष्कर** एवाऽसुकर **एव, प्रसिद्धं** प्रख्यातमेतत्। **किं पुनरेष प्रयत्नो** विशुद्धपिण्डग्रहणविषयः ? **मोक्षफलत्वेन** मोक्षः फलमस्येति मोक्षफलस्तद्भावस्तत्वं तेन, मोक्षहेतुतयेति भावः, **एतस्य** साधोः [यतिधर्मस्य-अटी.] ॥४३॥

ननु यद्येषणाप्रवृत्तस्यापि यतेः कथञ्चिदशुद्धाहारपरिभोगो भवेत् तत्र किं दोषः स्यान्न वा'इत्याशङ्क्याह –

**भोगंमि कम्मवावारदारतोऽवित्थ दोसपडिसेहो ।**
**णेओ आणाजोएण कम्मुणो चित्तयाए य ॥६३८॥ १३/४४**

अशुद्धाहार**भोगेऽपि कर्मव्यापारद्वारतः** [अपि - अटी.] कर्मव्यापारद्वारेण कर्मसामर्थ्य-मुखेनेत्यर्थः। **अत्र** प्रस्तुते **दोषप्रतिषेधो** [**ज्ञेयः**] विज्ञेयो दोषनिषेधोऽवगन्तव्यः। **आज्ञायोगेना**-ऽऽगमयोगेन हेतुना, **कर्मणा** ज्ञानावरणादेः **चित्रतया च** ॥४४॥

**इहरा न हिंसगस्स वि, दोसो पिसियादिभोत्तु कम्माओ ।**
**जं तस्सिद्धिपसंगो, एयं लोगागमविरुद्धं ॥६३९॥ १३/४५**

**इतरथा**ज्ञायोगमन्तरेण दोषाभावेऽभ्युपगम्यमाने, **न हिंसकस्यापि** हिंस्रस्यापि **दोषो** बन्धलक्षण:, **पिशितादि**मांसादिप्राण्युपमर्देन **भुङ्क्त्वा** [पिसियादिभोत्तु.... भोक्तुः,.... भोक्तुं - अटी.] **कर्मण:** सकाशाद्यद् **यस्मात् सिद्धिप्रसङ्गो** दोषाभावसिद्धिप्रसङ्गः । एतद्दोषाभावापादनं **लोकागमविरुद्धं** लोकागमाभ्यां बाधितं वर्त्तते तस्मादाज्ञायोग एव दोषापहारसमर्थः ॥४५॥

**ता तहसंकप्पो च्चिय, एत्थं दुट्ठो त्ति इच्छियव्वमिणं ।**
**तदभावपरिण्णाणं, उवओगादीहिं उ जतीणं ॥६४०॥ १३/४६**

तत्तस्मात् **तथासङ्कल्प एवा**धिकारम्भसङ्कल्प **एव अत्र** पिण्डग्रहणे, **दुष्ट इति** दोषहेतुः **एष्टव्यमिदम्, तदभावपरिज्ञानं** सङ्कल्पदोषाभावपरिज्ञानं दोषाभावपरिज्ञानं वा । **उपयोगादि-भिस्तू**पयोगनिमित्तशुद्ध्यादिभिः पुनः, **यतीनामिदं** च **निमित्तचूलिकादिग्रन्था**नुसारेण ज्ञेयम् । तत्र सूक्ष्मेक्षिकयोक्तत्वात् ॥४६॥

उद्गमादयो यत्प्रभवाः, तत्ख्यापनायाह -

**गिहिसाहूभयपहवा, उग्गमउप्पायणेसणादोसा ।**
**एए तु मंडलीए, णेया संजोयणादीया ॥६४१॥ १३/४७**

**गृहिसाधूभयप्रभवा** उद्गमोत्पादनैषणादोषाः, प्राक् प्रतिपादिताः, **एते तु** वक्ष्यमाणाः **मण्डल्यां ज्ञेयाः संयोजनादिकाः** ॥४७॥

एतानेवाह -

**संयोजणा पमाणे, इंगाले धूम कारणे चेव ।**
**उवगरण भत्तपाणे, सबाहिरब्भंतरा पढमा ॥६४२॥ १३/४८**

**संयोजना प्रमाणमङ्गारो धूमः कारणं चैव** पञ्चैते । तत्र संयोजनामाह-**उपकरण** उपकरणविषया **भक्तपाने** भक्तपानविषया **सबाह्याभ्यन्तरा प्रथमा** संयोजना, बहिरुपकरण-संयोजना, अन्तरुपकरणसंयोजना । बहिर्भक्तपानसंयोजना [अन्तर्भक्तपानसंयोजना, मुखसंयोजना च] समयप्रसिद्धा सर्वैव ॥४८॥

प्रमाणादीनाह -

**बत्तीस कवल माणं, रागद्दोसेहिं धूमइंगालं ।**
**वेयावच्चादीया, कारणमविहिंमि अइयारो ॥६४३॥ १३/४९**

**द्वात्रिंशत् कवलाः मानं** प्रमाणमुच्यते [प्रथमा बहुवचनान्तत्वात् कवलाः, अत्र छन्दसः हेतोः 'कवल' इति ह्रस्वत्वम् अटी.] । **रागद्वेषाभ्यां धूमाङ्गारम्,** अल्पान्तरत्वाद्धूमशब्दस्य पूर्वनिपातः *लघ्वक्षरा-ऽसखि-ईदुत्-स्वरादि-अल्पस्वर-अर्च्यम्-एकम् [ सिद्धहेम-३.१.१६० ] ।* रागाच्चारित्रा(त्रे)ङ्गारो द्वेषाद्धूमः । **वैयावृत्त्यादयः कारणम्,** आदिशब्दाद् वेदनादिग्रहः, यथोक्तम् -

*वेयण वेयावच्चे, इरियट्ठाए य संजमट्ठाए ।*

*तह पाणवत्तियाए, छट्ठं पुण धम्मचिंताए ॥ [ ओघनिर्युक्ति गाथा-५८१ ]*

**अविधावन्यथाकरणे, अतिचाराऽतिक्रमः,** तस्मादविधिर्न कार्यः ॥४९॥

प्रकरणोपसंहारमाह -

**एयं णाऊणं जो, सव्वं चिय सुत्तमाणतो कुणति ।**

**काउं संजमकायं, सो भवविरहं लहुं लहति ॥६४४॥ १३/५०**

**एतत्** पूर्वोक्तं **ज्ञात्वा**ऽवगम्य, **यः** साधुः, **सर्वमेव** सप्तचत्वारिंशद्दोषजातं **सूत्रमानतः** सूत्रप्रमाणतः सूत्रप्रामाण्येन, **करोति** विधत्ते यथागमं विधिप्रतिषेधाभ्यां **कृत्वा संयमकायं** चारित्रात्मानं संयमराशिं वा, **स** प्रस्तुतः साधुः **भवविरहं** संसारविरहं **लघु** शीघ्रमेव **लभते**ऽवाप्नोति ॥५०॥ (१. कायो-अटी.)

**॥ पिण्डविधि-पञ्चाशकं त्रयोदशं समाप्तम् ॥**

# ॥ चतुर्दशं शीलाङ्गविधि-पञ्चाशकम् ॥

प्राक् साधूनामाहारविशुद्धिरुद्गमादिदोषपरिहारेण प्रतिपादिता, अधुना साधुधर्मगतशीलाङ्ग-प्रतिपादनायाह-

**नमिऊण वद्धमाणं, सीलंगाइं समासओ वोच्छं ।**
**समणाण सुविहियाणं, गुरूवएसाणुसारेणं ॥६४५॥ १४/१**

**नत्वा वर्धमानं शीलाङ्गानि** शीलावयवरूपाणि, तत्कारणाणि वा, **समासतः** सङ्क्षेपेण **वक्ष्ये, श्रमणाना** साधूनाम्, शोभनं विहितमनुष्ठानं येषां ते **सुविहितास्तेषां गुरूपदेशानुसारेण** गुर्वाज्ञानुवृत्त्या ॥१॥

**सीलंगाण सहस्सा, अट्ठारस एत्थ होंति नियमेणं ।**
**भावेणं समणाणं, अखंडचारित्तजुत्ताणं ॥६४६॥ १४/२**

**शीलाङ्गानां सहस्राणि अष्टादशसङ्ख्या, अत्र** प्रस्तुते **भवन्ति नियमेनावश्यन्तया,** न न्यूनान्यधिकानि वा । **भावेन श्रमणानां** भावसाधूनामित्यर्थः । **अखण्डचारित्रयुक्तानां** सकलचारित्रसमन्वितानाम् ॥२॥

कथं पुनरष्टादशशीलाङ्गसहस्रनिष्पत्तिरित्याह -

**जोए करणे [१] सण्णा, इंदियभूमादिसमणधम्मे य ।**
**सीलंगसहस्साणं, अट्ठारसगस्स निप्फत्ती ॥६४७॥ १४/३**

**योगः करणं सञ्ज्ञा इन्द्रियाणि भूम्यादयः श्रमणधर्मश्च** शीलाङ्गसहस्राणा-**मष्टादशकस्य निष्पत्तिः** ॥३॥ १. सण्णाइंदिय. अटी. ।

एतद्भेदख्यापनायाह -

**करणादि तिण्णि जोगा, मणमादीणि उ हवंति करणाइं ।**
**आहारादी सण्णा, चउ सोत्ताइंदिया पंच ॥६४८॥ १४/४**

**भोमादी नव जीवा, अजीवकाओ उ समणधम्मो उ ।**
**खंतादि दसपगारो, एव ठिए भावणा एसा ॥६४९॥ १४/५ जुम्मं ।**

**करणादीनि** कृतकारितानुमतिरूपाणि, **त्रीणि योगा** व्यापाररूपत्वात्। **मन आदीनि तु** मनःप्रभृतीनि **पुनर्भवन्ति करणानि**, व्यापारं प्रति साधकतमत्वात्। **आहारादयः संज्ञाश्चतुरिति** चतस्रः, **श्रोत्रादीनीन्द्रियाणि पञ्च** ॥४॥

**भूम्यादयो नव जीवाः** पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियाः । **अजीवकायस्तु** दशमो यः परिहार्यः [= अजीवात्मकः पदार्थ सार्थः] । **श्रमणधर्मस्तु** साधुधर्मः, पुनः **क्षान्त्यादिर्दशप्रकारो** दशभेदः स चायं क्षान्तिर्मार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिञ्चन्य-ब्रह्मचर्यरूपः । **एवं स्थिते** मूलपदकलापे, **भावनैषा** भङ्गविभावना इत्यर्थः ॥५॥

**न करति मणेण आहारसण्णविप्पजढगो उ नियमेणं ।**
**सोतिंदियसंवुडो पुढविकायआरंभ खंतिजुओ ॥६५०॥ १४/६**

**न करोति मनसा, आहारसंज्ञाविप्रयुक्तस्तु नियमेन, श्रोत्रेन्द्रियसंवृतः पृथ्वीकायारम्भं** कर्मतापन्नम्, **क्षान्तियुक्तः** क्षान्तिसम्पन्नः ॥६॥

**इय मद्दवादिजोगा, पुढविक्काए भवंति दस भेया ।**
**आउक्कायादीसु वि, इय एते पिंडियं तु सयं ॥६५१॥ १४/७**

**सोइंदिएण एयं, सेसेहि वि जं इमं तओ पंच ।**
**आहारसण्णजोगा, इय सेसाहिं सहस्सदुगं ॥६५२॥ १४/८**

**एयं मणेण वइमादिएसु एयं ति छस्सहस्साइं ।**
**न करइ सेसेहिं पि य एए सव्वे वि अट्ठारा ॥६५३॥ १४/९ तिगं ।**

इत्यनेन प्रकारेण **मार्दवादियोगान्मार्दवादिपदाभिसम्बन्धात्। पृथिवीकाये भवन्ति दश भेदाः। अप्कायादिष्वपीति** अनेन च प्रकारेण प्रत्येकं दश। **एते सर्वेऽपि पिण्डितं तु शतं** भवन्ति शतसङ्ख्याः लभन्ते ॥७॥

**श्रोत्रेन्द्रियेणैत**च्छतं लब्धम्, **शेषैरपि** चक्षुरादिभिश्चतुर्भिः, **यद्** यस्माद्, **इदं** प्रत्येकं शतम्। **ततः पञ्चशतानि, आहारसञ्ज्ञायोगा**दित्येवं **शेषाभिरपि** भयादिसंज्ञादिभिः, **सहस्रद्विकं** सर्वाभिरपि, यतः पञ्चशतानि चतुर्गुणानि सहस्रद्वयं भवति ॥८॥

**एतन्मनसा** लब्धम् सहस्रद्वयम्, **वागादिकेषु** वाचि काये चेत्यर्थः, **एतदिति** सहस्रद्वयम्, **षट्सहस्राणि** समुदितानि, **न करोतीत्यनेन** सहस्रषष्टकं लब्धम्, **शेषाभ्यामपि च** द्वाभ्याम् **एतानि सर्वाण्यप्यष्टादश** सहस्राणि भवन्तीति गम्यते ॥९॥

अधिकारार्थाभिधानायाह -

**एत्थ इमं विण्णेयं, अइदंपज्जं तु बुद्धिमंतेहिं ।**
**एक्कं पि सुपरिसुद्धं, सिलंगं सेससब्भावे ॥६५४॥ १४/१०**

**अत्र** शीलाङ्गप्रस्तावे, **इदं** वक्ष्यमाणं **विज्ञेयमवगन्तव्यम् एदम्पर्यं तु** भावार्थरूपं वाक्यतात्पर्यं पुनः **बुद्धिमद्भिः** प्रज्ञावद्भिः । **एकमपि** क्रियारूपं **सुपरिशुद्धं** निर्दोषं **शीलाङ्गं** शीलावयवरुपं **शेषसद्भाव** भावतः शेषशीलाङ्गसत्तायाम् ॥१०॥

अत्रैवार्थे दृष्टान्तमाह -

**एक्को वाऽऽयपएसोऽसंखेयपएससंगओ जह तु ।**
**एतं पि तहा णेयं, सतत्तचाओ इहरहा उ ॥६५५॥ १४/११**

**एकोऽप्यात्मप्रदेशो** जीवप्रदेशः **असङ्ख्येयप्रदेशसङ्गतो यथा तु** समानजातीयैरसङ्ख्येयैः प्रदेशैरविभागवृत्तिर्या सैव, न पुनरेकाक्येव कदाचित्तदपरनिरपेक्षः । **एतदपि** शीलाङ्गं **तथा**-विभागवृत्त्या **ज्ञेयम्** । **स्वतत्त्वत्यागः** स्वरूपत्यागः, **इतरथा तु** विभागवृत्ताविष्यमाणायाम् ॥११॥

युक्तिमाह -

**जम्हा समग्गमेयं पि सव्वसावज्जयोगविरती उ ।**
**तत्तेणेगसरूवं, न खंडरूवत्तणमुवेति ॥६५६॥ १४/१२**

**यस्मात्** कारणात् **समग्रं** परिपूर्णम् **एतदपि** शीलम्, **सर्वसावद्ययोगविरतिस्तु** सर्वेभ्यः सावद्ययोगेभ्यो विरतिः, स्वभावमेव **तत्त्वेन** परमार्थेन **एकस्वरूपं** सकलरूपम्, **न खण्डरूपत्व-मुपैति**, न कदाचित् खण्डश आत्मलाभं लभते ॥१२॥

**एयं च एत्थ एवं, विरतीभावं पडुच्च दट्ठव्वं ।**
**न उ बज्झं पि पवित्तिं, जं सा भावं विणा वि भवे ॥६५७॥ १४/१३**

**एतच्च** शीलम् **अत्र** प्रक्रमे । **एवं** सकलरूपं **विरतिभावं** विरतिपरिणाममान्तरम्, **प्रतीत्य द्रष्टव्यम्, न तु बाह्यामपि प्रवृत्तिं** क्रियारूपाम् । **यद्** यस्मात् **सा** बाह्या प्रवृत्तिः, **भावं विनाप्यशुभपरिणाममन्तरेणापि भवेद्** भावसाधोः ॥१३॥

एतद्विभावनायाह -

**जह उस्सग्गंमि ठिओ, खित्तो उदयंमि केणति तवस्सी ।**
**तव्वहपवत्तकायो, अचलियभावोऽपवत्तो तु ॥६५८॥ १४/१४**

**यथोत्सर्गे** कायोत्सर्गे **स्थितो** व्यवस्थितः, **क्षिप्तः** प्रक्षिप्तः **उदके** सलिले नद्यादौ, **केनचिद्**देवादिना, **तपस्वी** साधुः, **तद्वधप्रवृत्तकायोऽपि**, उदकहिंसाप्रवृत्तशरीरः **अचलितभावः**, तत्संस्पर्शेऽपि सामायिकव्यवस्थितभावः, **अप्रवृत्तस्तु** प्रवृत्तसम अप्रवृत्त एव तत्त्वतः ॥१४॥

दृष्टान्तमभिधाय दार्ष्टान्तिकमाह -

**एवं चिय मज्झत्थो, आणाओ कत्थई पयट्टंतो ।**
**सेहगिलाणादट्ठा, अपवत्तो चेव णायव्वो ॥६५९॥ १४/१५**

**एवमेवोदक**क्षिप्तवत् [इव अटी.], **मध्यस्थः** सामायिकव्यवस्थितः, **आज्ञात** आगमात्, **क्वचिद्** द्रव्यहिंसादौ **प्रवर्तमानः** प्रवृत्तिं कुर्वाणः **शैक्षग्लानाद्यर्थम्**, आदिशब्दात् कुलगण-सङ्घकार्यादिपरिग्रहः, **अप्रवृत्त एव ज्ञातव्यः** सामायिकपरिणामावस्थितेः ॥१५॥

**आणापरतंतो सो, सा पुण सव्वण्णुवयणओ चेव ।**
**एगंतहिया वेज्जगणातेणं सव्वजीवाणं ॥६६०॥ १४/१६**

**आज्ञापरतन्त्र** आज्ञाधीनः, **स** प्रस्तुतसाधुः, **सा** पुनराज्ञा, **सर्वज्ञवचनादेव** सर्वज्ञ-वचनरूपत्वादेव, **एकान्तहिता**ऽत्यन्तसुन्दरा, **वैद्यकज्ञातेन** चिकित्साशास्त्रोदाहरणेन, **सर्वजीवानां** स्वस्थातुराणां, न ह्यायुर्वेदः कस्यचित् स्वस्था[स्थस्या]तुरस्य वा, हितोपदेशं न विधत्ते, स्वस्थाऽऽतुर-वृत्तोपदेशात् ॥१६॥

**भावं विणा वि एवं, होति पवत्ती न बाहते एसा ।**
**सव्वत्थ अणभिसंगा, विरतीभावं सुसाहुस्स ॥६६१॥ १४/१७**

**भावं विनाप्य**शुभभावमन्तरेणापि **एवमुक्तनीत्या**, **भवति** प्रवृत्तिः द्रव्यहिंसादौ, **न बाधते** पीडयति **एषा** हिंसा द्रव्यप्रवृत्तिः, **सर्वत्र** द्रव्यक्षेत्रकालभावचतुष्टये, **अनभिष्वङ्गाद्धेतोः विरतिभावं** विरतिपरिणामं **सुसाधोः** सामायिकवतः ॥१७॥

व्यतिरेकमाह -

**उस्सुत्ता पुण बाहति, समतिवियप्पसुद्धा वि नियमेणं ।**
**गीतणिसिद्धपवज्जणरूवा नवरं निरणुबंधा ॥६६२॥ १४/१८**

**उत्सूत्रा** सूत्रातिक्रान्ता, **पुनर्बाधते** विरतिभावमिति पूर्वेण सम्बन्धः। **स्वमतिविकल्पशुद्धापि** स्वोत्प्रेक्षितबुद्धिविकल्पशुद्धापि, **प्रवृत्तिः नियमेनावश्यन्तया, गीतनिषिद्धप्रतिपादनरूपा** गीतार्थ-निषिद्धप्रतिपत्तिरूपा। **नवरं** केवलं प्रवृत्तिरनभिनिवेशाद्धेतोः सामर्थ्यलब्धात् **निरनुबन्धा** कर्मानुबन्धरहिता ॥१८॥

**इयरा उ अभिणिवेसा, इयरा न य मूलछेज्जविरहेण ।**
**होएसा एत्तो च्चिय, पुव्वायरिया इमं चाहू ॥६६३॥ १४/१९**

**इतरा तु साभिनिवेशा,** गीतार्थनिषिद्धप्रतिपत्तिरूपा, स्वमतिविकल्पशुद्धा चोत्सूत्रा प्रवृत्तिरभिनिवेशाद्धेतोः **इतरा** सकर्मानुबन्धा क्लिष्टाशयत्वात्। रागद्वेषमोहोत्कर्षे च स्वाग्रहोत्कर्ष-प्रवृत्तेः, उक्तं च -

*रागो द्वेषश्च मोहश्च, भावमालिन्यहेतवः ।*
*एतदुत्कर्षतो ज्ञेयो, हन्तोत्कर्षस्य तत्त्वतः [ अष्टकप्रकरण गाथा १७० ]*

**न च मूलोच्छेद्यविरहेण** चारित्रमूलोच्छेद्यभावेन द्वादशकषायोदये मूलच्छेदविधानात्, **भवति** सम्भवति **एषा** साऽभिनिवेशोत्सूत्रप्रतिपत्तिः । **अत एवाभिनिवेशादेव पूर्वाचार्याः** पूर्वसूरय [**श्रीभद्रबाहुस्वामिमिश्रा**-अटी.] **इदं च** प्रस्तुतार्थसंवाद्येव **आहुर्ब्रुवते** ॥१९॥

[तद्यथा]

**गीयत्थो य विहारो, बीओ गीयत्थमीसओ भणितो ।**
**एत्तो तइयविहारो, नाणुण्णाओ जिणवरेहिं ॥६६४॥ १४/२०**

**गीतार्थश्च विहारो,** यः केवलगीतार्थैरेवानुष्ठीयते, **द्वितीयो गीतार्थमिश्रको भणितः** यो गीतार्थाधिष्ठितैरगीतार्थैः क्रियते। **अतो** द्वयात्, **तृतीयविहारो**ऽगीतार्थानामेव केवलानां यः स, **नानुज्ञाता** नानुमतः, प्रतिषिद्ध इत्यर्थः, **जिनवरैः** सर्वज्ञैः ॥२०॥

**गीयस्स न उस्सुत्ता, तज्जुत्तस्सेयरस्स वि तहेव ।**
**नियमेण चरणवं जं, न जाउ आणं विलंघेइ ॥६६५॥ १४/२१**

**गीतस्य** गीतार्थस्य **नोत्सूत्रा** प्रवृत्तिः, **तद्युक्तस्य** गीतार्थयुक्तस्य, **इतरस्याप्य**गीतार्थस्य **तथैव**

तद्वदेव, **नियमेन चरणवा**श्चारित्रवान् **यद्**यस्मा**न्न जातु** कदाचिद् **आज्ञां विलङ्घय**त्युल्लङ्घयति ॥२१॥

**न य तज्जुत्तो अण्णं, न निवारइ जोग्गयं मुणेऊणं ।**
**एवं दोण्ह वि चरणं, परिसुद्धं अण्णहा णेव ॥६६६॥ १४/२२**

**न च** नैव **तद्युक्त**श्चरणयुक्तः **अन्य**मगीतार्थं **न निवारयति** न निवारयत्येव । **योग्यतां** दोषपरिहारौचित्यं **मत्वा, एव**मुक्तनीत्या **द्वयोरपि** गीतार्थागीतार्थयाश्च**रणं** चारित्रं **परिशुद्धं** निरवद्यम्, **अन्यथो**क्तप्रकारमन्तरेणैव [रेण **नैव**]न कथञ्चित् परिशुद्धमित्यर्थः ॥२२॥

विरतिभावाऽखण्डरूपत्वनिगमनायाह -

**ता एव विरतिभावो, संपुण्णो एत्थ होइ णायव्वो ।**
**नियमेणं अट्ठारससीलंगसहस्सरूवो उ ॥६६७॥ १४/२३**

**तत्**तस्माद् **एव**मुक्तनीत्या, **विरतिभावो** विरतिपरिणामः, **सम्पूर्णो**ऽखण्डः, **अत्र** व्यतिकरे **भवति ज्ञातव्यो**ऽवबोधव्यः, **नियमेन** अवधृतस्वरूपः **अष्टादशशीलाङ्गसहस्ररूपस्तु** अष्टादश-शीलाङ्गसहस्रस्वरूप एव ॥२३॥

**ऊणत्तं न कयाइ वि, इमाण संखं इमं तु अहिकिच्च ।**
**जं एयधरा सुत्ते, निद्दिट्ठा वंदणिज्जा उ ॥६६८॥ १४/२४**

**ऊनत्वं** हीनत्वं **न कदाचित्** काले, **एषां** शीलाङ्गानां **संख्या**मियत्ताम् **इमां तु** प्रत्यक्षीकृताम् **अधिकृत्या**ङ्गीकृत्य **यद्** यस्माद् **एतद्धरा** अष्टादशशीलाङ्गसहस्रधराः **सूत्रे** प्रतिक्रमणाध्ययने **निर्दिष्टाः** कथिताः, **वन्दनीयास्तु** वन्दनीया एव ॥२४॥

कः पुनरेतदखण्डं कर्तुं शक्त इत्याह -

**ता संसारविरत्तो, अणंतमरणादिरूवमेयं तु ।**
**णाउं एयविउत्तं, मोक्खं च गुरूवएसेणं ॥६६९॥ १४/२५**

**परमगुरुणो य अणहे, आणाए गुणे तहेव दोसे य ।**
**मोक्खट्ठी पडिवज्जिय, भावेण इमं विसुद्धेणं ॥६७०॥ १४/२६**

**विहिताणुट्ठाणपरो, सत्तऽणुरूवमितरं पि संधंतो ।**
**अण्णत्थ अणुवओगा, खवयंतो कम्मदोसे वि ॥६७१॥ १४/२७**

**सव्वत्थ णिरभिसंगो, आणामेत्तंमि सव्वहा जुत्तो ।**
**एगग्गमणो धणियं, तम्मि तहाऽमूढलक्खो य ॥६७२॥ १४/२८**

**तह तइलपत्तिधारगणातगतो राहवेहगगतो वा ।**
**एयं चएइ काउं, न उ अण्णो खुद्दसत्तो त्ति ॥६७३॥ १४/२९**

तत्तस्मात् **संसारविरक्तो** भवविरक्तः, **अनन्तमरणादिरूपम्**, आदिशब्दाज्जन्मजरारोग-परिग्रहः । **एतं त** संसारं **ज्ञात्वा**, अवगम्य **एतद्वियुक्तं** मरणादिवियुक्तं **मोक्षं** चापवर्गं **च** । **गुरूपदेशेन** गुरुवचनकलापेन ज्ञात्वा ॥२५॥

**परमगुरोस्तीर्थकरस्य, अनघान्** निर्दोषान्, **आज्ञाया** वचनरूपाया **गुणान्** प्रतिपाद्यान्, **तथैव दोषांश्च** तत्प्रतिपाद्यानेव ज्ञात्वा, **मोक्षार्थी** मुक्त्यर्थी, **प्रतिपाद्या**भ्युपगम्य, प्रतिज्ञापूर्वकम्, **भावेनान्तःकरणेनेदं** शीलं **विशुद्धेन** विशुद्धिभाजा विशुद्धपरिणामेनेत्यर्थः ॥२६॥

**विहितानुष्ठानपरः** शास्त्रविहितसेवनपरः, **शक्त्यनुरूपं** यथाशक्ति, **इतरदपि** पूर्वप्रवृत्त-मप्यागमानुष्ठानं **सन्दधानो** भावप्रतिपत्त्या घटयन् **अन्यत्र** विहितानुष्ठानाद् **अनुपयोगा-दुपयोगाभावादन्यत्राध्यवसायमकुर्वन्नित्यर्थः** । विहितानुष्ठानोपयोगादेव **क्षपयन्निर्जरयन्** **कर्मदोषानपि** कर्मकृतविकारान् रागादीन् ॥२७॥

**सर्वत्र** द्रव्यक्षेत्रादौ, **निरभिष्वङ्गो**ऽप्रतिबद्धः, **आज्ञामात्रे** भगवत्सम्बन्धिनि, **सर्वथा** सर्वैः प्रकारैः **युक्त** उद्युक्तः उत्साहवान्, **एकाग्रमना** अनन्यचित्तः, **धनिकमत्यर्थं तस्मिन्** शीले **तथा** तेन चित्रोपयोगभेदेन, **अमूढलक्षश्चा**वन्ध्यध्येयश्च [अमूढः सुनिर्णयो, लक्षो बोधविशेषो यस्य सः अटी.] ॥२८॥

**तथा** अभ्युच्चये **तैलपात्रीधारकज्ञातगतो**ऽत्यन्ताप्रमत्तो, **राधावेधकगतो वा** तदेकदृष्टि च **एतच्छीलं शक्नोति कर्तुं** विधातुं **न त्वन्यः** पूर्वोक्तगुणविकलः । **क्षुद्रसत्त्व** इति कृपि(प)ण-सत्वः, प्रायोऽल्पाशय इति यावत् ॥२९॥

**एत्तो चिय निद्दिट्ठो, पुव्वायरिएहि भावसाहु त्ति ।**
**हंदि पमाणठियट्ठो, तं च पमाणं इमं होइ ॥६७४॥ १४/३०**

**अत एव** पूर्वोक्तहेतुकलापादेव, **निर्दिष्टः** कथितः, **पूर्वाचार्यैः** पूर्वसूरिभिः, [भद्रबाहुस्वामि प्रभृतिभिः, अटी.] **भावसाधुरिति** भावयतिः **हन्त प्रमाणस्थितार्थः** प्रमाणेन प्रतिज्ञादिपूर्वक-साधनवाक्येन स्थितः प्रतिष्ठितोऽर्थो अस्येति । **तच्च प्रमाणमिद भवति** साधनवाक्यम् ॥३०॥

**सत्थुत्तगुणो साहू, न सेस इति णे पइण्ण इह हेऊ ।**
**अगुणत्ता इति णेओ, दिट्ठंतो पुण सुवण्णं व ॥६७५॥ १४/३१**

**शास्त्रोक्तगुणः साधुर्न शेष इति इह नोऽस्माकं प्रतिज्ञा** विप्रतिषेधाभ्याम्, **इह हेतुरगुणत्वादिति ज्ञेयः**, सगुणत्वादिति विधावर्थाक्षिप्तो दृष्टव्यः । **दृष्टान्तः पुनर्युक्तिसुवर्णवत्**, सत्यसुवर्णवच्चेति विधौ ॥३१॥

सुवर्णगुणप्रतिपादनायाह –

**विसघाइ १ रसायण २ मंगलट्ठ ३ विणीए ४ पयाहिणावत्ते ५ ।**
**गरुए६ अडज्झ७ कुत्थे८, अट्ठ सुवण्णे गुणा होंति ॥६७६॥ १४/३२**

**विषघाति** विषं हन्तुं शीलमस्य **रसायनं** वयस्तम्भहेतुः, **मङ्गलार्थं** मङ्गलप्रयोजनम्, **विनयवद्विनीतम्**, मृदुत्वात् कार्यसौकर्योपपत्तेः । **प्रदक्षिणावर्तम**ग्निप्रतप्त–प्रनृत्यदवस्थं पूर्वादिदिग्विभागेन प्रत्यावर्तते, **गुरुकं** सारत्वाद् भारवत् । **अदाह्यमग्निना** शुद्धम्, ***'न दह्यतेऽग्नौ सुवर्णं न क्षीणम्'*** इति वचनात् । अविद्यमानकोथम् **अकोथनं** न शेषद्रव्यवत् कोथमुपैति, **अष्ट सुवर्णे गुणा भवन्ति** । तत्स्वरूपाव्यतिरेकवर्तिनः सदा तेषां तत्रोपलम्भात् ॥३२॥

साधुधर्मिण्यपि साधोः दृष्टान्तगतगुणसाम्यमाह –

**इय मोहविसं घायइ, सिवोवएसा रसायणं होति ।**
**गुणओ य मंगलट्ठं, कुणति विणीओ य जोग्गो त्ति ॥६७७॥ १४/३३**

**मग्गणुसारि पयाहिण, गंभीरो गरुयओ तहा होइ ।**
**कोहग्गिणा अडज्झो, अकुत्थो सइ सीलभावेण ॥६७८॥ १४/३४**

इत्येवं **मोहविषं** चेतनापरिहारकारित्वात्, **घातयति** विनाशयति, साधुः **शिवोपदेशान्मोक्षो**पदेशाद् **रसायनं भवति** । **गुणतश्च** ज्ञानादिगुणेभ्यः, **मङ्गलार्थं** मङ्गलप्रयोजनं **करोति**, **विनीतश्च योग्य इति** शिक्षादिसौकर्यात् ॥३३॥

**मार्गानुसारी** क्षयोपशमविशेषात् । **प्रदक्षिणो** भवत्युनुकूलो धर्मकार्येषु । **गम्भीरो** गम्भीराशयो, **गुरुकस्तथा भवति** सारत्वात् नार्कतूलादिवदनवस्थितः, लघुनो हि द्रव्यस्येतश्चेतश्च प्रेरणं संभवति, नेतरस्य । **क्रोधाग्निनाऽदाह्यः**, शुद्धस्वरूपत्वात् । **अकोथोऽ**पूतिभावः । **सदा शीलभावेन** सर्वदा चारित्रसद्भावेन ॥३४॥

**एवं दिट्ठंतगुणा, सज्झंमि वि एत्थ होंति णायव्वा ।**
**न हि साहम्माभावे, पायं जं होइ दिट्ठंतो ॥६७९॥ १४/३५**

**एवं दृष्टान्तगुणाः** सुवर्णगुणाः, **साध्येऽपि** साध्यधर्मोपलक्षितेऽपि धर्मिणि साधौ, **अत्राधिकारे भवन्ति ज्ञातव्या** विज्ञेयाः । **न हि** नैव **साधर्म्याभावे** समानधर्मताया अभावे सादृश्याभाव इत्यर्थः । **प्रायो** बाहुल्येन । **यद्** यस्माद् **भवति दृष्टान्तः**, साधर्म्याभावेन भवतीत्यर्थः । अतः दृष्टान्तधर्मिणो गुणतः साम्यमङ्गीकर्तव्यम् ॥३५॥

कीदृक् पुनः सुवर्णं दृष्टान्तत्वेनोपात्तं विषघातित्वादिगुणोपेतं भवतीत्याह -

**चउकारणपरिसुद्धं, कसछेयतावतालणाए य ।**
**जं तं विसघातिरसायणादिगुणसंजुयं होइ ॥६८०॥ १४/३६**

**चतुष्कारणपरिशुद्धं** चतुर्भिर्विशुद्धिकारणैः परिशुद्धिमागतैः **कषेण च्छेदेन तापेन ताडनया च यदवंविधं सुवर्णम्, तद्विषघाति-रसायनादिगुणसंयुतं भवति** नान्यत् ॥३६॥

दार्ष्टान्तिकः चतुष्कारणपरिशुद्धिमाह -

**इयरम्मि कसादीया, विसिट्ठलेसा तहेगसारत्तं ।**
**अवगारिणि अणुकंपा, वसणे अइणिच्चलं चित्तं ॥६८१॥ १४/३७**

**इतरस्मिन्** साधौ, **कषादिकाः** कषादयः [कषछेदतापताडनापरिशुद्ध्यः अटी.] **विशिष्टलेश्या** शुभलेश्या । **तथैकसारत्वं** क्रियाभावाश्रयणेनैकरूपत्वम्, **अपकारिण्य**पसर्गकारिणि **अनुकम्पा** न तु द्वेषः । **व्यसने** व्यस्यत्यपनयति श्रेयस्तदिति **व्यसनं**, चित्तविह्वलतापादनसमर्थम्, श्रेयोविघ्नहेतुः कार्यम्, बाह्यमाध्यात्मिकं वा, तस्मिन् **अतिनिश्चलम**तिनिष्प्रकम्पम्, **चित्तं** मनः । जात्यसुवर्णरेखातुल्या विशिष्टलेश्या सुवर्णैकसारत्वकल्पच्छेदः ( १ ) तापशुद्धिकल्पा ( २ ) अपकार्यनुकम्पा-स्वरुपाऽप्रच्युतिकल्पा ( ३ ) अचित्ततावस्था ताडनासमा चित्तनिश्चलता ( ४ ) ॥३७॥

अगुणत्वादित्यस्यार्थं विवृण्वन्नाह -

**तं कसिणगुणोवेयं, होइ सुवण्णं न सेसयं जुत्ती ।**
**न वि नाम रूवमेत्तेण एवमगुणो भवति साहू ॥६८२॥ १४/३८**

**तत्** सुवर्णं **कृत्स्नगुणोपेतं** सर्वगुणसमन्वितं **भवति सुवर्णं** व्यवहारानुपाति लोके, **न शेषकं** नान्यद् **युक्तिरिति** युक्तिसुवर्णम् । कषच्छेदतापायोग्यम् । **न** नैव **अपिशब्दो** भिन्नक्रमः । **नाम** इति सम्भावने **रूपमात्रेणापि** विषयमात्रेणापि **एवं** युक्तिसुवर्णवद् **अगुणो** निर्गुणोऽभिमत-

साधुगुणविकलो **भवति साधुः**, नैव भवतीति भावः ॥३८॥

**जुत्तीसुवण्णगं पुण, सुवण्णवण्णं तु जदिवि कीरेज्जा ।**
**न हु होति तं सुवण्णं, सेसेहिं गुणेहिऽसंतेहिं ॥६८३॥ १४/३९**

**युक्तिसुवर्णकं पुनः** त्रपुप्रभृतिद्रव्यान्तरमिश्रम्, **सुवर्णवर्णं तु** सुवर्णप्रतिच्छायं **पुनः यद्यपि क्रियते**, कथञ्चित् युक्तिज्ञेन । **न हु** नैव **भवति तद्** युक्तिसुवर्णं, **सुवर्णं** सत्यमेव न भवति । **शेषैर्**वर्णापेक्षया विषघातित्वादिभिः **गुणैरसद्भिर**विद्यमानैः ॥३९॥

**जे इह सुत्ते भणिया, साहुगुणा तेहिं होइ सो साहू ।**
**वण्णेणं जच्चसुवण्णगं व संते गुणणिहिम्मि ॥६८४॥ १४/४०**

**य इह सूत्रे** प्रमाणभूते **भणिताः** प्रतिपादिताः, **साधुगुणाः** प्रशमादयः **तैर्भवति स** प्रस्तुतः **साधुः वर्णेन** सतोपलक्षितं वा, **जात्यसुवर्णकमिव** जात्यकनकमिव, **सति** विद्यमाने **गुणनिधौ** गुणराशौ, विषघाति-रसायनादौ ॥४०॥

**जो साहू गुणरहिओ, भिक्खं हिंडेति न होति सो साहू ।**
**वण्णेणं जुत्तिसुवण्णगं वऽसंते गुणणिहिम्मि ॥६८५॥ १४/४१**

**यः साधुः गुणरहितः**, प्रशमादिविकलः, **भिक्षां हिण्डते** पर्यटति केवलमेव, **न भवति स साधुः** प्रस्तुतमोक्षकार्यासाधनत्वात् । **वर्णेन** पीतादिनोपलक्षितं **युक्तिसुवर्णकमिव** व्यवहारायोग्यम्, **असति गुणनिधा** गुणराशौ, यथा तत्सुवर्णं जात्यं न भवत्येवं साधुरपि ॥४१॥

**उद्दिट्ठकडं भुंजति, छक्कायपमद्दणो घरं कुणति ।**
**पच्चक्खं च जलगते, जो पियइ कहं नु सो साहू ? ॥६८६॥ १४/४२**

**उद्दिष्टकृतं** सामान्येनाधाकर्मादिदोषदुष्टम्, **भुङ्क्ते** समुपजीवति । **षट्कायप्रमर्दना** निष्कारणमेव तद्हिंसाप्रवृत्तोऽत्यन्तनिरपेक्षः, **गृहं** मदीयोपाश्रय इति बुद्ध्या **करोति**, तत्रात्यन्तप्रतिबद्धः, **प्रत्यक्षं च जलगतान्** पूतरकादीन् **यः पिबति, कथं नु** [स]**साधुर्भवति** नैवेति भावः ॥४२॥

**अण्णे उ कसादीया, किल एते एत्थ होंति णायव्वा ।**
**एताहिँ परिक्खाहिं, साहुपरिक्खेह कायव्वा ॥६८७॥ १४/४३**

**अन्ये तु** विद्वांसः, **कषादिकाः** कषादयः, **किलैत**द्गाथोक्ता उद्दिष्टकृतादयश्चत्वारः **अत्र** प्रस्तावे

**भवन्ति ज्ञातव्याः । एताभिः परीक्षाभिः साधुपरीक्षेह कर्तव्या** सुवर्णपरीक्षावत् ॥४३॥

साधनवाक्यनिगमनार्थमाह –

**तम्हा जे इह सुत्ते, साहुगुणा तेहिँ होइ सो साहू ।**
**अच्चंतसुपरिसुद्धेहिं मोक्खसिद्धि त्ति काऊण ॥६८८॥ १४/४४**

**तस्माद् य इह सूत्रे** पूर्वापराविरोधिनि तन्त्रयुक्तिगर्भे, **साधुगुणाः** प्रतिपादिताः, **तैर्गुणैर्भवति स** प्रस्तुतः **साधुः**, विशिष्टकार्यसाधनक्षमः । **अत्यन्तसुपरिशुद्धैः** अतिनिर्दोषैः, **मोक्षसिद्धिरिति कृत्वा,** न पुनरगुणस्थितः, प्रद्वेषनिबन्धनमिदमुच्यते निर्गुणः साधुर्न भवतीति भावसामायिक-क्षतिप्रसङ्गाद्, येषामेव तु साधुगुणानां प्रत्यासत्त्या मोक्षकारणत्वम्, तेषामेव तदितरनिरासेन तद् व्यवस्थाप्यते, न ह्यकारणमेव स्वरूपतः कार्यं जनयितुमलम् । येषां तु साधुगुणानां मोक्षं प्रत्यबन्धहेतुत्वम्, तेषामेवेहोपदेशः प्रस्तुत इत्यनवद्यम् ॥४४॥

उपसञ्जिहीर्षुराह –

**अलमेत्थ पसंगेणं, सीलंगाइं हवंति एमेव ।**
**भावसमणाण सम्मं, अखंडचारित्तजुत्ताणं ॥६८९॥ १४/४५**

**अलमत्र प्रसङ्गेन** पर्याप्तं विस्तरेण, **शीलाङ्गानि भवन्त्येवमेव** भावतः परस्परसापेक्षाणि । न ह्येकं बहूनि वा भावविरतिमन्तरेण सम्भवतीति भावः । **भावश्रमणानां** भावसाधूनाम्, **सम्यग**वैपरीत्येन **अखण्डचारित्रयुक्तानां** सकलचारित्रभाजाम् ॥४५॥

**इय सीलंगजुया खलु, दुक्खंतकरा जिणेहिँ पण्णत्ता ।**
**भावपहाणा साहू, ण तु अण्णे दव्वलिंगधरा ॥६९०॥ १४/४६**

**इत्येवमुक्तनीत्या** शीलाङ्गयुताः खलु **शीलाङ्गयुता एव** । दुःखान्तकरा **दुःखान्त-करणशीला,** जिनै**र्भगवद्भिः** प्रज्ञप्ताः **कथिताः**, भावप्रधानाः साधवो न त्वन्ये [द्रव्यलिङ्गधरा] लिङ्गद्रव्यधरा भावनिरपेक्षास्तेषां प्रस्तुतकार्यासाधकत्वात् । न पुनस्ते [द्रव्यलिङ्गिनः] भावसाधूनां द्वेषविषयाः, सर्वजीवानां स्वकर्मसामर्थ्योपपत्तेः, बलवद्धि कर्म तदन्यथाप्रवृत्तिं जनयति । उक्तं च –

*अन्यथा शास्त्रगर्भिण्या, धिया धीरोऽर्थमीहते ।*
*स्वामीव बलवत् कर्म, विदधाति तमन्यथा ॥[ ] ॥४६॥*

भावप्रधानाः साधवः इत्युक्तम्, अत्र भावार्थमाह -

**संपुण्णा वि य किरिया, भावेण विणा न होति किरिय त्ति ।**
**णियफलविगलत्तणओ, गेवेज्जुववायणाएणं ॥६९१॥ १४/४७**

**सम्पूर्णाऽपि च क्रिया** प्राणातिपातादिविरतिरूपा **भावेन** सम्यक्त्वादिना **विना न भवति क्रियेति निजफलविकलत्वात्। ग्रैवेयकोपपातज्ञातेन** ग्रैवेयकोपपातोदाहरणेन ॥४७॥

**आणोहेणाणंता, मुक्का गेवेज्जगेसु उ सरीरा ।**
**न य तत्थासंपुण्णाएँ साहुकिरियाएँ उववाओ ॥६९२॥ १४/४८**

**आज्ञा** भागवती **ओघेन** सामान्येन **अनन्तानि**, अनन्तसंख्यानि समयप्रसिद्धानि। **मुक्तानि** (जीवैः अटी.) अतीतकाले **ग्रैवेयकेषु तु** लोकपुरुषग्रीवाभरणस्थानीयविमानेषु पुनः, **शरीराण्य**प्येकैकजीवेन देवभवसम्बन्धिवैक्रियाणि, **न च तत्र** तेषु ग्रैवेयकेषु, **असम्पूर्णया** खण्डरूपया, **साधुक्रियया, उपपातो** जन्म ॥४८॥

**ता णंतसोऽवि पत्ता, एसा न उ दंसणं पि सिद्धं ति ।**
**एवमसग्गहजुत्ता, एसा न बुहाण इट्ठ त्ति ॥६९३॥ १४/४९**

**तत्** तस्माद् **अनन्तवारानपि प्राप्तैषा** सम्पूर्णक्रिया, न तु **दर्शनमपि** सम्यक्त्वमपि, **सिद्धमिति** निष्पन्नं न सञ्जातमिति भावः। **एवमुक्तनीत्या असद्ग्रहयुक्ता**ऽसदभिनिवेशसमन्विता **एषा** क्रिया। **न** नैव **बुधानां** विदुषाम् **इष्टे**त्यभिमता। तस्माद् भावसहितैव क्रियेष्टफलसाधिका ॥४९॥

**इय णियबुद्धीएँ इमं, आलोएऊण एत्थ जइयव्वं ।**
**अच्चंतभावसारं, भवविरहत्थं महजणेणं ॥६९४॥ १४/५०**

**इति** प्रागुक्तन्यायेन **निजबुद्ध्या**ऽऽत्मीयधियाऽविपर्यस्तया, **इद**मिष्टफलसाधकत्वम् **आलोच्य** निरुप्य, **अत्र** क्रियायां प्रतिपत्तव्यम् **यतितव्यं** प्रयत्नः करणीयः, **अत्यन्तभावसार**मतिशयभावप्रधानं यथा भवत्येवं क्रियाविशेषणमेतत् ॥ **भवविरहार्थं** मुक्तिनिमित्तं **महाजनेन** साधुजनेन ॥५०॥

**॥ शीलाङ्गविधि-पञ्चाशकं चतुर्दशं समाप्तम् ॥**

# ॥ पञ्चदशं आलोचनाविधि-पञ्चाशकम् ॥

शीलाङ्गविधिप्रतिपादनानन्तरं तद्विशुद्धये, शास्त्रदृष्टमालोचनामाह –

**नमिऊण तिलोगगुरुं, वीरं सम्मं समासओ वोच्छं ।**
**आलोयणाविहाणं, जतीण सुत्ताणुसारेणं ॥६९५॥ १५/१**

**नमस्कृत्य** नत्वा **त्रिलोकगुरुं** लोकत्रयपूज्यं **वीर** कषायादिशत्रुपराक्रमवन्तं **सम्यक्** न्यायेन भावक्रियाविशुद्धिलक्षणेन **समासतः** सङ्क्षेपेण **वक्ष्ये** प्रतिपादयिष्यामि, **आलोचनाविधान** आलोचनाविषयकर्तव्योपदेशम् **यतीनां** साधूनां **सूत्रानुसारेणा**गमानुसारेण ॥१॥

**आलोयणं अकिच्चे, अभिविहिणा दंसणं ति लिंगेहिं ।**
**वइमादिएहि सम्मं, गुरुणो आलोयणा णेया ॥६९६॥ १५/२**

**आलोचनमकृत्ये** यतीनामविधेये, विषयभूते, **अभिविधिना**ऽभिव्याप्त्या, **दर्शनं** प्रकटनम्, तद् एतदात्मन इति गम्यते । **इति**शब्दो भिन्नक्रमः, पुरस्ताद् योजनीयः । **लिङ्गै**र्लक्षणैः **वागादिकैः** वाक्कायाकारविशेषैः, **सम्यग**विपरीतं **गुरो**राचार्यस्य पादमूल इति सामर्थ्यम् **आलोचना इति विज्ञेया** प्रस्तुतशब्दार्थभावेन ॥२॥

नन्वकृत्ये समासेविते यत्कर्म बद्धम्, तद्बद्धमेवानुभवनीयं च, कः पुनरालोचनया गुण इत्याशङ्क्याह –

**आसेविते विऽकिच्चेऽणाभोगादीहिं होति संवेगा ।**
**अणुतावो तत्तो खलु, एसा सफला मुणेयव्वा ॥६९७॥ १५/३**

**आसेवितेऽप्यकृत्ये** समाचरितेऽप्यविधेये, **अनाभोगादिभि**रज्ञातकर्मदोषसामग्रीवैकल्यादि-भिः **भवति** जायत । **संवेगात्** संसारभयाद् **अनुतापः** पश्चात्तापस्ततोऽनुतापात्, **खल्वेषा**ऽऽलोचना **सफला** फलवती **मन्तव्या** विज्ञेया, नापार्थिका ॥३॥

भावार्थमाह –

**जह संकिलेसतो इह, बंधो वोदाणओ तहा विगमो ।**
**तं पुण इमीइ नियमा, विहिणा सइ सुप्पउत्ताए ॥६९८॥ १५/४**

**यथा सङ्क्लेशतः** संङ्क्लेशाच्चित्ताऽविशुद्धिलक्षणात्, **इह** प्रवचने **बन्धो** ज्ञानावरणादि-

कर्मभिर्जीवस्य **व्यवदानतश्चित्तविशुद्धेः तथा विगमो** बन्धापगमः । **तत्** पुनर्व्यवदानं चित्तविशुद्धिलक्षणम्, **अनया**ऽऽलोचनया, **नियमा**न्नियमेन, **विधिना**ऽऽगमोक्तेन, **सदा** सर्वकालं **सुप्रयुक्तया** सम्भवति । तस्माद्विधेया गुणवत्त्वादालोचनेति भावः ॥४॥

सुप्रयुक्तालोचना तावदुक्ता, तद् व्यतिरेकमाह –

**इहरा विवज्जओऽवि हु, कुवेज्जकिरियादिणायतो णेओ ।**
**अवि होज्ज तत्थ सिद्धी, आणाभंगा न पुण एत्थ ॥६९९॥ १५/५**

**इतरथा**ऽन्यथा, **विपर्ययोऽपि** विपर्यासोऽपि । हुर्वाक्यालङ्कारे । **कुवैद्यक्रियादिज्ञाततो ज्ञेयो**, यथा कुवैद्योपदेशाच्चिकित्सा नेष्टसिद्धये, प्रत्युतानर्थाय, आदिशब्दादसिद्धविद्यादसिद्ध-मन्त्राच्च गुरोः, विद्यामन्त्रसाधनपरिग्रहः । **अपिः** सम्भावने, अपि नाम **भवेत्, तत्र** कुवैद्यक्रियादौ **सिद्धि**रिष्टफलनिष्पत्तिः स्वपुण्यसामर्थ्यात्, **आज्ञाभङ्गात्** सर्वज्ञाज्ञाविराधनाद् **न पुनरत्र** दुष्प्रयुक्तालोचनायाम् ॥५॥

एतदेव व्यनक्ति –

**तित्थगराणं आणा, सम्मं विहिणा उ होइ कायव्वा ।**
**तस्सऽण्णहा उ करणे, मोहादतिसंकिलेसो त्ति ॥७००॥ १५/६**

**बंधो य संकिलेसा ततो न सोऽवेति तिव्वतरगाओ ।**
**ईसिमलिणं न वत्थं सुज्झइ नीलीरसादीहिं ॥७०१॥ १५/७ जुम्मं ।**

**तीर्थकराणामाज्ञा सम्यग्विधिना तु** विधिनैव **भवति कर्तव्या** । **तस्या** आज्ञाया **अन्यथा** त्वन्यथैव **करणे** निर्वर्तते [ने] **मोहाद्** विपर्यासाद् **अतिसङ्क्लेश** इति, अतिसङ्क्लिष्टाध्यवसायः ॥६॥

**बन्धश्च** कर्मबन्धश्च **सङ्क्लेशाद्** अशुद्धाध्यवसायात् **ततः** सङ्क्लेशात् **न स बन्धः अपैत्य**पगच्छति । **तीव्रतरकाद्** अतिशयतीव्रात् । अत्रैव दृष्टान्तमाह-**ईषन्मलिनं** मलसम्पृक्तम्, **न** नैव **वस्त्र**माच्छादनम्, **शुद्ध्यति** शुद्धिमनुभवति, **नीलीरसादि**भिरूपरागसम्पादन-समर्थद्रव्यविशेषैः ॥७॥

**एत्थं पुन एस विही, अरिहो अरिहंमि दलयति कमेणं ।**
**आसेवणादिणा खलु, सम्मं दव्वादिसुद्धीए ॥७०२॥ १५/८ दारगाहा ।**

अत्र आलोचनायां **पुनरेष विधिर्वक्ष्यमाणः, अर्हो** योग्यो, **अर्हे** योग्ये गुरौ, **ददाति** प्रयच्छति **क्रमेणा**नुपूर्व्या, **आसेवनादिना, खलु** वक्ष्यमाणेन **सम्यग् द्रव्यादिशुद्ध्या** । यदैतेऽनुगुणास्तदालोचना विधेया प्रशस्तत्वादस्य वस्तुनः ॥८॥

**कालो पुण एतीए, पक्खादी वण्णितो जिणिंदेहिं ।**
**पायं विसिट्ठगाए, पुव्वायरिया तथा चाहू ॥७०३॥ १५/९**

**कालो**ऽवसरः । **पुनरेतस्या** आलोचनायाः **पक्षादिः** पक्ष-चतुर्मासादिः **वर्णित** उक्तः, **जिनेन्द्रै**र्भगवद्भिः **प्रायो** बाहुल्येन, **विशिष्टकाया** विशिष्टाया यतमानपुरुषविषयत्वेन, **पूर्वाचार्याः** पूर्वसूरयः **तथा चाहु**र्ब्रुवते ॥९॥

**पक्खियचाउम्मासे, आलोयण नियमसा उ दायव्वा ।**
**गहणं अभिग्गहाण य, पुव्वग्गहिए निवेएउं ॥७०४॥ १५/१०**

**पाक्षिकचातुर्मास्ये** मासे। ***स्वार्थे स्यञ्*** [ ] पाक्षिकचातुर्मासिकयोरित्यर्थः। **आलोचना** विकटना। **नियमात्तु** नियमेन, **दातव्या** विधेया ['आलोयण' ह्रस्वत्वं प्राकृतत्वात्, 'नियमसा' सकारस्य प्राकृतत्वात् अटी.] । **ग्रहणम**भिनवानाम् **अभिग्रहाणां च** दण्डकप्रमार्जनादीनाम्। **पूर्वगृहीतान**विराधनया परिसमाधितान्, **निवेद्य** कथयित्वा गुरुभ्यः । अपरस्यास्तु प्रमादगर्भायाः प्रमादरहिताया अपि च, विशिष्टदेशकालान्तरिततथाविधगीतार्थोपसम्पत्त्याः, आगमोक्तनीत्या, अन्योऽपि समयः सम्भवतीत्यवसेयम् ॥१०॥

किं पुनः पक्षादावभिमतेयमित्याह –

**जीयमिणं आणाओ, जयमाणस्स वि य दोससब्भावा ।**
**पम्हुसणपमायातो, जलकुंभमलादिणाएणं ॥७०५॥ १५/११**

**जीतमिदम्** आचरितमिदं, चिरन्तनकल्प इत्यर्थः । **आज्ञात** आगमात् **यतमानस्यापि** चात्यन्ताप्रमत्तस्यापि च, छद्मस्थस्य **दोषसद्भावा**दपराधसम्भवात् । प्रभ्रष्टं स्मरणं स्मरणाद्वा भ्रष्टं **प्रस्मरणं** विस्मरणमित्यर्थः । कदाचिद्विस्मृते **प्रमादात्** क्वचिदवसरे, यतमानस्यापि प्रमादसम्भवात् । प्रमत्तऽप्रमत्तगुणस्थानयोः परावर्तमानयोरन्तर्मुहूर्तमात्रत्वात् । जलकुम्भमलादिज्ञातेन **जलाधार-कुम्भो**ऽरञ्जरः, तस्मिन् **मलः, आदिशब्दाद्** घटोदञ्चनगृहकचवरादिपरिग्रहः, तज्**ज्ञातेन** तदुदाहरणेन, यथा जलकुम्भे प्रतिदिनं प्रक्षालितेऽपि कश्चिन्मलः सम्भवति, यः पक्षान्ते विशोध्यते, एवं गृहादिष्वपि, तथा प्रतिदिनं दैवसिकादिदोषशुद्धावपि पक्षान्ते पुनर्विशुद्धिरिष्यते ॥११॥

अर्हम् इत्युक्तं प्राक्, तदुपदर्शनायाह -

**संविग्गो उ अमाई, मइमं कप्पट्ठिओ अणासंसी ।**
**पण्णवणिज्जो सद्धो, आणाइत्तो दुकडतावी ॥७०६॥ १५/१२**

**तव्विहिसमुस्सुगो खलु, अभिग्गहासेवणादिलिंगजुतो ।**
**आलोयणापयाणे, जोग्गो भणितो जिणिंदेहिं ॥७०७॥ १५/१३ जुम्मं ।**

**संविग्नस्तु** संसारभीरुरेव, **अमायी** मायारहित: स्वस्थाशय:, **मतिमान्** बुद्धिसम्पन्न:, **कल्पस्थित:** स्थविरजातसमासकल्पादिस्थित: । **अनाशंसी** निराशंस: सांसारिकफलनिरपेक्ष:, **प्रज्ञापनीय:** सुखावबोधनीय:, **श्राद्ध:** श्रद्धासमन्वित: । **आज्ञा**गम:, तेन वित्त: प्रतीत:, **आज्ञावित्त:**, तदनुसारी **दुष्कृततापी** दुर्विहितपश्चात्तापी ॥१२॥

**तद्विधिसमुत्सुक: खलु**, आलोचनाविध्यभिलाषातिरेकसम्पन्न: । **अभिग्रहासेवनादि-लिङ्गयुत:** अभिग्रहसमाचरणाराधननिर्वाहादिलिङ्गयुक्त: । **आलोचनाप्रदाने** वितरणे **योग्य:** साधु: **भणित** उक्त: **जिनेन्द्रै**र्भगवद्भि: ॥१३॥

'अर्हे गुरौ ददाती'त्युक्तं, तमाह -

**आयारवमोहारव, ववहारोवीलए पकुव्वी य ।**
**निज्जव अवायदंसी, अपरिस्सावी य बोद्धव्वो ॥७०८॥ १५/१४**

आचारोऽस्यास्तीति **आचारवान्** पञ्चविधाचारव्यवस्थित:, त्रिकमपराधजातं साधूनामवधारयतीति, **आधारवान**वधारणाशक्तिसम्पन्न इत्यर्थ: । **व्यवहारवान्** व्यवहार: आगम-श्रुताज्ञाधारणाजीताख्यपञ्चविधव्यवहारज्ञ: । स्वदोषप्रच्छादनपरमपि सत्त्वमाह्लाद्यवचनामृतैरवपीडयति निष्कर्षयति दोषजातं तस्मादिति **अवपीडक:** । **प्रकारयिता च** प्रायश्चित्तमागतं साधौ: प्रकर्तुं सहायवृत्त्याऽऽरम्भयतीति प्रकारी प्रकारक इत्यर्थ: । **निर्यामक:** साधुप्रायश्चित्तस्य निर्वाहक:, तथा विधत्ते यथा साधवस्तन्निर्वहन्ति ऐहलौकिक-पारलौकिकापायान्, प्रायश्चित्ताकरणे दर्शयितुं शीलमस्येति **अपायदर्शी** सत्त्वविशुद्धिकरण इत्यर्थ: । परिश्राव: परिगलनं भिन्नभाजनस्येव, स नास्यास्तीति **अपरिश्रावी**, य: परोक्तमन्यस्मै न कथयति सोऽपरिश्रावी [**च:** समुच्चये, अटी.] **बोद्धव्य:** अवगन्तव्य: ॥१४॥

**तह परहियम्मि जुत्तो, विसेसओ सुहुमभावकुसलमती ।**
**भावाणुमाणवं तह, जोग्गो आलोयणायरिओ ॥७०९॥ १५/१५**

**तथा परहिते युक्तः** तत्सम्पादनोत्साहवान्, **विशेषतो** विशेषेण, सूक्ष्मभावा बन्धमोक्षादयः, तेषु कुशलमतिर्निपुणबुद्धिः **सूक्ष्मभावकुशलमतिः**, भावो जीवाध्यवसायस्तद्विषयमनुमानं पराभिप्राय-परिच्छेदात्मकमविसंवादिप्रमाणं तद्विद्यतेऽस्येति **भावानुमानवान्, तथा योग्य** उचितः **आलोचनाचाय** आलोचनागुरुः ॥१५॥

'क्रमेण' इत्युक्तम् तत्प्रकाशनायाह –

**दुविहेणऽणुलोमेणं, आसेवणवियडणाभिहाणेणं ।**
**आसेवणाणुलोमं, जं जह आसेवियं वियडे ॥७१०॥ १५/१६**

**आलोयणाणुलोमं, गुरुगऽवराहे उ पच्छओ वियडे ।**
**पणगादिणा कमेणं, जह जह पच्छित्तवुड्ढी उ ॥७११॥ १५/१७**

**द्विविधेन** द्विप्रकारेण, **अनुलोमेनानुकूलेन**, क्रमेणेति वक्ष्यति, तस्य विशेषणमिदम्, **आसेवनविकटनाभिधानेना**सेवनाऽऽलोचना नाम्ना क्रमेण **आसेवनानुलोमम्**, स्वरूपतः कीदृक्? **यद् यथाऽऽसेवितं** समाचरितं **विकटयति** गुरु लघु वा ॥१६॥

**आलोचनानुलोमं** पुनः कीदृशं स्वरूपतः **गुरुकापराधास्तु** गुरुतरप्रायश्चित्तयोग्यदोषान् । **पश्चादुत्तरकालं विकटयति** प्रकटयति, गुरोः प्रकाशयतीत्यर्थः । **पञ्चकादिना** लघुगुरुप्रायश्चित्तभाजा, **क्रमेणानुपूर्व्येण, यथा यथा प्रायश्चित्तवृद्धिस्तु** पंचरात्रादेरारभ्य ॥१७॥

**तह आउट्टियदप्पप्पमायओ कप्पओ [१]वऽजयणाए ।**
**कज्जे वा जयणाए, जहट्ठियं सव्वमालोए ॥७१२॥ १५/१८**

**तथा** आकुट्टिका-दर्प-प्रमादतः **आकुटिको**पेत्यकरणम्, **दर्पो** वल्गनादिः, **प्रमादः** पञ्चविधो मद्यादिः, तेभ्यः । **कल्प** आचारस्ततो, **वाऽयतनया**ऽप्रयत्नेन, यदासेवितमिति गम्यते । **कार्ये वा** पुष्टालम्बने कल्पान्तर्गते **यतनया** प्रयत्नेन, **यथास्थितं** यद् यथावस्थितं सत्यमित्यर्थः । **सर्वमालोचयति** विशुद्धिकामः ॥१८॥ (१. व जयणाए कज्जे वाऽजयणाए-अटी.)

द्रव्यादिशुद्धीए[१५-८]इत्युक्तम्, तदुपदर्शनायाह –

**दव्वादीसु सुहेसुं, देया आलोयणा जतो तेसुं ।**
**होति सुहभाववुड्ढी, पाएण सुहा उ सुहहेऊ ॥७१३॥ १५/१९**

**द्रव्यादिषु** द्रव्यक्षेत्रभावकालेषु **शुभेष्वनुकूलेषु, देया** दातव्या । **आलोचना** स्वापराध-प्रकाशना, **यतस्तेषु** शुभद्रव्यादिषु **भवति शुभभाववृद्धिः** कुशलाध्यवसायसमृद्धिः । **प्रायेण**

**शुभा तु** शुभैव, स्वरूपेण **शुभहेतुः**, भाविनश्च शुभस्याऽवन्ध्यकारणं सङ्क्लेशनिवृत्त्यात्मकत्वात् पुण्यानुबन्धिपुण्यहेतुत्वाच्च ॥१९॥

शुभद्रव्यादीनेव व्याचष्टे -

**दव्वे खीरदुमादी, जिणभवणादी य होइ खेत्तम्मि ।**
**पुण्णतिहिपभिति काले, सुहोवओगादि भावे उ ॥७१४॥ १५/२०**

**द्रव्ये** द्रव्यविषया, विशुद्धिरिति प्रस्तावाद् गम्यते, **क्षीरद्रुमादिः**, आदिशब्दादशोकचम्पकादिपरिग्रहः । **जिनभवनादिश्च भवति, क्षेत्रे** क्षेत्रविषया, आदिशब्दादिक्षुशालिक्षेत्रादिपरिग्रहः । **पूर्णा तिथिप्रभृतिः** शुक्लपञ्चम्यादिः **काले** कालविषया विशुद्धिः । **शुभोपयोगः** शुभाध्यवसायः, **आदि**शब्दान्निमित्तशास्त्रगतशुभभावपरिग्रहः । **भावे तु** भावविषया विशुद्धिः ॥२०॥

**सुहदव्वादिसमुदए, पायं जं होइ भावसुद्धि त्ति ।**
**ता एयम्मि जएज्जा, एसा आणा जिणवराणं ॥७१५॥ १५/२१**

**शुभद्रव्यादिसमुदये** शुभद्रव्यक्षेत्रकालभावमेलके, **प्रायो** बाहुल्येन **यद्** यस्माद्, **भवति** जायते, **भावशुद्धिरितिकृत्वा, तत्तस्माद् एतस्मिन्** द्रव्यादौ समुदये **यतेत** यत्नं कुर्वीत, **एषा आज्ञा जिनवराणां** भगवताम् ॥२१॥

आलोचनादिविधिरुक्तोऽधुनाऽऽलोचयितव्याऽपराधानाह -

**आलोएतव्वा पुण, अइयारा सुहुमबायरा सम्मं ।**
**नाणायारादिगया, पंचविहो सो य विण्णेओ ॥७१६॥ १५/२२**

**आलोचयितव्याः** प्रकाशनीयाः, **पुनरतिचारा** अपराधाः, **सूक्ष्मबादराः** सूत्रोक्ताः, **सम्यङ्** न्यायेन, **ज्ञानाचारादिगताः** ज्ञानदर्शनचारित्रतपोवीर्यविषयाः, **पञ्चविधः** पञ्चधा **स च** आचारः, **विज्ञेयो**ऽवबोद्धव्यः ॥२२॥

ज्ञानाचारभेदानाह -

**काले विणए बहुमाणे उवहाणे तहा अनिण्हवणे ।**
**वंजणअत्थतदुभए, अट्ठविहो नाणमायारो ॥७१७॥ १५/२३**

**काले** [प्रथमैकवचनान्तत्वाद् वा काल एव ज्ञानाचारः - अटी.] कालविषयोऽकालस्वाध्यायपरिहारेण, **विनये** विनयविषयः । ज्ञानस्य ज्ञानिनां ज्ञानसाधनानां चाविनयत्यागेन, **बहुमाने** बहुमानविषयः, तेषामेवाभ्यन्तरसङ्क्लेशवर्जने, **उपधाने** उपधानविषयः, यथास्वमध्ययनादिषु

तपःकर्मासेवनेन, अन्यथा श्रुताऽऽशातनोपपत्तेः । यथोक्तम् -

*जं केवलिणा भणियं, केवलणाणेण तत्तओ नाउं ।*

*तस्सऽण्णहाविहाणे, आणाभंगो महापावो ॥ [ पंचवत्थुगं गाथा-५९० ]*

**तथा अनिह्नवने**ऽनिह्नवविषयः, सूत्रार्थोभयस्य गुर्वनपह्नवेन । तदपलापे तदुपपत्तेः, **व्यञ्जने** व्यञ्जनविषयः, यथादिष्टं सूत्रादिषु तदन्यप्रक्षेपाद्यभावेन, **अर्थः** अर्थविषयस्तदभिधेयान्यथात्वाऽकरणेन, **तदुभये** तदुभयविषयः, उभयस्मिन्नप्येककालमन्यथात्वपरिहारेण, इतरथा तदविसंवादोपपत्तेः, **अष्टविधो**ऽष्टभेदो **ज्ञानाचारः** [णाणमायारो 'ज्ञानं...आचारः ज्ञानाचारः,' मकारस्यागमिकत्वात् - अटी.] समयप्रसिद्धः ॥२३॥

सम्यग्दर्शनतद्धेतोरभेदोपचाराद्दर्शनाचारभेदानाह -

**निस्संकिय निक्कंखिय, निव्वितिगिच्छा अमूढदिट्ठी य ।**
**उववूहथिरीकरणे, वच्छल्लपभावणे अट्ठ ॥७१८॥ १५/२४**

शङ्कितं शङ्का, ततो निर्गतो **निःशङ्कितम्,** काङ्क्षितम् काङ्क्षा ततो निर्गतो, **निष्काङ्क्षितो** भावप्रधानत्वाद्वा निर्देशस्य निःशङ्कितत्वं निष्काङ्क्षितत्वं इत्येवं ज्ञेयम् । विचिकित्सा फलं प्रति विश्रोतसिका, 'किमस्य क्लेशायासस्यामुत्र मे फलं स्यात्', इत्येवंरुपा, ततो निर्गता चित्तपरिणति **निर्विचिकित्सा, अमूढदृष्टिश्च,** [अमूढा दृष्टि र्यस्य सः] विशेषणसमासाङ्गीकरणे वा-अमूढा चासौ दृष्टिश्चेति, **उपबृंहणं** प्रशस्तसद्भूतगुणोत्कीर्तनेन परिणामवृद्ध्याऽऽपादनम्, **स्थिरीकरणं** प्रमादपरसत्त्वानुष्ठानदर्शनाद्धर्मशैथिल्यवतः, पुनरपि स्वप्रकृत्यापादनमिदं च धर्मानुरक्तमतेरवसेयम् । **वात्सल्यं** साधर्मिकस्नेहव्यापारदर्शनम् । स्वशरीरोपरोधेनापि तत्प्रयोजनप्रवृत्तिस्तथा चान्नपानौषधादिसम्पादनम्, विदधतो यतन्त एव यतयः, केनचित् धर्मस्थितेन शासनमालिन्यापादने कृते अकृते वा स्वगुणैरन्यदोषतिरस्कारेण प्रवचनप्रकाशनं **प्रभावनम्,** एते **अष्ट** दर्शनाचाराः ॥२४॥

साम्प्रतं चारित्राचारभेदानाह -

**पणिहाणजोगजुत्तो, पंचहिं समितीहिं तीहिं गुत्तीहिं ।**
**एस चरित्तायारो, अट्ठविहो होइ णायव्वो ॥७१९॥ १५/२५**

**प्रणिधानं** मनस एकग्र्यं शुभविषयम्, तदेव **योगो** धर्मव्यापारः, तेन **युक्तः**, अथवा **योगश्चित्तवृत्तिनिरोधः**, उचितानुष्ठानं वा, प्रणिधानं च योगश्च ताभ्यां **युक्तः** । **पञ्चभिः समितिभिरीर्या**-भाषा-ऽन्वेषण-निक्षेपा-ऽऽदान-विसर्गरूपाभिः, **तिसृभिश्चगुप्तिभिर्मनो**-वाक्-काय-रक्षारूपाभिरुपलक्षित **एष चारित्राचारो ऽष्टविधो भवति ज्ञातव्यो**ऽवसेयः ॥२५॥

साम्प्रतं सामान्येन तपआचारभेदनिर्दिदिक्षया तत्स्वरूपमेवाभिधित्सुराह -

**बारसविहम्मि वि तवे, साब्भिंतरबाहिरे कुसलदिट्ठे ।**
**अगिलाएँ अणाजीवी, णायव्वो सो तवायारो ॥७२०॥ १५/२६**

**द्वादशविधेऽपि तपसि साभ्यन्तर-बाह्ये** प्रायश्चित्त-विनय-वैयावृत्त्य-स्वाध्याय-व्युत्सर्ग-ध्याना-ऽनशनाऽवमौदर्य-वृत्तिसङ्ख्यान-रसपरित्याग-कायक्लेश-संलीनतालक्षणे, **कुशलदृष्टे** कुशलमतिकथिते, **अग्लान्या** तपसाऽपराजयेन, **अनाजीव्य**नाजीवको, न तदेव तप उपजीवति, **ज्ञातव्यः स** एवंविध**स्तपाचारः** तपस्तद्वतोरभेदोपचारात् ॥२६॥

वीर्याचारस्वरूपप्रतिपादनायाह -

**अणिगूहियबलविरिओ, परक्कमइ जो जहुत्तमाउत्तो ।**
**जुंजइ य जहत्थामं, णायव्वो वीरियायारो ॥७२१॥ १५/२७**

**बलं** मांसशोणितोपचयसमुत्थम्, **वीर्यं** वीर्यान्तरायक्षयोपशमजनितं, बलं च वीर्यं च बलवीर्ये, **अनिगूढ**ऽप्रच्छादिते बल-वीर्ये येन स (अनिगूहितबल-वीर्यः) तथा, **पराक्रमते** समुत्सहते, **यः** पुरुषः, **यथोक्तं** यथाऽऽगमम्, **आयुक्त** उपयुक्तः । **युङ्क्ते च** प्रयुङ्क्ते च **यथास्थामं** यथाबलम्, धर्मव्यापारमिति गम्यते, **ज्ञातव्या** विज्ञेयो **वीर्याचारः** । आचारस्तद्वतोरभेदात् ॥२७॥

**एयम्मि उ अइयारा, अकालपढणाइया णिरवसेसा ।**
**अपुणकरणुज्जएणं, संवेगाऽऽलोइयव्व त्ति ॥७२२॥ १५/२८**

**एतस्मिन्** पञ्चविधाचारे, **अतिचारा** अपराधविशेषाः, **अकाले पठनादिकाः, आदि-**ग्रहणादविनया-ऽबहुमानादिपरिग्रहः । **निरवशेषाः** सर्वे **अपुनःकरणोद्यतेन** भावतोऽ-पुनःकरणपरिणामवता, अचिन्त्यकर्मसामर्थ्यात् त्वन्यथापि प्रवृत्तिः कदाचित् सम्भवति । **संवेगात्** संसारभयाद्, **आलोचयितव्या इति** प्रकाशनीयाः ॥२८॥

**अहवा मूलगुणाणं, एते एवं तहुत्तरगुणाणं ।**
**एएसिमह सरूवं, पत्तेयं संपवक्खामि ॥७२३॥ १५/२९**

**अथवा मूलगुणानामेते** अतिचारा एते **एवं** स्वरूपाः, **तथोत्तरगुणानां एतेषां** मूलोत्तरगुणानाम् **अथ स्वरूपं** स्वलक्षणं **प्रत्येकं** भेदेन, **सम्प्रवक्ष्यामि** विधास्यामि ॥२९॥

**पाणातिपातविरमणमादी निसिभत्तविरइपज्जंता ।**
**समणाणं मूलगुणा, तिविहं तिविहेण णायव्वा ॥७२४॥ १५/३०**

**प्राणातिपातविरमणादयो निशिभक्तविरतिपर्यन्ता** रात्रिभक्तविरतिपर्यवसानाः, **श्रमणानां** साधूनां **मूलगुणा** आदिगुणाः **त्रिविधं त्रिविधेन ज्ञातव्याः** कृतकारितानुमति-मनोवाक्कायरूपेण विज्ञेयाः ॥३०॥

**पिंडविसुद्धादीया, अभिग्गहंता य उत्तरगुण त्ति ।**
**एतेसिं अइयारा, एगिंदियघट्टणादीया ॥७२५॥ १५/३१**

**पिण्डविशुद्ध्यादिकाः** पिण्डविशुद्धि-समिति-भावना-प्रतिमादयः **अभिग्रहान्ता-श्चोत्तरगुणा इति** तत्पालनहेतवः । **एतेषां** मूलोत्तरगुणानाम् **अतिचारा एकेन्द्रियसङ्घट्टनादिका** एकेन्द्रियसङ्घट्टन-परितापनक्लमादिकाः ॥३१॥

**पुढवादिघट्टणादी, पयलादी तुच्छऽदत्तगहणादी ।**
**गुत्तिविराहण [१]कप्पट्ठममत्त दियगहियभुत्तादी ॥७२६॥ १५/३२**

**पृथिव्यादिघट्टनादयः** पृथिव्यप्तेजोवायुवनस्पति-द्वीन्द्रियादिसङ्घट्टनादयः । **प्रचलादयः** निद्राविशेषप्रचलादिविषयाः **तुच्छं** स्वल्पं **यद् अदत्तं** तद् **ग्रहणादयः, गुप्तिविराधनयो** नवब्रह्मचर्यगुप्तिविराधनप्रवृत्तयो, **डिम्भरूपममत्वादयो** ['कल्पार्थममता' - कल्पे वस्त्रादौ तिष्ठतीति कल्पस्थः कल्पेन वाऽर्थो यस्यासौ कल्पार्थः-शिशुः, तत्र ममता ममत्वं शय्यातरादि-सम्बन्धित्वात् स्वीकरणं कल्पार्थममता । - अटी.] **दिवागृहीत दिवाभुक्तादयः** प्रत्येकं महाव्रतेषु रात्रिभोजनषष्ठेषु मूलगुणातिचाराः ॥३२॥ (१. कप्पट्ठतमत्त. अटी.)

[उत्तरगुणातिचाराः] -

**भोगो अणेसणीएऽसमियत्तं भावणाणऽभावणया ।**
**जहसत्ति चाकरणं, पडिमाण अभिग्गहाणं च ॥७२७॥ १५/३३**

**भोगः** परिभोगः [भोजनं - अटी.] **अनेषणीयोऽ**नेषणीयविषयः, **असमितत्वं** समितिप्रतिपक्षः । **भावना**नामनित्यत्वादीनाम् **अभावनम्** । प्राकृतत्वाद् भावप्रत्ययो । **यथाशक्ति च** शक्त्यनुरूपम् **अकरणमनासेवनम्, प्रतिमानां** मासिक्यानां समयोक्तानाम् **अभिग्रहाणां च** दण्डकप्रमार्जनादीनां द्रव्यक्षेत्रकालभावविषयाणां चाकरणमिति वर्तते । पिण्डविशुद्ध्याद्युत्तरगुणानामेतेऽतिचाराः ॥३३॥

**एते इत्थऽइयारा, असद्दहणादी य गरुय भावाणं ।**
**आभोगाणाभोगादिसेविया तह य ओहेणं ॥७२८॥ १५/३४**

**एतेऽत्रातिचाराः अश्रद्धानादयश्चा**श्रद्धानं, विपरीतप्ररूपणादयः । **गुरुका** गुरवः, **भावानां**

जीवादिपदार्थानाम् **आभोगाऽनाभोगादिसेविताः** । परिज्ञाना-ऽपरिज्ञान-प्रमाद-रागादिसेविताः, **तथा च** ये केचन **ओघेन** सामान्येन ॥३४॥

कथं पुनर्गुरुणा प्रयोजकव्यापारमनुभवता ते अतिचारा आलोचनाविषयीकर्तव्याः साधूनामित्याह -

**संवेगपरं चित्तं, काऊणं तेहिं तेहिं सुत्तेहिं ।**
**सल्लाणुद्धरणविवागदंसगादीहिं आलोए ॥७२९॥ १५/३५**

**संवेगपरं** संवेगप्रधानं **चित्तं** मनः, **कृत्वा** विधाय, **तैस्तैः सूत्रै**रागमवचनैः, **शल्यस्य** भावशल्यस्य मायानिदानमिथ्यारूपस्य, **अनुद्धरणविपाकदर्शकादिभिः** शिष्यान् **आलोचयेद**तिचारान् गुरुः ॥३५॥

किं पुनर्भावशल्यम्, यदनुद्धरणे दोष इत्याह -

**सम्मं दुच्चरितस्सा, परसक्खिगमप्पगासणं जं तु ।**
**एयमिह भावसल्लं, पण्णत्तं वीयरागेहिं ॥७३०॥ १५/३६**

**सम्यग्** अविपरीतं क्रियाविशेषणमेतत् । **दुश्चरितस्य** दुष्कृतस्य **परसाक्षिकं** गुरुसाक्षिकम् **अप्रकाशन** स्वरूपेणानालोचनम्, **यत्तु** यत् पुन **एतदिह भावशल्य**मात्मपीडाहेतुत्वात् **प्रज्ञप्तं** कथितं **वीतरागैरर्हद्भिः** ॥३६॥

कानि पुनस्तानि सूत्राणि शल्यानुद्धरणविपाकदर्शकानि यैः संवेगपरता चित्तस्यापाद्यते गुरुणेति दिङ्मात्रेण तदुपदर्शनायाह -

**नवि तं सत्थं व विसं व, दुप्पउत्तो व कुणति वेतालो ।**
**जंतं व दुप्पउत्तं, सप्पो व पमादिओ कुद्धो ॥७३१॥ १५/३७**

**जं कुणइ भावसल्लं, अणुद्धितं उत्तिमट्ठकालम्मि ।**
**दुल्लहबोहीयत्तं, अणंतसंसारियत्तं च ॥७३२॥ १५/३८**

**नापि** नैव तदनर्थजातं कर्मतापन्नम्, **शस्त्रं** वा कर्तृहिंसाभृतम्, **विषं वा** मारणात्मकम् । **दुष्प्रयुक्तो वा** दुःसाधितो वा, **वेतालः** [पिशाचः, अटी.] कर्ता **करोति** । **यन्त्रं वा** शतघ्नीप्रभृति **दुष्प्रयुक्तं** दुर्व्यापारितम्, **सर्पो वा** भुजङ्गमो वा **प्रमादितो** अवज्ञाविषयीकृतः प्रमादितो वा [शब्दो विकल्पार्थः, अटी.] **क्रुद्धः** सन् ॥३७॥

**यत्** कर्तृ [कर्ता] **करोति** विधत्ते **भावशल्यं** मिथ्यादर्शनादि, **अनुद्धृत**मनाकृष्टम्, जीवशरीरात् **उत्तमार्थकाल** पर्यन्तकाले, **दुर्लभबोधिकत्वम्** असुलभबोधिलाभत्वम् **अनन्तसंसारिकत्वं**

च । सम्यक्त्वचारित्रावाप्तावपार्धपुद्गलपरावर्तान्तःपात्यनन्तसंसारभाक्त्वं च ॥३८॥

**आलोयणं अदाउं, सइ अण्णम्मि वि तहऽप्पणो दाउं ।**
**जेवि हु करेंति सोहिं, तेऽवि ससल्ला विणिद्दिट्ठा ॥७३३॥ १५/३९**

**आलोचनामात्मदोषप्रकाशनाम् अदत्त्वा** गुरुभ्य इति गम्यते, **सति** विद्यमाने **अन्यस्मिन्** [तस्मात् अपरस्मिन् अटी.] अप्यागमोक्तगीतार्थे, **तथाऽऽत्मन** एवालोचनां, **दत्त्वा** लज्जागारव-बहुश्रुतमदादिभिः, वितथात्मन एव वा **येऽप्यविवेकिनो**, हुर्वाक्यालङ्कारे, **कुर्वन्ति** विदधति **शुद्धिं** प्रायश्चित्तम्, **तेऽपि** कृतशुद्धयोऽपि **सशल्या विनिर्दिष्टा**, न तु निःशल्याः 'निःशल्यस्य च व्रतित्वम्' इत्यभ्युपगमः ॥३९॥ [*निःशल्यो व्रती-तत्त्वार्थ.सूत्र-अ.७.सूत्र.१३*]

**किरियण्णुणा वि सम्मं पि रोहिओ जह वणो ससल्लो उ ।**
**होइ अपत्थो एवं, अवराहवणोऽवि विण्णेओ ॥७३४॥ १५/४०**

क्रियां चिकित्सां जानातीति क्रियाज्ञस्तेन **क्रियाज्ञेनापि** सम्यक् चिकित्साशास्त्रविशारदेनापि पुंसा, **सम्यगपि** निराश्रवत्वमङ्गीकृत्य **रोहितो यथा व्रणः, सशल्यस्तु** ['तु' शब्दोऽवधारणे भिन्नक्रमश्च - अटी.] सशल्य एव सन्, **भवत्यपथ्यो** हि तावताऽन्तःशल्यत्वात्, **एवं** तथा **अपराधव्रणस्तु, विज्ञेयो** भावशल्यानुद्धरणेन, इह दुर्लभबोधित्वप्रतिपादकमेकं सूत्रम्, द्वितीयं तु सशल्यत्वप्रतिपादकम्, तृतीयं तु सशल्यव्रणरोहणप्रतिपादनपरमेवं प्रायाण्यन्यान्यपि सूत्राण्यवसेयानि ॥४०॥

आलोचनाविषयक्षेत्रकालाभि[धि]त्सयाऽह -

**सल्लुद्धरणनिमित्तं, गीयस्सन्नेसणा उ उक्कोसा ।**
**जोयणसयाइं सत्त उ, बारस वरिसाइं कायव्वा ॥७३५॥ १५/४१**

**शल्योद्धरणनिमित्तं** भावशल्योद्धारार्थं, **गीतस्य** गीतार्थस्य **अन्वेषणा**ऽनुपर्येषणा **तु, उत्कृष्टा योजनशतानि सप्त तु** सप्तैव क्षेत्रापेक्षया, **द्वादश वर्षाणि कर्तव्या** कालापेक्षया, दुर्लभगीतार्थं कालं समासृत्य ॥४१॥

स्वयं पुनरालोचनाकारी साधुः कथं संवेगं कृत्वालोचयतीत्याह -

**मरिउं ससल्लमरणं, संसाराडविमहाकडिल्लम्मि ।**
**सुचिरं भमंति जीवा, अणोरपारंमि ओइण्णा ॥७३६॥ १५/४२**

**मृत्वासेव्य, सशल्यमरणम् क्व? संसाराटवीमहाकडिल्ले** भवाटवीमहागहने, **सुचिरं** प्रभूतकालं **भ्रमन्ति** पर्यटन्ति, **जीवाः** प्राणिनः, **अनर्वाक्पारे**ऽर्वाग्भागपारवर्जिते, **अवतीर्णा**

अवगाढा: ॥४२॥

**उद्धरियसव्वसल्ला, तित्थगराणाएँ सुत्थिया जीवा ।**
**भवसयकयाइँ खविउं, पावाइँ गया सिवं थामं ॥७३७॥ १५/४३**

**उद्धृतसर्वशल्या** आकृष्टसूक्ष्मेतरभावशल्या:, **तीर्थकराज्ञया** तीर्थकरोपदेशेन, **सुस्थिता:** सुखिनो गुणस्थिता वा **जीवा:**, **भवशतकृतानि** मनुष्यतिर्यक्प्रभृतीनि भवशतनिर्वर्तितानि, **क्षपयित्वा** प्रक्षपय्य, **पापानि** कर्माणि, **गता:** प्राप्ता:, **शिवं** निरुपद्रवं मुक्त्याख्यं **स्थानम्** ॥४३॥

**सल्लुद्धरणं च इमं, तिलोगबंधूहिं दंसियं सम्मं ।**
**अवितहमारोग्गफलं, धण्णोऽहं जेणिमं णायं ॥७३८॥ १५/४४**

**शल्योद्धरणं चेदमागमप्रत्यक्षम्, त्रिलोकबन्धुभि:** सर्वजीवबान्धवैरर्हद्भि: **देशितं** कथितम्, **सम्यग**विपरीतम्, **अवितथं** सत्यम्, **आरोग्यफलं** भावारोग्यफलम्, **धन्य:** पुण्यभाग् **अहं येन** मया **इदं** शल्योद्धरणं **ज्ञातं** विदितं स्वरूपत: ॥४४॥

**ता उद्धरेमि सम्मं, एयं एयस्स नाणरासिस्स ।**
**आवेदिउं असेसं, अणिदाणो दारुणविवागं ॥७३९॥ १५/४५**

**त**त्तस्मात् **उद्धराम्य**पनयामि, **सम्यङ्** न्यायेन, **एतत्** भावशल्यम्, **एतस्य** गुरो: **ज्ञानराशे**र्ज्ञाननिकरस्य **आवेद्य** कथयित्वा, **अशेषं** सकलम्, **अनिदानो** निदानरहित:, **दारुणविपाकं** दारुणफलम् ॥४५॥

**इय संवेगं काउं, मरुगाहरणादिएहिं चिंधेहिं ।**
**दढमपुणकरणजुत्तो, सामायारिं पउंजेज्जा ॥७४०॥ १५/४६**

**इत्येवमुक्तनीत्या, संवेगं** श्रेय:प्रत्यवायोद्धारेण, **कृत्वा** स्वयमेव विधाय, **मरुकोदाहरणादिभिश्चिह्नै:** समयप्रसिद्धैर्मत्स्याद्याहारप्रवृत्तिप्रतिपादकैरन्त्यावस्थायां सद्भावालोचनपरै:, **दृढ**मत्यर्थम्, । **अपुन:करणयुक्त:** सावद्यप्रतिषेधनियमाऽन्वित:, **सामाचारीं** शिष्टाचरितक्रियारुपां **प्रयुञ्जीत** कुर्वीत ॥४६॥

कथं पुनर्भावालोचनां विदध्यादित्याह -

**जह बालो जंपंतो, कज्जमकज्जं व उज्जुयं भणति ।**
**तं तह आलोइज्जा, मायामयविप्पमुक्को उ ॥७४१॥ १५/४७**

**यथा बाल:** शिशु:, **जल्पन्** भाषमाण:, **कार्यमकार्यं वा** स्वरूपत: **ऋजुकमवक्रं भणति**

वक्ति, **तत्** कार्यमकार्यं वा **तथा** बालवद् **आलोचयेत्** कथयेत् **मायामदविप्रमुक्तश्च** मदस्थानविरहित एव ।।४७।।

सम्यगालोचनादाने किं पुनर्लिङ्गम्? इत्याह -

**आलोयणासुदाणे, लिंगमिणं बिंति मुणियसमयत्था ।**
**पच्छित्तकरणमुचितं, अकरणयं चेव दोसाणं ।।७४२।। १५/४८**

**आलोचनाया सुदानं** सम्यक्करणं **तस्मिन्, लिङ्गं** चिह्नम् **इदं** वक्ष्यमाणं **ब्रुवन्ति । मुणितसमयार्थाः** ज्ञातागमार्थाः विद्वांसः [मुणत् प्रतिज्ञाने हैमधातुपाठ १३६५ इति धातोरपि 'मुणित' शब्दसिद्धिः] **प्रायश्चित्तकरणं** प्रायश्चित्तासेवनम् **उचितं** योग्यम्, गुरूपदेशानुसारि, **अकरणं चैव**नासेवनं, चैवापुनःप्रवृत्त्या, **दोषाणा**मपराधानाम् ।।४८।।

कथं पुनरिदमालोचनाविधानं प्रस्तुतं सम्यग्भवतीत्याह -

**इय भावपहाणाणं, आणाए सुट्ठियाण होति इमं ।**
**गुणठाणसुद्धिजणगं, सेसं तु विवज्जयफलं ति ।।७४३।। १५/४९**

**इत्येवमुक्तनीत्या भावप्रधानानां** भावबहुमानिनाम् **आज्ञायां** क्रियोपदेशरूपायां **सुस्थितानां** प्रतिष्ठितानां च, **भवतीदमा**लोचनाविधानम्। **गुणस्थानशुद्धिजनकं** सर्वविरत्यन्तः पातिप्रमत्ता-प्रमत्ता[दि]गुणस्थानविशुद्धिहेतुः, **शेषं तु** उक्तलक्षणविमुक्तम्, पुरुषाऽयोग्यतया, **विपर्ययफल-मिति** गुणस्थानादिविशुद्धिहेतुः, नागमविपरीताभ्यां भाव-क्रियाभ्यां तद् गुणस्थानं विशुद्धिमनुभवति, तस्मादागमानुसार्येवेदं प्रशस्यते ।।४९।।

प्रस्तुतार्थमुपेत्यैवोपदेशरूपमाह -

**लद्धूण माणुसत्तं, दुलहं चईऊण लोगसण्णाओ ।**
**लोगुत्तमसण्णाए, अविरहियं होति जतितव्वं ।।७४४।। १५/५०**

**लब्ध्वा**ऽवाप्य, **मानुषत्व** मनुजत्वं **दुर्लभं** समुद्रपतितरत्नलाभकल्पं **त्यक्त्वा** विहाय, **लोकसञ्ज्ञा** भगवद्वचनप्रतिकूलवर्तिनी, तथाविधभवाभिनन्दिसत्त्वक्रियाप्रतिरूपा लोकाभिसन्धि-प्रायमात्रव्यवस्थिता। तया **लोकोत्तमसञ्ज्ञया** भगवद्वचनोपदेशरूपया गुणदोषनिरूपणगर्भया, निरस्तप्रज्ञामलया, **अविरहितं** सन्ततं **भवति । यतितव्यं** लोकसञ्ज्ञापरित्यागेन लोकोत्तमसञ्ज्ञयैव, प्रयत्नः करणीयो, न यथाकथञ्चिदालोचनाविधाने प्रवर्तितव्यमिति हृदयम् ।।५०।।

**।। पञ्चदशं आलोचनाविधि-पञ्चाशकं समाप्तम् ।।**

# ॥ षोडशं प्रायश्चित्तविधि-पञ्चाशकम् ॥

आलोचनाविधानानन्तरं साधो क्वचिदपराधे प्रायश्चित्तसम्भवात्तद्भेदनिरुपणायाह -

**नमिऊण वद्धमाणं, पायच्छित्तं समासतो वोच्छं ।**
**आलोयणादि दसहा, गुरूवएसाणुसारेणं ॥७४५॥ १६/१**

**नत्वा** मनो-वाक्-कायप्रह्वतया प्रणम्य, **वर्धमानं** सदैव केवलज्ञानादिभिः, स्वगुणैर्नहीय मानमवस्थितत्वेऽपि तेषां

माङ्गलिकत्वादेवमभिधानमायुषावर्ध[क]श्चेति यथा, [वद्धमाणं ति - गर्भगतेन भगवता ज्ञातकुलं विशेषेण धनेन वर्धितं तेन तस्य नाम कृतं वर्धमान इति । - आव. निर्युक्ति गाथा १०९१ हारिभद्रीयवृत्तिः ।] प्रायःचित्तशुद्धिस्मादिति **प्रायश्चित्तम्** । *'चिति सञ्ज्ञानशुद्ध्योः'* [ ]इति पाठात् । भावमूलान्ततः शुद्ध्यवाप्तेर्नान्यत इति प्रायोविशेषणम् । **समासतः** सङ्क्षेपेण वचनविस्तरमुत्सृज्य, मूलागमे तस्य बहुधाभिधानात्, **वक्ष्ये** प्रतिपादयिष्यामि, **आलोचनादि** वक्ष्यमाणं **दशधा** दशविधं **गुरूपदेशानुसारेण** स्वगुरूपदेशानुवृत्त्या ॥१॥

प्रायश्चित्तं दशधोक्तं तदाह -

**[१]आलोयण [२]पडिक्कमणे, [३]मीस [४]विवेगे तहा [५]विउस्सग्गे ।**
**[६]तव [७]छेय [८]मूल [९]अणवट्ठया य [१०]पारंचिए चेव ॥७४६॥ १६/२**

**आलोचन**मालोचनार्हम्, **प्रतिक्रमणं** प्रतिक्रमणार्हम्, **मिश्रं** तदुभयार्हम्, **विवेकः** परित्यागः **तथा व्युत्सर्गः** कायोत्सर्गः **तपो** बाह्याभ्यन्तरभेदम् । **छेदः** पर्यायच्छेदः । पञ्चकादिक्रमेण **मूलं** सर्वपर्यायोच्छेदः **अनवस्थाप्यता च** व्रतेषु, अकृततपःकर्मणः, **पारञ्चिकं चैव,** लिङ्गक्षेत्रकालतपोभेदेन पर्यन्तवर्त्तिप्रायश्चित्तपारगमनात्, न ततः परमन्यदस्ति ॥२॥

प्रायश्चित्तनिरुक्ताभिधानायाह -

**पावं छिंदति जम्हा, पायच्छित्तं ति भण्णए तेण ।**
**पाएण वा वि चित्तं, सोहयती तेण पच्छित्तं ॥७४७॥ १६/३**

पापमशुभं **छिनत्ति** कृन्तति **यस्मात् पापच्छिदिति भण्यते** निगद्यते **तेन** तस्माद्धेतोः **प्रायेण वापि चित्त शोधयति** क्रियां च, **तेन प्रायश्चित्तमि**त्युच्यते ॥३॥

कस्य पुनरिदं भावतः प्रायश्चित्तं सम्भवतीत्याह -

**भव्वस्साणारुइणो, संवेगपरस्स वण्णियं एयं ।**
**उवउत्तस्स जहत्थं, सेसस्स उ दव्वतो णवरं ॥७४८॥ १६/४**

**भव्यस्या**सन्नमोक्षस्य, **आज्ञारुचे**रागमबहुमानिनः, सम्यग्दृष्टेः **संवेगपरस्य** चारित्रिणः संविग्नस्य, **वर्णित** कथितम् **एतत्**प्रायश्चित्तम् **उपयुक्तस्य** सर्वापराधस्थानेषु दत्तावधानस्य, **यथार्थं** सत्यं स्वकार्यकारि, **शेषस्य त्वे**तद्गुणविकलस्य, **द्रव्यत** एव, **नवरं** केवलम्, न पुनः स्वार्थविधायि ॥४॥

इहे(है)व भावार्थमाह -

**सत्थत्थबाहणाओ, पायमिणं तेण चेव कीरंतं ।**
**एयं चिय संजायति, वियाणियव्वं बुहजणेणं ॥७४९॥ १६/५**

**शास्त्रार्थबाधनात्** प्राणातिपातादिरूपात्, **प्रायमिदं** प्रायश्चित्तम्, न पुनः प्राणातिपाताद् शास्त्रबाधया तत्सम्भवः, शास्त्रार्थाराधनस्यैव गरीयस्त्वात्। सत्यपि कल्पविहिते प्राणातिपातादौ तदसम्भवात्। **तेन चैव** शास्त्रार्थबाधनेनैव **क्रियमाणं** क्रियारूपं प्रायश्चित्तम्। **एतदेव** प्रायश्चित्तमेव पापरूपमेव **सञ्जायते**, शास्त्रप्रतिषिद्धविधीयमानप्राणातिपातादिवत्। **विज्ञातव्यं** निश्चेतव्यम्। गंभीरसारया प्रज्ञया **बुधजनेन** तत्त्वज्ञसमवायेन ॥५॥

एतदेव व्यक्तीकर्तुमाह -

**दोसस्स जं णिमित्तं, होति तगो तस्स सेवणाए उ ।**
**न उ तक्खउ त्ति पयडं, लोगंमि वि हंदि एयं ति ॥७५०॥ १६/६**

**दोषस्या**पराधस्य **यन्निमित्तं** यदवन्ध्यकारणम्, **भवत्यु**त्पद्यते **तको** दोषः **तस्य** दोषनिमित्तस्य सेवनया तु सेवनयैव **न तु** नैव **तत्क्षय इति** दोषक्षयः। **प्रकटं** प्रसिद्धम्। **लोकेऽपि** जनसमुदायेऽपि, **हन्ते**त्यामन्त्रणे। **एतदिति** कार्यकारणरूपम्। अयमत्र वाक्यार्थः-अधिकारिण एव शास्त्रार्थाबाधया प्रवृत्तस्य दोषविशुद्धिहेतु प्रायश्चित्तं। यस्तु शास्त्रार्थोल्लङ्घनेन दोषविशुद्धये प्रायश्चित्तकर्मणि प्रवर्तते तस्य प्रायश्चित्तासेवनक्रियापरस्यापि न दोषविशुद्धिः। दोषमूलस्य शास्त्रार्थबाधनस्य तदवन्ध्यहेतोस्तदवस्थत्वात्। तस्माद्दोषविशुद्धिमिच्छता श्रेयोऽर्थिना शास्त्रार्थाराधन एव प्रयत्नः करणीयः ॥६॥

एतच्च प्रायश्चित्तं यत्समानोक्तं पूर्वसूरिभिस्तत्सम्बन्धप्रदर्शनायेदमाह -

**दव्ववणाहरणेणं, जोजितमेतं विदूहिं समयंमि ।**
**भाववणतिगिच्छाए, सम्मं ति जतो इमं भणितं ॥७५१॥ १६/७**

**द्रव्यव्रणोदाहरणेन** वक्ष्यमाणेन **योजितं** साम्यमानीतमेव प्रायश्चित्तम्, **विद्वद्भिस्तज्ज्ञैः समये** सिद्धान्ते, **भावव्रणचिकित्सायां** प्रस्तुतायां **सम्यगिति** सम्यक्स्वरूपं **यतो** यस्माद् **इदं** प्रत्यक्षरूपं यत्नं **भणितमुक्तम्** [**श्रीभद्रबाहुस्वामिभिः** – अटी.] ॥७॥

यदुक्तं समये तदाह –

**दुविहो कायंमि वणो, तब्भव आगंतुगो य णायव्वो ।**
**आगंतुगस्स कीरति, सल्लुद्धरणं न इतरस्स ॥७५२॥ १६/८**

**द्विविधो** द्विप्रकारः, **काये** शरीरे, **व्रणः** क्षतरूपः तस्मिन्नेव काये भवतीति **तद्भवः** कायसमुत्थो गण्ड-पिटकादिः, **आगन्तुकश्च** कण्टकक्षतादिः **ज्ञातव्यः । आगन्तुकस्य** कण्टकादिक्षतस्य **क्रियते** विधीयते **शल्योद्धरण** कण्टकाद्युद्धाररूपं **नेतरस्य** शरीरसम्भवस्य, तस्मिन्नाऽऽगन्तुक-शल्याभावात् ॥८॥

द्रव्यव्रणक्रियोपदर्शनायाह –

**तणुओ अतिक्खतुंडो, असोणितो केवलं तयालग्गो ।**
**उद्धरिउं अवउज्झइ, सल्लो न मलिज्जइ वणो य ॥७५३॥ १६/९**

**तनुकः** स्वरूपेण कृशः, **अतीक्ष्णतुण्डोऽ**तीक्ष्णमुखः **अशोणितोऽ**रुधिरप्राप्तो नाद्यापि शोणितं संस्पृशति, **केवलं त्वचि** त्वग्मात्रे **लग्नः । उद्धृत्याऽऽ**कृष्य, **अपोह्यतेऽ**पास्यते वा, बहिः प्रक्षिप्यत इति यावत् । **शल्यः** कण्टकादिभिः । शल्यशब्दः पुंल्लिङ्गोऽप्यस्ति प्राच्यानाम्, **न मृद्यते व्रणश्च** तावन्मात्रेणैवादोषहेतुरिति कृत्वा ॥९॥

**लग्गुद्धियम्मि बीए, मलिज्जइ परमदूरगे सल्ले ।**
**उद्धरणमलणपूरण, दूरयरगए उ ततियगम्मि ॥७५४॥ १६/१०**

**लग्नोद्धृते द्वितीये** व्रणे, **मृद्यते परं** स एवेति गम्यते । **अदूरगे शल्येऽ**दूरगामिनि शल्ये, लग्नोद्धृते यदि **उद्धरणमर्दनपूरणानि** शल्योद्धारव्रणमर्दनकर्णमलपूर्णानि क्रियन्ते । **दूरतरगते** दूरतरावगाढे **तृतीये** व्रणे ॥१०॥

**मा वेअणा उ तो उद्धरित्तु गालिंति सोणिय चउत्थे ।**
**रुज्झइ लहुं ति चेट्ठा, वारिज्जइ पंचमे वणिणो ॥७५५॥ १६/११**

**मा वेदना तु** मा भूद् वेदना पुनः, **ततः** तद् **उद्धृत्य** शल्यं **गालयन्ति** निष्कासनं क्रियते, **शोणित** रक्तम्, कियदपि **चतुर्थे** व्रणे **अवरुध्यते** व्रणेन **लघ्विति** शीघ्रमेव **चेष्टा** प्रयासरूपा

**वार्यते** निषिध्यते **पञ्चमे** व्रणे **व्रणिनः** पुरुषस्य ॥११॥

**रोहेति वणं छट्टे, हितमितभोजी अभुंजमाणो वा ।**
**तत्तियमेत्तं छिज्जति, सत्तमए पूइमंसादी ॥७५६॥ १६/१२**

**रोहयति** निराश्रवीकरोति, **व्रणं** क्षतं **षष्ठे** द्रव्यव्रणस्थाने, **हितमितभोजी** पथ्यपरिमिताहारभोजी, **अभुञ्जाना वा** व्रणचिकित्सानुगुण्येन । **तावन्मात्रं** तावत्प्रमाणं **छिद्यते**ऽपनीयते, **सप्तमके** व्रणे, **पूतिमांसादि** दूषितमांसमेदप्रभृति ॥१२॥

**तह वि य अठायमाणे, गोणसखइयादि रप्पुए वा वि ।**
**कीरति तदंगछेदो, सअट्टितो सेसरक्खट्ठा ॥७५७॥ १६/१३**

**तथापि च**वमपि च विधीयमाने परिकर्मणि **अतिष्ठति** दोषव्याप्त्या प्रभवति, **गोनसखादितादा** गोनसभक्षितादौ, वातप्रधानविषे **रेफुके वापि** वल्मीकरोगे, **[क्रियते] तदङ्गच्छेदो** दूषिताङ्गच्छेदः, सहास्थीभिर्वर्तते **सास्थिकः । शेषरक्षार्थं** दूषिताङ्गरक्षार्थम् ॥१३॥

एतत्साम्येन भावव्रणोपदर्शनायाह -

**मूलुत्तरगुणरूवस्स ताइणो परमचरणपुरिसस्स ।**
**अवराहसल्लपभवो, भाववणो होति णायव्वो ॥७५८॥ १६/१४**

**मूलोत्तरगुणरूपस्य** अहिंसापिण्डविशुद्ध्यादिरूपस्य, **तायिनस्त्रातुः** संसारपरित्राणहेतुभूतस्य, **परमचरणपुरुषस्य** चरणं पुरुष इव चरणपुरुषः, परमश्चासौ चरणपुरुषश्चेति समासः तस्य, **अपराधशल्यप्रभवा** दोषशल्यनिमितः **भावव्रणो** भावक्षतरूपः, **भवति ज्ञातव्यो**ऽवबोद्धव्यः ॥१४॥

**एसो एवंरूवो, सविगिच्छो एत्थ होइ विण्णेओ ।**
**सम्मं भावाणुगतो, णिउणाए जोगिबुद्धीए ॥७५९॥ १६/१५**

**एष** भावव्रणः, **एवंरूप** एवंलक्षणः, **सचिकित्सः** सप्रतीकारः **अत्र** प्रक्रमे, **भवति विज्ञेयो**ऽवसेयः, **सम्यग्भावानुगतो**ऽभिप्रायान्वितो, **निपुणया** सूक्ष्मया, **योगिबुद्ध्या** योगिबोधेन । योगिनो हि मतिरविपरीतस्वरूपा भवति, तेन यथास्वभावं वस्तु प्रत्येति, न तत्र विपर्ययसम्भवः ॥१५॥

**भिक्खायरियादि सुज्झति, अइयारो कोइ वियडणाए उ ।**
**बितिओ उ असमितो मि त्ति कीस? सहसा अगुत्तो वा ॥७६०॥ १६/१६**

**सद्दादिएसु रागं, दोसं व मणे गओ तइयगम्मि ।**
**णाउं अणेसणिज्जं, भत्तादि विगिंचण चउत्थे ॥७६१॥ १६/१७**

**उस्सग्गेण विसुज्झति, अइयारो कोइ कोइ उ तवेणं ।**
**तह वि य असुज्झमाणे, छेयविसेसा विसोहंति ॥७६२॥ १६/१८ तिगं ।**

**भिक्षाचर्यादि**र्भिक्षाटनादिर्गमनागमनविषयः, [तेन] **शुद्ध्यति** शुद्धिमुपैति, **अतिचारो**ऽपराधः । **कश्चित्** स्वल्पतया **विकटनया त्वा**लोचनयैव, न क्रियान्तरमपेक्षते, **द्वितीयः पुनरसमितोऽस्मीति,** समित्युपयोगरहितः, **कस्माद्धेतोः सहसा** प्रयोजनमन्तरेण, **अगुप्तो वा** गुप्त्युपयोगरहितः, न किञ्चिदसमितत्वेऽगुप्तत्वे वा मम पुष्टालम्बनमस्ति । तस्मात् प्रतिक्रमणविषयोऽयमपराधो मिथ्यादुष्कृतेन शुद्ध्यति ॥१६॥

**शब्दादिकेषु** शब्दरूपादिषु, **रागम**भिष्वङ्गलक्षणम्, **दोषं वा**ऽप्रीतिविकारलक्षणम्, **मनस्य**न्तःकरणे **गतः** प्रतिपन्नोऽध्यवसायेन, **तृतीयके** मिश्रे, स चापराधः तदुभयार्हत्वादालोचनप्रतिक्रमणाभ्यां शुद्ध्यति, **ज्ञात्वा** विज्ञाय श्रुतानुसारिप्रज्ञया, **अनेषणीयम**कल्पनीयम्, **भक्तादि विवेचनं** भक्तपानविवेकश्च, **चतुथ** विवेकार्हे, स चापराधोऽनेषणीयभक्तपानपरित्यागेन शुद्ध्यति ॥१७॥

**उत्सर्गेणापि** कायोत्सर्गेणापि, **शुद्ध्यति** शुद्धिमासादयति, **अतिचारः । कश्चि**दनभिसन्धिपूर्वकप्राणातिपातादिविषयस्वप्नमनोविज्ञानजनितः, **कश्चित्तु तपसा** शुद्ध्यति, तपोऽर्हप्रायश्चित्तयोग्यः **तथापि च** तपसापि च, **अशुद्ध्यमानम**पराधम्, **छेदविशेषात्** छेदादिप्रायश्चित्तविशेषात्, **विशोधयन्त्य**पनयन्ति च, शोधनशक्तियुक्तः शुद्ध्यमानः ***ताच्छील्य-वयो-वचन-शक्तिषु चानस् परस्मैपदीनामपि*** ॥१८॥

कथं पुनः छेदशेषेभ्योऽपराधविशुद्धिरित्याह -

**छिज्जति दूसियभावो, तहोमरायणियभावकिरियाए ।**
**संवेगादिपभावा, सुज्झइ णाता तहाऽऽणाओ ॥७६३॥ १६/१९**

**छिद्यत** खण्डशोऽपनीयते प्रव्रज्यापर्यायो, **दूषितभावो** दूषिताध्यवसायः, **तथा** तेन प्रकारेण पञ्चकच्छेदादिना, अवमश्चासौ रात्निकश्च [इति अवमरात्निकः तस्य] अवमरात्निकस्य भावस्य क्रिया [अवमरात्निकभावक्रिया तया] **अवमरात्निकभावक्रियया, संवेगादिप्रभावात्** संवेगनिर्वेदादिसामर्थ्यात्, **शुद्ध्यति** शुद्धिमनुभवति, छेदार्हप्रायश्चित्तयोरेवापराधो, **न्यायात्** न्यायेनागमदृष्टेन, **तथाऽऽज्ञातः** सर्वज्ञाज्ञायाः सकाशात् । अथवापराध-तद्वतोरभेदोपचारात्, **ज्ञाता** पुरुषः, संवेगादिप्रभावाच्छेद्यति **तथा ज्ञातश्च** ॥१९॥

**मूलादिसु पुण अहिगयपुरिसाभावेण नत्थि वणचिंता ।**
**एतेसिं पि सरूवं, वोच्छामि अहाणुपुव्वीए ॥७६४॥ १६/२०**

**मूलादिषु** मूला-ऽनवस्थाप्य-पाराञ्चिकेषु, **पुनरधिकृतपुरुषाभावेन** चरणपुरुषाभावेन, **नास्ति** न सम्भवति, **व्रणचिन्ता** द्रव्यव्रणसाम्यगता । **एतेषामपि** मूलादिनां **स्वरूपं** स्वलक्षणं **वक्ष्याम्यभिधास्यामि** **यथानुपूर्व्या** यथाक्रमम् ॥२०॥

**पाणातिवातपभितिसु, संकप्पकएसु चरणविगमम्मि ।**
**आउट्टे परिहारा, पुण वयठवणं तु मूलं ति ॥७६५॥ १६/२१**

**प्राणातिपातप्रभृतिषु** अपराधेषु, **सङ्कल्पकृतेषु** मनःसङ्कल्पविहितेषु, **चरणविगमे** चारित्रपरिणामविरामे सति, **आवृत्ते** आवृत्तपरिणामे पुनःकरणरूपेण, **परिहारात्** दोषपरिहार-माश्रित्य, **पुनर्व्रतस्थापनं तू**त्तरकालं व्रतन्यासः, **मूलमिति** मूलार्हं प्रायश्चित्तम् ॥२१॥

मूलान्तरं सविषयमनवस्थाप्यमाह -

**साहम्मिगादितेयादितो तहा चरणविगमसंकेसे ।**
**णोचियतवेऽकयम्मी, ठविज्जति वएसु अणवट्ठो ॥७६६॥ १६/२२**

**साधर्मिकादिस्तेयादितः** प्रथमादिशब्दादन्यतीर्थिकादिग्रहः, द्वितीयादिशब्दात् हस्ततलादिग्रहः, **तथा** तेन रूपेणागमोक्तेन, **चरणविगमसङ्क्लेश** चरणापगमनिबन्धनसङ्क्लेशे समुत्पन्ने सति, **न** नैव **उचिततपस्या**गमोक्ततपसि **अकृते**ऽनासेवितेऽविहित इति यावत्। **स्थाप्यते व्रतेषु**, नारोप्यते व्रतेष्वित्यर्थः । सोऽयमेवंविधः **अनवस्थाप्य**स्तदभेदोपचारात् प्रायश्चित्तमपि तथोच्यते ॥२२॥

अनवस्थाप्यानन्तरं सविषयं पाराञ्चिकमाह -

**अण्णोऽण्णमूढदुट्ठातिकरणतो तिव्वसंकिलेसंमि ।**
**तवसाऽतियारपारं, अंचति दिक्खिज्जति ततो य ॥७६७॥ १६/२३**

**अन्योन्य-मूढ-दुष्टा-ऽतिकरणतो**ऽन्योन्यकरणात् समयप्रसिद्धात्, मूढकरणाद् दुष्टकरणाच्च । **तीव्रसङ्क्लेश सत्यु**त्कृष्टसङ्क्लेशपरिणामे, **तपसा** समयोक्तेन, **अतिचार**मपराध**पारं** पर्यन्तम् **अञ्चति** गच्छति । तदुच्छेदं विधत्त इति यावत्, **दीक्ष्यते**ऽभ्युपगम्यते **ततश्च**तपसा विशुद्धः सन्, इतरथा दीक्षार्होऽपि स न भवति, तथाविधाऽगमिकसङ्क्लेशप्राप्तत्वात् । स्वयं चायोग्यमात्मानं वेत्त्यसौ, ततोऽन्यस्य तदनधिकारित्वात् ॥२३॥

**अण्णेसिं पुण तब्भवतदण्णवेक्खाएँ जे अजोग त्ति ।**
**चरणस्स ते इमे खलु, सलिंगचितिभेदमादीहिं ॥७६८॥ १६/२४**

**अन्येषां पुन**स्तन्त्रान्तरीयाणां स्वतन्त्रस्थितानां च **तद्भवे** तस्मिन् भवे, **तदन्यापेक्षया** दीक्षाऽनर्हा परमपुरुषापेक्षया, **येऽयोग्या** इत्यनुचितरूपाः, **चरणस्य** चरित्रस्य, **ते**ऽयोग्या, **इमे खल्विमे** भवन्ति । **स्वलिङ्गचैत्यभेदादिभि**रुपलक्षिताः स्वलिङ्गभेदेन ऋषिहत्यादिना, चैत्यभेदेन प्रतिमाऽन्यथात्वाऽऽपादनेनाऽत्यन्ताऽयोग्याः खल्विमे भवन्तीत्येवमुपन्यासः । सामान्यत-स्त्वनलसूत्रप्रतिपादिताऽन्ययोग्या भवन्त्येव । न च त एवं सङ्क्लिष्टास्तेषां तज्जन्मन्यपि कथञ्चित्तद्योग्यत्वसम्भवात् ॥२४॥

तदेतदन्यमतमपि पूर्वोक्तं कथञ्चित्समर्थयमानः सूरिरिदमाह –

**आसयविचित्तयाए, किलिट्ठयाए तहेव कम्माणं ।**
**अत्थस्स संभवातो, णेयं पि असंगयं चेव ॥७६९॥ १६/२५**

**आशयविचित्रतया**ऽध्यवसायविचित्रत्वेन जीवानां, **क्लिष्टतया** निरुपक्रमक्लिष्टत्वेन । **तथैव कर्मणा** चारित्रमोहनीयान्तःपातिनां ज्ञानावरणादीनां वा, **अर्थस्य** तदभावापेक्षयात्यन्ता-योग्यत्वलक्षणस्य, **सम्भवत्वात्** सम्भवित्वात्, **नैतदप्यन्यमतम्**, **असङ्गतमेव** सर्वथाऽयुक्तरूपमेव किन्तु कथञ्चित्सङ्गतमपि ॥२५॥

पाराञ्चिकप्रस्तावमेवाङ्गीकृत्येदमाह –

**आगममाई य जतो, ववहारो पंचहा विणिद्दिट्ठो ।**
**आगम सुय आणा धारणा य जीए य पंचमए ॥७७०॥ १६/२६**

**एयाणुसारतो खलु, विचित्तमेयमिह वण्णियं समए ।**
**आसेवणादिभेदा, तं पुण सुत्ताउ णायव्वं ॥७७१॥ १६/२७**

**आगमादिश्च यतो** यस्माद्, **व्यवहारः** प्रायश्चित्तविषयः, **पञ्चधा** पञ्चविधः, **निर्दिष्टः** कथितः । कः पुनरसौ ?[तत्] परिज्ञानार्थं भेदनिर्देशः । (१) **आगम** इत्यागमव्यवहारः केवल-मनः पर्याया-ऽवधि-चतुर्दशपूर्वधरादिविषयः ते हि साक्षादुपायैर्वा पराभिप्रायमवितथं पश्यन्ति । नैतद्दृष्टे क्वचित् विसंवादः, तेन प्रत्यक्षरूपापन्न एवायं परगतसर्वापरानां जन्मभाविनामपि तथात्वेनोपलम्भात्। (२) **श्रुतव्यवहारो** द्वितीयो, ये श्रुतोपदेशेन प्रायश्चित्तं प्रयच्छन्ति, तद्विषयः (३) **आज्ञाव्यवहारो** देशान्तरव्यवहितयोर्द्वयोर्गीतार्थयोः प्रज्ञावत् पुरुषधारणाशक्तिगोचरः । स

ह्युभयाज्ञामवधार्य तथैव कथयति । (४) **धारणा च** धारणाव्यवहारो यैरसकृत्प्रायश्चित्तं गुरुभ्यः श्रुतं, देशकालाद्यपेक्षया च कृतम् । ते तथैवावधार्य परस्यापि तथाविधद्रव्यादिषु प्रायश्चित्तसमापन्नस्य कथयन्ति, तेन तथाविधधारणागोचरोऽयम् । (५) **जीतं च** जीतव्यवहारः, **पञ्चमकः**, जीतं चिरन्तनमाचरितकल्प इत्यनर्थान्तरम्, सोऽप्यागमिकसमाचरितत्वात्, अनादिसंसिद्धजीत-व्यवहारान्तःपातित्वाच्च प्रमाणभूत एव, तेन विना व्यवहारपञ्चकत्वस्यानुपपत्तेः ॥२६॥

**एतदनुसारतः खलु** पञ्चविधव्यवहारानुसारत एव, **विचित्रमेतत्**पारञ्चिकमिह **वर्णितं** कथितम् **समय** सिद्धान्ते । **आसेवनादिभेदा**दासेवनाऽऽशातनाभेदात्, **तत् पुनः** पारञ्चिकं **सूत्रा**दागमात्, **ज्ञातव्यं** विज्ञेयम् ॥२७॥

**एयं च एत्थ तत्तं, असुहज्झवसाणओ हवति बंधो ।**
**आणाविराहणाणुगमेयं पि य होति दट्ठव्वं ॥७७२॥ १६/२८**

**सुहभावा तव्विगमो, सोऽवि य आणाणुगो णिओगेण ।**
**पच्छित्तमेस सम्मं, विसिट्ठओ चेव विण्णेओ ॥७७३॥ १६/२९ जुम्मं ।**

[अथोक्त] प्रायश्चित्त(तद्)दोषाविशुद्धिमुपदिशन्निदमाह -

**एतच्चात्र** दशविधप्रायश्चित्ते प्रस्तुते, **तत्त्वं** परमार्थः **अशुभाध्यवसानतो**ऽशुभाध्यवसायाद्, **भवति** जायते, **बन्धो** जीवप्रदेशकर्मस्कन्धान्योन्यगमात्मकः क्षीरोदकवत् परस्परानुप्रवेशेन, आज्ञाया भगवद्वचनरूपाया, विराधनाऽन्यथात्वकरणम्, तामनुगच्छतीति-**आज्ञाविराधनानुगम्, एतदपि चाशुभाध्यवसानपि** च, **भवति दृष्टव्यं** विज्ञेयम् । नाऽऽज्ञाविराधनमन्तरेणाशुभाध्यवसानं सम्भवतीति भावः ॥२८॥

**शुभभावा**च्छुभाध्यवसायात्, **तद्विगमः** कर्मबन्धविगमः, **सोऽपि च** शुभभावः **आज्ञानुगः** आज्ञानुवर्तनपरः, तत्सहित इत्यर्थः । **नियोगेन** नियमेन, **प्रायश्चित्तं** दोषविशुद्धिहेतुः **एष** शुभभावः । **सम्यग**विपरीतं **विशिष्टमेव** विशिष्ट एव, न सामान्यरूपो, **विज्ञेयो** ज्ञातव्यः । प्रायश्चित्तक्रिया तु तदङ्गत्वेन कर्मक्षयार्थं वा ॥२९॥

प्रायश्चित्तकर्मण्यपि विशिष्ट एव शुभभावो दोषविशुद्धिहेतुः, न शुभभावमात्रमित्युप-निदर्शयन्निदमाह -

**असुहज्झवसाणाओ, जो सुहभावो विसेसओ अहिगो ।**
**सो इह होति विसिट्ठो, न ओहतो समयनीतीए ॥७७४॥ १६/३०**

**अशुभाध्यवसानात्** दोषसमासेवनकालविषयात्, **यः शुभभाव**स्तदुत्तरकालभावी, **विशेषतो** विशेषेण,

**अधिकस्तत्**प्रतिपक्षभूतो दोषविनिर्घातनसमर्थः, **स** शुभभावः, **इह** प्रक्रमे, **भवति विशिष्टो**ऽतिशयवान्। **न** नैव, **ओघतः** सामान्येन, शुभभावमात्रान्तःपाती, **समयनीत्या**गमनीत्या ॥३०॥

व्यतिरेकदोषमाह –

**इहरा बंभादीणं, आवस्सयकरणतो उ ओहेणं।**
**पच्छित्तं ति विसुद्धी, ततो न दोसो समयसिद्धो ॥७७५॥ १६/३१**

**इतरथा**ऽन्यथा, **ब्राह्म्यादीना** ब्राह्मी-सुन्दरीप्रभृतीनां पूर्वजन्मनि, **आवश्यककरणतस्त्** दैवसिकादिप्रतिक्रमणविधानात्, **एव ओघेन** सामान्येन। **प्रायश्चित्तमिति** हेतोः विशुद्धिर्दोषविशुद्धिः, **तत** आवश्यकप्रायश्चित्तादेव **न दोषः** प्राप्नोति न भवति इत्यर्थः। **समयसिद्धः** सिद्धान्तप्रसिद्धः, स्त्रीनामगोत्रकर्मबन्धलक्षणः, अथ च प्रतिपादित एवासौ तस्मान्न शुभभावमात्राद्दोषविशुद्धिः ॥३१॥

उपसंहरन्नाह –

**ता एयंमि पयत्तो, कायव्वो अप्पमत्तयाए उ।**
**सतिबलजोगेण तहा, संवेगविसेसजोगेण ॥७७६॥ १६/३२**

**तत्** तस्मात्, **एतस्मिन्** विशिष्टशुभभावे, **प्रयत्नः** प्रकर्षः प्रकृष्टः यत्नः, **कर्तव्यो** विधेयः, **अप्रमत्ततया** त्वप्रमत्ततयैव, **स्मृतिबलयोगेन** स्मृतिसामर्थ्यव्यापारेण, **तथा संवेगविशेषयोगेन** संवेगातिशयसम्बन्धेन ॥३२॥

विशिष्टभावमेवं सकलमुपदर्शयन्निदमाह –

**एतेण पगारेणं, संवेगाइसयजोगतो चेव।**
**अहिगयविसिट्ठभावो, तहा तहा होति नियमेणं ॥७७७॥ १६/३३**

**एतेन** प्राक्प्रस्तुतेन, **प्रकारेण** स्मृतिबलयोगादिना **संवेगातिशययोगतश्चैव**, संवेगप्रकर्ष-सम्बन्धाच्चैव, **अधिकृतविशिष्टभावो** दोषोन्मूलनसमर्थः। **तथा तथा** जीववीर्यातिशयेन, **भवति** सम्पद्यते, **नियमेना**वश्यंभावेन ॥३३॥

**तत्तो तव्विगमो खलु, अणुबंधावणयणं व होज्जाहि।**
**जं इय अपुव्वकरणं, जायति सेढी य विहियफला ॥७७८॥ १६/३४**

**ततः** शुभभावात् **तद्विगमः खलु** अशुभाध्यवसायजातबन्धविगम एव, **अनुबन्धापनयनं वा भवेत्** शुभभावादेवाऽप्रकृष्टरूपात् कर्मणामनुबन्धभेदो भवेत्, न सर्वथा तद्विगमः। **यद्** यस्मात् इत्येवम्, **अपूर्वकरण** श्रेण्यन्तर्गतं **जायते** प्रादुर्भवति, **श्रेणिश्चो**पशम-क्षपकश्रेणिरूपा **विहितफला**

समयोक्तफला कर्मक्षयश्चासौ अनुबन्धव्यवच्छेदश्चेति कर्मक्षयानुबन्धव्यवच्छेदौ ताभ्याम् कर्मक्षयाऽनुबन्धव्यवच्छेदाभ्यां सर्वस्यैवापूर्वकरणं श्रेणिश्चेतिभावः ॥३४॥

**एवं निकाइयाण वि, कम्माणं भणियमेत्थ खवणं ति ।**
**तं पि य जुज्जइ एवं, तु भावियव्वं अतो एयं ॥७७९॥ १६/३५**

**एवं** स्थिते, **निकाचितानामपि** निकाचनाकरणाऽवस्थापितानामपि, **कर्मणां** ज्ञानावरणादीनां **भणित** प्रतिपादितम्, **अत्र** श्रेण्यां **क्षपणमिति** क्षयकरणम्। यदित्यनुक्तमप्यर्थादाक्षिप्यते-**तदपि च** क्षणम्, **युज्यते** घटते, **एवं** त्वपूर्वकरणादिषु भावप्राधान्ये श्रेण्यां हि यन्निकाचितकर्मक्षपणमुक्तं तत् तथाविधशुभभावमन्तरेण, नान्यतः कुतश्चिद् भवितुमर्हति। तस्मात् स एव शुभभावः, कर्मक्षयात् करणमित्यगन्तव्यम्। **भावयितव्यं** भावनीयम् **अत** एतस्माद्धेतोः शुभभावलक्षणात्, **एतत्**प्रायश्चित्तं दोषविशुद्धिहेतुः, न विशिष्टभावमन्तरेण प्रायश्चित्तमपि स्वकार्यकारि सम्पद्यते, तस्माच्छ्रेयोऽर्थिना शुभभाव एवाश्रयितुं युक्तस्तदनुगतस्यैव प्रायश्चित्तानुष्ठानस्यापि स्वफलसाधकत्वात् ॥३५॥

अत्राह शिष्यः -

**विहियाणुट्ठाणंमी, एत्थं आलोयणादि जं भणियं ।**
**तं कह पायच्छित्तं, दोसाभावेण तस्स त्ति ? ॥७८०॥ १६/३६**

**अह तं पि सदोसं चिय, तस्स विहाणं तु कह णु समयम्मि ? ।**
**न य नो पायच्छित्तं, इमं पि तह कित्तणाओ उ ॥७८१॥ १६/३७ जुम्मं ।**

**विहितानुष्ठाने** चैत्यसाधर्मिकवन्दनादौ, **अत्राधिकारे**, **आलोचनादि**, आदिशब्दादीर्यापथिका-प्रतिक्रमण-परिग्रहः **यद् भणितं** यदुक्तम्, **तत्कथं प्रायश्चित्तं दोषाभावेन** दोषविरहेण, **तस्येति** विहितानुष्ठानस्य, चैत्यवन्दनादेः ॥३६॥

**अथ तदपि** विहितानुष्ठानमपि, **सदोषमेव** सापराधमेव, **तस्य** विहितानुष्ठानस्य, **विधानं** विधिरूपदेशः, **कथं नु समये** सिद्धान्ते नैव विधिः प्राप्नोतीत्यर्थः। **न च नो प्रायश्चित्तं** किन्तु प्रायश्चित्तम् **इदमप्यालोचनादि । तथाकीर्तनात्तु** प्रायश्चित्तत्वेन प्रतिपादनादेव ॥३७॥

सूरिराह -

**भण्णइ पायच्छित्तं, विहियाणुट्ठाणगोयरं चेयं ।**
**तत्थ वि य किंतु सुहुमा, विराहणा अत्थि तीएँ इमं ॥७८२॥ १६/३८**

**भण्यते** अत्रोत्तरम्, **प्रायश्चित्तं विहितानुष्ठनगोचरं** विहितानुष्ठानविषयम् **चैतत्** आलोचनादि,

सत्यमेतत्, किन्तु **तत्रापि च** विहितानुष्ठाने, **किन्तु सूक्ष्मा** स्वल्पा **विराधना** ईर्यापथरूपा, **अस्ति** विद्यते, **तस्यां** सूक्ष्मविराधनायां सत्याम्-[अतस्तस्या विराधनायाः शुद्ध्यर्थं । इदं....अटी.] **इदं** आलोचनादि प्रायश्चित्तम् ॥३८॥

एतदेवागमेन द्रढयन्नाह –

**सव्वावत्थासु जओ, पायं बंधो भवत्थजीवाणं ।**
**भणितो विचित्तभेदो, पुव्वायरिया तहा चाहू ॥७८३॥ १६/३९**

**सर्वावस्थासु** सराग-वीतराग-चेष्टारूपासु, **यतो** यस्मात्, **प्रायो** बाहुल्येन **बन्धः** सामान्य-कर्मबन्धः, **भवस्थजीवानां** संसारस्थसत्त्वानां, प्रायोग्रहणमयोगिकेवलिव्यापारनिरासार्थम्। **भणितः** प्रतिपादितो, **विचित्रभेदा** नानाप्रकारः, **पूर्वसूरयः** पूर्वाचार्याः **तथा चाहुः** ब्रुवते ॥३९॥

**सत्तविहबंधगा होंति पाणिणो आउवज्जियाणं तु ।**
**तह सुहुमसंपराया, छव्विहबंधा विणिद्दिट्ठा ॥७८४॥ १६/४०**

**मोहाउयवज्जाणं, पगडीणं ते उ बंधगा भणिता ।**
**उवसंतखीणमोहा, केवलिणो एगविहबंधा ॥७८५॥ १६/४१**

**ते पुण दुसमयट्ठितियस्स बंधगा न पुण संपरायस्स ।**
**सेलेसीपडिवण्णा, अबंधगा होंति विण्णेया ॥७८६॥ १६/४२**

**अपमत्तसंजयाणं, बंधठिती होति अट्ठ उ मुहुत्ता ।**
**उक्कोसेण जहण्णा, भिण्णमुहुत्तं तु विण्णेया ॥७८७॥ १६/४३**

**जे उ पमत्ताणाउट्टियाएँ बंधंति तेसि बंधठिती ।**
**संवच्छराणि अट्ठ उ, उक्कोसियरा मुहुत्तंतो ॥७८८॥ १६/४४ पंचगं।**

**सप्तविधबन्धकाः भवन्ति प्राणिनः** सत्त्वा, **आयुर्वर्जितानां च** प्रकृतीनामिति गम्यते । **तथा सूक्ष्मसम्परायास्तद्**गुणस्थानवर्तिनः **षड्विधबन्धा विनिर्दिष्टाः** कथिताः ॥४०॥

**मोहायुर्वर्जानां प्रकृतीनां** कर्मप्रकृतीनाम्, **ते तु** सूक्ष्मसम्परायाः, **बन्धका भणिता** उक्ताः **उपशान्तमोहाः क्षीणमोहाः केवलिन** एते त्रयोऽपि **एकविधबन्धाः** शातावेदनीयबन्धका एव ॥४१॥

**ते पुनस्त्रयोऽपि द्विसमयस्थितिकस्ये**र्यापथस्य कर्मणः, **बन्धका, न पुनः सम्परायस्य** संसारकारणस्य। **शैलेशीप्रतिपन्ना** शैलेशीव्यवस्थिता **अबन्धका भवन्ति विज्ञेयाः** सर्वस्यैव कर्मणः ॥४२॥

**अप्रमत्तसंयतानाम**प्रमादव्यवस्थितसाधूनाम्, **बन्धस्थितिर्भवत्यष्ट त्वष्टैव मुहूर्ता** नालिकाद्वयप्रमाणाः, **उत्कर्षेणो**त्कृष्टपदेन बन्धस्थितिरुत्कृष्टा, **जघन्या** लघ्वी **भिन्नमुहूर्तं तु विज्ञेया** जघन्या पुनरन्तर्मुहूर्तमवसेया। विशेषविषया चेयं बन्धस्थितिः, प्राणातिपातादौ शातावेदनीयाऽबन्धकस्याप्रमत्तयतेरप्रमादविचित्रतया समयोक्ताऽवसेया ॥४३॥

**ये तु** ये पुनः, **प्रमत्ताः** प्रमत्तसंयताः [षष्ठगुणस्थानकवर्त्तिनः - अटी.] **अनाकुट्टिकया**-ऽनुपेत्यकरणेन **बन्धन्ति** प्राणातिपातादिना कर्म स्वीकुर्वन्ति **तेषामप्रमत्तसंयतानां बन्धस्थितिः**, शातावेदनीयस्थितिः **संवत्सरान्** द्वादशमासपरिमाणान्, **अष्ट त्वष्टैव उत्कर्षवत्यु**त्कृष्टा, **इतरा** जघन्या **मुहूर्तस्यान्तर**न्तर्मुहूर्तप्रमाणा ॥४४॥

प्रस्तुतयोजनामाह -

**ता एवं चिय एयं, विहियाणुट्ठाणमेत्थ हवइ त्ति ।**
**कम्माणुबंधछेयणमणहं आलोयणादिजुयं ॥७८९॥ १६/४५**

**तत्** तस्माद् **एवमेव** सूक्ष्मविराधनासम्भवेन, **एतत्** प्रायश्चित्तम्, **विहितानुष्ठानमत्र** प्रक्रमे **भवतीति** सम्पद्यते। **कर्मानुबन्धच्छेदनं** कर्मसन्तानच्छेदकम् **अनघं** निर्दोषम्, **आलोचनादियुतमा**लोचनादिसमन्वितम्। चैत्य-साधर्मिकवन्दनादिविहितानुष्ठानगोचरत्वादालोचनाद्यर्हं विहितानुष्ठानमेवोक्तम् ॥४५॥

तत्र प्रायश्चित्तत्वाभावमाशङ्कमानः परः [तत्शङ्कां] परिजिहीर्षुश्च सूरिरिदमाह -

**विहिताणुट्ठाणत्तं, तस्स वि एवं ति ता कहं एयं ।**
**पच्छित्तं णणु ! भण्णति, समयंमि तहा विहाणाओ ॥७९०॥ १६/४६**

**विहितानुष्ठानत्वं तस्याप्यालोचनादेः एवमित्यु**क्तनीत्या, **तत्त**स्मा**त्कथं** केन प्रकारेण, **एतदा**लोचनादि **प्रायश्चित्तम् ननु भण्यते**। अत्रोत्तरम्, **समये** सिद्धान्ते **तथा**विधालोचनादेः प्रायश्चित्तत्वेन, **विधानात्** विहितत्वात् ॥४६॥

एतदेव भावयति -

**विहियाणुट्ठाणं चिय, पायच्छित्तं तदण्णहा न भवे ।**
**समए अभिहाणाओ, इट्ठत्थपसाहगं नियमा ॥७९१॥ १६/४७**

**विहितानुष्ठानमेव** शास्त्रोक्तानुष्ठानमेव, **प्रायश्चित्तं** नान्यत्, **तत्** प्रायश्चित्तम्, **अन्यथा** विहितानुष्ठानत्वपरित्यागेन, **न भवेत्** न सम्भवेत् । **समये** सिद्धान्ते **अभिधानात्** हेतोः, **इष्टार्थप्रसाधकं** इष्टफलजनकम्, **नियमात्** नियमेन, अथवा पृथग् वाक्यम्-**समये अभिधानात्** प्रतिपादनात्, तेन विधीयमानत्वादित्यर्थः । **इष्टार्थप्रसाधकं नियमा** तद्भवतीति । अत्रापि पक्षे विहितानुष्ठानरूपमेव प्रायश्चित्तम् ॥४७॥

साम्प्रतं सकलस्यैव साध्वनुष्ठानस्य विवक्षायाः प्रायश्चितत्वमुपपादयन्नाह -

**सव्वा वि य पव्वज्जा, पायच्छित्तं भवंतरकडाणं ।**
**पावाणं कम्माणं, ता एत्थं नत्थि दोसो त्ति ॥७९२॥ १६/४८**

**सर्वापि च** निरवशेषाणि च, धर्मव्यापाराङ्गीकरणेन, **प्रव्रज्या** व्रताभ्युपगमरूपा, **प्रायश्चित्तं** विशुद्धिहेतुः, **भवान्तरकृतानां** जन्मान्तरविहितानां **पापानामशुभानां कर्मणां** ज्ञानावरणादीनाम्, **तत्तस्माद् अत्र** विहितानुष्ठानस्य प्रायश्चित्तत्वे **नास्ति दोष इति** न कश्चन दोषः ॥४८॥

किं पुनः सम्यक् चरितस्य प्रायश्चित्तस्य लिङ्गमित्याह -

**चिण्णस्स णवरि लिंगं, इमस्स पाएण अकरणं तस्स ।**
**दोसस्स तहा अण्णे, नियमं परिसुद्धए बिंति ॥७९३॥ १६/४९**

**चीर्णस्य** चरितस्य सम्यक्सेवितस्य, **नवरं** केवलं **लिङ्गं** लक्षणम्, **अस्य** प्रायश्चित्तस्य, **प्रायेण** बाहुल्येन, **अकरणमनासेवनं, तस्य दोषस्य** प्रायश्चित्तार्हस्य, **तथाऽन्ये** सूक्ष्मबुद्धयो, **नियम**मकरणनियमं ग्रन्थिभेदवत्, तदबन्धरूपमासंसारं तद्दोषपरिहारस्वभावं, [**परिशुद्धये**] परिहारशुद्धये दोषविशुद्धये **ब्रुवते** प्रतिपादयन्ते ॥४९॥

एतदप्यन्यसूक्ष्मबुद्धिमतं सङ्गतमेवेत्याह -

**निच्छयणएण संजमठाणापातंमि जुज्झति इमं पि ।**
**तह चेव पयट्टाणं, भवविरहपराण साहूणं ॥७९४॥ १६/५०**

**निश्चयनयेन** निश्चयनयमतेन, **संयमस्थानापाते** देवगतावपि, तथाविधाऽव्यक्तभाव-सामायिकाऽप्रतिपाते **युज्यते** सुसङ्गत एव **तदपि** सूक्ष्मबुद्धिमतः **तथा चैव** भावितात्मतया **प्रवृतानां** प्रवृत्तिं विदधतां **भवविरहपराणा** संसारविरहप्रधानानां **साधूनां** यतीनां ते ह्यत्यन्त-साधुधर्मा भावितात्मनो देवादिगतिष्वपि वर्त्तमानाः स्वभावत एव सुन्दरं कुर्वन्ति, नेतरत् ॥५०॥

**॥ षोडशं पञ्चाशकं प्रायश्चित्तविधिप्रकरणं समाप्तम् ॥**

# ॥ सप्तदशं स्थिताऽस्थितकल्पं-पञ्चाशकम् ॥

पूर्वोक्तप्रायश्चित्तविशुद्धसाधुधर्माणां स्थितादिकल्पप्रतिपादनायाह –

**नमिऊण महावीरं, ठियादिकप्पं समासओ वोच्छं ।**
**पुरिमेयरमज्झिमजिणविभागतो वयणनीतीए ॥७९५॥ १७/१**

**नत्वा महावीर**मागमप्रसिद्धदेवकृतनामानं **स्थितादिकल्पं** स्थितास्थितकल्पं दशस्थानविषयं **समासतः** सङ्क्षेपेण, **वक्ष्ये**ऽभिधास्ये, **पूर्वेतरमध्यमजिनविभागतः** पूर्वपश्चिमजिनसाधूनां स्थितकल्पः, मध्यमतीर्थकृत्-द्वाविंशतेरस्थितकल्प इति विभागेन, **वचननीत्या**गमनीत्या ॥१॥

तत्र पूर्वकल्प इति प्रतिपादनायाह –

**दसहोहओ उ कप्पो, एसो उ पुरिमेयराण ठियकप्पो ।**
**सययासेवणभावा, ठियकप्पो णिच्चमज्जाया ॥७९६॥ १७/२**

**दशधा** दशप्रकारः **ओघतस्तु** सामान्येन **कल्पो** व्यवस्थारूपः **एष** दशविधः **पूर्वोत्तर-जिनसाधूना स्थितकल्प** उच्यते । **सततासेवनभावात्** निरन्तराचरणसद्भावात्, **स्थित-कल्पो नित्यमर्यादा** न तैरागमोक्तपुष्टालम्बनमन्तरेणोल्लङ्घनीय इति नित्यमर्यादारूपोऽयम्, कारणस्तु तेऽपि बहुगुणं चेष्टन्ते ॥२॥

कस्मादयमेवमिष्यत इत्याह –

**ततिओसहकप्पोऽयं, जम्हा एगंततो उ अविरुद्धो ।**
**सययं पि कज्जमाणो, आणाओ चेव एतेसिं ॥७९७॥ १७/३**

**तृतीयौषधकल्पोऽयं** तृतीयौषधतुल्योऽयम्, **यस्मात् एकान्ततस्तु** एकान्तेनैव **अविरुद्धः** परिणामसुन्दरत्वेन, **सततमप्य**नवरतमपि, **क्रियमाणो** विधीयमानः, **आज्ञात एवा**गमादेव, **एतेषां** पूर्वेतरसाधूनाम्, ते हि तथाकुर्वन्त कल्याणभाज एव भवन्ति ॥३॥

तृतीयौषधप्रतिपादनायाह –

**वाहिमवणेइ भावे, कुणइ अभावे तयं तु पढमं ति ।**
**बितियमवणेति न कुणति, तइयं तु रसायणं होति ॥७९८॥ १७/४**

**व्याधिं** रोगम्, **अपनयत्य**पहरति, **भावे** सद्भावे सति रोगस्य, शरीरं इति गम्यते। **करोति** जनयति **अभाव**ऽसद्भावे व्याधेः **तकं तु** व्याधिं **प्रथममिति** प्रथमौषधम्, **द्वितीयमपनयति** व्याधिं सद्भावे, **न करोत्य**पूर्वव्याधिम्, गुणांश्च **तृतीयं तु रसायनं भवति** व्याधिं सन्तं हत्वा, असन्तं चाकृत्वा, गुणमेव निवर्तयति ॥४॥

दृष्टान्तमभिधाय, दार्ष्टान्तिकप्रतिपादनायाह –

**एवं एसो कप्पो, दोसाभावेऽवि कज्जमाणो उ।**
**सुंदरभावाओ खलु, चरित्तर[1]सायणं णेओ ॥७९९॥ १७/५**

**एवं** तृतीयौषधवद् **एष कल्पः** स्थितकल्पः, **दोषाभावेऽप्य**पराधाभावेऽपि, **क्रियमाणस्तु** क्रियमाण सन्, **सुन्दरभावात्** सुन्दरत्वात्। **खलु**शब्दो वाक्यालङ्कारे, **चारित्ररसायनं** चारित्रपुष्टिहेतु**र्ज्ञेयो**ऽवगन्तव्यः ॥५॥ (१. रसायणमिव-अटी.)

'दशधौघतः कल्प' इत्युक्तं प्राक्, तद्दर्शनायेदमाह –

**आचेलक्कु१ द्देसिय२ सिज्जायर३ रायपिंड४ किइकम्मे५।**
**वय६ जेट्ठ७ पडिक्कमणे८, मासं९ पज्जोसवण१० कप्पो ॥८००॥ १७/६**

**आचेलक्यम्, औद्देशिकम्, शय्यातरपिण्डः, राजपिण्डः, कृतिकर्म, व्रतानि, ज्येष्ठः, प्रतिक्रमणम्, मासकल्पः, पर्युषवन[ षण ]कल्पः** ॥६॥

**छसु अट्ठितो उ कप्पो, एत्तो मज्झिमजिणाण विण्णेओ।**
**णो सययसेवणिज्जो, अणिच्चमेरासरूवो त्ति ॥८०१॥ १७/७**

**षट्सु** स्थानेषु, **अस्थितो**ऽनवस्थितः, **तु** पुनः **कल्प**। **एभ्यो** दशभ्यः, **मध्यमजिनानां** द्वाविंशतेः जिनानां साधूनां **विज्ञेयो** ज्ञातव्यो, **नो सततसेवनीयो** दशस्थानापेक्षया, **अनित्यमर्यादास्वरूप इति**, तेऽपि कदाचिद् दश स्थानानि पालयन्ति, कदाचिन्नेत्येवमनित्यत्वम् ॥७॥

'षट्स्वस्थित' इत्युक्तम्, तान्येव षट्स्थानान्युपदर्शयन् विषयद्वारेणाह –

**आचेलक्कुद्देसियपडिक्कमणरायपिंडमासेसु।**
**पज्जुसणाकप्पंमि य, अट्ठियकप्पो मुणेयव्वो ॥८०२॥ १७/८**

**आचेलक्यौद्देशिकप्रतिक्रमण-राजपिण्ड-मासेषु** विषयभूतेषु, **पर्युषणाकल्पे च** दशाश्रुतस्कन्धान्तर्वर्त्तिनि, **अवस्थितकल्पो मन्तव्यो**ऽवसेयः ॥८॥

**सेसेसु ठियकप्पो, मज्झिमगाणं पि होइ विण्णेओ ।**
**चउसु ठिता छसु अठिता, एत्तो च्चिय भणियमेयं तु ॥८०३॥ १७/९**

**शेषेषु** चतुर्षु स्थानेषु, **स्थितकल्पो मध्यमकानामपि** मध्यमतीर्थकरसाधूनामपि **भवति विज्ञेयः । चतुर्षु स्थिताः षट्स्वस्थिताः । अत एव** पूर्वोक्तार्थवशादेव **भणितमेतत्तु** प्रदेशान्तरे ॥९॥

**सिज्जायरपिंडंमि य, चाउज्जामे य पुरिसजेट्ठे य ।**
**कितिकम्मस्स य करणे, ठिइकप्पो मज्झिमाणं पि ॥८०४॥ १७/१०**

**शय्यातरपिण्डे च चातुर्यामे च पुरुषज्येष्ठे च कृतिकर्मणश्च करणे स्थितकल्पो** व्यवस्थितरूपः, **मध्यमानापि** मध्यमतीर्थकरसाधूनामपि ॥१०॥

आचेलक्यादिदशस्थानस्वरूपप्रतिपादनायाह -

**दुविहा एत्थ अचेला, संतासंतेसु होंति विण्णेया ।**
**तित्थगरऽसंतचेला, संताऽचेला भवे सेसा ॥८०५॥ १७/११**

**द्विविधा** द्विप्रकाराः, **अत्र** स्थितकल्पविचारे, **अचेलाः** स्वरूपतः शास्त्रोक्ताः, **सदसत्सु** विद्यमानाविद्यमानेषु वस्त्रेष्विति गम्यते । **भवन्ति विज्ञेया** ज्ञातव्याः । **तीर्थकरा असच्चेलाः** शक्रोपनीतदेवदूष(ष्य)परिभोगासम्भवात् । इतरकालं **सदचेलाः** सद्भिरपि वस्त्रैः **अचेला भवेयुः, शेषाः** साधवः ॥११॥

**आचेलक्को धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स ।**
**मज्झिमगाण जिणाणं, होइ सचेलो अचेलो य ॥८०६॥ १७/१२**

आचेलक्यहेतुत्वाद् **आचेलक्यो धर्मः पूर्वस्य च** युगादिदेवस्य **पश्चिमस्य च** महावीरस्वामिनो **जिनस्य** साधूनाम्, **मध्यमकानां जिनानां भवति सचेलोऽचेलश्चा**ऽऽगमनीत्या । श्वेतवस्त्रधारणं हि पूर्व-पश्चिमसाधूनामाचेलक्यमुक्तम् । मध्यमसाधूनां पुनरेषणीयरक्तनीलादिवर्णोपेतपट-[कम्बला]दिधारणमपि शास्त्रेऽनुज्ञातम्, अतः सचेलत्वं पुरुषभूमिकापेक्षया च भगवद्भिरूप-दिश्यमानं तद्द्वयमप्यदुष्टम् ॥१२॥

कथं पुनः पूर्व-पश्चिमानां साधूनामाचेलक्यं वस्त्रधारणेऽपि सम्भवतीत्याह-

**अमहद्धण भिन्नेहि य, आचेलक्कमिह होइ वत्थेहिं ।**
**लोगागमनीतीए, अचेलगत्तं तु पच्चयतो ॥८०७॥ १७/१३**

**अमहाधनैर**महामूल्यैः **भिन्नैश्च**खण्डितैः, **आचेलक्यम**चेलकत्वम्, इहाधिकारे **भवति** सम्भवति, **वस्त्रैरा**च्छादनैः **लोकागमनीत्या** लोकन्यायेनाऽऽगमन्यायेन च, **अचेलकत्वं** प्रस्तुतम्, **प्रत्ययतः** प्रतीतेः, लोकेऽनुचितवस्त्रे(स्य) सद्भावे तद् व्यवह्रियते, आगमेऽपि तद्विषय-प्रतिबन्धाभावेन ततः प्रतीतमेवैतत् ॥१३॥

**उद्देसियं तु कम्मं, एत्थं उद्दिस्स कीरते तयं त्ति ।**
**एत्थ वि इमो विभागो, णेओ संघादवेक्खाए ॥८०८॥ १७/१४**

**औद्देशिकं तु कर्म** आधाकर्म, **अत्र** प्रस्तावे **उद्देश्य** मनसिकृत्य, **क्रियते** विधीयते, **तकदिति** तदौद्देशिकम् । **अत्राप्ययं विभागो**ऽर्थव्याख्यारूपः, **ज्ञेयो** ज्ञातव्यः, **सङ्घाद्य**पेक्षया ॥१४॥

एतदेव व्याचष्टे -

**संघादुद्देसेणं, ओघादीहिं समणाइ अहिकिच्च ।**
**कडमिह सव्वेसिं चिय, न कप्पई पुरिमचरिमाणं ॥८०९॥ १७/१५**

**सङ्घाद्युद्देशेन**, आदिशब्दात् कुलगणादिपरिग्रहः, **ओघादिभिः** समयोक्तप्रकारैः, **श्रमणादीन्**, आदिशब्दाच्छ्रमण्यादिसकलविशेषग्रहः, **अधिकृत्या**ऽङ्गीकृत्य **कृतं** निर्वर्तितम् **इह** स्थितकल्पप्रस्तावे, **सर्वेषामेव** निरवशेषाणामेव, विवक्षितश्रमणाद्यपेक्षया, **न कल्पते पूर्व-चरमजिनसाधूनां** प्रस्तुतानाम् ॥१५॥

**मज्झिमगाणं तु इयं, कडं जमुद्दिस्स तस्स चेव त्ति ।**
**नो कप्पइ सेसाण उ, कप्पइ तं एस मेर त्ति ॥८१०॥ १७/१६**

**मध्यमकानां** मध्यमतीर्थकरसाधूनां **त्विदं** प्रक्रान्तौद्देशिकं **कृतं** निर्वर्तितं **यं** विवक्षितं **उद्दिश्या**धिकृत्य, **तस्य चैवेति** तस्यैव विवक्षितसाध्वादेः **नो** नैव **कल्पते, शेषाणां तु** साध्वादीनां **कल्पते** समर्थीभवति **तदा**द्देशिकम्, न शेषाणां परिहार्यमितिभावः । **एषा मेरा** मर्यादेति ऋजुप्रज्ञत्वादेषाम्, प्रज्ञापनीयत्वाच्च लोकानामियं व्यवस्था ॥१६॥

**सेज्जायरो त्ति भण्णति, आलयसामी उ तस्स जो पिंडो ।**
**सो सव्वेसि न कप्पति, पसंगगुरुदोसभावेण ॥८११॥ १७/१७**

**शय्यातर इति भण्यत** अभिधीयते, **आलयस्वामी तु** साध्वाऽऽश्रयस्वामी **तस्य यः पिंडः, स सर्वेषा**माश्रयान्तरस्थितसाधूनां **न कल्पते प्रसङ्गगुरुदोषभावेन** प्रकृष्टः सङ्गः प्रसङ्गस्तस्मिन्, [प्रसङ्गो] गुरवश्च ते दोषाश्च [तेषां भावः], तेन तद्भावेन तत्सत्तया ॥१७॥

दोषानेवाह -

**तित्थंकरपडिकुट्ठो, अण्णायं उग्गमो वि य न सुज्झे ।**
**अविमुत्ति यऽलाघवया, दुल्लहसेज्जा विउच्छेओ ॥८१२॥ १७/१८**

**तीर्थकरै**र्भगवद्भिः **प्रतिकृष्टः** प्रतिषिद्धः **अज्ञातम**ज्ञातोञ्छमज्ञातचर्या । **उद्गमोऽपि** चोद्गमदोषरूपः, **न शुध्यति** न शुद्धिमासादयति । **अविमुक्तिः** सलोभता । न विद्यते लाघवमस्येत्यलाघवस्तद्भावः **अलाघवता** । प्रतिबन्धान्नलाघवमासेवितं भवति, **दुर्लभशय्या** येन शय्या देया, तेन किलाहारोऽपि देयः तत्प्रदानशक्त्यभावे, साधूनां किं तयैव केवलया दत्तयेति गृहपत्यभिप्रायात्, दुर्लभा शय्या जायते, यदैवाश्रयाऽऽहारदानसामर्थ्यं तदैव तां दद्यान्नान्यदा, **व्यवच्छेदः** शय्याया एव, आगमिनि काले विशिष्टसामर्थ्याभावेन निर्वाहाभावात्, पूर्वमपि सति सामर्थ्ये कश्चिन्न दद्यादित्येवमुभयावस्थयोरपि शय्याव्यवच्छेदः । शय्यातरपिण्डग्रहणे समयोक्ता दोषाः ॥१८॥

**पडिबंधनिरागरणं, केई अण्णे अगहियगहणस्स ।**
**तस्साउंटणमाणं, एत्थऽवरे बेंति भावत्थं ॥८१३॥ १७/१९**

**प्रतिबन्धनिराकरणं** ममत्वनिरासम्, **केचिदन्येऽ**परे [आचार्या,] **अगृहीतग्रहणस्य**, अगृहीतभक्तपानादेः **तस्य** शय्यातरस्य, **आकुंटनमा**वर्जनम्, **आज्ञां** सर्वज्ञाज्ञाम् **अत्रापरे ब्रूवन्ति** प्रतिपादयन्ति, **भावार्थं** तात्पर्यम् ॥१९॥

**मुदितादिगुणो राया, अट्ठविहो तस्स होति पिंडो त्ति ।**
**पुरिमेयराणमेसो, वाघातादीहिं पडिकुट्ठो ॥८१४॥ १७/२०**

*मुइओ मुद्धभिसित्तो, मुइजो जो होई जोणिसुद्धो उ ।*
*अहिसित्तो उ परेहिं, सयं भरहो जहा राया ॥*

[बृहत्कल्पभाष्य गाथा-६३८, निशीथभाष्य गाथा-२४९८]

**मुदितादिगुणो राजा**, इत्यादि चागमोक्तः । **अष्टविधो** वक्ष्यमाणः, **तस्य** राज्ञः, **भवति पिण्ड इति** यः प्रस्तुतो राजपिण्डः, **पूर्वेतराणां** साधूनां ऋषभ-महावीरसम्बन्धिनाम् **एष** राजपिण्डः, **व्याघातादिभि**र्वक्ष्यमाणैः दोषैः **प्रतिक्रुष्टः** प्रतिषिद्धः ॥२०॥

व्याघातादीनेवाहुः -

**ईसरपभितीहिं तहिं, वाघातो खद्धलोहुदाराणं ।**
**दंसणसंगो गरहा, इयरेसि न अप्पमादाओ ॥८१५॥ १७/२१**

राजावितीर्णचामराद्यलङ्कार **ईश्वरः**, तत्**प्रभृतिः**, तलवरमण्डवा[माडम्बिका]धिपाद्यैः, प्रविशद्भिर्निष्क्रामद्भिश्च सपरिकरैः, **तस्मिन्** राजकुले, **व्याघातो**ऽवधीरणा स्खलना, आत्मीयस्वाध्यायादिकार्यविघातो वा, तस्मिन्नेव **खद्धे** प्रभृते लभ्यमाने, **लोभः** प्रभूतलोभः खद्धे प्रभूते (= हैमदेशीनाममाला २.६७) प्रभूतार्थोऽयं खद्धः शब्दः देश्यः। **उदाराणा**मुदारशरीराणां हस्त्यश्वस्त्रीपुरुषादीनां **दर्शने सङ्गो**ऽभिष्वङ्गः, कस्यचित् स्यात्। **गर्हा** निरभिष्वङ्गा "यतय एते किल, तथाप्यदृष्टकल्याणवत्, सङ्गं कुर्व्वन्ति व्याक्षिप्तचेतसः परसमृद्धिषु" इत्येवं निन्दा। एते व्याघातयो दोषा राजपिण्डग्रहणे, पूर्वेतरसाधूनां प्रमादसम्भवात् **इतरेषां** मध्यमतीर्थकृत्साधूनां **न** व्याघातादयो दोषाः, **अप्रमादात्** प्रमादाभावाद्धेतोः तेषां हि भगवतामृजुप्रज्ञत्वाद्विशिष्टतराप्रमाद-सचिवं सर्वमेवानुष्ठानमतो विशेषः ॥२१॥

अष्टविधत्वप्रतिपादनायाह -

**असणादीया चउरो, वत्थं पायं च कंबलं चेव ।**
**पाउंछणगं च तहा, अट्ठविहो रायपिंडो उ ॥८१६॥ १७/२२**

**अशनादिका** अशन-पान-खाद्य-स्वाद्याहाराः **चत्वारः, वस्त्रं पात्रं च कम्बलश्चैव पादप्रोञ्छनकं च** रजोहरणाख्यं **तथा। अष्टविधो राजपिण्डस्तु**, एषोऽष्टविधः परिवर्जनीयः ॥२२॥

**कितिकम्मं ति य दुविहं, अब्भुट्ठाणं तहेव वंदणगं ।**
**समणेहि य समणीहि य, जहारिहं होति कायव्वं ॥८१७॥ १७/२३**

**कृतिकर्मेति च द्विविधम् अभ्युत्थान**मभिमुखमुत्थानम् **तथैव वन्दनकं** द्वादशावर्तादि, **श्रमणैः** साधुभिः **श्रमणीभिश्च** साध्वीभिः **यथार्हं** यथायोग्यं **भवति कर्तव्यं** विधेयम् ॥२३॥

**सव्वाहिं संजतीहिं, कितिकम्मं संजयाण कायव्वं ।**
**पुरिसोत्तमो त्ति धम्मो, सव्वजिणाणं पि तित्थेसु ॥८१८॥ १७/२४**

**सर्वाभिः संयतीभिः** संयमवतीभिः, **कृतिकर्म** प्रस्तुतं **संयतानां** साधूनां **कर्तव्यमनुष्ठेयम्। पुरुषोत्तमः** पुरुषप्रधानो **धर्म** इति कृत्वा, **सर्वजिनानामपि** चतुर्विंशतेरपि, **तीर्थेषु** प्रवचनेषु ॥२४॥

व्यतिरेके दोषमाह -

**एयस्स अकरणंमी, माणो तह णीयकम्मबंधो त्ति ।**
**पवयणखिंसाऽयाणग, अबोहि भववुड्ढि अरिहंमि ॥८१९॥ १७/२५**

**एतस्य** कृतिकर्मणः, **अकरणे**ऽसम्पादने, **मानो**ऽभिमानः सेवितो भवति, विधेयाप्रवृत्तेः **तथा च नीचकर्मबन्ध इति** नीचैर्गोत्रकर्मबन्धो विनयाऽकरणात्, **प्रवचनखिंसा** शासननिन्दा, विनयमूलधर्मप्रतिपादनेऽपि स्वयं वन्दनाप्रवृत्तेः । किमिदं प्रवचनमेव न प्रमाणं तेनैवं चेष्टते, **अज्ञायका** 'अज्ञा एते' इति खिंसैव, लोकव्यवहारमप्येते न जानन्तीति भावः, **अबोधिर**बोधि-लाभफलं कर्म, **भववृद्धिः** संसारवृद्धिः **अर्हे** वन्दनोचिते, कृतिकर्माऽकुर्वतामेते दोषाः ॥२५॥

तथा चाह -

**पंचवतो खलु धम्मो, पुरिमस्स च पच्छिमस्स य जिणस्स ।**
**मज्झिमगाण जिणाणं, चउव्वतो होति विण्णेओ ॥८२०॥ १७/२६**

**पञ्चव्रतः खलु** पञ्चयामो **धर्मः पूर्वस्य च** ऋषभस्वामिनः, **पश्चिमस्य च** महावीरस्वामिनः **जिनस्य** वचनवृत्त्या, **मध्यमकानां जिनानां** द्वाविंशतेः **चतुर्व्रत**श्चतुर्यामो धर्मो वचनवृत्त्या **भवति**, **विज्ञेयो** ज्ञातव्यः, परमार्थतस्त्वभिन्न एव ॥२६॥

तथा चाह -

**नो अपरिग्गहियाए, इत्थीए जेण होइ परिभोगो ।**
**ता तव्विरईए च्चिय, अबंभविरइ त्ति पण्णाणं ॥८२१॥ १७/२७**

**नो** नैव, **अपरिगृहीतायाः** अस्वीकृतायाः **स्त्रिया** योषितः, **येन** कारणेन **भवति** जायते **परिभोगः** समासेवनम् । **तत्**तस्मात् **तद्विरत्यैवऽब्रह्मविरतिरित्य**वाऽब्रह्मचर्यविरतिः, **प्रज्ञानां** [एतत् प्रजानन्ति ये, ते प्रज्ञाः - अटी.] जानताम्, प्राज्ञानां वा प्रज्ञावताम् ॥२७॥

**दुण्हऽवि दुविहोऽवि ठिओ, एसो आजम्ममेव विण्णेओ ।**
**इय वइभेया दुविहो, एगविहो चेव तत्तेणं ॥८२२॥ १७/२८**

**द्वयोरपि** पूर्व-पश्चिमसाधूनां द्वाविंशतेश्च । **द्विविधोऽपि** पञ्चयाम-चतुर्यामरूपः **स्थितो** व्यवस्थितः, **एष** प्रस्तुतकल्पः । **आजन्मैव** सकलं जन्माभिव्याप्य **विज्ञेयो** ज्ञातव्यः, इत्येवमुक्तनीत्या, **व्रतभेदाद्** व्रतोच्चारणभेदात् । पञ्च-चतुर्ष्वप्याख्यानात् । **द्विविधो**ऽपि द्विप्रकार, **एकविध एव तत्त्वेन** परमार्थेनैकस्वरूप एव, प्रज्ञाविशेषकृतस्तु भगवद्भिः शिष्याऽनुग्रहाय विशेषः प्रतिपाद्यते ॥२८॥

**उवठावणाएँ जेट्ठो, विण्णेओ पुरिमपच्छिमजिणाणं ।**
**पव्वज्जाए उ तहा, मज्झिमगाणं निरतियारो ॥८२३॥ १७/२९**

**उपस्थापनया** महाव्रतारोपणारूपया, **ज्येष्ठो** रत्नाधिकः **विज्ञेयः पूर्व-पश्चिमजिनानां** तत्साधूनाम्, **प्रव्रज्यया तु** सामायिकप्रतिपत्तिरूपया, **तथा मध्यमानां** मध्यमतीर्थकृतसाधूनां **निरतिचारः** सकलातिचाररहितः, ज्येष्ठो भवतीति सम्बन्धः ॥२९॥

उपस्थापनया ज्येष्ठ इत्युक्तम्, तद्विधिप्रतिपादनायाह –

**पढिए य कहिएँ अहिगएँ, परिहर उवठावणाएँ कप्पो त्ति ।**
**छक्कं तीहिँ विसुद्धं, सम्मं नवएण भेदेण ॥८२४॥ १७/३०**

**पठिते च** पाठतः शस्त्रपरिज्ञादौ, **कथिते** व्याख्यातेऽर्थप्रकाशनया, **अधिगते** सम्यग् ज्ञाते, **परिहरन्** प्रतिषिद्धाऽऽसेवनवर्जनेन । **उपस्थापनया** व्रतारोपणस्य **कल्प्य इति** योग्यः, किं परिहरन् ? **षट्कं** व्रतषट्कं जीवनिकायषट्कं च, **त्रिभिर्विशुद्ध**मतीतवर्तमानभाविभिः कालः **विशुद्धं** निन्दा-संवरण-प्रत्याख्यानैः, **सम्यक्** शास्त्रन्यायेन, **नवकन भेदेन** कृतकारितानुमतिमनोवाक्कायलक्षणेन ॥३०॥

**पितिपुत्तमाइयाणं, समगं पत्ताण जेट्ठ पितिपभिई ।**
**थेवंतरे विलंबो, पण्णवणाए उवट्ठवणा ॥८२५॥ १७/३१**

**पितापुत्रकादीनां** जनकसुतादीनाम्, आदिशब्दात् पितृव्य-मातुलादिपरिग्रहः । **समकं** युगपत्, **प्राप्तानामु**पस्थापनाप्राप्तानाम्, **ज्येष्ठा** व्रतज्येष्ठाः, **पितृप्रभृतयः** क्रियन्ते, **स्तोकान्तरे** प्राप्तिमाश्रित्य, **विलम्बः** प्रतीक्षणं सुतादेरिति गम्यते, **प्रज्ञापनया** पित्राद्यवबोधनेन विशिष्टलग्नान्तराद्यभावे, **उपस्थापना** महाव्रतारोपणम् ॥३१॥

**सपडिक्कमणो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स ।**
**मज्झिमगाण जिणाणं, कारणजाए पडिक्कमणं ॥८२६॥ १७/३२**

**गमणागमणविहारे, सायं पाओ य पुरिमचरिमाणं ।**
**नियमेण पडिक्कमणं, अइयारो होउ वा मा वा ॥८२७॥ १७/३३**

**मज्झिमगाण उ दोसे, कहंचि जायम्मि तक्खणा चेव ।**
**[1]दोसपडिवारणाए, गुणावहं तह पडिक्कमणं ॥८२८॥ १७/३४**

**सप्रतिक्रमणो धर्मः पूर्वस्य पश्चिमस्य च जिनस्य** साधूनाम्, **मध्यमकानां जिनानां**-अर्हद्द्वाविंशतेः साधूनां **कारणजाते** समुत्पन्नकारणे, कारणसमूहे वा, **प्रतिक्रमणं** विधेयम्, न सर्वदा ॥३२॥

गमनं चागमनं च विहारश्च चैत्यसाधुवन्दनादौ, **गमनागमनविहारं** तस्मिन् । **सायं** विकालवेलायां **प्रातश्च** प्रभाते, **पूर्वचरम**साधूनाम्, **नियमेन** नियोगेन, **प्रतिक्रमण**मीर्यापथिक-प्रतिक्रमणम्, दैवसिकं च रात्रिकरूपं च **अतिचारो भवतु वा, मा वा** भूत् ॥३३॥

**मध्यमकानां** मध्यमजिनसाधूनां **दोषे**ऽपराधे **कथञ्चित्** प्रमादात् **जाते** समुत्पन्ने **तत्क्षणादेव** कालव्याक्षेपमन्तरेण, **दोषप्रतिवारणया** दोषनिषेधेन, [**दोसपडियारणाया-दोषप्रतिकार-ज्ञाताद्**-रोगचिकित्सोदाहरणेन। अटी.] **गुणावहं** गुणकारणम्, **तथा प्रतिक्रमणं** तेषामपि सायं प्रातश्चावश्यकरूपं न, [अपि] त्वनियमेन, तेष्वपि तीर्थेषु सामायिकादिसूत्रभावात् । तस्य च सन्ध्याकालप्रत्यासत्तिप्रतिबन्धस्थितित्वात् । अपरसन्ध्यायां दैवसिकम्, पूर्वसन्ध्यायां रात्रिकमनादिकालसंसिद्धश्चायं व्यवहार: ॥३४॥ (१. दोसपडियारणाया-अटी.)

**पुरिमेयरतित्थयराण मासकप्पो ठिओ विणिद्दिट्ठो ।**
**मज्झिमगाण जिणाणं, अट्ठियओ एस विण्णेओ ॥८२९॥ १७/३५**

**पूर्वेतरतीर्थकर**साधूनां **मासकल्पो** मासकल्पप्रकृतानुसार्यनुष्ठानविशेष:, न तु मासावस्थानमात्रं शेषक्रियाविकलमेव, **स्थितो** व्यवस्थित:, **विनिर्दिष्ट:** कथित:, **मध्यमकानां जिनाना** मध्यमतीर्थकर-साधूनाम् **अस्थितको**ऽस्थितरूप एव, स्वल्पेनापि कारणेन गुणदोषापेक्षया-ऽतदुल्लङ्घनाद् **एष** मासकल्प: **विज्ञेयो** ज्ञातव्य: ॥३५॥

**पडिबंधो लहुयत्तं, न जणुवयारो न देसविण्णाणं ।**
**नाणाराहणमेए, दोसा अविहारपक्खम्मि ॥८३०॥ १७/३६**

**प्रतिबन्धो** द्रव्यादिप्रतिबन्ध:, **लघुकत्वं** जनमध्ये लाघवम्, प्रतिबन्ध: स हि तपस्वी, यस्य लाघवहेतुत्वात् प्रसिद्धं चैतद्विदुषामितरेषां च **न जनोपकारो** विभिन्नक्षेत्रावस्थितानां लोकानां धर्मार्थिकानामेकक्षेत्रनिवासे साधुभ्यो, न दर्शनम्, न पर्युपासनम्, विनयधर्मश्रवणादिभिर्महानुपकारो यथा, तेभ्य एव गुणव्यवस्थितेभ्य:, सर्वसत्वहितनिरतेभ्य:, यथागमं विहरद्भ्य: सम्पद्यते । **न देशविज्ञानं** नानादेशस्वरूपविज्ञानं समुदायनिर्वाहफलम्, स्वपरोपकारक्षमम्, प्रयोजनसमुत्पन्नै: नैकक्षेत्रनिवासे(स:) साधूनां सम्भवति । **न नैवाज्ञाराधनं** सर्वज्ञाज्ञासम्पादनम्, **एते दोषा अविहारपक्षे**, तस्मादागमानुसारी मासकल्प एव श्रेयान् ॥३६॥

**कालादिदोसओ पुण, न दव्वओ एस कीरई नियमा ।**
**भावेण उ कायव्वो, संथारगवच्चयादीहिं ॥८३१॥ १७/३७**

**कालादिदोषत: पुन:** दु:षमाकाल-मासकल्पायोग्यक्षेत्रादिदोषत:, **न** नैव, **द्रव्यत:**

सकलक्रियाद्वारेणैष मासकल्पः, **क्रियते** विधीयते । **नियमान्नियमेन, भावेन तु** भावमाश्रित्य, **कर्तव्यो** मासकल्पः, **संस्तारकव्यत्ययादिभिः** संस्तारकभूमिविपर्ययासादिभिः । यथोक्तम्—

*गोयरमाईयाणं एत्थं परियत्तणं तु मासादौ ।*
*जह-संभवं निओगो संथारम्मी विही भणिओ ॥ ३७ ॥*

**पज्जोसवणाकप्पोऽपेवं पुरिमेयरादिभेदेणं ।**
**उक्कोसेतरभेदो, सो नवरं होइ विण्णेओ ॥८३२॥ १७/३८**

**पर्युत्सवना( पर्युषणा )कल्पोऽप्येवं पूर्वेतरादिभेदेन** पूर्व-पश्चिमजिनसाध्वादिभेदेन, आदिशब्दान्मध्यमजिनसाधुपरिग्रहः, उत्कृष्ट-जघन्यौ भेदावस्य **इत्युत्कृष्टेतरभेदः । स** पर्युत्सवना(पर्युषणा)कल्पः **। नवर** केवलं **भवति विज्ञेयो**ऽवबोद्धव्यः ॥३८॥

**चाउम्मासुक्कोसो, सत्तरि राइंदिया जहण्णो उ ।**
**थेराण जिणाणं पुण, नियमा उक्कोसओ चेव ॥८३३॥ १७/३९**

**चतुर्मासं,** *स्वार्थे 'ष्यञ्'*[ ] विधानात्, चातुर्मासी, **उत्कृष्टो** ज्येष्ठः । **सप्तति रात्रिंदिवानि** अहोरात्राणि । **जघन्यस्तु स्थविराणां** स्थविरकल्पिकानाम्, **जिनानां पुन**र्जिनकल्पिकानाम्, **नियमान्नियमेन उत्कृष्ट एव,** नेतरः ॥३९॥

**दोसासति मज्झिमगा, अच्छंति उ जाव पुव्वकोडी वि ।**
**इहरा उ ण मासं पि हु, एवं खु [१]विदेहजिणकप्पे ॥८३४॥ १७/४०**

**दोषाणामसत्य**भावे, **मध्यमका** मध्यमतीर्थकरसाधव, **आसते त्व**तिष्ठन्त एवैकक्षेत्रे, यावत् **पूर्वकोट्यपि** पूर्वकोटीमपि यावत् । **इतरथा**ऽन्यथा पुनर्न **मासमपि,** हुर्वाक्यालङ्कारे, **एवं खु** एवमेव **विदेहजिनकल्पिकाः** महाविदेहक्षेत्रे व्यवस्थितजिनसाधवः [विदेहजिणकप्पि-विदेहजिनकल्पे इति अटी.-इति पाठान्तरत्वेन स्वीकृतः] ॥४०॥ (१. विदेहजिणकप्पि-अटी.)

**एवं कप्पविभागो, ततिओसहणातओ मुणेयव्वो ।**
**भावत्थजुओ एत्थ उ, सव्वत्थ वि कारणं एयं ॥८३५॥ १७/४१**

**एवमुक्तनीत्या, कल्पविभाग** आचेलक्यादिदशविधस्थिताऽस्थितकल्पविभागः, **तृतीयौषधज्ञाततस्**तृतीयौषधोदाहरणेन, **मन्तव्यो** ज्ञातव्यः, **भावार्थयुतो** गर्भार्थयुक्तः, **अत्र तु** दशविधकल्पे, **सर्वत्रापि** स्थितास्थितादौ, **कारणं** निमित्तम् **एतद्** वक्ष्यमाणं वर्तते ॥४१॥

तदेवाह -

**पुरिमाण दुव्विसोज्झो, चरिमाणं दुरणुपालओ कप्पो ।**
**मज्झिमगाण जिणाणं, सुविसोज्झो सुहणुपालो य ॥८३६॥ १७/४२**

[**पूर्वेषाम्**] पूर्व(आद्य, अटी.)तीर्थकरसाधूनाम्, **दुर्विशोध्यो** दुर्विशोधनीयः **चरमतीर्थकर-साधूनां** दुःखेनानुपाल्यत इति दुरनुपालः, स एव **दुरनुपालकः कल्पः** प्रस्तुतः । **मध्यमकानां जिनानां** मध्यमतीर्थकरसाधूनाम्, **सुविशोध्यः** सुशोधनीयः, सुखेनानुपाल्यत इति **सुखानुपालश्च** ॥४२॥

**उज्जुजडा पुरिमा खलु, णडादिणायाउ होंति विण्णेया ।**
**वक्कजडा पुण चरिमा, उजुपण्णा मज्झिमा भणिया ॥८३७॥ १७/४३**

ऋजवश्च ते जडाश्च **ऋजुजडाः । पूर्वे** पूर्वतीर्थकरसाधवः । **खलु नटादिज्ञातात्** आदिशब्दात् प्रेक्षणकादि-परिग्रहः, **भवन्ति विज्ञेयाः**, ऋजुत्व-जडत्वाभ्यां तेषां हीदं जडत्वं-यन्नटाद्यवलोकेन निषिद्धे, प्रेषणकाद्यप्रतिषिद्धं मन्यमानाः पश्यन्त्येव, गुरुभिस्तु रागद्वेषादिमूलत्वेन तस्मिन्नेव निवारिते, स्वच्छाऽऽशयत्वात् तदपि तथाविधं मन्यमानाः परिहरन्तीति तेषामृजुत्वं । **वक्रः जडाः पुनश्चरम**तीर्थकरसाधवः, सामान्येन जडत्वाद् दोषाऽऽसेवनेऽपि भूयसामृजुत्वपरिणामाभावात् वक्रत्वोपपत्तेः । **ऋजुप्रज्ञा** । प्रजानन्तीति प्रज्ञाः । *'आतश्चोपसर्ग'* इति जानातेः प्रोपसर्गपूर्वात्कर्तरि कः । जडप्रतिपक्षभूतगुणपरिग्रहश्चानेनोक्तः, ऋजुत्वं शुभभावत्वम्, ऋजवश्च ते प्रज्ञाश्चेति समासः, **मध्यमा** मध्यमतीर्थकरसाधवः **भणिताः** कथिताः ॥४३॥

**कालसहावाउ च्चिय, एतो एवंविहा उ पाएणं ।**
**होंति अओ उ जिणेहिं, एएसि इमा कया मेरा[1] ॥८३८॥ १७/४४**

**कालस्वभावादेव** तावत्कालसामर्थ्यादेव, **एते** ऋजु-जडादयः । **एवंविधास्तु** व्यावर्णितस्वभावा एव, **प्रायेण** बाहुल्येन, **भवन्ति** जायन्ते तत्तत्कालविभागाः **अतस्तु** अत एव हेतोः **जिनै**र्भगवद्भिरनुग्रहप्रभृतैः **एतेषा**मृजुजडादीनां कृत्वा, विहिता **इयम्**क्तस्वरूपा **मेरा** मर्यादा ॥४४॥ (१. मेर-अटी.)

**एवंविहाण वि इहं, चरणं दिट्ठं तिलोगणाहेहिं ।**
**जोगाण थिरो भावो, जम्हा एएसि सुद्धो उ ॥८३९॥ १७/४५**

**अथिरो उ होइ इयरो, सहकारिवसेण न उण तं हणइ ।**
**जलणा जायइ उण्हं, वज्जं न उ चयइ तत्तं पि ॥८४०॥ १७/४६ जुम्म।**

**एवंविधानामपि** ऋजुजडादीनामपि **इह** प्रक्रमे कल्पे मनुष्यलोके, **चरणं** चारित्रम्, **दृष्टमु**पलब्धं केवलज्ञानचक्षुषा, **त्रिलोकनाथै**र्लोकत्रयस्वामिभिः । **योग्यानां** प्रव्रज्योचितानाम्, **स्थिरः** प्रतिष्ठितः, **भावो**ऽध्यवसायः, **यस्मादेतेषा**मृजुजडादीनां **शुद्धस्तु** शुद्ध एव सन् भवति ॥४५॥

**अस्थिरस्त्व**प्रतिष्ठितरूपः, कदाचित्कः, **भवतीतरो**ऽशुद्धः, **सहकारिवशेन** द्रव्यादिसामग्री-कर्मोदयसामर्थ्येन **न पुनस्तं** योग्यस्थिरभावं **हन्ति** विनाशयति, तदुच्छेदापादनेन । दृष्टान्तमाह-**ज्वलनाद्** वह्नेः **जायते** भवति **उष्णं वज्रं** पार्थिवविकाररूपम्, **न तु** नैव, **त्यजति** सर्वथा मुञ्चति, **तत्त्वमपि** स्वरूपमपि, यथा काष्ठादयो ज्वलनसम्पर्काद् भस्मसाद् भवन्ति, नैवं वज्रम्, भस्मसाद्भावानापत्तेः ॥४६॥

**इय चरणम्मि ठियाणं, होइ अणाभोगभावओ खलणा ।**
**न उ तिव्वसंकिलेसा, णऽवेति चारित्तभावोऽवि ॥८४१॥ १७/४७**

**इत्येवं चरणे** चारित्रे **स्थितानां** व्यवस्थितानां **भवति** जायते । **अनाभोगभावतो**-ऽपरिज्ञानभावेन, **स्खलना** क्रियाप्रबन्धाऽप्रवृत्तिरूपा, **न तु** नैव **तीव्रसङ्क्लेशाद्** द्वादशकषायोदय-जन्यात् **नापैति** नापगच्छति **चारित्रभावोऽपि** चारित्रपरिणामोऽपि, किन्तु अनवस्थित एवास्ते ॥४७॥

**चरिमाण वि तह णेयं, संजलणकसायसंगयं चेव ।**
**माइट्ठाणं पायं, असइं पि हु कालदोसेणं ॥८४२॥ १७/४८**

**चरिमाणामपि** चरमतीर्थकरसाधूनामपि, **तथा तेन** रूपेण, **ज्ञेयं** ज्ञातव्यं चरणम्, **सञ्ज्वलनकषायसङ्गतमेव**-अल्पतरकषायसमन्वितमेव । **माइट्ठाणं** ति [**मातरः** स्त्रियोऽभिधीयन्ते, तासां स्थानम्, अटी.] **मातृस्थानं** मायास्थानं माया **प्रायो** बाहुल्येन केषाञ्चिन्न सम्भवत्येवेति प्रायोग्रहणम्, **असकृद**नेकशो**ऽपि** । हुर्वाक्यालङ्कारे, **कालदोषेण** दुःषमास्वभावेन ॥४८॥

व्यतिरेकसारमाह -

**इहरा उ न समणत्तं, असुद्धभावाउ हंदि विण्णेयं ।**
**लिंगंमि वि भावेणं, सुत्तविरोहा जओ भणियं ॥८४३॥ १७/४९**

**इतरथा** त्वन्यथा पुनः **न श्रमणत्वं** यतित्वम्, । **अशुद्धभावा**दशुद्धाध्यवसायात् । हन्तेत्यामन्त्रणम्, **विज्ञेय**मवबोद्धव्य्, **लिङ्गेऽपि** रजोहरणादौ सत्यपि, **भावे**नाभ्यन्तरपरिणामेन, **सूत्रविरोधा**दागमविरोधाद् **यतो** यस्माद् **भणित**मुक्तम् ॥४९॥

**सव्वेऽवि य अइयारा, संजलणाणं तु उदयतो होंति ।**
**मूलच्छेज्जं पुण होति बारसण्हं कसायाणं ॥८४४॥ १७/५०**

**सर्वेऽपि चातिचाराः** सर्वेप्यबाधाः **सञ्ज्वलनानां तु** सञ्ज्वलनानामेव **उदयतो** विपाकाद् **भवन्ति** सञ्जायन्ते । **मूलच्छेद्यं**-मूलप्रायश्चित्तछेद्यम्, चारित्रमिति गम्यते, **पुनर्भवति द्वादशानां कषायाणा**मुदयत इति सम्बध्यते ॥५०॥

**एवं च संकिलिट्ठा, माइट्ठाणंमि निच्चतल्लिच्छा ।**
**आजीवियभयगत्था, मूढा नो साहुणो णेया ॥८४५॥ १७/५१**

**एवं चो**क्तनीत्या, **सङ्क्लिष्टा** द्वादशकषायोदयोदयवर्तिनः, **मातृस्थाने** मायास्थाने, **नित्यतल्लिप्सा** नित्यतत्पराः, **आजीविकाभयग्रस्ता** धनादिविरहिताः, कथं दुर्भिक्षादिषु वयं जीविष्याम इत्याजीविकाभयाभिभूतमानसाः । **मूढा** मोहवन्तो **नो** नैव **साधवो** भावसाधवो **ज्ञेया** ज्ञातव्याः ॥५१॥

**संविग्गा गुरुविणया, नाणी दंतिंदिया जियकसाया ।**
**भवविरहे उज्जुत्ता, जहारिहं साहुणो होंति ॥८४६॥ १७/५२**

**संविग्नाः** संसारभीरवः तद्विरक्तत्वेन **गुरुषु विनताः** प्रणताः गुर्वनुकूलाः, **ज्ञानिनः** सम्यग्ज्ञानवन्तः । **दान्तेन्द्रियाः** जितेन्द्रियाः **जितकषायाः** निगृहीतक्रोधादयः, **भवविरहे** संसारविरहे, आत्मनः कर्तव्ये, **उद्युक्ता** उद्योगवन्तः, **यथार्हं** देशकालाद्यपेक्षया, **साधवो** भावसाधवो **भवन्ति** ॥५२॥

**॥ सप्तदशं स्थितास्थितकल्पविधिप्रकरणं पञ्चाशकं समाप्तम् ॥**

# ॥ अष्टादशं भिक्षुप्रतिमा-पञ्चाशकम् ॥

स्थितास्थितकल्पप्रतिपादितगुणव्यवस्थितानामेव प्रतिमाकल्पयोग्यतोपपत्तेस्तत्प्रत्यासत्त्या प्रतिमाकल्पप्रतिपादनायाह -

**नमिऊण वद्धमाणं, भिक्खुप्पडिमाण लेसओ किंपि ।**
**वोच्छं सुत्ताएसा, भव्वहियट्ठाएँ पयडत्थं ॥८४७॥ १८/१**

**नत्वा** नमस्कृत्य, कल्याण-विजयाभ्यां **वर्धमानं** भगवन्तम्, **भिक्षुप्रतिमानां लेशतः** सङ्क्षेपेण, **किमपि** किञ्चिद्, **वक्ष्ये**ऽभिधास्ये, **सूत्रादेशादागमादेशाद् भव्यहितार्थाय** भव्यहितप्रयोजनाय, **प्रकटार्थं** परिस्फुटार्थम् ॥१॥

**बारस भिक्खूपडिमा, ओहेणं जिणवरेहिं पण्णत्ता ।**
**सुहभावजुया काया, मासादीया जतो भणियं ॥८४८॥ १८/२**

**द्वादश भिक्षुप्रतिमाः** समयप्रसिद्धाः, **ओघेन** सामान्येन, **जिनवरै**र्भगवद्भिः, **प्रज्ञप्ताः** कथिताः **शुभभावयुताः कायाः** शरीराणि, **मासादिका** मास आदिर्यासां ताः, तथा, **यतो** यस्माद्, **भणितमुक्तम्** ॥२॥

यदुक्तं तदाह -

**मासादी सत्तंता, पढमाबितितइयसत्तराइदिणा ।**
**अहराइ एगराई, भिक्खूपडिमाण बारसगं ॥८४९॥ १८/३**

**मासादयः प्रतिमाः, सप्तान्ताः** सप्तमासान्ताः, सप्त भवन्ति, प्रथमैकेन मासेन । द्वितीया द्वाभ्याम् । तृतीया त्रिभिः । चतुर्थी चतुर्भिः । पञ्चमी पञ्चभिः । षष्ठी षड्भिः । सप्तमी सप्तभिः मासैः । अष्टमी पुनः प्रथमसप्तरात्रिदिना । नवम्यपि द्वितीयसप्तरात्रिदिना । दशम्यपि तृतीय-सप्तरात्रिदिना । एकैकाः सप्तभिर्दिवसैः परिपूर्णा भवन्ति । **अहोरात्रिकी**ऽअहोरात्रद्वयेन **एकरात्रिः**, एकरात्रिकी रात्रिमात्रेण, **भिक्षुप्रतिमानां द्वादशमेतद्** भवति [१. पढमा-बिइ-तइय-सत्तराइदिण त्ति-सप्तानामुपरि प्रथमा-द्वितीया तृतीया च सप्त रात्रिंदिवानि यस्यां सा । अ.टी. २. अहश्च रात्रिश्च-तयोः समाहारः, अहोरात्रं दिवसनिशं, तस्य द्वयम् युगलम् इति अहोरात्रद्वयं दिवसः निशा च इति द्वे एव ।] ॥३॥

कः पुनः साधुः प्रतिमाद्वादशकस्य प्रतिपत्ता भवतीत्याह -

**पडिवज्जइ एयाओ, संघयणधिईजुओ महासत्तो ।**
**पडिमाउ भावियप्पा, सम्मं गुरुणा अणुण्णाओ ॥८५०॥ १८/४**

**प्रतिपद्यते**ऽभ्युपगच्छति, **एताः** प्रतिमाः, **संहनन-धृति-युतः** प्रशस्तसंहनन-दृढधृतिसमन्वितो, **महासत्वा** महाध्यवसायोऽविक्लवत्त्व महाध्यवसायसम्पन्नो वा, **प्रतिमाः** प्रस्तुताः, **भावितात्मा** धर्मवासितान्तरात्मा, **सम्यग्** न्यायेन **गुरुणा**, भगवता श्रीसङ्घेन वा, **अनुज्ञातः** कृतानुज्ञः ॥४॥

**गच्छे च्चिय निम्माओ, जा पुव्वा दस भवे असंपुण्णा ।**
**नवमस्स तइयवत्थू, होइ जहण्णो सुयाभिगमो ॥८५१॥ १८/५**

**गच्छ एव** समूह एव, **निर्मातो** निष्पन्नो, **यावत् पूर्वाणि दश भवेयुः असम्पूर्णा**न्युत्कर्षेण, **नवमस्य** प्रत्याख्यानपूर्वस्य, **तृतीयवस्त्वा**चारवस्तु **भवति जघन्यो** अल्पीयान् **श्रुताभिगमः** श्रुतपरिज्ञानं श्रुतसम्पत्तिरित्यर्थः ॥५॥

**वोसट्ठचत्तदेहो, उवसग्गसहो जहेव जिणकप्पी ।**
**एसण अभिग्गहीया, भत्तं च अलेवडं तस्स ॥८५२॥ १८/६**

**व्युत्सृष्टः** परिकर्माभावेन, **त्यक्तो** भावतो ममत्वपरित्यागेन, **देहो** येन स तथा । उपसर्गान् दिव्य-मानुष-तिर्यक्कृतानाऽत्मसंवेदनीयान् सहत इत्यु**पसर्गसहः । यथैव** यद्वत् **जिनकल्पी** जिनकल्पप्रतिपन्नस्तद्वदुपसर्गसह इत्यर्थः । **एषणा** सप्तविधा, [1]असंसृष्टा,[2] संसृष्टा,[3] उद्धृता, [4]अल्पलेपा,[5] अवगृहीता,[6] प्रगृहीता,[7] उज्झितधर्मा, तत्राद्ययोर्द्वयोरग्रहः पञ्चास्तु ग्रहः, पुनरपि विवक्षितदिवसे द्वयोरभिग्रहः, एका भक्ते, एका पाने, **अभिगृहीता** प्रतिपादितन्यायेन, **भक्तं चा**त्र च **अलेपकृत् तस्य** समयप्रसिद्धम् ॥६॥

**गच्छा विणिक्खमित्ता, पडिवज्जइ मासियं महापडिमं ।**
**दत्तेग भोयणस्सा, पाणस्स वि एग जा मासं ॥८५३॥ १८/७**

**गच्छात्** समुदायात् विनिष्क्रम्य विनिर्गत्य, **प्रतिपद्यते**ऽभ्युपगच्छति, मासेन निर्वृतां **मासिकीं महाप्रतिमां, दत्तिरेका**विच्छेदप्रदानरूपा, **भोजनस्या**न्नस्य, **पानस्याप्येका, यावन्मासं** मासमभिव्याप्य ॥७॥

**आदीमज्झवसाणे, छग्गोयरहिंडगो इमो णेओ ।**
**णाएगरायवासी, एगं च दुगं च अण्णाए ॥८५४॥ १८/८**

**आदिश्च मध्यश्चावसानं** च त्रिधा। प्राक्क्लृप्तदिवसस्यादिमध्यावसानम्, तस्मिन्, **षड्गोचर-हिण्डकः** षड्वीथीहिण्डको, **अयं** प्रतिमाप्रतिपन्नः, **ज्ञेयो** ज्ञातव्यः, **ज्ञाते** सति 'अयं प्रतिमाप्रतिपन्नो महात्मा विहरति' इत्येवमवजाते, **एकरात्रं** वस्तु शीलमस्येति **ज्ञातैकरात्रवासी । एकं च द्विकं** च एकरात्रं द्विरात्रं च **अज्ञाते** लोकेनाऽविदिते, तस्य वस्तुं कल्पत इति शेषः ॥८॥

**जायणपुच्छाणुण्णावणपण्हवागरणभासगो चेव ।**
**आगमणवियडगिहरुक्खमूलगावासयतिगो त्ति ॥८५५॥ १८/९**

**याचन-पृच्छा-ऽनुज्ञापन-प्रश्नव्याकरण-भाषकश्चैव** । स हि भगवान् याचनविषयां भाषां प्रयोजनसमुत्पत्तौ भाषते । पृच्छाभाषां मार्गप्रश्नादौ, अनुज्ञापनभाषामवग्रहतृणकाष्ठादौ, प्रश्नव्याकरणभाषां प्रश्नोत्तरकालविभाविनीं निरवद्यां वक्ति, **आगमनविकटगृहवृक्षमूलका-ऽवासकत्रिक इति** । आगमनगृहमागन्तुकागारम्, यत्र यत्र कार्पटिकादयो विश्राम्यन्ति विकट-[विवृत-अ.टी.]गृहमुपरिष्टादाच्छादितम्, अधश्च कृतावरणं सर्वदिक्प्रवेशयोग्यम्। वृक्षमूले यद् गृहं-साधुनिवासयोग्यम्, न तु यत्र पत्र-पुष्प-फल-बीजानि त्रसाश्च सम्पतन्ति, तस्य शेषसाधूनामपि अयोग्यत्वात्, एतदावासकत्रिकमस्येति तथोच्यते, एतान् वातिगच्छति, प्रविशति, **आगमन-विकटगृह-वृक्षमूलकाऽऽवासकातिग** । [**कत्रिक**]इति ॥९॥

**पुढवीकट्ठजहऽऽत्थिण्णसारसाई न अग्गिणो बीहे ।**
**कट्ठाइ पायलग्गं, णऽवणेति तहऽच्छिकणुगं वा ॥८५६॥ १८/१०**

पृथिवी च काष्ठं च यथास्तीर्णसारश्च शिलापट्टादिः, तेषु शयितुं स्थातुं शीलमस्य-**पृथिवी-काष्ठ-यथास्तीर्णसारशायी नाग्नेः** सकाशाद् **बिभेति** स्वयमागतात् कायोत्सर्गादिस्थितः सत्त्वसम्पन्नतया, दूरात्तु प्रत्यवायहेतुरग्निरयमिति परिहरत्येवासौ, कर्मसामर्थ्यात्तु तस्मिन्नापतिते केवलं भयं न विधत्ते, **काष्ठादि** काष्ठं कण्टकादि, **पादलग्नं** चरणसम्बद्धं **नापनयति** न विशोधयति, **तथाऽक्षिकणुकं वा** नयनप्रविष्टः सूक्ष्मपार्थिवाङ्गं वा न त्यजति, अवयवरूपं वा ॥१०॥

**जत्थऽत्थमेइ सूरो, न तओ ठाणा पयं पि संचरइ ।**
**पायादि न पखालइ एसो वियडोदगेणावि ॥८५७॥ १८/११**

**यत्र** ग्रामारण्यादौ **अस्तमेति** पर्यन्तं व्रजति, **सूर्य** आदित्यः, **न ततः स्थानात्**, **पदमपि** पादविक्षेपमात्रमपि, **सञ्चरति** सङ्क्रामयति। **पादादि** पादपाणिप्रभृति, **न प्रक्षालयति** न धावति, **एष** प्रतिमाप्रतिपन्नो **विकृतोदकेनापि** प्रासुकसलिलेनापि ॥११॥

**दुट्ठऽस्सहत्थिमाई, तओ भएणं पयं पि णोसरई ।**
**एमादिनियमसेवी, विहरति जाऽखंडिओ मासो ॥८५८॥ १८/१२**

**दुष्टाः** दृप्ताः, **अश्वहस्त्यादयो** यान् लोको भयाद्विवर्जयति, **ततस्तेभ्यो**, **भयेन** भयमोहनीयसम्भवेनात्मपरिणामेन **पदमपि** चरणविक्रान्तिलक्षणं **नो** नैव **सरति** गच्छति, **एवमादिनियमसेवी** एवं प्रभृत्यागमोक्तनियमकारी, **विहरति** स्वचर्ययाऽवतिष्ठते। **यावदखण्डितो मासः**, परिपूर्ण इत्यर्थः ॥१२॥

**पच्छा गच्छमईई, एवं दुम्मासि तिमासि जा सत्त ।**
**नवरं दत्तिविवड्ढी, जा सत्त उ सत्तमासीए ॥८५९॥ १८/१३**

**पश्चाद् गच्छमत्येति** प्रविशति, **एवं** मासिकप्रतिमावत् **द्विमासा त्रिमासा यावत्सप्तमासा** । **नवरं** केवलं **दत्तिविवृद्धिर्दत्तिसम्वर्धनम्**। **यावत् सप्त तु** दत्तयः, **सप्तमासायां** प्रतिमायाम् ॥१३॥

**तत्तो य अट्ठमी खलु, हवइ इहं पढमसत्तराइंदी ।**
**तीएँ चउत्थचउत्थेणऽपाणएणं अह विसेसो ॥८६०॥ १८/१४**

**ततश्च** तदनन्तरम्, **अष्टमी खलु** प्रतिमा **भवति**, **इह प्रथमसप्तरात्रिंदिवा** सप्तरात्रिंदिन-प्रमाणेत्यर्थः, तस्यामष्टप्रतिमायाम्, **चतुर्थ-चतुर्थेन** तपःकर्मणा, अशितव्यमिति शेषः, **अपानकेन** पानाहारविरहितेन **अथ विशेषः** प्राक्तनप्रतिमाभ्यः ॥१४॥

अस्यामेव कर्तव्यशेषमाह -

**उत्ताणग पासल्ली, णेसज्जी वा वि ठाणगं ठाउं ।**
**सहउवसग्गे घोरे, दिव्वादी तत्थ अविकंपो ॥८६१॥ १८/१५**

**उत्तानकवदुत्तानस्येव पार्श्वशयवत्( शयितः )निषद्यावान्** निषद्यास्थितवत् नितरां शय्यास्थितराजवत्, **वाऽपि स्थानकं** स्थानविशेषं **स्थित्वा** कृत्वा, एतान् शरीराकारान् व्यवस्थाप्य, **सहते** क्षमते, प्रभविष्णु भावतः। **उपसर्गान्** उपसृज्यते समालिङ्ग्यते यैरात्मभावेन पुरुषैस्त उपसर्गास्तान्, **घोरान्** दारूणान् **दिव्यादीन्** दिव्यमानुषादिकृतान्, **तत्र** तस्यां प्रतिमायाम्, **अविकम्पो** मनःशरीराभ्यामचलः ॥१५॥

**दोच्चा वि एरिस च्चिय, बहिया गामाइयाण नवरं तु ।**
**उक्कुडलगंडसादी, दंडाययओ व्व ठाऊणं ॥८६२॥ १८/१६**

**द्वितीयापि** सप्तरात्रिंदिवा, **ईदृश्येव** व्यावर्णितरूपैव, **बहिर्ग्रामादिकानां** बहिर्ग्रामनगरादिभ्यः,

**नवरं त** केवलम्, तत् **उक्कटुकशायी, लंगडशायी** (= वक्रकाष्ठशायी) मस्तकपार्ष्ण्यर्योर्भागावष्टम्भ-मात्रेणाक्षिप्तशरीरः, वज्रसंहननत्वाद् धर्मशुक्लध्यायी **दण्डायतको वा** दण्डवदायतः दीर्घः शिलादिलग्नशरीरः **स्थित्वा** ॥१६॥

**तच्चा वि एरिस च्चिय, नवरं ठाणं तु तस्स गोदोही ।**
**वीरासणमहवा वि हु, ठाएज्जा अंबखुज्जो उ ॥८६३॥ १८/१७**

**तृतीयापीदृश्येव** व्यावर्णितस्वरूपा एव, **नवरं** केवलम्, **स्थानं तु** शरीरसंस्थानमासन-विशेषरूपम्, **तस्य** प्रतिमाप्रतिमाप्रतिपन्नस्य, **गोदोहिका** गोदोहनप्रवृत्तस्याग्रपादतलाभ्या-मवस्थानक्रिया, **वीरासनम्, अथवापि हु** वीराणां वज्रसंहननं नामासनं गुरवः कथयन्ति, यथाहि सिंहासनाधिरूढस्य कस्यचिन्महाप्रभोः कुतश्चित् कारणात्तद्देशात् सिंहासनापनयने कृते, तथैव निष्प्रकम्पस्य व्यवस्थानम्, जानुमात्रासनापरित्यागेन, धर्मशुक्लध्यायिनो महाबल-संहननाऽनिष्प्रकम्पावस्थानमिति भावः। लोके तु भोजनादिषु वीरासनं प्रसिद्धम्। **तिष्ठेदवतिष्ठेत् आम्रकुब्जस्त्वी**षदवनतः ॥१७॥

**एमेव अहोराई, छट्ठं भत्तं अपाणगं णवरं ।**
**गामणगराण बाहिं, वाघारियपाणिए ठाणं ॥८६४॥ १८/१८**

[**एवमेवानन्तरोक्तनीत्या अहोरात्रिक्य**होरात्रपरिमाणा प्रतिमा भवति **नवरं** केवलमयं विशेष इत्यर्थः **षष्ठं भक्तं** भोजनं वर्ज्यतया यत्र तत् षष्ठभक्तमुपवासद्वयरूपं तपः ह्युपवासद्वये चत्वारि भक्तानि वर्ज्यन्ते, एकाशनेन च तदारभ्यते तेनैव च निष्ठां यातीत्येवं षड्भक्तवर्जनरूपं तदिति, इह च षष्ठमित्यनुस्वारः छन्दार्थम्, **अपानकं** पानकाहाररहितं तस्यां विधेयमिति शेषः, तथा **ग्रामनगरेभ्यः**प्रतीतेभ्यः **बहिर्बहिस्तात् व्याघारितपाणिके** प्रलम्बभुजस्येत्यर्थः । **स्थानम्**-अवस्थानं भवति तत्प्रतिपन्नस्येति, इयं चाहोरात्रिकी त्रिभिर्दिवसैर्याति प्रतिमा अहोरात्रस्यान्ते षष्ठभक्तप्रकरणात्, यदाह-**अहोराइया तिहिं, पच्छा छट्ठं करेइ**। इति गाथार्थः ॥१८॥ अटी.]

**एमेव एगराई, अट्ठमभत्तेण ठाण बाहिरओ ।**
**ईसीपब्भारगओ, अणिमिसणयणेगदिट्ठीए ॥८६५॥ १८/१९**

**साहट्टु दो वि पाए, वाघारियपाणि ठायती ट्ठाणं ।**
**वाघारि लंबियभुओ, अंते य इमीएँ लद्धि त्ति ॥८६६॥ १८/२० जुम्म।**

**एवमेवाहोरात्रिकी** प्रतिमा, **अष्टमभक्तेन** त्रिरात्रोपवासेन, **स्थानमवस्थानं** करोति। **बाह्यतो**

ग्रामादिभ्यो बहिः **ईषत् प्राग्भारगतः** भाराक्रान्तपुरुषवत्, **अनिमिषनयनो** निमेषरहितलोचनो देवाद्युपसर्गेषु। **एकदृष्टिरे**करूपीपुद्गलनिरुद्धदृष्टिः ॥१९॥

**संहृत्य** चतुराङ्गुलान्तरौ, **द्वावपि पादा**वेकीकृत्य, **व्याघारितपाणिः** प्रलम्बितपाणिः तिष्ठति **स्थानं** । **वाघारित**पाणिः लम्बितपाणिर्लम्बितभुजः, **अन्ते** च पर्यन्ते च, सर्वप्रतिमानाम्, **अस्या** एकरात्रिक्या, **लब्धिर्ला**भो **जायते** न प्राक्, प्रकर्षवर्तित्वादस्याः, आसां च प्रतिमानां सर्वासामेव प्रतिकर्म तावत् प्रमाणं यावत्प्रतिमानुष्ठानं मासादिसप्तमासान्तम्, वर्षासु च न प्रतिमाप्रतिपत्तिः । प्रथम-द्वितीय-तृतीय-चतुर्थप्रतिमानां सम्भवत्येकवर्ष एव परिकर्मानुष्ठाने, तत्त्वतस्तु साऽद्या द्वितीयप्रतिमा सपरिकर्मैकसंवत्सरे सम्भवति, पञ्चम्यास्त्वारभ्याऽन्यसंवत्सरे, परिकर्माऽन्यसंवत्सरे चानुष्ठानम् ॥२०॥

एवमागमनीत्या प्रतिमाकल्पे प्रतिपादिते तदयुक्तत्वसम्भावनया विषयविभागमनवगच्छन् पृच्छति -

**आह न पडिमाकप्पे, सम्मं गुरुलाघवाइचिंत त्ति ।**
**गच्छाउ विणिक्खमणाइ न खलु उवगारगं जेण ॥८६७॥ १८/२१**

**आह प्रतिमाकल्प** पूर्वोक्ते, **सम्यग्** न्यायेन, **गुरुलाघवादिचिन्तेति** गुणगौरव-दोषलाघव-विशिष्ट-फलसाधकत्वाऽऽलोचना, **गच्छात्** समूहाद् **विनिष्क्रमणादि** विनिर्गमैकविहारितादि, **न खल**, नैव **उपकारकमु**पकर्तृगुरुसाध्वादीनां, **येन** कारणेन ॥२१॥

[कथं नोपकारकं? इत्याह, अटी.] -

**तत्थ गुरुपारतंतं, विणओ सज्झाय सारणा चेव ।**
**वेयावच्चं गुणवुड्ढि तह य णिप्फत्ति संताणो ॥८६८॥ १८/२२**

**तत्र** गच्छे, **गुरुपारतन्त्र्यं** गुर्वधीनत्वम्, **विनयस्तदु**चितानाम्, **स्वाध्यायः** पञ्चप्रकारो वाचनादिः सम्पूर्णः, **स्मारणा चैव** क्वचिद्विस्मृतेः, **वैयावृत्यं** व्यावृत्तभावकर्मरूपम्, (व्यावृत्तभावस्तत्कर्म वा अटी.) **गुणवृद्धिः** ज्ञानादिगुणाभिवृद्धिर्गुर्वादिभ्य एव, **तथा च** समुच्चये, **निष्पत्तिः** शिष्याणाम्, तथाविधगुर्वादिभ्य एव, **सन्तानः** शुभसाध्वादिशिष्यसन्तानः ॥२२॥

**दत्तेगादिग्गहोऽवि हु, तह सज्झायादभावओ न सुहो ।**
**अंताइणो वि पीडा, न धम्मकायस्स य सुसिलिट्ठं ॥८६९॥ १८/२३**

**एकादिदत्तिग्रहोऽपि** तदभिग्रहरूपः । हुर्वाक्यालङ्कारे । **तथा** स्वाध्याय नैरन्तर्येण **स्वाध्यायाद्यभावतः** स्वाध्यायध्यानादिविरहेण **न शुभो** न श्रेयान्, गच्छे तु निरन्तरस्वाध्यायादि-सद्भाव उभयप्रतीतः । **अन्तादिनोऽ**प्यन्तप्रान्तरूक्षजीवनभोजिन इत्यर्थः । **पीडा** बाधा, **न [च]**नैव

**धर्मकायस्य** धर्मशरीरस्य, **सुश्लिष्ट** सुयुक्तमेतत्, ॥२३॥

**एवं पडिमाकप्पो, चिंतिज्जंतो उ निउणदिट्ठीए ।**
**अंतरभावविहीणो, कह होइ विसिट्ठगुणहेऊ ? ॥८७०॥ १८/२४**

एवमुक्तनीत्या, यावत् **प्रतिमाकल्पः** प्रागुक्तः, **चिन्त्यमानस्त्वा**लोच्यमानस्तु **निपुणदृष्ट्या** । **आन्तरभावविहीनः** क्रियामात्रसारः **कथं भवति** जायते **विशिष्टगुणहेतु**र्विशिष्टोपकारनिमित्तम् ॥२४॥

**भण्णति विसेसविसओ, एसो न उ ओहओ मुणेयव्वो ।**
**दसपुव्वधरादीणं, जम्हा एयस्स पडिसेहो ॥८७१॥ १८/२५**

**भण्यत** अभिधीयते, **विशेषेण विषयो** विशेषगोचरः, **एषः** प्रतिमाकल्पः, **न तु नैव ओघतः** सामान्येन, **मुणितव्यो** ज्ञातव्यो विशिष्टगुणहेतुत्वेन, **दशपूर्वधरादीनाम्**, आदिशब्दाच्चतुर्दशपूर्ववत्परिग्रहः, **यस्मादेतस्य** प्रतिमाकल्पस्य **प्रतिषेधः** परिहार उक्तः ॥२५॥

**पत्थुयरोगचिगिच्छावत्थंतरतव्विसेससमतुल्लो ।**
**तह गुरुलाघवचिंतासहिओ तक्कालवेक्खाए ॥८७२॥ १८/२६**

प्रस्तुता चासौ रोगचिकित्सा च तस्या अवस्थान्तरमधिकदोषोत्पत्तिरूपं तद्विविशेषसमोऽधिकदोषविशेषोपशमः, तेन तुल्यः प्रतिमाकल्पः, **प्रस्तुतरोगचिकित्सावस्थान्तरतद्विशेषण-समतुल्यः** । **तथा** तेन रूपेण, या **गुरूलाघवचिन्ता** तया **सहितो** युक्तः सामान्यरोगकल्पदोष-प्रतिकारापेक्षाऽधिकदोषोपशमचिन्तान्वितः **तत्कालापेक्षया** प्रतिमाप्रतिपत्तिकालापेक्षया ॥२६॥

साम्प्रतं लेशत उक्तमप्यर्थं, दृष्टान्तद्वारेण परिस्फुटतरं प्रतिपिपादयिषुर्दार्ष्टान्तिकसामर्थ्य-माह -

**निवकरलूताकिरियाजयणाए हंदि जुत्तरूवाए ।**
**अहिदट्ठादिसु छेयादि वज्जयंतीह तह सेसं ॥८७३॥ १८/२७**

नृपस्य राज्ञः, करे हस्ते, लूता नृपकरलूता, तस्यां क्रियायतनायाम् चिकित्साप्रतियत्नो विशिष्टमन्त्राऽपमार्जनादिरूपः, तस्यां **नृपकरलूताक्रियायतनायां** प्रस्तुतायाम्, **हंत युक्तरूपाया** सङ्गतस्वरूपायामुचितायामित्यर्थः । **अहिदष्टादिष्वा**शीविषदष्टादिषु, गुरुतरदोषेषु नृपस्येति गम्यत । **छेदादिभ्यस्त**दङ्गच्छेद-दाहादिभ्यो, अधिकतरदोषोपशमहेतुभ्यो **वर्जयन्ति** परिहरन्ति, **इह** प्रक्रमे, **तथा** तेन रूपेण, पूर्वकालभाविनीं **शेषां** मन्त्राऽपमार्जनादिक्रियाम् ॥२७॥

**एवं चिय कल्लाणं, जायइ एयस्स इहरहा न भवे ।**
**सव्वत्थावत्थोचियमिह कुसलं होइऽणुट्ठाणं ॥८७४॥ १८/२८**

**एवमेवा**धिकतरदोषसम्पादनैव, **कल्याणम**भिवाञ्छतारोग्यं, **जायते** प्रादुर्भवति **एतस्य** लूताग्रस्तकरनृपस्य, **इतरथा**ऽन्यथा च्छेद-दाहादिनिषेधेनापमार्ज्जनमात्रात् **न भवेत्** न स्यात्, कल्याणम्, अधिकतर-दोषोदयाद्विनाशप्राप्तेः, **सर्वत्र** सर्वस्मिन्नेव, पुरुषादौ, **अवस्थोचित**-मवस्थायोग्यमिह **कुशलं** श्रेयोनिबन्धनत्वेन, **भवति** जायते, **अनुष्ठानं** कर्तव्यविशेषरूपम् ॥२८॥

**इय कम्मवाहिकिरियं, पव्वज्जं भावओ पवण्णस्स ।**
**सइ कुणमाणस्स तहा, एयमवत्थंतरं णेयं ॥८७५॥ १८/२९**

**इत्येवं कर्मव्याधिक्रियां** कर्मरोगचिकित्सां **प्रव्रज्यां** दीक्षां **भावतो** गुरु-लाघवापेक्षया, **प्रपन्नस्या**भ्युपगतवतः, **सदा** सर्वकालं **कुर्वतः** कर्मव्याधिचिकित्सां **तथा** तेन गच्छवासोक्तप्रकारेण, **एतत्**प्रतिमाकल्पानुष्ठानं **अवस्थान्तर**मधिकदोषहेत्वहिदष्टादिकल्पं तीव्रकर्मोदयरूपं **ज्ञेयं** ज्ञातव्यम्, तेनावस्थान्तररोगविशेषसमस्तुल्यः प्रतिमाकल्प इति स्थितम् ॥२९॥

अवस्थाविशेषोचित एवायं प्रतिमाकल्पः सामान्येन गच्छवासाद् गरीयानित्युपदर्शयन्निदमाह-

**तह सुत्तवुड्ढिभावे, गच्छे सुत्थंमि दिक्खभावे य ।**
**पडिवज्जइ एयं खलु, न अण्णहा कप्पमवि एवं ॥८७६॥ १८/३०**

**तथा** तेन पूर्वप्रवृत्तव्यवहारेण, **सूत्रवृद्धिभावे** सूत्रार्थोभयप्रदानवृद्धिसम्भवे, तस्मिन्नस्खलिते प्रवर्तमान इत्यर्थः, [अथवा अकारप्रश्लेषात् 'सूत्राऽवृद्धिभावे = किञ्चिदूनदशपूर्वाधिकतरश्रुतग्रहण-शक्त्यभावे इत्यर्थः-अटी.] **गच्छे** समुदाये। **सुस्थे** विवक्षितबाधापरित्यागेन, **दीक्षा**(क्ष्या)**भावे** चाधिकतरगुणप्रव्रजनीयाभावे **च प्रतिपद्यत** अभ्युपगच्छति **एतं** प्रतिमाकल्पम्, **खलु**शब्दो वाक्यालङ्कारे, **न** नैव **अन्यथा** प्रकारत्रयमहत्तमगुणसम्पादकाभावे, **कल्पमपि** धर्मसम्पादन-समर्थमपि, प्रतिमाकल्पमेवमागमोक्तनीत्या ॥३०।

**इहरा न सुत्तगुरुता, तयभावे न दसपुव्विपडिसेहो ।**
**एत्थं सुजुत्तिजुत्तो, गुरुलाघवचिंतबज्झंमि ॥८७७॥ १८/३१**

**इतरथा**ऽन्यथा यथाकथञ्चित् प्रतिमाकल्पप्रतिपत्तौ, **न सूत्रगुरुता** न भगवदागमस्य गौरवम्, **तदभाव** सूत्रगुरुताया अभावे, **न** नैव **दशपूर्विप्रतिषेधः** चतुर्दश-दशपूर्वधरप्रतिमाकल्पप्रतिषेधः, **अत्रै**तस्मिन् प्रतिमाकल्पे, **सुयुक्तियुक्तः** संन्यायसङ्गतः, **गुरुलाघवचिन्ताबाह्ये** यथाकथञ्चि-त्करणीयतयाऽभ्युपगम्यमाने ॥३१॥

का पुनर्गुरुलाघवचिन्तेत्याह -

**अप्पपरिच्चाएणं, बहुतरगुणसाहणं जहिं होइ ।**
**सा गुरुलाघवचिंता, जम्हा णाओववण्ण त्ति ॥८७८॥ १८/३२**

**अल्पपरित्यागेन** स्तोकगुणपरित्यागेन, **बहूनां गुणानां संसाधनं** संसिद्धिः **यत्र भवति** जायते, **सा गुरुलाघवचिन्ता यस्माद्धेतोर्न्यायोपपन्ना इति** न्यायसङ्गता ॥३२॥

**वेयावच्चुचियाणं, करणनिसेहेणमंतरायं ति ।**
**तं पि हु परिहरियव्वं, अइसुहुमो होउ एसो त्ति ॥८७९॥ १८/३३**

**वैयावृत्त्योचितानां** गुरुबालवृद्धादीनां, **करणनिषेधेन** प्रतिमाकल्प इति प्रतिपत्त्या, **अन्तरायमिति** वैयावृत्त्यान्तरायः, **तदपि** चान्तरायं **परिहर्तव्यम्** पारमार्थिकान्तरायाभावात्, **अतिसूक्ष्मस्त् एष** दोष [**भवतु**] **इति**। अतिसूक्ष्मे दोषे मूढता पुनरेष वैयावृत्त्यान्तरायाभिप्रायः, तत्साध्यस्यार्थस्यान्येनापि सम्पादयितुं शक्यत्वात्, तथा हि गच्छवासिनो गुरुबालवृद्धवैयावृत्त्येषु भूयांस एव यथाशक्ति प्रवर्तन्ते, न प्रतिमाकल्पस्य प्रतिपत्तरि सत्यपि तत्कार्यस्य क्षतिः, तस्माद् सदालम्बनमेतत् ॥३३॥

**ता तीए किरियाए, जोग्गयं उवगयाण नो गच्छे ।**
**हंदि उविक्खा णेया, अहिगयरगुणे असंतंमि ॥८८०॥ १८/३४**

**तत्तस्मात् तस्याः क्रियायाः** प्रतिमाप्रतिपत्त्यादिकायाः, **योग्यतां** क्षमत्वम् **उपगतानां** प्राप्तानाम्, **नो** नैव, **गच्छ** समुदाये, **हन्तोपेक्षा** प्रतिमाकल्पप्रतिपत्त्यौदासीन्यरूपा, **ज्ञेया** ज्ञातव्या, **अधिकतरगुणे** सूत्रवृद्ध्यादिरूपे, **असत्यविद्यमाने**, तस्मिंस्तु सति स्फुट एव तत्प्रतिषेधः, तस्मात्तत्कल्पोचितानां तत्प्रवृत्तिरेव विधेयेति भावः ॥३४॥

**परमो दिक्खुवयारो, जम्हा कप्पोचियाण वि णिसेहो ।**
**सति एयंमि उ भणिओ, पयडो च्चिय पुव्वसूरीहिं ॥८८१॥ १८/३५**

**परमः** प्रधानो, **दीक्षोपकारः** प्रव्राजनीयोपकारो वर्तते । **यस्मात्, कल्पोचितानामपि** जिनकल्प-प्रतिमाकल्पोचितानामपि, **निषेधः** प्रतिषेधः, **सति** विद्यमाने, **एतस्मिन्** दीक्षोपकारे, **भणित** उक्तः, **प्रकट एव** स्फुट एव **पूर्वसूरिभिः** पूर्वाचार्यैः ॥३५॥

कथमित्याह -

**अब्भुज्जयमेगयरं, पडिवज्जिउकामु सोऽवि पव्वावे ।**
**गणिगुणसलद्धिओ खलु, एमेव अलद्धिजुत्तो वि ॥८८२॥ १८/३६**

**अभ्युद्यतं** प्रयत**मेकतरं** विहारम्, **प्रतिपत्त्युकामो**ऽभ्युपगन्तुकामः, **सोऽपि** प्रतिमाप्रतिपत्तियोग्यो महात्मा **प्रव्राजयेत्,** परोपकारसमर्थां दीक्षाम्, **गणिनो** गणस्वामिनः, **गुणाः** सूत्रार्थनिर्वाणप्रियदृढधर्मत्वादयः तैः, समाना लब्धिरस्य **गणिगुणसलब्धिकः। खलु**शब्दो वाक्यालङ्कारे, **एवमेवालब्धियुक्तोऽपि** गणिगुणलब्धि विकलोऽपि प्रतिमानां प्रतिपत्ता। अनेन परोपकारविषयमागमस्य गरीयस्त्वमावेदयति, विशिष्टप्रव्राजनीयाभ्युपगमो हि गुरुतरगुणसम्पन्नः, न प्रतिमापरिपालनानुष्ठानमेव, सर्वत्र परोपकारस्य गरीयस्त्वादेवमेवागमप्रवृत्तेः ॥३६॥

कर्मव्याधिक्रियां प्रतिपन्नस्यैतदवस्थान्तरं ज्ञेयमित्युक्तम्, तत्कुतो भवतीत्याह -

**तं चावत्थंतरमिह, जायइ तह संकिलिट्ठकम्माओ ।**
**[१]पत्थुयनिवाहिदट्ठाइ जह तहा सम्ममवसेयं ॥८८३॥ १८/३७**

**तच्चावस्थान्तरमिह** प्रस्तावे, **जायते** सम्भवति, **तथा संक्लिष्टं** च **तत्कर्म** च तथासङ्क्लिष्टकर्म, **ततः**, तदुदयरूपत्वात्तस्य, **प्रस्तुत**श्चासौ **नृपादि**श्च तस्य **दष्टादि** गुरुदोषरूपं [पाठान्तरे प्रस्तुतनृपस्य यदहिदष्टादि तत् तथा-अ.टी.] **यथा तथा सम्यगवसेयम्**। प्रतिमानां प्रतिपत्तुरपि तीव्रकर्मोदयरूपम्, न ह्यसति तस्मिन् प्रतिमाकल्प इष्यते तत्वज्ञैः प्रतिमानुष्ठानसाध्यत्वात्, तदिहाङ्गीक्रियते ॥३७॥ (१. पत्थुयनिवस्स जमहिदट्ठाइ अटी.)

कथं पुनरिदमवसीयते अवस्थान्तरं प्रतिमानुष्ठानसाध्यमित्याशङ्क्याह -

**अहिगयसुंदरभावस्स विग्घजणगं ति [१]संकिलिट्ठं च ।**
**तह चेव तं खविज्जइ, एत्तो च्चिय गम्मए एयं ॥८८४॥ १८/३८**

**अधिकृतसुन्दरभावस्य** विशिष्टज्ञानादिकारणस्य, **विघ्नजनकमिति** विघ्नहेतुरिति, **संक्लिष्टं च** सङ्क्लेशयुक्तं च **तथा चैव** प्रतिमाप्रतिपत्त्यैव **तदवस्थान्तरम्, क्षिप्यत** अपनीयते, **अत एव** प्रतिमाकल्पविधानादेवागमगतात्, **गम्यत** अवसीयते **एतत्** प्रस्तुतं मन्यते ॥३८॥ (१. अतिसंकिलिट्ठं अटी.)

प्रतिमाकल्पे धर्मकायपीडापि न सङ्गतेत्युक्तं प्राक्, तत्परिजिहीर्षुराह -

**एत्तो अतीव णेया, सुसिलिट्ठा धम्मकायपीडा वि ।**
**आंताइणो सकामा, तह तस्स अदीणचित्तस्स ॥८८५॥ १८/३९**

**अतो** हेतोः **अतीव ज्ञेया सुश्लिष्टा** सुयुक्ता **धर्मकायपीडापि** धर्मशरीराबाधापि, अन्तमत्तुं शीलमस्येति **अन्तादी**, तस्याऽन्तादिनः अन्तप्रान्ताशिनः, **सकामा** समनोरथाः स्वाभिप्राय-प्रवृत्तत्वात्, **तथा** तेन रूपेण, **तस्य** प्रतिमाप्रतिपन्नस्य, **अदीनचित्तस्यादीनमनसः** ॥३९॥

एतदेव समर्थयते -

**न हु पडइ तस्स भावो, संजमठाणाउ अवि य वड्ढेइ ।**
**न य कायपायओऽवि हु, तदभावे कोइ दोसो त्ति ॥८८६॥ १८/४०**

**न हु** नैवेतत्, **पतति** प्रच्यवते, **तस्य** प्रतिमाप्रतिपन्नस्य, **भावो**ऽध्यवसायः, **संयमस्थाना**-च्चारित्रस्थानाद् **अपि च** किन्तु, **वर्धते** वृद्धिमनुभवति, **न च कायपाततोऽपि** कायप्रतिपातादपि, हुर्वाक्यालङ्कारे, **तदभाव** भावप्रतिपत्त्यभावे, **कश्चिद्दोष इति**, नैव इत्यर्थः ॥४०॥

**चित्ताणं कम्माणं, चित्तो च्चिय होइ खवणुवाओ वि ।**
**अणुबंधछेयणादी, सो उण एवं ति णायव्वो ॥८८७॥ १८/४१**

**चित्राणां** चित्रस्वभावानां **कर्मणां** ज्ञानावरणादीनां **चित्र एव** प्रतिमानुष्ठानादिभिः **भवति** सम्भवति, **क्षपणोपायोऽपि** क्षयहेतुरपि **अनुबन्धच्छेदनादिः** सन्ततिर्निवर्त्तनादिः । **स पुनः** क्षपणोपायः । **एवमिति** प्रतिमाकल्पविधानेन, **ज्ञातव्यो** विज्ञेयः ॥४१॥

**इहरा उ णाभिहाणं, जुज्जइ सुत्तंमि हंदि एयस्स ।**
**एयंमि अवसरंमी, एसा खलु तंतजुत्ति त्ति ॥८८८॥ १८/४२**

**इतरथा** त्वन्यथा तु **नाभिधानं** न प्रतिपादनं **युज्यते** घटते, **सूत्र** आगमे, **हन्तैतस्य** प्रतिमाकल्पस्य **एतस्मिन्नवसरे** प्रतिमाकल्पयोग्ये, **एषा खलु** एषैव **तन्त्रयुक्तिरित्या**गमयुक्तिः ॥४२॥

**अण्णे भणंति एसो, विहियाणुट्ठाणमागमे भणिओ ।**
**पडिमाकप्पो सेट्ठो, दुक्करकरणेण विण्णेओ ॥८८९॥ १८/४३**

**अन्ये** अपरे सूरयः स्वतन्त्रस्थिता एव सूक्ष्मबुद्धिविकला, **भणन्ति** प्रतिपादयन्ति, **एष** प्रतिमाकल्पो, **विहितानुष्ठानं** कर्तव्यरुपम्, **आगमे** शास्त्रे, **भणितः** प्रतिपादितः, **प्रतिमाकल्पः श्रेष्ठः** आगमोक्तत्वमात्रादेव, **दुष्करकरणेन** दुष्करक्रियया, **विज्ञेयो**ऽवबोद्धव्यः ॥४३॥

एतत्परिहारायाह -

**विहियाणुट्ठाणं पि य सदागमा एस जुज्जई एवं ।**
**जम्हा न जुत्तिबाहियविसओऽवि सदागमो होति ॥८९०॥ १८/४४**

**विहितानुष्ठानमपि च** कर्तव्यरूपोऽपि, **सदागमात्** सुन्दरागमात्, **एष** प्रतिमाकल्पो **युज्यते** घटते, **एवमुक्तं** वैतत् यस्माद्धेतोः **न** नैव युक्तिभिर्बाधितो विषयोऽस्येति **युक्तिबाधितविषयः**। सोऽ**पि** युक्तिबाधितविषयोऽपि, **सदागमः** प्रशस्तागमो, **भवति** नैव भवतीत्यर्थः ॥४४॥

**जुत्तीए अविरुद्धो, सदागमो सावि तदविरुद्ध त्ति ।**
**इय अण्णोऽण्णाणुगयं, उभयं पडिवत्तिहेउ त्ति ॥८९१॥ १८/४५**

**युक्त्या अविरुद्धो**ऽबाधितः, **सदागमः** शोभनागमः, **साऽपि** युक्तिः प्रत्यक्षादिका, **तदविरुद्धेति** आगमाविरुद्धः **इत्यवम् अन्योऽन्यानुगतं** परस्परानुगतम्, **उभयं** युक्तिसदागमरूपम्, **प्रतिपत्तिहेतुरिति** प्रतिपत्त्युपाय अतीन्द्रियार्थेषु ॥४५॥

**कयमेत्थ पसंगेणं झाणं, पुण निच्चमेव एयस्स ।**
**[१]सुत्तत्थाणुसरणओ, रागादिविणासणं [२]परमं ॥८९२॥ १८/४६**

**कृतमत्र** पर्याप्तमत्र, **प्रसङ्गेन** विस्तरेण, **ध्यानं पुन**रेकाग्रतारूपम् । **नित्यमेव** सदैव वै **एतस्य** प्रतिमाप्रतिपन्नस्य, **सूत्रार्थानुस्मरणतः** सूत्रार्थयोरनुस्मरणात्, **रागादिविनाशनं** रागद्वेष-मोहापहारहेतुः, **परम** प्रधानं धर्मादि परमत्वं च तस्य मुक्तिहेतुत्वादिति ॥४६॥

[अभयदेवसूरिपादैरयं पाठः पाठान्तरत्वेन उपात्तः । स्वयं तु 'सुत्तत्थाणुसरणं' इति प्रथमान्तम्, तथा 'ओ' इति पूर्णार्थं स्वीकरोति,] (१. सुत्तत्थाणुसरणं ओ अटी. । २. रम्मं अटी. ।)

**॥ साधुप्रतिमाप्रकरणम् ॥१८॥ ॥छ॥**

**कृतिरियं श्रीश्वेताम्बराचार्ययशोभद्रस्येति । संवत ११२१ ज्येष्ठसुदि ११ बुधदिने ।॥छ॥**
श्रीरस्तु ॥ **जसोधरेण** लिखितम् -

ससहरकुलम्मि विउले आसि ससहरकरसरिसगुणकलिओ ।
कलिमलकलंकमुक्को सिरिसूरि**जिणेसरो** नाम ॥१॥

तस्सऽत्थि सीसपवरो, सीसो जिणसासणसाहणेक्कतल्लेसो ।
**जिणचंद**सूरिनामो दिणनाहो व्व पसिद्धओ तवसा ॥२॥

अण्णो वि अत्थि पवरो भव्वो भव्वाण बोहणिक्करओ ।
सिरि **अभयदेवसूरी**थिरो थेरो इव अत्थि वेयविऊ ॥३॥

तत्तो वि य दढधम्मो धम्मरुई धम्मदेसओऽत्थि मुणी ।
लद्धुवज्झायपओ सीसो **सिरिधम्मदेवो** त्ति ॥४॥

अह **लाडयम्मि** देसे अत्थि पुरं सुद्धजणवयसमिद्धं ।
नरवइ रयणसमुद्दं वडउद्दं जिणहरसमिद्धं ॥५॥

तत्थ य निवसइ सड्ढो, सम्मत्तदढो वियड्ढगुणजुत्तो ।
जीवाइपयत्थविऊ धणधण्णसमाउलो विमलचित्तो ॥६॥

णाऊण मच्चलोए अणिच्चयं जोव्वणं धणं धण्णं ।
अम्मच्चो कयकिच्चो, **अम्मो** णामेण वरसड्ढो ॥७॥

तस्सऽत्थि थिरसहावा, भावियभवभावणा विमलचित्ता
संवेयपरा वि तहा अवितहवक्का वि विणयरया ॥८॥

जिणपूअकज्जनिरया निरया गुरुसाहुदाणकज्जेसु ।
धम्मेसु चेव निरया, तवसंजमउज्जया चेव ॥९॥

दाणमई रूयमई सहावकरुणापवन्नचित्ता वि ।
जिणवयणभावियमई **होल्ला** णामेण भज्ज त्ति ॥१०॥

वीमंसीऊण तेणं, सह णियजायाइ सम्मभावेणं ।
कयणाणदाणराओ, जिणधम्मपवन्नओ पवरो ॥११॥

तत्तो सुअसद्धाए, निज्जरहेउ त्ति अ(म्मऽ)मच्चेण ।
सिरिधम्म एव उवज्झायकारणे कलिय कलिकालं ॥१२॥

पंचासयाण वित्ति असुभनिवित्ति य भवविरहकित्ती ।
सुत्तसहिया वि(लिहिया) विमला वण्ण जसकित्ति व्व ॥१३॥

जाव य मेरुस्स सिहा जाव य ससि-सूरमंडलपयारो ।
जाव य गह नक्खत्ता ताव य नंदउ इमं पोत्थं ॥१४॥

सुकयत्थो होइ नरो सुयणाणपयाणओ असंदेहं ।
लहइ पसंसं लोए ण य आवइभायणं होइ ॥१५॥

णाणेण होइ णाया, सव्वपयत्थाण मच्चलोयम्मि ।
णाणेण पूयणिज्जो सलाहणिज्जो वि लद्धजसो ॥१६॥

णाणं विवेयजणयं णाणं सिवसोक्खकारणं परमं ।
णाणं जिणवरभणियं, णरयगइनिवारणं एक्कं ॥१७॥

णाणं दिंतो वि नरो, ण पावए अयसपंकयं कहवि ।
लंघेई भवपवंचं सुणाणदाणेण अवियारं ॥१८॥

णाणस्स फलं विरई, विरइभावाओ आसवनिरोहो ।
आसवनिरोहा संवर संवरओ होइ तव विउलो ॥१९॥

तवसो फलं च निज्जर, निज्जरओ होइ कम्महाणी वि ।
कम्माण खये जीवो, सिद्धो बुद्धो हवइ निच्चो ॥२०॥

**[ कोबा हस्तप्रत-१००४८ ]** - इति श्रीपञ्चाशकलघुटीका सम्पूर्णम् ॥ संवत् १९४१ रा चैत्रवद अष्टमी ८ दिने लिखिता महर्षि रत्नचंद बृहन्नागोरी लुंकागच्छे, ॥ श्रीजैशलमेरे चरमत्तीर्थंकरो, प्रनग[सा]दात् उपरी परत प्रमाणे लीखी छै ॥ रस्वदीर्घ अक्षरमात्रा की खोट होय तो दोसा नहि है ॥ श्रीभैरवप्रशादात् ॥ वासी हमीर रहते हैं ॥

**दूहो - जब लग मेरू अडत हे, तब लग ससीहर सूर ।**
**जब लग पुस्तक ए सदा रहजो गुण भरपूर ॥**

॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

[इतोऽन्तं यावद् ग्रंथवृत्तिः **अभयदेवीया अत्रावतारिता**]

अथ प्रतिमागतमेवोपदिशन्नाह -

**एया पवज्जियव्वा, एयासिं जोग्गयं उवगएणं ।**
**सेसेण वि कायव्वा, केइ पइन्नाविसेस त्ति ॥८९३॥ १८/४७**

**'एय त्ति'** अनन्तरोक्तभिक्षुप्रतिमाः **'पवज्जियव्व त्ति' प्रतिपत्तव्याः** । **'एयासिं** ति' **एतासां** प्रतिमानाम् **'जोग्गयं ति' योग्यताम्** **'उवगएणं** ति' प्राप्तेन साधुना । तदन्यस्य को विधिरिति? आह - **'सेसेण वि त्ति'** तदन्येनापि **'कायव्व** त्ति' विधेयाः । **'केइ त्ति' केचित्** **'पइन्नाविसेस त्ति'** अभिग्रहविशेषाः । **इति** समासौ । इति गाथार्थः ॥४७॥

तानेवाह -

**जे जम्मि जम्मि कालम्मि बहुमया पवयणुन्नतिकरा य ।**
**उभओ जोगविसुद्धा, आयावणठाणमाईया ॥८९४॥ १८/४८**

**'जे त्ति'** ये प्रतिज्ञाविशेषाः **'जम्मि जम्मि त्ति' यस्मिन् यस्मिन्** **'कालम्मि त्ति'** अवसर **'बहुमय त्ति' बहुमता** गीतार्थानाम् **'पवयणुन्नइकरा य त्ति'** शासनप्रभावनहेतवोऽद्भुतभूतत्वेन श्लाघानिबन्धनत्वात् । **'उभओ त्ति' उभाभ्यां** प्रकाराभ्यां क्रियाया भावतश्चेत्यर्थः । **'जोगविसुद्ध** त्ति' **विशुद्धयोगा** निरवद्यव्यापाराः । **'आयावणठाणमाइय त्ति' आतापना** शीतादिसहनम्, **स्थानमुत्कटुकादिकम् आदिशब्दाद्विविधद्रव्याद्यभिग्रहग्रहः** । इति गाथार्थः ॥४८॥

एतदकरणे दोषमाह -

**एएसिं सइ विरिए, जमकरणं मयपमायओ सो उ ।**
**होअइयारो सो पुण, आलोएयव्वओ गुरुणो ॥८९५॥ १८/४९**

'**एएसिं** ति' **एतेषां** प्रतिज्ञाविशेषाणां '**सइ** त्ति' विद्यमाने '**विरिए** त्ति' **वीर्ये** '**जमकरणं** ति' यदविधानम् । कथं ? '**मयप्पमायओ** त्ति' गर्वालस्याभ्यां । '**सो उ** त्ति' **स पुनः** । '**होयइयारो** त्ति' **जायते**ऽतिक्रमश्चरणस्य । '**सो पुण** त्ति' **सोऽतिचारः** पुनः । '**आलोएयव्वओ** ति' निवेदनीयः शुद्ध्यर्थम् । '**गुरुणो** त्ति' आलोचनाचार्यस्य । इति गाथार्थः ॥४९॥

उक्तार्थफलभणनेन प्रकरणमुपसंहरन्नाह -

**इय सव्वमेवमवितहमाणाए भगवओ पकुव्वंता ।**
**सयसामत्थणुरूवं, अइरा काहिंति भवविरहं ॥८९६॥ १८/५०**

'**इय** त्ति' एतदभिग्रहजातम् । '**सव्वं** ति' समस्तम् । '**एवं** ति' एवमुक्तन्यायेन । '**अवितहं** ति' अविपरीतम् । कथं ? '**आणाए** त्ति' आदेशेन, न स्वमत्या । कस्येत्याह-'**भगवओ** त्ति' आप्तस्य । '**पकुव्वन्त** त्ति' **प्रकुर्वाणाः** । कथमिति ? आह-'**सयसामत्थणुरूवं** ति' निजशक्त्यनुसारेण । '**अइर** त्ति' शीघ्रम् । '**काहिंति** त्ति' विधास्यन्ति । '**भवविरहं** ति' संसारक्षयम् । इति गाथार्थः ॥५०॥

**[ अष्टादशं भिक्षुप्रतिमा पञ्चाशकं समाप्तम् ]**

**॥ प्रतिमाकल्पप्रकरणं वृत्तितः समाप्तमिति ॥**

# ॥ एकोनविंशतितमं तपोविधि-पञ्चाशकम् ॥१९॥

अनन्तरं भिक्षुप्रतिमा उक्तास्तपोरूपाश्च ता इत्यतस्तपः स्वरूपनिरूपणाय प्रकरणं प्रतिपिपादयिषुर्मंगलाद्यभिधानायाह -

**नमिऊण वद्धमाणं, तवोवहाणं समासओ वोच्छं ।**
**सुत्तभणिएण विहिणा, सपरेसिमणुग्गहट्ठाए ॥८९७॥ १९/१**

**नत्वा** प्रणम्य **वर्धमानं** वीरं **तपउपधानं** तपोरूपं संयमकायोपष्टंभनं तपोविधानं वा तपोऽनुष्ठानं **समासतः** संक्षेपेण **वक्ष्ये** भणिष्यामि । **सूत्रभणितेना**गमोक्तेन **विधिना** प्रकारेण **स्वपरेषामनुग्रहार्थाय** स्वपरोपकारायेत्यर्थः । इति गाथार्थः ॥१॥

अथ तपोभेदान् दर्शयन्नाह -

**अणसणमूणोयरिया, वित्तीसंखेवणं रसच्चाओ ।**
**कायकिलेसो संलीणया य बज्झो तवो होइ ॥८९८॥ १९/२**

**अनशन**मभोजनं यावत्कथिकेत्वरभेदम् । तत्र यावत्कथिकं पादपोपगमनमिङ्गितमरणं भक्तपरिज्ञा चेति त्रिधा । तत्राद्यं सर्वथा परिस्पन्दवर्जितमप्रतिकर्म चतुर्विधाहारत्यागनिष्पन्नं च । द्वितीयमपि तथैव, नवरमिङ्गितदेशे चङ्क्रमणाद्यपरिहारवत् । तृतीयं तु सप्रतिकर्म त्रिविध-चतुर्विधाहारत्यागनिष्पन्नं चेति । इत्वरं पुनश्चतुर्थभक्तादि षण्मासान्तम् । ( १ ) तथोनोदरस्य स्तोकाहाराभ्यवहारादपरिपूर्णोदरस्य करणम् **ऊनोदरिका** । सा च द्रव्यतो द्वात्रिंशत्कवलमान-पूर्णाहारापेक्षयैकादिकवलन्यूनाहारग्रहणतोऽनेकविधा । भावोनोदरिका तु कषायत्यागः । ( २ ) तथा **वृत्ते**र्भिक्षाचर्यायाः **संक्षेपण**मल्पताकरणं वृत्तिसंक्षेपणं द्रव्याद्यभिग्रहग्रहणम् । तत्र द्रव्यतो 'लेपकृदेवेतरदेव वा द्रव्यं मया ग्राह्यम्' इत्यादि। एवं क्षेत्रतः स्वग्राम एव परग्राम एव वा एतावत्स्वेव वा गृहेषु यल्लप्स्यत इत्यादि । एवं कालतः पूर्वाह्णे मध्याह्नेऽपराह्णे वा । भावतः पुनरुत्क्षिप्तमेव वा निक्षिप्तमेव वा गायतो वा रुदतो वा यल्लप्स्यत इत्यादि । ( ३ ) तथा **रसानां** दुग्धदध्यादीनां सर्वेषामन्यतरेषां वा **त्याग**स्त्यजनं रसत्यागः । ( ४ ) तथा **कायस्य** देहस्य **क्लेशः**, औचित्येन विबाधनं कायक्लेशो वीरासनोत्कटुकासनगोदोहिकाशीतवातातपसहन-शिरोलोचादिरनेकविधः । ( ५ ) तथा संलीनस्य संवृतस्य भावः **संलीनता** । सा चेन्द्रिय-कषाय-योग-विविक्तचर्याभेदाच्चतुर्धा । तत्राद्यत्रयं प्रतीत। विविक्तचर्या तु स्त्रीपशुपण्डक-कुशीलवर्जानवद्याश्रयाश्रयणम् । ( ६ ) **च** शब्दः समुच्चये । **बाह्यं** अनाभ्यन्तरम् आसेव्यमान-

स्यास्य लोकैरपि ज्ञायमानत्वात्। स्थूलदृष्टीनामपि च कुतीर्थिकानां तपस्तया प्रतीतत्वात्। **तपः** प्रतीतम्। **भवति** स्यात्। इति गाथार्थः ॥२॥

उक्तं बाह्यं तपोऽथान्तरमाह -

**पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ ।**
**झाणं उस्सग्गो वि य, अब्भितरओ तवो होइ ॥८९९॥ १९/३**

**प्रायश्चित्तमु**क्तशब्दार्थमालोचनादि प्रागुक्तम्। तथा विनीयतेऽपोह्यते कर्मानेनेति **विनयः**। स च ज्ञान-दर्शन-चारित्र-मनो-वाक्-कायोपचारभेदात् सप्तधा । तत्राद्यो मत्यादीनां श्रद्धान-भक्तिबहुमान-तद्दृष्टार्थभावना-विधिग्रहणाभ्यासरूपः । द्वितीयस्तु सम्यग्दर्शनगुणाधिकेषु शुश्रूषानाशातनाभेदात् द्वेधा । तयोश्चाद्यः सत्काराभ्युत्थानसन्मानासनाभिग्रहासनानुप्रदान-कृतिकर्माञ्जलिप्रग्रहा गच्छदनुगमनस्थितपर्युपासनगच्छदनुव्रजनभेदाद् दशधा प्रसिद्ध एव । नवरं सत्कारो वन्दनादि-रभ्युत्थानं गौरव्यदर्शने विष्टरत्यागः, सन्मानो वस्त्रादिपूजनम्, आसनाभिग्रह पुनस्तिष्ठत एवासनानयनपूर्वकमुपविशतात्रेति भणनम्, आसनानुप्रदानं त्वासनस्य स्थानान्तरसञ्चारणम्, आगच्छतोऽनुगमनमभिमुखयानमिति । अनाशातनाविनयस्तु पञ्चदशधा । तद्यथा-जिनधर्मसूरि-वाचकस्थविरकुलगणसङ्घसाम्भोगिकक्रियाज्ञानपञ्चकानामनाशातना भक्तिबहुमानवर्णवादाश्चेति। अत्र च क्रिया-आस्तिक्यमुच्यते । चारित्रविनयस्तु सामायिकादिचारित्राणां श्रद्धानकरणप्ररूपणानि । मनोवाक्कायविनयास्तु आचार्यादिष्वकुशलानां चित्तादीनां सदा निरोधः, कुशलानां पुनरुदीरणेति । उपचारविनयस्तु सप्तधा-अभ्यासासनं (१) छन्दोनुवर्तनं, (२) कृतप्रतिकृतिः (३) कारित-निमित्तकरणं (४) दुःखार्तगवेषणं (५) देशकालज्ञानं (६) सर्वत्रानुमतिश्चेति (७)। प्रतीतश्चायं नवरं कृतप्रतिकृतिर्नाम विनयात् प्रसादिताः सूरयः श्रुतं दास्यन्तीत्यभिप्रायेणाशनदानादियत्नः । कारितनिमित्तकरणं तु सम्यगर्थपदमध्यापितस्य विशेषेण विनये वृत्तिस्तदर्थानुष्ठानं चेति । दुःखार्तगवेषणं तु दुःखितस्य प्रतीकारकारणमिति । तथा व्यावृत्तस्याशनादिदानव्यापारवतो भावः कर्म वा **वैयावृत्यम्**, तच्चाचार्योपाध्याय(१-२)स्थविर(३)तपस्वि(४)ग्लान(५)शैक्ष(६)साधर्मिक (७)कुल(८)-गण(९)संघ(१०)भेदाद् दशधा। **तथैवे**ति समुच्चये। सुष्ठु आ मर्यादयाऽध्यायोऽध्ययनं **स्वाध्यायः**। स च पञ्चधा-वाचना(१)पृच्छना(२)परिवर्तना(३)अनुप्रेक्षा(४)धर्मकथा(५)भेदादिति। तथा ध्यातिर्**ध्यानं** अन्तर्मुहूर्तमात्रं चित्तैकाग्रता । तच्चार्त-रौद्र-धर्म-शुक्लभेदाच्चतुर्धा । तत्राद्ययो-र्भवहेतुत्वादितरयोश्च मुक्तिनिमित्तत्वादितरे एव तपः। तथा उत्सर्जनं त्यजनं **उत्सर्गः**। स च द्वेधा द्रव्यतो भावतश्च। द्वावपि चतुर्धा, तत्र द्रव्यतश्चतुर्धा गणशरीरोपध्याहारभेदात्। भावतस्तु चित्तकोपादि-त्यागरूपत्वादस्य । **'अब्भितरउ त्ति' आभ्यन्तरकम**बाह्य लौकिकैः प्रायोऽनभिलक्ष्यत्वात् तन्त्रान्तरीयैर्भावतोऽनासेव्यमानत्वान्मोक्षप्राप्त्यन्तरङ्गत्वाच्च **तपो** निर्जराहेतु**र्भवति**

स्यादिति गाथार्थः ॥३॥

**एसो बारसभेओ, सुत्तनिबद्धो तवो मुणेयव्वो ।**
**एयविसेसो उ इमो, पइन्नगोऽणेगभेदो त्ति ॥९००॥ १९/४**

**इह तपः** शब्दस्य प्राकृतत्वेन पुल्लिंगनिर्देशः, एतदनन्तरोक्तं **द्वादशभेदं** उभयेषां भेदानां मीलना । **सूत्रनिबद्धं** शासनोक्तम् **तपस्तपस्या 'मुणेयव्वो** त्ति' ज्ञातव्यम् । **एतद्विशेषस्तु** अनन्तरोक्ततपोभेद एव । **'इमो** त्ति' **इदं** वक्ष्यमाणं तपः **प्रकीर्णकं** व्यक्तितः सूत्रानिबद्धं न भिक्षुप्रतिमादीवत् सूत्रे निबद्धमित्यर्थः । न चोत्सूत्रत्वमस्य द्वादशभेदतपस्यन्तर्भावात् । तच्च **अनेकभेद**मनेकविधालंबनत्वात् । **इति**शब्दः समाप्तौ । इति गाथार्थः ॥४॥

प्रकीर्णकमेव तपो दर्शयन्नाह –

**तित्थगरनिग्गमादी, सव्वगुणपसाहणं तवो होइ ।**
**भव्वाण हिओ नियमा, विसेसओ पढमठाणीणं ॥९०१॥ १९/५**

**तीर्थकरनिर्गमादि** येन तपसा तीर्थकरा निष्क्रान्ताः । आदिशब्दात् तीर्थकरज्ञाननिर्वाणादिग्रहः । किंभूतमिदमित्याह-**सर्वगुणसाधकं** तीर्थकरनिर्गमनाद्यालंबनस्य शुभभावप्रकर्षरूपत्वेन ऐहलौकिकाद्युपकारकारित्वात् । **तपो भवतीति** व्यक्तम् । अत एव **भव्यानां हितं नियमा**दिति व्यक्तम् । **विशेषतः** पुनः **प्रथमस्थानिना**मव्युत्पन्नबुद्धीनाम्, हितत्वादेव निरालंबनतयापि शुभभावप्रकर्षसंभवात् सर्वमपि हितमेवेति गाथार्थः ॥५॥

तत्र तीर्थकरनिर्गमतपः प्रतिपादयंस्तावदाह –

**तित्थगरनिग्गमो खलु, ते जेण तवेण निग्गया सव्वे ।**
**ओसप्पिणीए सो पुण, इमीए एसो विणिद्दिट्ठो ॥९०२॥ १९/६**

**तीर्थकरैर्निर्गमे** गृहवासाद् यत्कृतं तपस्तत्तीर्थकरनिर्गमः । **खलु**रलंकारे । तच्च कीदृशमिति ? आह-**ते** तीर्थकरा **येन तपसा निर्गता** गृहवासात् **सर्वेऽवसर्पिण्याम् । 'सो पुण त्ति' तत्पुनस्तपोऽस्यां** वर्तमानायाम् । **'एसा** त्ति' **एतद्**वक्ष्यमाणम् । **'विणिद्दिट्ठो** त्ति' उक्तम् । इति गाथार्थः ॥६॥

एतदेवाह –

**सुमइ त्थ निच्चभत्तेण निग्गओ वसुपुज्ज जिणो चउत्थेण ।**
**पासो मल्ली वि य अट्ठमेण सेसा य छट्ठेणं ॥९०३॥ १९/७**

**सुमतिः** पञ्चमजिनः '**त्थ**' इति पादपूरणे निपातः। **नित्यभक्तेना**नवरतभोजनेनाविहितोपवास इत्यर्थः। **निर्गतो** गृहवासान्निष्क्रान्तः। तथा **वासुपूज्यो** द्वादशो **जिनो**ऽर्हन्। **चतुर्थेनै**कोपवासरूपेण। **पार्श्व**स्त्रयोविंशतितमः, **मल्लि**रेकोनविंशतितमः। **अष्टमेना**पवासत्रयरूपेण। **शेषास्तु** विंशतिः पुनः **षष्ठेनो**पवासद्वयरूपेण। इति गाथार्थः ॥७॥

एतद्विधानविधिमाह -

**उसभाइकमेणेसो, कायव्वो ओहओ सइ बलम्मि।**
**गुरुआणापरिसुद्धो, विसुद्धकिरियाएँ धीरेहिं ॥९०४॥ १९/८**

**ऋषभादिक्रमेण** नाभेयनिर्गमाद्यानुपूर्व्या **एष** तीर्थकरनिर्गमः **कर्तव्यो** विधेयः। **ओघतः** सामान्येनोत्सर्गेणेत्यर्थः। **सति** विद्यमाने **बले** शक्तौ। तथाविधबलाभावे पुनर्व्यतिक्रमकरणेऽपि न दोष इति भावः। **गुर्वाज्ञया परिशुद्धो** निर्दोषस्तत्संपादनाद् गुर्वाज्ञापरिशुद्धः। तथा **विशुद्ध-क्रियया**ऽनवद्यानुष्ठानेन। **धीरैः** सात्त्विकैः। इति गाथार्थः ॥८॥

इहैव मतान्तरमाह -

**अन्ने तम्मासदिणेसु, बेंति लिंगं इमस्स भावम्मि।**
**तप्पारणसंपत्ती, तं पुण एयं इमेसिं तु ॥९०५॥ १९/९**

**अन्ने** गाहा। **अन्ये**ऽपरे सूरयः तेषामृषभादिजिननिर्गमतपसां ये मासाः प्रतीता दिनानि च तिथयस्तानि **तन्मासदिनानि तेषु** न मासान्तरतिथ्यन्तरेषु। **ब्रुवते** तीर्थकरनिर्गमतपः। तथाहि- ऋषभस्वामिनो निष्क्रमणतपोऽङ्गीकृत्य चैत्रमासबहुलाष्टमीदिन एव षष्ठं कार्यम्। वर्धमानस्वामिनश्च मार्गशीर्षबहुलदशमीदिन एवेति। एवमन्येषामपीति। तथा **लिङ्गं** लक्षणम्। **अस्य** ऋषभादिनिर्गमतपसः **भावे** संसिद्धौ। तेषामृषभादीनां यस्य **यत्पारणं** भोजनमासीत्तस्य **संपत्तिः** प्राप्तिस्तत्पारणसंपत्तिः। **तत्पुनः** पारणक**मेतद्** वक्ष्यमाण**मेषा**मृषभादीनाम्। **तुशब्दः** पूरणे। इति गाथार्थः ॥९॥

तदेवाह -

**उसभस्स उ इक्खुरसो, पारणए आसि लोगनाहस्स।**
**सेसाणं परमण्णं, अमयरसरसोवमं आसी ॥९०६॥ १९/१०**

**ऋषभस्य तु** नाभेयस्यैव **इक्षुरसः पारणके आसील्लोकनाथस्ये**ति व्यक्तम्। **शेषाणा**मजितादीनां **परमान्नं** पायसं **अमृतरसेन** लोकरूढ्यपेक्षया रसे स्वादे **उपमा** यस्य **तत्तथा** तदासीदभूत्। इति गाथार्थः ॥१०॥

एतस्यैव प्रसंगेन लब्धिकालमाह –

**संवच्छरेण भिक्खा, लद्धा उसभेण लोगनाहेण ।**
**सेसेहिं बीयदियहे, लद्धा पढमभिक्खाओ ॥९०७॥ १९/११**

**संवत्सरेण भिक्षा लब्धा ऋषभेण लोकनाथेन ।** **शेषैरिति** व्यक्तम् । **द्वितीयदिवस** प्रव्रज्यादिवसापेक्षया **लब्धाः प्रथमभिक्षाः** इति व्यक्तम् । इति गाथार्थः ॥११॥ तथा–

**तित्थंकरनाणुप्पत्तिसन्निओ तहऽपरो तवो होति ।**
**पुव्वोइएण विहिणा, कायव्वो सो पुण इमो त्ति ॥९०८॥ १९/१२**

**तित्थं** गाहा । तीर्थकरज्ञानोत्पत्तिरिति संज्ञा सञ्जाता यस्य तत् **तीर्थकरज्ञानोत्पत्तिसंज्ञितं** । पुंस्त्वं तु सर्वत्र प्राकृतत्वात् । **तथ**ति समुच्चये । **अपर**मन्यत् **तपो भवति** स्यात् । **पूर्वोदितेन विधिना** ऋषभादिक्रमेण गुर्वाज्ञया विशुद्धक्रियया च मतान्तरेण तन्मासदिनेष्वित्येवंलक्षणेन । '**कायव्वो** त्ति' **कार्यं** । '**सो पुण** त्ति' तत्पुनः प्रस्तुततपः । '**इमो त्ति इदं** वक्ष्यमाणम् । **इतिः** समाप्तौ । इति गाथार्थः ॥१२॥

एतदेवाह –

**अट्ठमभत्तंतम्मि य, पासोसहमल्लिरिट्ठनेमीणं ।**
**वसुपुज्जस्स चउत्थेण छट्ठभत्तेण सेसाणं ॥९०९॥ १९/१३**

**उसभाइयाणमेत्थं, जायाइं केवलाइँ नाणाइं ।**
**एयं कुणमाणो खलु, अचिरेणं केवलं [१]लहइ ॥९१०॥ १९/१४**

**अट्ठम** गाहा । **उसभ** गाहा । अष्टमभक्तान्त एव उपवासत्रयावसान एव । **चशब्द** एवकारार्थः **पार्श्वर्षभमल्लिरिष्टनेमीनां** जिनानां केवलान्युत्पन्नानीति योगः । **वासुपूज्यस्य** द्वादशजिनस्य **चतुर्थेन**कोपवासरूपेण । **षष्ठभक्तेनो**पवासद्वयरूपेण **शेषाणा**मेकोनविंशतेर्जिनानामिति ॥१३॥

**ऋषभादिकानां** जिनानां । **अत्र** तपसि कृते । **जातान्युत्पन्नानि** । **केवलानि** केवलसंज्ञितानि । **ज्ञानानि** संवेदनानि । **अत एतत्तीर्थ**करज्ञानोत्पत्तिसंज्ञितं तपः **कुर्वाणः खल्वचिरेण केवलं लभत** इति व्यक्तम् । उपैतीति पाठान्तरं चेति गाथाद्वयार्थः ॥१४॥ (१. उवेइ अटी.जे ।) तथा–

**तित्थगरमोक्खगमणं, अहावरो एत्थ होइ विन्नेओ ।**
**जेण परिनिव्वुया ते, महाणुभावा तओ य इमो ॥९११॥ १९/१५**

**तित्थ** गाहा । **तीर्थकरमोक्षगमनं** नाम । **अथानन्तरं** । '**अवरो** त्ति' **अपरमत्र** तपोऽधिकार । **भवति** स्यात् । '**विन्नेओ** त्ति' **विज्ञेयं येन** तपसा **परिनिर्वृता** निर्वाणं गताः । **ते**

तीर्थकराः **महानुभावा** अचिन्त्यशक्तयः । **'तओ य इमो** त्ति' **तकच्च** तीर्थकरनिर्वाणगमनाख्यं तप **इदं** वक्ष्यमाण । इति गाथार्थः ॥१५॥

तदेवाह -

**निव्वाणमंतकिरिया, सा चोद्दसमेण पढमनाहस्स ।**
**सेसाण मासिएणं, वीरजिणिंदस्स छट्ठेणं ॥९१२॥ १९/१६**

**निव्वाण** गाहा । **निर्वाणं** निर्वृत्तिः । **अन्तक्रियेति** अन्तक्रियाशब्देनोच्यते । **सान्तक्रिया 'चोद्दसमेण** त्ति' **चतुर्दशभक्तेनो**पवासषट्करूपेण **प्रथमनाथस्य** ऋषभजिनस्य । **शेषाणाम**-जितादीनां **मासिकेन** मासोपवासरूपेण । **वीरजिनेन्द्रस्य षष्ठेने**ति व्यक्तम् । इति गाथार्थः ॥१६॥

अथैते यत्र निर्वृतास्तत्प्रसंगेन दर्शयितुमाह -

**अट्ठावयचंपोज्जितपावासंमेयसेलसिहरेसु ।**
**उसभ-वसुपुज्जनेमी-वीरो सेसा य सिद्धिगया ॥९१३॥ १९/१७**

स्पष्टा नवरं **अष्टापदः** पर्वतविशेषः । **चंपा** नगरी । **'उज्जित** त्ति' **उज्जयन्तः** पर्वतविशेष एव । **'पाव** त्ति' अपापा मध्यमा नाम नगरी । **संमेतशैलशिखरं** पर्वतविशेषकूटं । **एषु** स्थानकेषु । **ऋषभादयः** क्रमेण सिद्धिं गता इति गाथार्थः ॥१७॥ तथा-

**चंदायणाइ य तहा अणुलोमविलोमओ तवो अवरो ।**
**भिक्खाकवलाण पुढो विन्नेओ वुड्ढिहाणीहिं ॥९१४॥ १९/१८**

**चंदा** गाहा । **चन्द्रायणमिव** चन्द्रायणं **तदादि च** । आदिशब्दाद् भद्रा-महाभद्रा-सर्वतोभद्रा-रत्नावली-कनकावल्ये-कावली-सिंहनिष्क्रीडितद्वया-चाम्लवर्धमान-गुणरत्नसंवत्सर-सप्तसप्तमिकादिचतुष्टय-कल्याणकादितपसामागमप्रसिद्धानां ग्रहः । **तथेति** वाक्यान्तरोपक्षेपार्थो गाथादौ दृश्यः । **अनुलोमविलोमतो** गतप्रत्यागत्या । **तपोऽपरमन्यत्** । कथं? **भिक्षाकवलानां** प्रतीताना **पृथग्** भेदेन **विज्ञेयो** ज्ञेयो **वृद्धिहानिभ्यां** । इति गाथार्थः ॥१८॥

इयं च चान्द्रायणप्रतिमा यवमध्या स्याद् व्रज्रमध्या च, तत्राद्यां तावद्दर्शयन्नाह -

**सुक्कम्मि पडिवयाओ, तहेव वुड्ढीएँ जाव पन्नरस ।**
**पंचदसिपडिवयाहिं, तो हाणी किण्हपडिवक्खे ॥९१५॥ १९/१९**

**शुक्ले** शुक्लपक्षे **प्रतिपदः** प्रथमतिथेरारभ्य **तथैव** तेनैव प्रकारेण एकाद्येकोत्तरलक्षणेन वृद्ध्या प्रतिदिनं भिक्षाणां कवलानां च वर्धनेन **यावत् पञ्चदश** भिक्षाः कवलान् वा गृह्णाति ।

**'पंचदसिपडिवयाहिं** ति' **पञ्चदश्यां** पौर्णमास्यां **प्रतिपदि च** कृष्णपक्षप्रथमतिथौ। **'तो** त्ति' **ततो**ऽनन्तरं। **'हाणि** त्ति' एकैकशोऽनुदिनं भिक्षादि**हानिं** करोति। **कृष्णप्रतिपक्षे** कृष्णस्वरूपे शुक्लपक्षापेक्षया द्वितीयपक्ष इत्यर्थः। तत्र चामावास्यायामेका भिक्षा कवलो वा स्यादिति गाथार्थः ॥१९॥

अथ वज्रमध्या, तामाह -

**किण्हे पडिवय-पन्नरस, [१]इगेगहाणी उ जाव इक्को उ।**
**अमवस्सपडिवयाहिं, वुड्डी पन्नरस पुन्नाए ॥९१६॥ १९/२०**

**किन्हे** गाहा। **कृष्णे** पक्षे **प्रतिपदि** प्रथमतिथौ **पञ्चदश**कवलादीन् गृह्णाति। तत **'इगेगहाणी उ** त्ति' [२]**एकैक**कवलादि**हानिः** प्रतिदिनं क्रियते। **यावदेकस्तु** एक एव कवलादिः। **अमावास्या-प्रतिपदोः** प्रतीतयोः। ततो **वृद्धिः** कवलादीनामनुदिनं क्रियते यावत् **पञ्चदश** कवलादयः **पूर्णायां** पूर्णमास्यां भवन्ति। इति गाथार्थः ॥२०॥ (१. एग, पु.। २. एकक पु.।)

इह तपसि भिक्षादि ग्राह्यतयोक्तमतस्तल्लक्षणमाह -

**एत्तो भिक्खामाणं, एगा दत्ती विचित्तरूवा वि।**
**कुक्कुडिअंडगमेत्तं, कवलस्स वि होइ विन्नेयं ॥९१७॥ १९/२१**

**एत्तो** गाहा। **इतो** विवक्षिततपःस्वरूपाभिधानानन्तरं **भिक्षामानं** वाच्यमिति शेषः। तच्चेदम्- **एका**ऽसहाया **दत्ति**र्भक्तप्रक्षेपरूपा **विचित्ररूपा**ऽपि बह्वल्पैकानेकद्रव्यस्वभावतया नानास्वभावाऽपि, न केवलमेकस्वभावेति। अथ कवलमानमाह- **कुक्कुट्यण्डकमात्रं कवलस्यापि भवति विज्ञेय**मिति प्रतीतं। नवरं मानमिति वर्तते। इति गाथार्थः ॥२१॥

इहैव विशेषमाह -

**एयं च कीरमाणं, सफलं परिसुद्धजोगभावस्स।**
**निरहिगरणस्स णेयं, इयरस्स न तारिसं होइ ॥९१८॥ १९/२२**

**एयं** गाहा। **एतच्चै**तत्पुनरनन्तरोक्तं तपः **क्रियमाणं** विधीयमानं **सफलं** मोक्षादिफलं विज्ञेयमिति योगः। **परिशुद्धा** निर्दोषा **योगा** व्यापारा **भावश्चा**ध्यवसायो यस्य स तथा तस्य। एतदेव स्पष्टतरमाह-**निरधिकरणस्य** गुरुतरारंभवर्जितस्य निष्कलहस्य वा **ज्ञेयं** ज्ञातव्यम्। **इतरस्य** साधिकरणस्य **न** नैव **तादृशं** यादृशं निरधिकरणस्य फलमिति गम्यते। **भवति** स्यात्। इति गाथार्थः ॥२२॥

किञ्च -

**अन्नो वि अत्थि चित्तो, तहा तहा देवयानिओगेण ।**
**मुद्धजणाण हिओ खलु, रोहिणिमादि मुणेयव्वो ॥९१९॥ १९/२३**

**अन्नो** गाहा। **अन्नो वि त्ति अन्यदपि अस्ति** विद्यते। **चित्रं** विचित्रं तप इति गम्यते। **तथा तथा** तेन तेन प्रकारेण लोकरूढेन **देवतानियोगेन** देवतोद्देशेन **मुग्धजनाना**मव्युत्पन्नबुद्धिलोकानां **हितं खलु** पथ्यमेव विषयाभ्यासरूपत्वात् **रोहिण्यादि**देवतोद्देशेन यत्तद्रोहिण्यादि 'मुणेयव्वो त्ति' **ज्ञातव्यम्**। पुल्लिंगता च सर्वत्र प्राकृतत्वात्। इति गाथार्थः ॥२३॥

देवता एव दर्शयन्नाह -

**रोहिणी अंबा तह मंदउन्निया सव्वसंपयासोक्खा ।**
**[1]सुयसंतिसुरा काली, [2]सिद्धाइया तहा चेव ॥९२०॥ १९/२४**

**रोहिणि** गाहा। **रोहिणी** (१), **अंबा** (२) **तथा मन्दपुण्यिका** (३)। **'सव्वसंपयासोक्ख त्ति' सर्वसंपत्** (४) **सर्वसौख्या** चेत्यर्थः (५)। **'सुयसंतिसुर त्ति' श्रुतदेवता** (६) **शान्तिदेवता** (७) चेत्यर्थः, 'सुयदेवय-संति-सुरा' इति वा पाठान्तरं व्यक्तं च। **काली**, (८) **सिद्धायिका** (९) इत्येता नव देवताः, **तथा चैवेति** समुच्चयार्थः, 'संबाइया चेव त्ति' पाठान्तरं। इति गाथार्थः ॥२४॥ (१. सुयदेवय-संति-सुरा. अटी. जे.। २. संबाइया चेव अटी.।)

ततः किमित्याह -

**एमादिदेवयाओ, पडुच्च अवऊसगा उ जे चित्ता ।**
**नाणादेसपसिद्धा, ते सव्वे चेव होन्ति तवो ॥९२१॥ १९/२५**

**एमा** गाहा। **एवमादिदेवताः प्रतीत्यैतदाराधनयेत्यर्थः। 'अवऊसग त्ति' अपवसनानि** अवजोषणानि वा **तुः** पूरणे **ये चित्रा नानादेशप्रसिद्धास्ते सर्वे चैव भवन्ति तपः** इति स्फुटमिति। तत्र रोहिणीतपो रोहिणीनक्षत्रदिनोपवासः सप्तमासाधिकसप्तवर्षाणि यावत्। तत्र च वासुपूज्यजिन-प्रतिमायाःप्रतिष्ठा पूजा च विधेयेति। तथा अम्बातपः पञ्चसु पञ्चमीष्वेकाशनादि विधेयं नेमिनाथाम्बिकापूजा चेति। तथा श्रुतदेवतातप एकादशस्वेकादशीषूपवासो मौनव्रतं श्रुतदेवतापूजा चेति। शेषाणि तु रूढितोऽवसेयानीति गाथार्थः ॥२५॥

अथ कथं देवतोद्देशेन विधीयमानं यथोक्तं तपः स्यादित्याशङ्क्याह -

**जत्थ कसायनिरोहो, बंभं जिणपूयणं अणसणं च ।**
**सो सव्वो चेव तवो, विसेसओ मुद्धलोयम्मि ॥९२२॥ १९/२६**

**जत्थ** गाहा । **यत्र** तपसि **कषायनिरोधो ब्रह्म जिनपूजन**मिति व्यक्तम् **अनशनं च** भोजनत्यागः **'सा त्ति' तत् सर्वं** भवति **तपो विशेषतो मुग्धलोके,** मुग्धलोको हि तथा प्रथमतया प्रवृत्तः सन्नभ्यासात्कर्मक्षयोद्देशेनापि प्रवर्तते, न पुनरादित एव तदर्थं प्रवर्तितुं शक्नोति, मुग्धत्वादेवेति । सद्बुद्धयस्तु मोक्षार्थमेव विहितमिदमिति बुद्ध्यैव वा तपस्यन्ति । यदाह- ***"मोक्षायैव तु घटते, विशिष्टमतिरुत्तमः पुरुषः"*** [तत्त्वार्थसूत्रकारिका-१ श्लोक ५] इति । मोक्षार्थघटना चागमविधिनैव । आलम्बनान्तरस्यानाभोगहेतुत्वात् । इति गाथार्थः ॥२६॥

न चेदं देवतोद्देशेन तपः सर्वथा निष्फलमैहिकफलमेव वा, चरणहेतुत्वादपीति चरणहेतुत्वमस्य दर्शयन्नाह -

**एवं पडिवत्तीए, [१]एत्तो मग्गाणुसारिभावाओ ।**
**चरणं विहियं बहवे, पत्ता जीवा महाभागा ॥९२३॥ १९/२७**

**एवं** गाहा । **एव**मित्युक्तानां साधर्मिकदेवतानां कुशलानुष्ठानेषु निरुपसर्गत्वादिहेतुना **प्रतिपत्त्या** तपोरूपोपचारेण तथा **इत** उक्तरूपात् कषायादिनिरोधप्रधानात् तपसः, पाठान्तरेण **एवमुक्तकरणेन मार्गानुसारिभावात्** सिद्धिपथानुकूलाध्यवसायात् **चरणं** चारित्रं **विहित**माप्तोपदिष्टं **बहवः** प्रभूताः **प्राप्ता** अधिगताः **जीवाः** सत्वाः **महाभागा** महानुभावाः । इति गाथार्थः ॥२७॥ (१. एवं. पु, जे. ।) तथा-

**सव्वंगसुंदरो तह, निरुजसिहो परमभूसणो चेव ।**
**आयइजणगो सोहग्गकप्परुक्खो तहण्णोऽवि ॥९२४॥ १९/२८**

**पढिओ तवोविसेसो अन्नेहिं वि तेहिं तेहिं सत्थेहिं ।**
**मग्गपडिवत्तिहेऊ हंदि विणेयाणुगुण्णेणं ॥९२५॥ १९/२९**

**सव्वं** गाहा । **पढिओ** गाहा । सर्वाङ्गानि सुन्दराणि यतस्तपोविशेषात् स **सर्वाङ्गसुन्दरः** । **तथे**ति समुच्चये रुजानां रोगाणामभावो निरुजं तदेव शिखेव शिखा प्रधानं फलतया यत्रासौ **निरुजशिखः** । तथा परमाण्युत्तमानि भूषणान्याभरणानि यतोऽसौ **परमभूषणः** । **चैवे**ति समुच्चय । तथा आयतौ आगामिकालेऽभीष्टफलं जनयति करोति योऽसौ **आयतिजनकः** । तथा **सौभाग्यस्य** सुभगतायाः संपादने **कल्पवृक्ष** इव यः स **सौभाग्यकल्पवृक्षः** । **तथे**ति समुच्चये । **अन्योऽपि** अपरोऽपि उक्ततपोविशेषात् ॥२८॥

किमिति ? आह - **पठितोऽ**धीत**स्तपोविशेष**स्तपोभेदः । **अन्यैरपि** ग्रन्थकारैः **तेषु तेषु शास्त्रेषु** नानाग्रन्थेष्वित्यर्थः । नन्वयं पठितोऽपि साभिष्वङ्गत्वान्न मुक्तिमार्ग इत्याशङ्क्याह-**मार्गप्रतिपत्तिहेतुः**

शिवपथाश्रयणकारणं यश्च तत्प्रतिपत्तिहेतुः स मार्ग एवोपचारात् । कथमिदमिति चेदुच्यते-हंदीत्युपप्रदर्शन। **विनेयानुगुण्येन** शिक्षणीयसत्त्वानुरूप्येण । भवन्ति हि केचित् ते विनेया ये साभिष्वङ्गानुष्ठानप्रवृत्ताः सन्तो निरभिष्वङ्गमनुष्ठानं लभन्ते । इति गाथाद्वयार्थः ॥२९॥

अथ सर्वाङ्गसुन्दरादितपोविशेषान् विवृण्वन्नाह -

**अट्ठोवासा एगंतरेण विहिपारणं च आयामं ।**
**सव्वंगसुन्दरो सो होइ तवो सुक्कपक्खंमि ॥९२६॥ १९/३०**

**खमयादभिग्गहो इह, सम्मं पूया य वीयरागाणं ।**
**दाणं च जहासत्तिं, जइदीणादीण विण्णेयं ॥९२७॥ १९/३१ जुम्मं ।**

**अट्ठो** गाहा । **खम** गाहा । **अष्टावुपवासाः** प्रसिद्धाः । कथं? एकेन पारणकदिनेनान्तरं व्यवधानमेकान्तरं तेन **एकान्तरेण। विधिपारणं च** प्रत्याख्यानस्पर्शनादिविधानयुक्तं भोजनं च । आयाम**माचाम्ल**मागमसिद्धं यत्र तपोविशेषे । **सर्वाङ्गसुन्दरोऽसौ भवति** । **'तवो** त्ति' **तपो**विशेषः । **शुक्लपक्षे** प्रतीते । इति ॥३०॥ तथा -

क्षाम्यतीति क्षमस्तद्भावः **क्षमता** क्षान्तिस्तदा**दौ** क्षान्तिमार्दवार्जवा-दा**वभिग्रहो** नियमः **क्षमताद्यभिग्रहः इह** तपसि विधेयो भवति । तथा **सम्यग्** भावतः **पूजा** चाभ्यर्चन **वीतरागाणा** । **दानं च यथाशक्ति यतिदीनादीनां विज्ञेय**मिति व्यक्तम् । इति गाथाद्वयार्थः ॥३१॥ तथा -

**एवं चिय निरुजसिहो, नवरं सो होइ किण्हपक्खम्मि ।**
**तह य गिलाण तिगिच्छाभिग्गहसारो मुणेयव्वो ॥९२८॥ १९/३२**

**एवं** गाहा । **'एवं चिय' एवमेव** सर्वाङ्गसुन्दरवदित्यर्थः । **निरुजशिख**स्तपोविशेषः । **नवरं** केवलं **स भवति कृष्णपक्ष** इति व्यक्तम् । **तथा चे**ति विशेषान्तरसमुच्चयार्थः **ग्लानचिकित्सा-ऽभिग्रहसारो** ग्लानो मया पथ्यादिदानतः प्रतिचरणीय इत्येवंरूपप्रतिज्ञाप्रधानो **ज्ञातव्यः** । इति गाथार्थः ॥३२॥ तथा -

**बत्तीसं आयामं, एगंतरपारणेण सुविसुद्धो ।**
**तह परमभूसणो खलु, भूसणदाणप्पहाणो य ॥९२९॥ १९/३३**

**बत्तीसं** गाहा । **द्वात्रिंशदायामान्याचाम्लानि । एकान्तरपारणेन** एकायामव्यवहितभोजनेन । **सुविशुद्धानि** निर्दोषाणि । **तथे**ति समुच्चये । **परमभूषणः खलु** उक्तशब्दार्थः । **भूषणदानप्रधानश्च** जिनाय तिलकाद्याभरणदानसारः । इति गाथार्थः ॥३३॥ तथा -

**एवं आयइजणगो, विण्णेओ नवरमेस सव्वत्थ ।**
**अणिगूहियबलविरियस्स होइ सुद्धो विसेसेणं ॥९३०॥ १९/३४**

**एवं** गाहा। **एवमित्येकान्तरितद्वात्रिंशदायामरूपं आयतिजनक** उक्तार्थः **विज्ञेयः नवरं** केवलमयं **विशेष** इत्यर्थः। **एषोऽयं सर्वत्र** सर्वधर्मकृत्येषु **अनिगूहितबलवीर्यस्य भवति शुद्धो विशेषेणे**ति व्यक्तम्। नवरं केवलं बलं शारीरः प्राणः, वीर्यं चित्तोत्साहः। इति गाथार्थः ॥३४॥

**चित्ते एगंतरओ, सव्वरसं पारणं च विहिपुव्वं।**
**सोहग्गकप्परुक्खो, एस तवो होइ कायव्वो ॥९३१॥ १९/३५**

**चित्ते** गाहा। **चैत्रे** मासे **एकान्तरक** एकदिनव्यवहितः उपवास इति गम्यते। **सर्वरसं** सविकृतिकमित्यर्थः। **पारणं च** भोजनं **विधिपूर्वं** गुरुदानादिपूर्वकमित्यर्थः। **सौभाग्यकल्पवृक्ष** उक्तार्थः। **एषोऽय 'तवो त्ति' तपोविशेषो भवति कर्तव्य** इति व्यक्तम्। इति गाथार्थः ॥३५॥

इहैव विधिशेषमाह –

**दाणं च जहासत्तिं, एत्थ समत्तीएँ कप्परुक्खस्स।**
**ठवणा य विविहफलभरसन्नामियचित्तडालस्स ॥९३२॥ १९/३६**

**दाणं** गाहा। **दानं च** साध्वादिभ्यो देयम्, **यथाशक्त्यत्र** तपसि, **समाप्तौ** वाऽस्य तपसः **कल्पवृक्षस्य** सुवर्णतन्दुलादिमयस्य, **स्थापना च** न्यासश्च। किंविधस्य ? **विविधफलभरेण** नानाविधफलभारेण, **सन्नामितान्यवनतीकृतानि, चित्राणि** विविधानि, **डालानि** शाखा यस्य स, तथा तस्येति गाथार्थः ॥३६॥

**एते अवऊसणगा, इट्ठफलपसाहगा उ सट्ठाणे।**
**अण्णत्थजुया य तहा, विण्णेया बुद्धिमंतेहिं ॥९३३॥ १९/३७**

**एते** गाहा। **एतान्यवजोषणकानि** तपोविशेषसेवाः **इष्टफलसाधकानि तु स्वस्थाने** स्वविषये अव्युत्पन्नविनेयलक्षणे **अन्वर्थयुक्तानि च तथा** अन्वर्थश्चैषां प्रागदर्शित एव। **विज्ञेयानि बुद्धिमद्भिः**। इति गाथार्थः ॥३७॥ तथा –

**इंदियविजओ वि तहा, कसायमहणो य जोगसुद्धी य।**
**एमादओ वि णेया तहा तहा पंडियजणाओ ॥९३४॥ १९/३८**

**इंदिय** गाहा। **इन्द्रियविजयोऽपि** तपोविशेषः प्रतीतान्वर्थः। **तथा कषायमथनश्च** व्यक्तान्वर्थ एव। **योगशुद्धिश्च** मनोवाक्कायव्यापारानवद्यतासंपादकस्तपोविशेषो भवति। एतत्स्वरूपं चाचरणतोऽवसेयम्। तच्चेदम्–पुरिमार्धैकाशनकनिर्विकृतिकायामोपवासा यत्रैकैकमिन्द्रियमाश्रित्य पञ्चभिः परिपाटीभिर्विधीयन्तेऽसाविन्द्रियविजयः। तत्र पञ्चविंशतिस्तपोदिनानि भवन्ति। यत्र

च त एव पुरिमार्धवर्जाः प्रतिकषायं विधीयन्तेऽसौ कषायमथनः। इह परिपाटीचतुष्केण षोडश तपोदिनानि स्युः। तथा यत्र निर्विकृतिकायामोपवासा एकैकयोगमाश्रित्य विधीयन्तेऽसौ योगशुद्धिः। इह च परिपाटीत्रयेण नव तपोदिनानि स्युरिति। अथोक्तशेषानतिदिशन्नाह- **'एमादओ वि त्ति'** **एवमादयोऽप्य**नन्तरोक्ततपःप्रकारा अपि तपोविशेषाः **ज्ञेया** ज्ञातव्याः। **तथा तथा** तेन तेन प्रकारेण यो यथा विधेयो यत्प्रमाणश्चेत्यर्थः। **पण्डितजनादा**चरणाविज्ञजनात्। तथाहि-यत्रोपवास एकाशनकमेकसित्थमेकस्थानकमेकदत्तिर्निर्विकृतिकमायाममष्टकवलं च स्यात् **तदष्टकर्मसूदनं** तपस्तत्र चाष्टाभिः परिपाटीभिश्चतुःषष्टिस्तपोदिनानि स्युः। तथा भाद्रपदे सप्तभिरेकाशनकैस्तीर्थकर-मातृपूजायुक्तं **तीर्थंकरमातृतपः** स्यात्। तथा भाद्रपद एव षोडशभिरेकाशननिर्विकृतिकाया-मोपवासैर्यथाशक्तिकृतैः समवसरणपूजान्वितं **समवसरणतपः**। तत्र चतुर्षु भाद्रपदेषु चतुःषष्टि-स्तपोदिनानि स्युः। तथाऽमावास्यायां पटलिखितनंदीश्वर-जिननिलयपूजान्वितमुपवासादीना-मन्यत**मन्नन्दीश्वरतपः**। तथा चैत्रपूर्णमास्यां पुण्डरीकपूजायुतमुपवासाद्यन्यतरत्**पुण्डरीकतपः**। तथा जिनबिंबपुरतः स्थापितकलशः प्रतिदिनं प्रक्षिप्यमाणतंडुलमुष्ट्या यावद्भिर्दिनैः पूर्यते तावन्ति दिनान्येकाशनकादितपो**ऽक्षतनिधिः**। तथैका प्रतिपत्, द्वे द्वितीये, तिस्रस्तृतीया, एवं यावत्पञ्चदश पञ्चदश्यः कृतोपवासा यत्र तपसि भवन्ति तत् **सर्वसौख्यसंपत्ति**रित्येवमन्यान्यपि तपांसि। इति गाथार्थः ॥३८॥

अथैते तपोविशेषा आगमे नोपलभ्यन्त इत्याशङ्कां परिहरन्नाह -

**चित्तं चित्तपयजुयं, जिणिंदवयणं असेससत्तहियं।**
**परिसुद्धमेत्थ किं तं, जं जीवाणं हियं नत्थि ॥९३५॥ १९/३९**

**चित्तं** गाहा। **चित्रमद्भुतमनेकातिशयाभिधानत्वादङ्गानङ्गादिभेदत्वाद्वा चित्रमनेकविधं** तथा **चित्रपदयुत** नानाविधार्थप्रतिपादकाभिधानयुक्तं **जिनेन्द्रवचनं** जिनेश्वरागमः, **अशेषसत्त्वहितं** समस्तप्राण्यु-पकारकं भव्यानुसारेण मार्गप्रतिपत्त्युपायप्रतिपादनपरत्वात् **परिशुद्धं** कषच्छेदतापविशुद्धं सुवर्णमिव निर्दोषं एवं **चात्रास्मिन्** जिनवचने। **किं तद्यज्जीवानां हितं नास्ति ?** सर्वमपि जीवानां हितमस्तीत्यत इदं तपः परिदृश्यमानागमेऽनुपलभ्यमानमप्युपलब्धमिवावगन्तव्यं तथाविध-जनहितत्वात्। इति गाथार्थः ॥३९॥ तथा -

**सव्वगुणपसाहण मो, णेओ तिहि अट्ठमेहि परिसुद्धो।**
**दंसणनाणचरित्ताण एस रेसिंमि सुपसत्थो ॥९३६॥ १९/४०**

**सव्व** गाहा। **सर्वगुणप्रसाधनः** सकलगुणावह इति पर्यायः तपोविशेषः। **'मा'** निपातः पूरणार्थः **ज्ञेयो**ऽवसेयः **त्रिभिरष्टमै**रुपवासत्रयलक्षणैः **परिशुद्धो**ऽनवद्यः **दर्शनज्ञानचारित्राणां**

प्रतीताना **एषोऽयं 'रेसिंमि त्ति'** निमित्तं **सुप्रशस्तो**ऽतिशुभः, तत्रैकमष्टमं दर्शनगुणशुद्धये एवमपरद्वयं ज्ञेयं। शेषद्वयपरिशुद्धये। इति गाथार्थः ॥४०॥

अथ सर्वाङ्गसुन्दरादितपस्सु सनिदान एव प्राणी प्रवर्तते, ततो न न्याय्यान्येतानीत्याशङ्का-परिहारार्थमनिदानतामेषु प्रवृत्तस्य दर्शयन्नाह –

**एएसु [1]वट्टमाणो, भावपवित्तीएँ बीजभावाओ ।**
**सुद्धासयजोएणं, अनियाणो भवविरागाओ ॥९३७॥ १९/४१**

**एए** गाहा। **एतेष्वनन्तरोक्ततपस्सु प्रवर्तमानो** व्याप्रियमाणो जीवः एतेसु बहुमाणा इति पाठान्तरं व्यक्तं च। कया ? **भावप्रवृत्त्या** बहुमानसारक्रियया अनिदान इति योगः। कुत इति ? आह-**बीजभावात्** बोधिबीजविकलस्य देहिनो बोधिबीजभवनेन। एतदेव कथमिति ? आह-**शुद्धाशययोगेन** शुभाध्यवसायसम्बन्धेन, शुभाध्यवसायाद्धि बोधिबीजं स्यात्। **अनिदानो** निदानरहितः स्यात्। तथा **भवविरागात्** संसारनिर्वेदात्, यत् किल भवविरागादिनिमित्तं तन्निदानं न भवति बोध्यादिप्रार्थनमिव। भवविरागादिहेतवश्चोक्ततपांसि केषाञ्चिदतो निर्निदानानि। इति गाथार्थः ॥४१॥ (१. बहुमाणा – अटी.।)

निर्निदानत्वादेवैतेषां निर्वाणाङ्गतामाचार्यान्तरमतेनापि दर्शयन्नाह –

**विसयसरूवणुबंधेहिं तह य सुद्धं जओ अणुट्ठाणं ।**
**निव्वाणंगं भणियं, अण्णेहि वि जोगमग्गम्मि ॥९३८॥ १९/४२**

**एयं च विसयसुद्धं, एगंतेणेव जं तओ जुत्तं ।**
**आरोग्गबोहिलाभादिपत्थणाचित्ततुल्लं ति ॥९३९॥ १९/४३ जुम्मं ।**

**विसय** गाहा। **एयं च** गाहा। **विषयो** गोचर उक्ततपसामालम्बनीयस्तीर्थकरनिर्गमादिः, **स्वरूपमुक्ततपसामेव** स्वभाव आहारत्यागब्रह्मचर्यजिनपूजासाधुदानादिलक्षणः, **अनुबन्धश्च** तत्परिणामाव्यवच्छेदतः प्रकर्षयायिताऽतस्तेषु विषयस्वरूपानुबन्धेषु। **तथा चेति** समुच्चये। **शुद्धं** निरवद्यं **यतो** यस्मात् कारणात् **अनुष्ठानं** क्रिया **निर्वाणाङ्गं** मुक्तिकारणं **भणितमुक्तम्** **अन्यैरपि** तन्त्रान्तरीयैः, किं पुनर्जिनैः **योगमार्गे**ऽध्यात्मशास्त्रपथे। अतो विषयादिशुद्धतयैतेषां निर्वाणाङ्गत्वान्निर्निदानतेति हृदयमिति ॥४२॥

**एतच्चैतत्पुनरनन्तरोक्तं तपः। विषयशुद्धं** निर्दोषगोचरं सकलदोषमोषिजिन-पतिविषयत्वात् **एकान्तेनैव** सर्वथैव **यद्यस्मात्ततस्तस्माद्धेतोः युक्तं** सङ्गतं प्रार्थनागर्भमपीदं तपः। कुत इति ? आह-**आरोग्यबोधिलाभादीनां** *"आरोग्गबोहिलाभं समाहिवरमुत्तमं दिंतु"* इत्येवंरूपा या

**प्रार्थना** याञ्चा तत्प्रधानं **यच्चित्तं** मनस्तेन **तुल्यं** समानं यत् तद् आरोग्यबोधिलाभादि-प्रार्थनाचित्ततुल्यं । **इति** कृत्वा । इति गाथाद्वयार्थः ॥४३॥

एवमनन्तरोक्तं तपो निर्निदानमिति व्यवस्थापितमथोपदिशन्नाह –

**जम्हा एसो सुद्धो, अणियाणो होइ भावियमईणं ।**
**तम्हा करेह सम्मं, जह विरहो होइ कम्माणं ॥९४०॥ १९/४४**

**यस्मात्** कारणात् '**एसा** त्ति' **इदमनन्तरोक्तं तपः शुद्धं** निर्दोषं **भवति** स्यात्। किंभूतं सदिति ? आह-**अनिदानं** प्रागुक्तयुक्त्या निदानवर्जितम् । केषामिदमेवंविधमिति ? आह-**भावितमतीना** सदागमवासितमानसानां **तस्मात्** कारणात् **कुरुत** विधत्त । एतदेवेति गम्य **सम्यग्** भावशुद्ध्या । एतदेव व्यक्ततरमाह-**यथा** येन प्रकारेण **विरहो** विनाशो **भवति** जायत **कर्मणां** ज्ञानावरणादीनाम् । इह च **विरहशब्देन श्रीहरिभद्राचार्यकृतता** प्रकरणस्य सूचिता, विरहाङ्कत्वात् तस्येति गाथार्थः ॥४४॥

**॥ एकोनविंशतितमं तपोविधि पञ्चाशकं वृत्तितः समाप्तम् ॥१९॥**

**समाप्ता चेयं शिष्यहितानाम्नी सितपटपटलप्रधानप्रावचनिक पुरुषप्रवरचतुर्दशशतसंख्याप्रकरणप्रबन्धप्रणायिसुगृहीतनामधेय श्रीहरिभद्रसूरिविरचितपञ्चाशकाख्यप्रकरणटीकेति ॥**

यस्मिन्नतीते श्रुतसंयमश्रियावप्राप्नुवत्यावपरं तथाविधम् ।
स्वस्याश्रयं संवसतोऽतिदुःस्थिते, श्रीवर्धमानः स यतीश्वरोऽभवत् ॥१॥
शिष्योऽभवत्तस्य जिनेश्वराख्यः, सूरिः कृतानिन्द्यविचित्रशास्त्रः ।
सदा निरालम्बविहारवर्ती, चन्द्रोपमश्चन्द्रकुलाम्बरस्य ॥२॥
अन्योऽपि वित्तो भुवि बुद्धिसागरः, पाण्डित्यचारित्रगुणैरनोपमैः ।
शब्दादिलक्ष्मप्रतिपादकानघग्रन्थप्रणेता प्रवरः क्षमावताम् ॥३॥
तयोरिमां शिष्यवरस्य वाक्याद्, वृत्तिं व्यधात् श्रीजिनचन्द्रसूरेः ।
शिष्यस्तयोरेव विमुग्धबुद्धिर्ग्रन्थार्थबोधेऽभयदेवसूरिः ॥४॥
बोधो न शास्त्रार्थगतोऽस्ति तादृशो, न तादृशी वाक्पटुताऽस्ति मे तथा ।
न चास्ति टीकेह न वृद्धनिर्मिता, हेतुः परं मेऽत्र कृतौ विभोर्वचः ॥५॥

यदिह किमपि दृब्धं बुद्धिमान्द्याद् विरुद्धं, मयि विहितकृपास्तद्धीधनाः शोधयन्तु ।
निपुणमतिमतोऽपि प्रायशः सावृतेः स्यान्न, हि न मतिविमोहः किं पुनर्मादृशस्य ? ॥६॥
चतुरधिकविंशतियुते वर्षसहस्रे शते च सिद्धेयम्। धवलक्कपुरे वसतौ धनपत्योर्बकुलबन्दिकयोः ॥७॥
अणहिलपाटकनगरे संघवरैर्वर्तमानबुधमुख्यैः । श्रीद्रोणाचार्यैर्विद्वद्भिः शोधिता चेयम् ॥८॥

(ग्रन्थाग्रं-८७५०)

**॥ वैक्रमीये २०७० तमे वर्षे मुनिधर्मरत्नविजयेन संशोधितं सम्पादितञ्चेदं पूर्वगतार्थतारतारकज्ञानधारकश्रीहरिभद्रसूरिशेखरप्रणीतं सविवरणं पञ्चाशकप्रकरणं समाप्तम् ॥**

# परिशिष्टम्-१

## २० उपधानप्रतिष्ठा-पञ्चाशकम् ॥

नमिऊण महावीरं, वोच्छं नवकारमाइ उवहाणे ।
किंपि पइट्ठाणमहं, विमूढसंमोहमहणत्थं ॥२०/१॥

जं सुत्ते निद्दिट्ठं, पमाणमिह तं सुओवयाराइ ।
आयाराईणं जह, जहुत्तमुवहाण निम्महणं ॥२०/२॥

वुत्तं च सुए नवकार-इरिय-पडिकमण-सक्कत्थयविसयं ।
चेइय-चउवीसत्थय-सुयत्थएसुं च उवहाणं ॥२०/३॥

किं पुण सुत्तं तं इह जत्थ नमोक्कारमाइउवहाणं ।
उवइट्ठं ? आह गुरु-महानिसीहक्ख सुयखंधे ॥२०/४॥

एसो वि कह पमाणं, नंदीए हंदि कित्तणाउ त्ति ।
जं तत्थेव निसीहं, महानिसीहं च संलत्तं ॥२०/५॥

अह तं न होइ एयं, एवं आयारमाइ वि तयन्नं ।
तुल्ले वि नंदिपाढे, को हेऊ विसरिसत्तम्मि ॥२०/६॥

अह दुब्बलिसूरीणं, पराभवत्थं कयं सबुद्धीए ।
गोट्ठेणं ति मयं नो, इमं पि वयणं अविन्नूणं ॥२०/७॥

पुट्ठमबद्धं कम्मं, अप्परिमाणं च संवरणमुत्तं ।
जं तेण दुगं एयं, तं चिय अपमाणमक्खायं ॥२०/८॥

सेसं तु पमाणत्तेण कित्तियं गोट्ठमाहिलुत्तं पि ।
इग-दुगमयभेय च्चिय, जं सुत्ते निण्हवा वुत्ता ॥२०/९॥

अह भूरिमयविरोहा, पमाणया नो महानिसीहस्स ।
लोइयसत्थाणं पि व, तहाहि तम्मी अणुचियाइं ॥२०/१०॥

सत्तमनरयगमाईणि इत्थियाणं पि वन्नियाइं ति ।
तं न लिहणाइदोसा, संति विरोहा सुए वि जओ ॥२०/११॥

आभिणिबोहियनाणे, अट्ठावीसं हवंति पयडीओ ।
आवस्सयम्मि वुत्तं, इममन्नह कप्पभासम्मि ॥२०/१२॥

नाणमवाय-धीईओ, दंसणमिट्ठं च उग्गहेहाओ ।
एवं कह न विरोहो, विवरीयत्तेण भणणाओ ॥२०/१३॥

किंच गइ-इंदियाइसु, दारेसु न सम्म-सासणं इट्ठं ।
इगिंदीणं विगलाण, मइसुए तं चऽणुन्नायं ॥२०/१४॥

सयगे पुण विगलाणं, एगिंदीणं च सासणं इट्ठं ।
न पुणो मइसुयनाणे, तहेव आवस्सए वुत्तं ॥२०/१५॥

सीहो तिविट्ठजीवो, जाओ सत्तममहीउ उव्वट्टो ।
जीवाभिगममएणं, मीणत्तं चेव सो लहइ ॥२०/१६॥

नायासुं पुव्वण्हे, दिक्खा नाणं च भणियमवरण्हे ।
आवस्सयम्मि नाणं, बीयम्मि दिणम्मि मल्लिस्स ॥२०/१७॥

छउमत्थे परिआओ, सड्ढछम्मास-बारससमाओ ।
मग्गसिरकिण्हदसमी, दिक्खाए वीरनाहस्स ॥२०/१८॥

वइसाइसुद्धदसमी, केवललाभम्मि संभविज्ज कहं ।
इय सत्थेसुं बहवो, दीसंति परोप्परविरोहा ॥२०/१९॥

तस्संभवे वि आवस्सयाइ सत्थाइं जह पमाणं ।
तह किं महानिसीहं, घिप्पइ न पमाणबुद्धीए ॥२०/२०॥

अह पंचनमोक्काराइयाणमुवहाणमणुचियं भिन्नं ।
आवस्सयस्स अंतो, पाढाहि तहाहि सामइयं ॥२०/२१॥

नवकारपुव्वयं चिय, कीरइ जं ता तयंगमेसो त्ति ।
अन्नं च इत्थ अत्थे, पयडं चिय कित्तियं एयं ॥२०/२२॥

नंदिमणुओगदारं, विहिवहुवग्घाइयं च नाऊण ।
काऊण पंचमंगलमारंभो होइ सुत्तस्स ॥२०/२३॥

इय सामाइयनिजुत्तिमज्झमज्झासिओ इमो ताव ।
पडिकमणे य पविट्ठो, इरियावहियाए पाढो वि ॥२०/२४॥

अरहंतचेइयाण य, वंदणदंडो सुयत्थओ य तहा ।
काउस्सग्गज्झयणे, पंचमए अणुपविट्ठो त्ति ॥२०/२५॥

बीयज्झयणसरूवे, चउवीसत्थओ वि जं विणिद्दिट्ठो ।
आवस्सयाउ न पिहो, जुज्जइ ता तेसिमुवहाणं ॥२०/२६॥

आवस्सयउवहाणे, ताण उवहाणं कयं समवसेयं ।
कयउवहाणे य पिहो, तक्करणे होइ अणवत्था ॥२०/२७॥

भन्नइ उत्तरमिहइं, नवकारो आइमंगलत्तेण ।
वुच्चइ जया तय च्चिय, सामाइएऽणुप्पवेसो से ॥२०/२८॥

जइया य सयण-भोयण, निज्जरहेउं पढिज्जए एसो ।
तइया सतंत एव हि, गिज्झइ अन्नो सुयक्खंधो ॥२०/२९॥

इह-परलोयत्थीणं, सामाइयविरहिओ वि वावारो ।
दीसइ नवकारगओ, तदत्थसत्थाणि य बहूणि ॥२०/३०॥

नवकारपडल नवकारपंजिया सिद्धचक्कमाईणि ।
सामाइयंगभावो, इमस्स णेगंतिओ तम्हा ॥२०/३१॥

पढमुच्चारणमेत्ते, विऽणुप्पवेसो हवेज्ज सामइए ।
एयस्स सव्वहा जइ, ता नंदीणुयोगदाराणं ॥२०/३२॥

तयणुप्पवेसओ च्चिय, तवचरणं नेय जुज्जइ विभिन्नं ।
दीसइ य कीरमाणं, जोगविहीए य भिन्नत्तं ॥२०/३३॥

किंचाभिन्नत्ते सव्वहा वि सामाइयाउ एयस्स ।
काऊण पंचमंगलमिच्चाइ अणुचियं वयणं ॥२०/३४॥

इय भेयपक्खमणुसरिय जइ तवो कीरई नमोक्कारे ।
तो को दोसो नंदणुओगद्दारेसु वि हविज्जा ॥२०/३५॥

इरियावहियाईयं, सुयं पि आवस्सयस्स करणम्मि ।
अणुपविसइ तम्मि तयन्नया य भिन्नं हि तेणेव ॥२०/३६॥

भत्ते पाणे सयणासणाइ सुत्तं पि जायइ कयत्थं ।
तिन्नि वि कड्ढइ तिसिलोइय थुइ त्ति इच्चाइ सुत्तं पि ॥२०/३७॥

आवस्सए पवेसो, जइ एसो सव्वहा वि य हवेज्जा ।
तो पि हु पढणं एसिं, सव्वेसिं कह घडिज्ज त्ति ॥२०/३८॥

जं च इयरेयरासय, दूसणमेवं च वुच्चइ इमाण ।
पाढेण विणा न तवो, तवं विणा नेव पाढो त्ति ॥२०/३९॥

तं पि हु अदूसणं जह, पव्वइउमुवट्ठियस्सऽणुन्नायं ।
सामाइयाइयाणं, आलावगदाणमतवे वि ॥२०/४०॥

एवं जइ पढिएसु वि, नवकाराईसु ताणमुवहाणं ।
सविसेसगुणनिमित्तं, कारिज्जइ को णु ता दोसो ॥२०/४१॥

नियगमइविगप्पियं पि, हु कारिज्जइ मोक्खदंडयाइ तवं ।
सत्थुत्तं पि निसिज्झइ, उवहाणं ही महामोहो ॥२०/४२॥

मंतम्मि पुव्वसेवा, जइ तुच्छफले वि वुच्चइ इहं ता ।
मोक्खफले वि उवहाणलक्खणा किं न कीरई सा ॥२०/४३॥

एइए परमसिद्धी, जायइ जं ता दढं तओ अहिगा ।
जत्तम्मि वि अहिगत्तं, भव्वस्सेयाणुसारेण ॥२०/४४॥

अह सक्कविरयणाओ, सक्कत्थय नोवहाणमुववन्नं ।
एयं पि केण सिट्ठं, जमेस सक्केण रइउ त्ति ॥२०/४५॥

सक्कस्स अविरइत्ता, जिणथुई जइ अणेण णुन्नाया ।
ता तक्कओ त्ति सो वुत्तुमेवमुचियं कहं तम्हा ॥२०/४६॥

केवलिणा दट्ठूणं, उवइट्ठाणं च विरइयाणं च ।
नवकारमाइयाणं, महाप्पभावोववेयाणं ॥२०/४७॥

तिक्कालियमहवा सत्तकालियं सुमरणे निउत्ताणं ।
जुत्तं चिय उवहाणं, महानिसीहे निबद्धाणं ॥२०/४८॥

उवहाणविहीणाण वि मरुदेवाईण सिवगमो दिट्ठो ।
एवं च वुच्चमाणे तवदिक्खाईण वि निसेहो ॥२०/४९॥

इय भूरिहेउजुत्तीजुयम्मि बहुकुसलसलहिए मग्गे ।
कुग्गहविरहेणुज्जमह महह जइ मुक्खसुहमणहं ॥२०/५०॥

# परिशिष्टम्-२

## पञ्चाशकमूलगाथानामकाराद्यनुक्रमः ॥


| | | | |
|---|---|---|---|
| अंधोऽणंधो व्व सदा | ११/११ | अथिरो उ होइ इयरो | १७/४६ |
| अकसिणपवत्तयाणं | ६/४२ | अद्दव्वे टंकेण वि | ३/३६ |
| अग्गीयस्स इमं कह ? | ११/९ | अन्नत्थारंभवओ | ४/१२ |
| अट्ठमभत्तंतंमि य | १९/१३ | अन्नमिह कोउगाइ व | १३/२४ |
| अट्ठावयचंपोर्ज्जितपावासं | १९/१७ | अपदेसंमि ण वुड्ढी | ७/११ |
| अट्ठाहिया य महिमा | ८/४८ | अपमत्तसंजयाणं | १६/४३ |
| अट्ठोववासा एगंतरेण | १९/३० | अपमायवुड्ढिजणगं | ५/३४ |
| अणभिनिवेसाओ पुण | ११/४८ | अपरिणयं दव्वं चिय | १३/२९ |
| अणसणमूणोयरिया | १९/२ | अपरिवडियसुहचिंता | ७/४८ |
| अणिगूहियबलविरिओ | १५/२७ | अप्पडिदुप्पडिलेहिय | १०/१६ |
| अणिसिट्ठं सामण्णं | १३/१५ | अप्पडिदुप्पडिलेहिय | १/३० |
| अणुहवसिद्धं एयं | ३/२५ | अप्पपरिच्चाएणं | १८/३२ |
| अण्णाईणं सुद्धाण | १/३१ | अप्पाहण्णा एवं | ६/१४ |
| अण्णे उ कसादीया | १४/४३ | अप्पाहण्णेऽवि इहं | ६/१३ |
| अण्णे उ पुण्णकलसादिठावणे | ८/३७ | अब्बंभे पुण विरई | १/४६ |
| अण्णे उ लोगिगच्चिय | ३/४२ | अब्भत्थणाइ करणे | १२/४ |
| अण्णे तम्मासदिणेसु | १९/९ | अब्भुज्जयमेगयरं | १८/३६ |
| अण्णे भणंति एसो | १८/४३ | अभिवाहरणा अण्णे | २/२६ |
| अण्णे भणंति जतिणो | ५/३३ | अमए देहगए जह | ३/१२ |
| अण्णे भणंति समणादत्थं | १३/३४ | अमहद्धण भिन्नेहि य | १७/१३ |
| अण्णेसिं पुण | १६/२४ | अम्हे उ तह अधण्णा | ९/२७ |
| अण्णोऽण्णमूढदट्ठातिकरणतो | १६/२३ | अलमेत्थ पसंगेणं | ६/५० |
| अण्णोऽवि अत्थि चित्तो | १९/२३ | अलमेत्थ पसंगेणं | १४/४५ |
| अण्णोण्णंतरिअंगुलिकोसागारेहिं | ३/१९ | अविरुद्धो ववहारो | १/४४ |
| अतिलोभा परियडती | १३/२३ | अविसुद्धावि हु वित्ती | ४/१३ |
| अथिरस्स पुव्वगहियस्स | १२/४५ | असणं ओयणसत्तुगमुग्गजगाराइ | ५/२७ |

| | |
|---|---|
| असणादीया चउरो | १७/२२ |
| असदारंभपवत्ता | ४/४३ |
| असिणाणवियडभोई | १०/१८ |
| असुहज्झवसाणाओ | १६/३० |
| असुहतरंडुत्तरणप्पाओ | ६/२१ |
| अह तंपि सदोसं चिय | १६/३७ |
| अह तिपयाहिणपुव्वं | २/२९ |
| अहवा मूलगुणाणं | १५/२९ |
| अहवावि पयट्टस्सा | १२/३२ |
| अहवावि भावभेया | ३/३ |
| अहिगयगुणसाहम्मियपीई | २/३७ |
| अहिगयतित्थविहाया | ९/३६ |
| अहिगयसुंदरभावस्स | १८/३८ |
| अहिगारिणा इमं | ७/२ |
| अहिगारी उ गिहत्थो | ७/४ |
| अहिणउलमयमयाहिवपमुहाणं | २/२२ |
| आईमज्झवसाणे | १८/८ |
| आउच्छणा उ कज्जे | १२/२६ |
| आउयपरिहाणीए | १/४८ |
| आगममाई य जतो | १६/२६ |
| आचेलक्कु १ द्देसिय २ | १७/६ |
| आचेलक्कुद्देसिय | १७/८ |
| आचेलक्को धम्मो | १७/१२ |
| आणागारी आराहणेण | ८/११ |
| आणापरतंतो सो | १४/१६ |
| आणापवित्तिओ च्चिय | ८/१२ |
| आणाबलाभिओगो | १२/८ |
| आणारुइणो चरणं | ११/१२ |
| आणोहेणाणंता | १४/४८ |
| आयारवमोहारववहारोवीलए | १५/१४ |
| आरंभे च्चिय दाणं | ९/१२ |
| आराहगो य जीवो | ७/५० |
| आराहणाइ तीए | ७/३ |
| आलोएयव्वा पुण | १५/२२ |
| आलोचिऊण एवं | ३/४९ |
| आलोयणं अकिच्चे | १५/२ |
| आलोयणं अदाउं | १५/३९ |
| आलोयण पडिक्कमणे | १६/२ |
| आलोयणाणुलोमं | १५/१७ |
| आलोयणासुदाणे | १५/४८ |
| आवस्सिया उ आवस्सिएर्हि | १२/२१ |
| आसन्नसिद्धियाणं | ८/४३ |
| आसयविचित्तयाए | १६/२५ |
| आसाढसुद्धछट्ठी | ९/३४ |
| आसेवितेऽविऽकिच्चे | १५/३ |
| आह ण पडिमाकप्पे | १८/२१ |
| आहाकम्मुद्देसिय | १३/५ |
| आहारजाइओ एस | ५/२५ |
| आहारदेहसक्कारबंभवावारपोसहो | १/२९ |
| आहारपोसहो खलु | १०/१५ |
| इंदियविजओऽवि तहा | १९/३८ |
| इच्छा १ मिच्छा २ तहक्कारो ३ | १२/२ |
| इच्छापरिमाणं खलु | १/१७ |
| इट्ठपसिद्धिऽणुबंधो | १२/२८ |
| इड्ढीण मूलमेसो | ९/१८ |
| इत्तरियादिविभासा | १२/४७ |

| | |
|---|---|
| इत्तो उ विभागाओ | ३/३१ |
| इत्तो च्चिय | ६/२६ |
| इय अण्णत्थऽवि सम्मं | ९/४९ |
| इय अवरदक्खिणेणं | २/१९ |
| इय कम्मवाहिकिरियं | १८/२९ |
| इय कल्लाणी एसो | २/४२ |
| इय चरणम्मि ठियाणं | १७/४७ |
| इय णियबुद्धीएँ इमं | १४/५० |
| इय तंतजुत्तिओ खलु | ३/३३ |
| इय ते दिणा पसत्था | ९/३३ |
| इय बहुमाणा तेसिं | ९/२८ |
| इय भावपहाणाणं | १५/४९ |
| इय मद्दवादिजोगा | १४/७ |
| इय मोहविसं घायइ | १४/३३ |
| इय संवेगं काउं | १५/४६ |
| इय सव्वमेवमवितहमाणाए | १८/५० |
| इय सव्वेणवि सम्मं | ७/१६ |
| इय सामत्थाभावे | ९/२५ |
| इय सीलंगजुया खलु | १४/४६ |
| इय सुद्धबुद्धिजोगा | ८/७ |
| इयरम्मि कसाईया | १४/३७ |
| इयरम्मि विगप्पेणं | १२/१६ |
| इयरा उ अभिणिवेसा | १४/१९ |
| इयराऽतब्बहुमाणोऽवण्णा | ९/४६ |
| इयरेसिं अक्खित्ते | १२/४१ |
| इह पुण अद्धारूवं | ५/३ |
| इह सहसब्भक्खाणं | १/१२ |
| इहरा अणत्थगं तं | ६/३९ |
| इहरा उ ण समणत्तं | १७/४९ |
| इहरा उ णाभिहाणं | १८/४२ |
| इहरा ण सुत्तगुरुया | १८/३१ |
| इहरा ण हिंसगस्सऽवि | १३/४५ |
| इहरा बंभादीणं | १६/३१ |
| इहरा विवज्जओऽवि हु | १५/५ |
| इहरा विवज्जतो खलु | १२/२९ |
| इहरा सदंतराया | ११/२३ |
| इहलोयपारलोइयकज्जाणं | ४/१७ |
| ईसरपभितीहिं तहिं | १७/२१ |
| उउदेवीणाहवणे | २/१४ |
| उउबद्धे वासासु उ | ११/२९ |
| उक्कोसिया य पूजा | ८/२९ |
| उचियं खलु कायव्वं | ६/८ |
| उचिओ जणोवयारो | ८/४७ |
| उचियं च इमं णेयं | ४/३५ |
| उचियमिह गीयवाइयमुचियाण | ९/९ |
| उचियाणुट्ठाणाओ | ६/१६ |
| उज्जुजडा पुरिमा खलु | १७/४३ |
| उड्ढाहोतिरियदिसं | १/१९ |
| उत्तमगुणबहुमानो | ४/४८ |
| उत्ताणग पासल्ली | १८/१५ |
| उद्दिट्ठकडं भत्तंपि वज्जती | १०/३२ |
| उद्दिट्ठकडं भुंजति | १४/४२ |
| उद्देसियं तु कम्मं | १७/१४ |
| उद्देसिय साहुमाई | १३/८ |
| उद्धरियसव्वसल्ला | १५/४३ |
| उपसंपया य काले | १२/३ |

| | |
|---|---|
| उप्पायण संपायण | १३/१७ |
| उभयाभावेऽवि | ५/२४ |
| उवगाराभावम्मि वि | ४/४४ |
| उवठावणाएँ जेट्ठो | १७/२९ |
| उवसंपया य तिविहा | १२/४२ |
| उसभस्स उ इक्खुरसो | १९/१० |
| उसभाइकमेणेसो | १९/८ |
| उसभाइयाणमेत्थं | १९/१४ |
| उस्सग्गववायाण | ११/४१ |
| उस्सग्गेण विसुज्झति | १६/१८ |
| उस्सुत्ता पुण बाहति | १४/१८ |
| ऊणत्तं ण कयाइवि | १४/२४ |
| एईइ चेव सद्धा जायइ | २/६ |
| एईइ परमसिद्धी | ३/१४ |
| एते अवऊसणगा | १९/३७ |
| एए इत्थऽइयारा | १५/३४ |
| एएसिं सइ विरिए | १८/४९ |
| एएसु वट्टमाणो | १९/४१ |
| एएहिंतो अण्णे | ६/४१ |
| एकासणाइ णियमा | ९/७ |
| एक्कंपि उदगबिंदू | ४/४७ |
| एक्को वाऽऽयपएसो | १४/११ |
| एगागियस्स दोसा | ११/३१ |
| एतीएँ फलं णेयं | ८/४५ |
| एतीएँ सव्वसत्ता | ९/२० |
| एते अहिगारिणो इह | ३/७ |
| एतेण पगारेणं | १६/३३ |
| एत्तो अईव णेया | १८/३९ |
| एत्तो ओसरणादिसु | १२/२४ |
| एत्तो चिय णिद्दिट्ठो | १४/३० |
| एत्तो च्चिय ण णियाणं | ४/३० |
| एत्तो च्चिय णिद्दोसं | ७/३५ |
| एत्तो च्चिय पडिसेहो | ५/२० |
| एत्तो च्चिय पुच्छादिसु | १०/४६ |
| एत्तो पडिसेहाओ | ११/३० |
| एत्तो भिक्खामाणं | १९/२१ |
| एत्तो य अप्पमाओ | ५/१४ |
| एत्थं पुण अइयारा | १/३३ |
| एत्थं पुण चउभंगो | ५/६ |
| एत्थं पुन एस विही | १५/८ |
| एत्थ इमं विण्णेयं | १४/१० |
| एत्थ उ सावयधम्मे | १/३९ |
| एत्थमणुसासणविही | ९/१६ |
| एमाइदेवयाओ | १९/२५ |
| एमेव अहोराई | १८/१८ |
| एमेव एगराई | १८/१९ |
| एयं च एत्थ एवं | १४/१३ |
| एयं च एत्थ जुत्तं | ७/४१ |
| एयं च एत्थ तत्तं | १६/२८ |
| एयं च कीरमाणं | १९/२२ |
| एयं च विसयसुद्धं | १९/४३ |
| एयं णाऊणं जो | १३/५० |
| एयं मणेण | १४/९ |
| एयं सामायारीं | १२/४९ |
| एयंपि जुज्जइ च्चिय | ३/४३ |
| एयद्दोसविसुद्धो | १३/३० |

एयमिह मूलमंगलमेत्तो ८/३१
एयम्मि उ अइयारा १५/२८
एयम्मि परिच्चत्ते ११/१४
एयम्मि पूजियम्मी ८/४१
एयस्य फलं भणियं ७/४४
एयस्स अकरणंमी १७/२५
एयस्स उ संपाडणहेउं ६/३८
एयस्स पुव्वदक्खिणभागेणं २/१८
एयस्स समत्तीए ४/२९
एया पवज्जियव्वा १८/४७
एयाणुसारतो खलु १६/२७
एवं अचलादीसुवि ८/३५
एवं आणाऽऽराहणजोगाओ १२/७
एवं आयइजणगो १९/३४
एवं उक्कोसेणं १०/३८
एवं एसो कप्पो १७/५
एवं कप्पविभागो १७/४१
एवं कहंचि कज्जे ५/३५
एवं च अहिनिवेसा ११/४७
एवं च दसाईसुं ४/३७
एवं च संकिलिट्ठा १७/५१
एवं च होइ एसा ७/३४
एवं चि भावथए ६/५
एवं चिय कल्लाणं १८/२८
एवं चिय निरुजसिहो १९/३२
एवं चिय मज्झत्थो १४/१५
एवं जा छम्मासा १०/२२
एवं तु इट्ठसिद्धी ? ४/३१
एवं दिट्ठंतगुणा १४/३५
एवं निकाइयाणवि १६/३५
एवं पडिमाकप्पो १८/२४
एवं पडिवत्तीए १९/२७
एवं वयमाईसुवि १०/८
एवं सामायारी १२/४८
एवंविहा उ णेया ११/४३
एवंविहाणवि इहं १७/४५
एवंविहेसु पायं १३/३९
एवं निवित्तिपहाणा ७/४२
एवमसंतोऽवि इमो १/३८
एवमिह सावगाणवि ५/४२
एवोग्गहप्पवेसे १२/२२
एसण गवेसणऽण्णेसणा १३/२५
एसा उ महादाणं ८/४४
एसा उत्तमजत्ता ९/४५
एसा खलु गुरुभत्ती २/३०
एसा पवयणणीती ९/१४
एसा य परा आणा ११/१३
एसा य होइ णियमा ७/३२
एसो एवंरूवो १६/१५
एसो गुणद्धिजोगा ७/६
एसो चेव इह विही ४/१९
एसो पुण संविग्गो ११/५०
एसो बारसभेओ १९/४
ओसरणे बलिमादी ६/३१
ओहेणाविसयंपि हु ५/४९
कंदप्पं कुक्कुइयं १/२४

| | |
|---|---|
| कज्जं इच्छंतेणं | ६/३४ |
| कज्जंतरं ण कज्जं | १२/३१ |
| कज्जंपि णाणदंसणचरित्त | १२/१९ |
| कज्जेणं गच्छंतस्स | १२/१८ |
| कट्ठादीवि दलं इह | ७/१७ |
| कडुगोसधादिजोगा | ६/२२ |
| कत्ति कडं मे पावं | १२/१३ |
| कत्तियकिण्हे चरिमा | ९/३५ |
| कप्पाकप्पे परिणिट्ठियस्स | १२/१४ |
| कम्मविसपरममंतो | ४/२८ |
| कम्मादि संकति तयं | १३/२७ |
| कम्मावयवसमेयं | १३/९ |
| कम्मुद्देसियचरमतिय | १३/१६ |
| कयपच्चक्खाणोऽवि य | ५/४० |
| कयमित्थ पसंगेणं | ४/४० |
| कयमेत्थ पसंगेणं | ८/४६ |
| कयमेत्थ पसंगेणं | ९/२९ |
| कयमेत्थ पसंगेणं | १८/४६ |
| करणं अहापवत्तं | ३/२९ |
| करणाइ तिण्णि जोगा | १४/४ |
| कल्लाणसंपयाए | २/४१ |
| काऊण कुसलजोगं | ५/३७ |
| कारणदीवणयाइवि | १२/६ |
| कारवणेवि य तस्सिह | ७/२१ |
| कालम्मि कीरमाणं | ४/४ |
| कालसहावाउ च्चिय | १७/४४ |
| कालादिदोसओ पुण | १७/३७ |
| काले विणए बहुमाणे | १५/२३ |
| काले सुइभूएणं | ४/३ |
| कालो पुण एतीए | १५/९ |
| किंचेह छेयकूडगरूवगणायं | ३/३४ |
| किण्हे पडिवय पणरस | १९/२० |
| कितिकम्मंति य दुविहं | १७/२३ |
| किरियण्णुणावि सम्मंपि | १५/४० |
| कीलादिसल्लजोगा | ७/१३ |
| कुलवहुणायादीया | ११/१८ |
| कोहप्फलसंभावणपडुपण्णो | १३/२२ |
| खंतादभावओ च्चिय | ११/२१ |
| खंती य मद्दवऽज्जवमुत्ती | ११/१९ |
| खड्डातडम्मि विसमे | ७/३९ |
| खमयादभिग्गहो इह | १९/३१ |
| खाओवसमिगभावे | ३/२४ |
| खुरमुंडो लोएण व | १०/३५ |
| खेत्ताइहिरण्णाई धणाइ | १/१८ |
| गंधवरधूवसव्वोसहीहिं | ४/१४ |
| गहणे आगारेसुं | ५/४ |
| गच्छा विणिक्खमित्ता | १८/७ |
| गच्छे च्चिय णिम्माओ | १८/५ |
| गब्भे जम्मे य तहा | ९/३१ |
| गमणागमणविहारे | १७/३३ |
| गरहियमिच्छायारो | २/४३ |
| गहणं तप्पढमतया | १२/४६ |
| गहणं पव्वज्जाए | १०/४० |
| गहणादुवरि पयत्ता | १/३५ |
| गहणेऽवि णिज्जरा खलु | १२/३७ |
| गिण्हति सयंगहीयं | ५/५ |

| | |
|---|---|
| गिहिसाहूभयपहवा | १३/४७ |
| गीयत्थ जायकप्पो | ११/२८ |
| गीयत्थो य विहारो | ११/३२ |
| गीयत्थो य विहारो | १४/२० |
| गीयस्स ण उस्सुत्ता | १४/२१ |
| गुणपगरिसो जिणा खलु | ८/४ |
| गुणसमुदाओ संघो | ८/३९ |
| गुरुआएसेणं वा | ५/४५ |
| गुरुकुलवासच्चाए | ११/२० |
| गुरुगुणरहिओ उ गुरू | ११/२४ |
| गुरुगुणरहिओऽवि इहं | ११/३५ |
| गुरुणोऽवि णाहिगरणं | २/३२ |
| गुरुदेवोग्गहभूमीएँ | १२/२३ |
| गुरुपारतंत णाणं | ११/७ |
| गुरुपूयाकरणरई | ७/५ |
| गुरुमूले सुयधम्मो | १/९ |
| गुरुवेयावच्चेणं | ११/२२ |
| गोसे भणिओ य विही | १/५० |
| चंदायणाइ य तहा | १९/१८ |
| चउक्कारणपरिसुद्धं | १४/३६ |
| चउणारीओमिणणं | ८/२५ |
| चत्तारि अंगुलाइं | ३/२० |
| चत्तारि पुण्णकलसा | ८/२२ |
| चरणपडिवत्तिरूवो | ६/२४ |
| चरमम्मि चेव भणिया | २/३ |
| चरिमाण वि तह णेयं | १७/४८ |
| चाउम्मासुक्कोसो | १७/३९ |
| चारित्तओ च्चिय दढं | ११/१० |
| चारित्तजुओ साहू | ११/२ |
| चिण्णस्स णवरि लिंगं | १६/४९ |
| चितिवंदण थुतिवुड्ढी | ८/३२ |
| चित्तं चित्तपयजुयं | १९/३९ |
| चित्तबलिचित्तगंधेहिं | ८/३० |
| चित्ताणं कम्माणं | १८/४१ |
| चित्ते एगंतरओ | १९/३५ |
| छट्ठट्ठमदसमदुवालसेहिं | ५/४६ |
| छसु अट्ठिओ उ कप्पो | १७/७ |
| छिज्जति दूसियभावो | १६/१९ |
| जं उत्तमचरियमिणं | २/३१ |
| जं एयवइयरेणं | ८/२६ |
| जं कुणइ भावसल्लं | १५/३८ |
| जं च चउद्धा भणिओ | ६/३७ |
| जं जह सुत्ते भणियं | ११/३४ |
| जं जायइ परिणामे | ८/१० |
| जं णिहियमत्थजायं | १०/३३ |
| जं पुण एयविउत्तं | ६/९ |
| जं पुण णिरभिस्संगं | ४/३८ |
| जं बहुगुणं पयाणं | ७/३७ |
| जं वीयरागगामी | ६/७ |
| जं सा अहिगयराओ | १/५ |
| जंपिय ण या लभेज्जा | ११/२५ |
| जइणो अदूसियस्सा | ६/२० |
| जइणोऽवि हु | ६/२८ |
| जइविस्सामणमुचिओ | १/४५ |
| जतिपज्जुवासणपरो | १०/३४ |
| जत्ता महूसवो खलु | ९/४ |

| | |
|---|---|
| जत्ताविहाणमेयं | ९/५० |
| जत्थ कसायणिरोहो | १९/२६ |
| जत्थऽत्थमेइ सूरो | १८/११ |
| जमहिगयबिंबसामी | ८/१९ |
| जमुभयजणणसभावा | ३/४४ |
| जम्हा उ अभिस्संगो | ६/१९ |
| जम्हा एसो सुद्धो | १९/४४ |
| जम्हा समग्गमेयंपि | १४/१२ |
| जय वीयराय ! जगगुरु | ४/३३ |
| जयणा उ धम्मजणणी | ७/३० |
| जयणा य पयत्तेणं | ७/२९ |
| जयणाए वट्टमाणो | ७/३१ |
| जरसमणाई रयणा | ४/२६ |
| जह उस्सग्गंमि ठिओ | १४/१४ |
| जह बालो जंपंतो | १५/४७ |
| जह संकिलेसओ इह | १५/४ |
| जह सिद्धाण पतिट्ठा | ८/३४ |
| जा गंठी ता पढमं | ३/३० |
| जा चिय गुणपडिवत्ती | ९/२४ |
| जाओ य अजाओ य | ११/२७ |
| जायइ य सुहो एसो | ९/१९ |
| जायणपुच्छाणुण्णा- | १८/९ |
| जिणबिंबस्स पइट्ठा | ८/२ |
| जिणभवणकारणविही | ७/९ |
| जिणभवणकारणाइवि | ६/३५ |
| जिणभवणबिंबठावणजत्तापूजाइ | ६/३ |
| जिणबिंबपइट्ठावण- | ७/४५ |
| जिणभवणादिविहाणद्दारेणं | ६/१७ |
| जिण्णासावि हु एत्थं | ३/२६ |
| जीयमिणं आणाओ | १५/११ |
| जुत्तीए अविरुद्धो | १८/४५ |
| जुत्तीसुवण्णगं पुण | १४/३९ |
| जुत्तो पुण एस कमो | १०/४९ |
| जे इह सुत्ते भणिया | १४/४० |
| जे इह होंति सुपुरिसा | ११/३६ |
| जे उ तह विवज्जत्था | ११/३७ |
| जे उ पमत्ताणाउट्टियाएँ | १६/४४ |
| जे जंमि जंमि कालंमि | १८/४८ |
| जे पुण एयविउत्ता | १२/५० |
| जेट्ठंमि विज्जमाणे | ९/४७ |
| जो अत्तलद्धिओ खलु | १२/३५ |
| जो चेव मावलेसो | ६/३३ |
| जो जस्स कोइ भत्तो | १३/२१ |
| जो साहू गुणरहिओ | १४/४१ |
| जो जहवायं ण | ११/४६ |
| जो होइ निसिद्धप्पा | १२/२५ |
| जोए करणे | १४/३ |
| जोग्गेऽवि अणाभोगा | १२/९ |
| जो च्चिय सुहभावो खलु | ७/८ |
| झयइ पडिमाएँ ठिओ | १०/१९ |
| णंदादिसुहो सद्दो | ७/१९ |
| ण करति | १४/६ |
| ण य अपुणबंधगाओ | ३/८ |
| ण य तज्जुत्तो अण्णं | १४/२२ |
| ण य तत्थवि तदणूणं | ३/२३ |
| ण य तस्स तेसुवि तहा | ५/२२ |

| | | | |
|---|---|---|---|
| ण य पढमभाववाघाय | ५/२३ | णो अपरिग्गहियाए | १७/२७ |
| ण य भगवं अणुजाणति | ६/३२ | णो भावओ इमीए | ३/३२ |
| ण य भगवं अणुजाणति | ६/३३ | ण्हाणाइवि जयणाए | ४/१० |
| ण य सामाइयमेयं | ५/१५ | तं कसिणगुणोवेयं | १४/३८ |
| णणु तत्थेव य | ६/४४ | तं खलु णिरभिस्संगं | ५/१८ |
| णमिऊण महावीरं | १७/१ | तं चावत्थंतरमिह | १८/३७ |
| णमिऊण महावीरं | २/१ | तं तह पवत्तमाणं | ७/७ |
| णमिऊण वद्धमाणं | १८/१ | तं पुण अणत्थफलदं | ३/३७ |
| णमिऊण वद्धमाणं | १९/१ | तं पुण संविग्गेणं | ४/३२ |
| णवकारेण जहण्णा | ३/२ | तंतंतरेसुवि इमो | १०/५० |
| णवकारेण विबोहो | १/४२ | तंतम्मि वंदणाए | ६/२९ |
| णवणीओगाहिमए | ५/११ | तग्गुणबहुमाणाओ | ८/६ |
| णवि तं सत्थं व विसं व | १५/३७ | तच्चावि एरिसच्चिय | १८/१७ |
| णाऊण य तब्भावं | २/३३ | तणुओ अतिक्खतुंडो | १६/९ |
| णाणं सद्दहणं गहण | ५/२६ | ततिओसहकप्पोऽयं | १७/३ |
| णाणम्मि दंसणम्मि य | ११/४४ | तत्तत्थसद्दहाणं | १/३ |
| णाणस्स होइ भागी | ११/१६ | तत्तो तव्विगमो खलु | १६/३४ |
| णाणाइगुणजुओ खलु | २/३४ | तत्तो पडिदिणपूयाविहाणओ | ८/५० |
| णाणाइजुओ य गुरू | २/११ | तत्तो य अट्ठमी खलु | १८/१४ |
| णिच्छयणएण | १६/५० | तत्तो य अहक्खायं | ११/४ |
| णिच्छयणयस्स | ११/४५ | तत्तो विसेसपूयापुव्वं | ८/४९ |
| णिच्छयणया जमेसा | ७/४९ | तत्तो सयलसमीहियसिद्धी | ९/३९ |
| णिप्फण्णस्स य सम्मं | ८/१६ | तत्तो सुहजोएणं | ८/२१ |
| णिप्फाइऊण एवं | ७/४३ | तत्थ गुरुपारतंतं | १८/२२ |
| णिवकरलूयाकिरियाजयणाए | १८/२७ | तत्थ पहाणो अंसो | ७/३८ |
| णिस्संकिय णिक्कंखिय | १५/२४ | तत्थ पुण वंदणाइंमि | ६/४८ |
| णीयदुवारंधयारे | १३/११ | तत्थ पुण संठिताणं | ११/१७ |
| णेयं च भावसाहुं | ६/२५ | तत्थ सुइणा दुहावि हु | ४/९ |

तत्थवि य ७/४६
तत्थुग्गमो पसूई १३/४
तप्पुव्विया अरहया ८/४०
तप्पूयापरिणामो ८/४२
तम्मि असंते राया ९/२१
तम्हा उ तदाभासा ३/४५
तम्हा जहोइयगुणो ११/४९
तम्हा जे इह सुत्ते १४/४४
तम्हा णिच्चसतीए १/३६
तम्हा विसेसओ चिय १३/३६
तव्विहिसमुस्सुगो खलु १५/१३
तस्स उ पवेसणिग्गमवारणजोगेसु ५/२१
तस्सवि य इमो णेओ ७/१८
तह आउट्टियदप्पप्पमायओ १५/१८
तह चेईहरगमणं १/४३
तह तइलपत्तिधारगणायगओ १४/२९
तह तम्मि तम्मि जोए १०/४७
तह परहियम्मि जुत्तो १५/१५
तह सुत्तवुड्ढिभावे १८/३०
तहऽणत्थदंडविरई १/२३
तहकिरियाऽभावाओ १३/४०
तहविय अठायमाणे १६/१३
ता उद्धरेमि सम्मं १५/४५
ता एयं मे वित्तं ७/२८
ता एयंमि पयत्तो १६/३२
ता एयपुव्वगं चिय ४/२७
ता एयाणुट्ठाणं ४/३९
ता एवं चिय एयं १६/४५
ता एव विरतिभावो १४/२३
ता कम्मखओवसमा १०/४५
ता गीयम्मि इमं खलु ११/३३
ता णंतसोऽवि पत्ता १४/४९
ता तंपि अणुमयं चिय ६/३६
ता तहसंकप्पो च्चिय १३/४६
ता तीए किरियाए १८/३४
ता न चरणपरिणामे ११/१५
ता नियविहवणुरूवं ४/१८
ता भावत्थयहेऊ ६/१२
ता रहणिक्खमणादि वि ९/४२
ता संसारविरत्तो १४/२५
ताऽऽरिसं अविरोहेणं ४/८
तारिसयस्साभावे ८/८
तित्थंकरणाणुप्पत्ति- १९/१२
तित्थंकरपडिकुट्ठो १७/१८
तित्थंकरभत्तीए १/३७
तित्थगराणं आणा १५/६
तित्थगरे बहुमाणा ८/२७
तित्थगरे बहुमाणो ९/३७
तित्थयरणिग्गमाई १९/५
तित्थयरणिग्गमो खलु १९/६
तित्थयरमोक्खगमणं १९/१५
तित्थस्स वण्णवाओ ९/२३
तिविहाइभेयओ खलु ५/३२
तिव्वगिलाणादीणं ३/५०
तीए य अविगलाए १०/४२
तुलणा इमेण विहिणा १०/४१

| | |
|---|---|
| ते तुच्छगा वराया | ७/२२ |
| ते धण्णा सप्पुरिसा | ९/२६ |
| ते पुण दुसमयट्ठितियस्स | १६/४२ |
| ते पुण समिया गुत्ता | ११/४० |
| तेणेव खेत्तसुद्धी | ८/१७ |
| तेसिं अत्थाहिगमे | ४/२५ |
| तेसिं बहुमाणेणं | ११/३९ |
| तेसिंपि घायगाणं | ९/२२ |
| तेसु य दिणेसु धन्ना | ९/३२ |
| तो समणो जइ सुमणो | १०/४४ |
| थुइथोत्ता पुण उचिया | ९/१० |
| थूलगपाणवहस्सा | १/८ |
| थूलमुसावायस्स य | १/११ |
| थूलादत्तादाणे | १/१३ |
| दंतवणं तंबोलं | ५/३० |
| दंतवणं तंबोलं | १०/२५ |
| दंसणपडिमा णेया | १०/४ |
| दंसणमिह मोक्खंगं | ९/२ |
| दंसणवयसामाइय- | १०/३ |
| दत्तेगाइगहोऽवि हु | १८/२३ |
| दव्वत्थओ वि एवं | ६/४६ |
| दव्वत्थयभावत्थयरूवं | ६/२७ |
| दव्वत्थयारिहत्तं | ६/४९ |
| दव्ववणाहरणेणं | १६/७ |
| दव्वावीसु सुहेसुं | १५/१९ |
| दव्वे खीरदुमादी | १५/२० |
| दव्वे भावे य तहा | ७/१० |
| दव्वे भावे य थओ | ६/२ |
| दव्वेणं टंकेण य | ३/३५ |
| दसहोहओ उ कप्पो | १७/२ |
| दाणं १ तवोवहाणं २ | ९/५ |
| दाणं अणुकंपाए | ९/६ |
| दाणं च जहासत्तिं | १९/३६ |
| दाणमह जहासत्ती | २/३६ |
| दिक्खा मुंडणमेत्थं | २/२ |
| दिक्खाएँ चेव रागो | २/४ |
| दिक्खाविहाणमेयं | २/४४ |
| दिक्खियजिणोमिणणओ | ८/२८ |
| दिट्ठो पवयणगुरुणा | ९/१५ |
| दिट्ठो य तीएँ णागो | ७/४० |
| दिसिदेवयाण पूया | ८/१८ |
| दिसिवयगहियस्स | १/२७ |
| दुक्करयं अह एयं | १३/४३ |
| दुग्गतरयणायररयणगहणतुल्लं | १२/४० |
| दुट्ठऽस्सहत्थिमाई | १८/१२ |
| दुण्हऽवि दुविहोऽवि ठिओ | १७/२८ |
| दुलहं खलु मणुयत्तं | १२/३९ |
| दुविहा एत्थ अचेला | १७/११ |
| दुविहेणऽणुलोमेणं | १५/१६ |
| दुविहो कायंमि वणो | १६/८ |
| देवस्सपरीभोगो | ८/९ |
| देहादिणिमित्तंपि हु | ४/४५ |
| दो चेव णमोक्कारे | ५/८ |
| दो जाणू दोण्णि करा | ३/१८ |
| दोच्चावि एरिसच्चिय | १८/१६ |
| दोसपरिण्णाणंपि हु | १३/३२ |

| | |
|---|---|
| दोसस्स जं णिमित्तं | १६/६ |
| दोसासइ मज्झिमगा | १७/४० |
| धण्णाणमेयजोगो | २/३५ |
| धम्मट्ठा आरंभो | १३/३५ |
| धम्मत्थमुज्जएणं | ७/१४ |
| धम्मपसंसाएँ तहा | ७/२३ |
| धम्मम्मि य बहुमाणा | २/३९ |
| धम्मो पुण एयस्सिह | ११/८ |
| धाइत्तणं करेती | १३/२० |
| धाती दूति णिमित्ते | १३/१८ |
| धिइसद्धासुहविविदिसभेया | ३/२७ |
| न खलु परिणाममेत्तं | १३/४१ |
| न य एत्थं एगंतो | ५/४८ |
| न हु पडइ तस्स भावो | १८/४० |
| नमिऊण जिणं वीरं | ६/१ |
| नमिऊण तिलोगगुरुं | १५/१ |
| नमिऊण देवदेवं | ८/१ |
| नमिऊण महावीरं | १०/१ |
| नमिऊण महावीरं | १२/१ |
| नमिऊण महावीरं | १३/१ |
| नमिऊण महावीर | ४/१ |
| नमिऊण वद्धमाणं | १/१ |
| नमिऊण वद्धमाणं | ३/१ |
| नमिऊण वद्धमाणं | ५/१ |
| नमिऊण वद्धमाणं | ७/१ |
| नमिऊण वद्धमाणं | ९/१ |
| नमिऊण वद्धमाणं | ११/१ |
| नमिऊण वद्धमाणं | १४/१ |
| नमिऊण वद्धमाणं | १६/१ |
| नाणादुवग्गहे सति | १२/३६ |
| निक्खित्तभरो पायं | १०/३० |
| निग्घिणतेगंतेणं | १०/२७ |
| निवसेज्ज तत्थ सड्ढो | १/४१ |
| निव्वाणमंतकिरिया | १९/१६ |
| पंचंगो पणिवाओ | ३/१७ |
| पंच उ अणुव्वयाइं | १/७ |
| पंच चउरो अभिग्गहे | ५/१० |
| पंच महाकल्लाणा | ९/३० |
| पंचवतो खलु धम्मो | १७/२६ |
| पक्खियचाउम्मासे | १५/१० |
| पच्चक्खाणं नियमो | ५/२ |
| पच्छा गच्छमईई | १८/१३ |
| पज्जोसवणाकप्पोऽपेवं | १७/३८ |
| पडिपुच्छणा उ कज्जे | १२/३० |
| पडिबंधनिरागरणं | १७/१९ |
| पडिबंधो लहुयत्तं | १७/३६ |
| पडिबुज्झिस्संतऽन्ने | ७/४७ |
| पडिबुज्झिस्संति इहं | ७/२७ |
| पडिवज्जइ एयाओ | १८/४ |
| पढमकरणोवरि तहा | ३/२८ |
| पढमाउ कुसलबंधो | ६/२३ |
| पढिए य कहिएँ अहिगएँ | १७/३० |
| पढिओ तवो विसेसो | १९/२९ |
| पणिहाणजोगजुत्तो | १५/२५ |
| पत्थुयरोगचिगिच्छावत्थंतर- | १८/२६ |
| पयतीए सोऊण व दट्ठुण | २/५ |

| | |
|---|---|
| परदारस्स य विरई | १/१५ |
| परमगुरुणो य अणहे | १४/२६ |
| परमो दिक्खुवयारो | १८/३५ |
| परलोगहियं सम्मं | १/२ |
| परियट्टिए अभिहडे | १३/६ |
| परिसुद्धभावओ तह | २/३८ |
| परिसुद्धस्स उ तह | २/२८ |
| पवरा पभावणा इह | ९/३ |
| पवरेहिं साहणेहिं | ४/१६ |
| पव्वाविओ सियत्ति य | १०/४८ |
| पाणं सोवीरजवोदगाइ | ५/२८ |
| पाणातिपातविरमणमादी | १५/३० |
| पाणातिवातपभितिसु | १६/२१ |
| पाणे आउक्कायं | १०/२४ |
| पामिच्चं जं | १३/१२ |
| पायं अहिण्णगंठी | ११/३८ |
| पायं इमीएँ जत्ते | ३/१५ |
| पायच्छित्तं विणओ | १९/३ |
| पावं अणायरंतो | ११/२६ |
| पावं छिंदति जम्हा | १६/३ |
| पावं ण तिव्वभावा | ३/४ |
| पिंडविसुद्धादीया | १५/३१ |
| पितिपुत्तमाइयाणं | १७/३१ |
| पुढवादिघट्टणादी | १५/३२ |
| पुढवीकट्ठजहऽत्थिण्ण- | १८/१० |
| पुरिमाण दुव्विसोज्झो | १७/४२ |
| पुरिमेयरतित्थयराण | १७/३५ |
| पुरिसेणं बुद्धिमया | ४/६ |
| पुव्वगहिएण छंदण | १२/३४ |
| पुव्वणिसिद्धे अण्णे | १२/३३ |
| पुव्वाउत्तं कप्पति | १०/३७ |
| पुव्विंपच्छासंथव | १३/१९ |
| पुव्वोइयगुणजुत्तो | १०/२० |
| पूजाए कायवहो | ४/४१ |
| पूया वंदणमुस्सग्ग पारणा | ८/३३ |
| पेच्छणगावि णडादी | ९/११ |
| पेच्छिस्सं इत्थमहं | ७/२६ |
| पेसेहिवि आरंभं | १०/२९ |
| पोसेइ कुसलधम्मे | १०/१४ |
| बंधवहं छविछेयं | १/१० |
| बंधादि असक्किरिया | १०/१० |
| बंधो य संकिलेसा | १५/७ |
| बज्झभावेऽवि इमं | ५/४७ |
| बत्तीसं आयामं | १९/३३ |
| बत्तीस कवल माणं | १३/४९ |
| बहुजणविरुद्धसंगो | २/९ |
| बहुमाणोऽवि हु एवं | ४/२३ |
| बारस भिक्खूपडिमा | १८/२ |
| बारसविहम्मिवि तवे | १५/२६ |
| बाहगदोसविवक्खे | १/४९ |
| बाहिं तु पुप्फपाए | २/२७ |
| बिइए जाणावेउं | ५/७ |
| बोंदी य एत्थ पडिमा | १०/७ |
| भण्णइ जिणपूयाए | ४/४२ |
| भण्णइ पायच्छित्तं | १६/३८ |
| भण्णइ विसेसविसओ | १८/२५ |

| | |
|---|---|
| भण्णति विभिण्णविसयं | १३/३७ |
| भत्तोसं दंताई | ५/२९ |
| भवणवइवाणमंतरजोइसियाणं | २/२० |
| भवणिव्वेयाउ जतो | १०/४३ |
| भव्वस्साणारुइणो | १६/४ |
| भव्वस्साणावीरियसंफासण- | १०/२८ |
| भव्वावि एत्थ णेया | ३/४७ |
| भावं विणावि एवं | १४/१७ |
| भावविहूणा वण्णाइएहि | ३/४० |
| भावे अइप्पसंगो | ६/६ |
| भावेऊणऽत्ताणं | १०/३९ |
| भावेणं वण्णाईहिं चेव | ३/३८ |
| भावेणं वण्णाईहिं तहा | ३/३९ |
| भिक्खायरियादि सुज्झति | १६/१६ |
| भिक्खासद्दोऽवेवं | १३/३३ |
| भिच्चावि सामिणो इय | ४/२१ |
| भुवणगुरुगुणक्खाणा | २/२४ |
| भुवणगुरुणो य ठवणा | २/१७ |
| भुवणगुरूण जिणाणं | ४/२२ |
| भूमीपेहणजलछाणणाइ | ४/११ |
| भोगंमि कम्मवावारदारतोऽवित्थ | १३/४४ |
| भोगादिफलविसेसो | ६/१५ |
| भोगो अणेसणीएऽसमियत्तं | १५/३३ |
| भोत्तूणमुचियजोगं | ५/४४ |
| भोमादी णव जीवा | १४/५ |
| मंगलदीवा य तहा | ८/२३ |
| मंगलपडिसरणाइं | ८/२४ |
| मंताइविहाणम्मिवि | ३/१३ |
| मग्गणुसारि पयाहिण | १४/३४ |
| मग्गणुसारी सड्ढो | ३/६ |
| मग्गाणुसारिणो खलु | ९/४० |
| मज्झिमगाणं तु इयं | १७/१६ |
| मज्झिमगाण उ दोसे | १७/३४ |
| मणदुप्पणिहाणादी | १०/१३ |
| मणवयणकायदुप्पणिहाणं | ९/२६ |
| मत्तगगयं अजोग्गं | १३/२८ |
| ममकारेऽवोच्छिण्णे | १०/३६ |
| मरणजयज्झवसियसुहड- | ५/१९ |
| मरिउं ससल्लमरणं | १५/४२ |
| मल्लाइएहिं पूजा | ६/३० |
| मा वेअणा उ तो | १६/११ |
| मालोहडं तु भणियं | १३/१४ |
| मासाई सत्तंता | १८/३ |
| मिउपिंडो दव्वघडो | ६/११ |
| मिच्छत्तं कुग्गहकारणंति | १०/५ |
| मित्ति मिउमद्दवत्ते | १२/१२ |
| मुत्तासुत्ती मुद्दा | ३/२१ |
| मुदितादिगुणो राया | १७/२० |
| मूढा अणादिमोहा | ८/१४ |
| मूलादिसु पुण | १६/२० |
| मूलुत्तरगुणरूवस्स ताइणो | १६/१४ |
| मोक्खंगपत्थणा इय | ४/३६ |
| मोक्खत्थिणा तओ इह | ८/१५ |
| मोक्खद्धदुग्गगहणं | ३/१६ |
| मोक्खपहसामियाणं | ८/५ |
| मोहाउयवज्जाणं | १६/४१ |

रइयम्मि समोसरणे २/२३
रोहिणि अंबा तह १९/२४
रोहेइ वणं छट्टे १६/१२
लग्गुद्धियम्मि बीए १६/१०
लद्धूण दुल्लहं ता ९/४४
लद्धूण माणुसत्तं १५/५०
लिंगा ण तिए भावो ३/९
लेसुद्देसेणेए ५/३१
लोगववहारविरओ १०/३१
लोगे य साहुवाओ ७/२४
लोगे सलाहणिज्जो ६/४७
लोगो गुरुतरगो खलु ९/४८
लोगविरुद्धच्चाओ ४/३४
वंतरगाहवणाओ २/१६
वइमेत्तं णिव्विसयं १२/२०
वज्जइ इत्तरिअपरिग्गहियागमणं १/१६
वज्जइ इह १/१४
वज्जइ इह १/२८
वज्जइ उड्ढाइक्कममाण- १/२०
वज्जइ सयमारंभं १०/२६
वज्जणमणंतगुंबरिअच्चंगाणं १/२१
वण्णो य पवयणस्सा ९/३८
वत्तणसंधणगहणे १२/४३
वत्थविलेवणमल्लादिएहिं ९/८
वत्थेण बंधिऊणं ४/२०
वयभंगो गुरुदोसो ५/१२
वरगंधपुप्फदाणं २/२५
वरबोहिलाभओ सो ७/३६
वाउकुमाराईणं २/१२
वाउकुमाराहवणे २/१३
वायणपडिसुणणाए १२/१५
वाहिमवणेइ भावे १७/४
विग्घाणं चाभावो २/७
वित्तीवोच्छेयम्मि य ४/७
विरईए संवेगा ५/५०
विसघाइ १ रसायण २ १४/३२
विसयपवेसे रण्णो ९/१३
विसयप्पगरिसभावे ९/४३
विसयसरूवणुबंधेहिं १९/४२
विहिअपओसो जेसिं ३/४८
विहिणा उ कीरमाणा ४/२
विहिणा पडिपुण्णम्मी ५/३६
विहिताणुट्ठाणत्तं १६/४६
विहिताणुट्ठाणपरो १४/२७
विहियाणुट्ठाणं चिय १६/४७
विहियाणुट्ठाणंपि य १८/४४
विहियाणुट्ठाणंमी १६/३६
विहियाणुट्ठाणमिणं ति ६/४
विहियाणुट्ठाणाओ २/४०
वेमाणियजोइसभवणवासिया- २/१५
वेमाणियदेवाणं णराण २/२१
वेयावच्चुचियाणं १८/३३
वेलाइ विहाणंमि य ३/१०
वोसट्ठचत्तदेहो १८/६
संकिय मक्खिय १३/२६
संघादुद्देसेणं १७/१५

| | |
|---|---|
| संजमजोगे अब्भुट्ठियस्स | १२/१० |
| संतेअरलद्धिजुएअराइभावेसु होइ | ५/४३ |
| संदिट्ठो संदिट्ठस्स | १२/४४ |
| संपत्ते इच्चाइसु | १३/३१ |
| संपुण्णावि य किरिया | १४/४७ |
| संभवइ य एसोऽवि हु | १३/३८ |
| संयोजणा पमाणे | १३/४८ |
| संलेहणा य अंते | १/४० |
| संवच्छरेण भिक्खा | १९/११ |
| संविग्गअन्नसंभोइयाण | ५/४१ |
| संविग्गा गुरुविणया | १७/५२ |
| संविग्गो उ अमाई | १५/१२ |
| संविग्गोऽणुवएसं | १२/१७ |
| संवेगपरं चित्तं | १५/३५ |
| सइ संजाओ भावो पायं | ३/११ |
| सइ सामत्थे एसो | १२/५ |
| सक्खा उ | ६/४० |
| सग्गामपरग्गामा | १३/१३ |
| सच्चित्तं आहारं | १०/२३ |
| सच्चित्तं जमचित्तं | १३/७ |
| सच्चित्तं पडिबद्धं | १/२२ |
| सच्चित्तणिक्खिवणयं वज्जइ | १/३२ |
| सज्झयादुव्वाओ | १२/३८ |
| सति एयम्मि उ णियमा | ११/६ |
| सत्तविहबंधगा होंति | १६/४० |
| सत्तीएँ संघपूजा | ८/३८ |
| सत्तेगट्ठाणस्स उ | ५/९ |
| सत्थत्थबाहणाओ | १६/५ |
| सत्थुत्तगुणो साहू | १४/३१ |
| सद्दादिएसु रागं | १६/१७ |
| सपडिक्कमणो धम्मो | १७/३२ |
| समणोवासगपडिमा | १०/२ |
| समतिपवित्ती सव्वा | ८/१३ |
| समभावे च्चिय तं | ५/१७ |
| समभावो सामइयं | ११/५ |
| समयम्मि दव्वसद्दो | ६/१० |
| सम्मं णाऊण इमं | ४/५० |
| सम्मं दुच्चरितस्सा | १५/३६ |
| सम्मत्तोवरि ते | १०/९ |
| सम्ममणुव्वयगुणवयसिक्खावयवं | १०/१७ |
| सम्मा पलियपुहुत्तेऽवगए | १/६ |
| सयपालणा य एत्थं | ५/३९ |
| सरिऊण विसेसेणं | ५/३८ |
| सल्लुद्धरणं च इमं | १५/४४ |
| सल्लुद्धरणनिमित्तं | १५/४१ |
| सव्वंगसुंदरो तह | १९/२८ |
| सव्वगुणपसाहणमो | १९/४० |
| सव्वत्थ अपडिबद्धा | ११/४२ |
| सव्वत्थ णिरभिसंगो | १४/२८ |
| सव्वत्थ निरभिसंगत्तणेण | ६/१८ |
| सव्वत्थवि पणिहाणं | ३/२२ |
| सव्वस्स चेव णिंदा | २/८ |
| सव्वावत्थासु जओ | १६/३९ |
| सव्वावि य पव्वज्जा | १६/४८ |
| सव्वाहिं संजईहिं | १७/२४ |
| सव्वेऽवि य अइयारा | १७/५० |

| | |
|---|---|
| सा इह परिणयजलदल- | ७/३३ |
| सामइए आगारा | ५/१६ |
| सामइए वि हु | ५/१३ |
| सामण्णे मणुयत्ते | ९/१७ |
| सामाइयंमि उ कए | १०/१२ |
| सामाइयत्थ पढमं | ११/३ |
| सारा पुण थुइथोत्ता | ४/२४ |
| सावज्जजोगपरिवज्जणादिरूवं | १०/११ |
| सासणगरिहा लोए | ७/१२ |
| सासयवुड्डीवि इहं | ७/२५ |
| साहट्टु दोऽवि पाए | १८/२० |
| साहम्मिगादितेयादितो तहा | १६/२२ |
| साहम्मिया य एए | ८/२० |
| साहुवसणम्मि तोसो | २/१० |
| साहोहासियखीराइठावणं | १३/१० |
| सिंगारकहाविरओ इत्थीएँ | १०/२१ |
| सिद्धत्थयदहि | ४/१५ |
| सिक्खावयं तु एत्थं | १/२५ |
| सिज्जायरपिंडंमि य | १७/१० |
| सिट्ठावि य केइ इहं | १३/४२ |
| सीलंगाण सहस्सा | १४/२ |
| सुक्कंमि पडिवयाओ | १९/१९ |
| सुत्तभणिएण विहिणा | ४/४६ |
| सुत्तविउद्धस्स पुणो | १/४७ |
| सुत्तादुपायरक्खणगहणपयत्तविसया | १/३४ |
| सुद्धस्सवि गहियस्सा | ७/२० |
| सुद्धेणं भावेणं | १२/११ |
| सुद्धो पिंडो विहिओ | १३/२ |
| सुमइ त्थ णिच्चभत्तेण | १९/७ |
| सुव्वइ दुग्गयणारी | ४/४९ |
| सुव्वइ य वइररिसिणा | ६/४५ |
| सुस्सूस धम्मराओ | १/४ |
| सुस्सूस धम्मराओ | ३/५ |
| सुहदव्वादिसमुदए | १५/२१ |
| सुहफलजणणसभावा | ३/४६ |
| सुहभावा तव्विगमो | १६/२९ |
| सेज्जायरोत्ति भण्णति | १७/१७ |
| सेसेसुं ठियकप्पो | १७/९ |
| सो कम्मपारतंता | ९/४१ |
| सो खलु पुप्फाईओ | ६/४३ |
| सो तावसासमाओ | ७/१५ |
| सो पुण इह विण्णेओ | ४/५ |
| सो विहिनाया तस्साहणंमि | १२/२७ |
| सोइंदिएण एयं | १४/८ |
| सोउं मंगलसद्दं | ८/३६ |
| सोऊं णाऊण गुणे | ८/३ |
| सोलस उग्गमदोसा | १३/३ |
| होइ अणाभोगजुओ | १०/६ |
| होइ य पाएणेसा | ३/४१ |

# परिशिष्टम्-३

## पञ्चाशकवृत्तिगत पद्य उद्धरणानामकाराद्यनुक्रमः ॥


| आदिपद | ग्रन्थनाम | पृष्ठ |
|---|---|---|
| अज्झवसायविसुद्धि | आ.प.१६ | १५१ |
| अत्थंमि रागभावे | | १७ |
| अन्नाणी किं काही? | दश.अ.४/१० | १४७ |
| अस्येदं फलमित्येवं | | ३ |
| आगमेनानुमानेन | यो.दृ.१०१ | ३५ |
| इहलोइयं च | चं.वे.३२ | ७२ |
| ईर्ष्याभयक्रोधपरिष्कृतेन | सुश्रु. | ७१ |
| एक्को वि पावाइं | दश.द्वि.चू.१० | १४७ |
| गुणभूइट्ठे दव्वंमि | | ४९ |
| गुरुणाणुण्णयभरो | विं.विं.१३६ | ७४ |
| गोयरमाईयाणं | | २२६ |
| छट्ठ-ऽट्ठम-दशम | चं.वे.३५ | ७२ |
| जम्बूदीवपइट्ठा | | ११२ |
| जम्हा छउमत्थाणं | वि.सा.८८२ | ५८ |
| जह मेरुस्स | | ११२ |
| जह लवणस्स | | ११२ |
| जं केवलिणा | पं.व.५९० | १९७ |
| दंखा वावीए | उ.प.८२४ | १५० |
| देवा वि देवलोए | चं.वे.३३ | ७२ |
| देवा वि देवलोए | चं.वे.३४ | ७२ |
| धण्णा आयरियाणं | चं.वे.३१ | ७२ |
| धर्माधर्मव्यवस्थायाः | | ६८ |
| धर्मादभ्युदयो | | १ |
| निस्संकिय | दश.नि.१८२ | ११७ |
| पढमं अट्ठुस्सासा | | १६२ |
| परपरिवायंमि | | १४ |
| पितुः प्रजानां | | २३ |
| बाह्येन्द्रियाणि | भ.गी.अ.३/६ | २९ |
| भासा असच्चमोसा | आ.नि.१०९५ | ५३ |
| मोक्षायैव तु | त.का.१/५ | २१५ |
| यथोक्तदोषेष्वनिवृत्तमानसः | | ११ |
| यदीरणं लोचन | | ११ |
| यदुच्यमानं व्यसनाय | | ११ |
| रागो द्वेषश्च | अ.प्र.१७० | १८३ |
| शुश्रूषा श्रवणं | आचा.४३ | ९२ |
| सद्धेणं सति | प्र.स्व.२६६ | ७४ |
| संपत्ते भिक्ख. | दश.अ.५/१ | १७३ |
| सलक्खणमिणं | | १११ |
| सल्लं कामा | | ८६ |
| सिद्धे इंदे चन्दे | | ९६ |
| यस्य प्रभावादाकारा | | १५० |
| वेयण वेयावच्चे | ओ.नि.५८२ | १७८ |
| अन्यथा शास्त्र | | १८९ |
| महान्त्यपि | | ११६ |

# परिशिष्टम्-४

## पञ्चाशकवृत्तिगत गद्योद्धरणानामकाराद्यनुक्रमः ॥

| गाथा | पृष्ठ | उद्धरणम् |
|---|---|---|
| २/१७ | २३ | वर्णकमाहुश्चन्दनम् । |
| १/४९ | १७ | धम्मो जेणुवईट्ठो सो तस्स गुरु गिहि व समणो वा । |
| ३/१ | ३० | अम्मापिउसंतिए वद्धमाण-श्रीकल्पसूत्र-सूत्र-१०८ |
| ३/४७ | ४३ | सेत्स्यन् भव्यः । |
| २/२,११/४० | १९,१५० | आपत्स्वैक्लव्यकरमध्यवसानकरं सत्त्वम् । |
| ३/२७ | ३८ | धृति श्रद्धा सुखा विविदिषा विज्ञप्तिरिति तत्व-धर्मयोनयः । |
| ३/४८ | ४३ | शुद्धदेशना हि क्षुद्रसत्त्वमृगयूथसन्त्रासनसिंहनादः । |
| ५/७ | ६१ | ज्ञात्वा अभ्युपेत्यकरणं विरतिः । त.भा. |
| ५/३६ | ७१ | पूर्णेऽपि स्तोककालावस्थानात्तीरितं भवति । |
| ७/१९ | ९६ | इतजन्तस्तारकादिषु |
| २/१७ | २३ | व्यपगतमालावर्णकविलेपनस्य |
| ३/१७ | ३५ | शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः - प्रणिधानम् |
| ४/१ | ४५ | धर्मशास्त्रविधेये... हितकामैः । |
| ६/४५ | ८९ | माल्यारोपण-धूप-प्रदीप-चिति-चामराऽऽतपत्राणामर्हद्पूजासत्कारनिमित्तं त्यागजो धर्मः । |
| १०/३४ | १३७ | दुविहा मासा पण्णत्ता । धण्णमासा य कालमासा य |
| १७/३९ | २२६ | स्वार्थे ष्यञ् |
| - | २२९ | आतश्चोपसर्गः |
| पीठिका-२ | - | यः खलु सम्यग् बोधो हेयोपादेयवस्तुविषयगतः, ज्ञानावरणापरासा(गमा) ज्जीवस्य स उच्यते ज्ञानम् – |
| १०/३७ | १३७ | कप्पइ से पुव्वाउत्ते चाउलोयणे णो खलु पच्छाउत्ते भिलिंगसूवे **श्रीकल्पसूत्र**-सूत्र-२६६ |
| ११/१३ | १४४ | सुयं मे आउसंतेण. |
| १३/३५ | १७४ | गुर्वादिभ्यः शेषं भोक्तव्यम् । |
| १५/३९ | २०१ | निःशल्यस्य च व्रतित्वम् – निःशल्यो व्रती (तत्वा.७-१३) |
| १२/१४ | १५७ | तहमेयं भंते ! अवितहमेयं भंते !...श्रीकल्पसूत्र-सूत्र-१४ |
| २/२५ | २५ | पुष्प विकसने - पा.धा.११२२ |
| ३/९ | ३२ | लिङ्गमतन्त्रम् । |
| १४/३२ | १८६ | न दह्यतेऽग्नौ सुवर्ण न क्षीणम् । |

# परिशिष्टम्-५

## अभयदेवीया वृत्तौ अस्मिन् ग्रन्थे

## 'अन्ये तु' इत्यादिना उट्टङ्किता प्रस्तुतवृत्तिमताः ॥

### पुस्तक भाग-१

| भाग-१ | | गाथा | |
|---|---|---|---|
| २१ | ५ | १/५ | अन्ये तु "तओ उ" पठन्ति-तत्र व्याख्या न च-नैव तकः पुनर्भवति-जायते। |
| ५४ | ८ | १/१८ | अन्ये त्वाहुः "भावेन-............... व्यवस्थाप्यत इति" |
| ७३ | १० | १/२५ | अन्ये त्वविभक्तिकनिर्देशे कृत्वा 'मो' निपात इति व्याख्यान्ति। |
| ८२ | ११ | १/२८ | अत्र केचिदाहुः दिग्व्रत........ |
| १६७ | २९ | २/४३ | अन्ये तु मिथ्याचारलक्षणं (एवं) वदन्ति - "बाह्य. ॥ गाथा ॥ इति। |
| १९२ | ३३ | ३/११ | 'भाववुड्ढीए' इत्यन्ये पठन्ति.... इति। |
| १९५ | ३४ | ३/१४ | अन्ये त्वाहुः फलाधिक्यानुसारेण इति। |
| २५८ | ५१ | ४/२२ | केचित् जिनानामपि इति पठन्ति। |
| ४१२ | ८९ | ६/४६ | सुपरिशुद्धः - अन्ये तु द्रव्यस्तवोऽप्येवं सुपरिशुद्धो ज्ञेय इत्येवं सम्बन्धयन्ति। |
| ५६९ | १४० | १०/४८ | प्रव्राजितः रजोहरणासाधुवेषदानत इत्यन्ये। |

### पुस्तक भाग-२

| | | | |
|---|---|---|---|
| २७ | १४६ | ११/२२ | अन्ये त्वाहुः 'इभ्यस्य गृहागतस्य विंशोपकेनापि व्यवहारे-सत्कारे। |
| ७९ | १५९ | १२/२१ | आवश्यिकीशब्दोच्चार इत्यन्ये। |
| ८० | १५९ | १२/२२ | नैषेधिकीशब्दोच्चार इत्यन्ये। |
| २२९ | १९७ | १५/२५ | अन्ये त्वाहुः प्रणिधानयोगयुक्तः समित्यादिभिरुपलक्षित एषः एवंविधश्चारित्राचारः। |
| २८५ | २१६ | १६/४९ | अन्ये तु व्याख्यान्ति-नियमं-अकरणनियमम्-आसंसारं तद्दोषानासेवनात् परिशुद्धये-दोषविशुद्धये। |
| ३१४ | २२५ | १७/३४ | दोसपडियारणाए त्ति तत्र दोषनिषेधेनेत्यर्थः। |
| ३७० | २४१ | १८/४६ | सूत्रार्थानुस्मरणत इति क्वचित् पाठः। |

# परिशिष्टम्–६

## अभयदेवीयावृत्त्या उद्धृत्ता दृष्टान्ताः

[अत्र यशोभद्रीयवृत्यां ये दृष्टान्ताः न व्याकृताः तेऽत्र अभयदेवीयटीकातः स्पष्टतरा उद्धृताः सन्ति]

## (१) वन्दनायां रूपकदृष्टान्तः

**छेकश्चासौ** शुद्धः **कूटकश्च** कथञ्चिदशुद्धश्छेककूटकः स चासौ **रूपकश्च** द्रम्मः च्छेककूटकरूपकः स एव तस्य वा ज्ञातं निदर्शनं **छेककूटकरूपकज्ञातम्** तद् **भणन्ति** वदन्ति। **समयविदः** सिद्धान्तवेदिनो भद्रबाहुस्वामिप्रभृतयः। **तन्त्रेष्वा**वश्यकनिर्युक्त्यादिशास्त्रेषु। तथाहि – "[१]**रूप्पं टंकं विसमाहयक्खरं न विय रूवओ छेओ। दोह्णं पि समाओगे रूवो च्छेयत्तणमुवेति ॥१॥**" **चित्रभेदं** बहुप्रकारं चतुर्विकल्पमित्यर्थः। इह स्थाने यदिति शेषो दृश्यः। **तदपि** च्छेदकूटकरूपकज्ञातमपि, न केवलं द्रव्यलिङ्गग्रहणानन्त्येनाशुद्धत्वमस्या भावनीयमित्यपिशब्दार्थः। हुशब्द एवकारार्थो भिन्नक्रमश्चेति इहेति वन्दनायां **परिभावनीयमेव** पर्यालोचयितव्यमेव। **इति** शब्दो वाक्यार्थसमाप्तौ। इति गाथार्थः ॥३/३४॥

१–अस्या व्याख्या–अत्र तावच्चतुर्भंगी। रूप्रमशुद्धं टंकं विषमाहताक्षरमित्येकः, रूप्रमशुद्धं टंकं समाहताक्षरमिति द्वितीयः, रूपं शुद्धं टंकं विषमाहताक्षरमिति तृतीयः, रूपं शुद्धं टंकं समाहताक्षरमिति चतुर्थः। अत्र च रूपकल्पं भावलिंगं, टंककल्पं द्रव्यलिंगं। इह च प्रथमभङ्गतुल्याश्चरकादयः, अशुद्धोभयलिङ्गत्वात्। द्वितीयभङ्गतुल्याः पार्श्वस्थादयः, अशुद्धभावलिङ्गत्वात्। तृतीयभङ्गतुल्याः प्रत्येकबुद्धाः अन्तर्मुहूर्तमात्रं कालमगृहीतद्रव्यलिङ्गाः। चतुर्थभङ्गतुल्याः साधवः शीलयुक्ताः गच्छतो निर्गताश्च जिनकल्पिकादयः। यथा रूपको भङ्गत्रयान्तर्गतः अच्छेक इत्यविकलं, तदर्थक्रियार्थिना नोपादीयते, चतुर्थभङ्गनिरूपित एवोपादीयत। एवं भङ्गत्रयनिदर्शिताः पुरुषा अपि परलोकार्थिनौघतो न नमस्करणीयाः, चरमभङ्गकनिदर्शिता एव नमस्करणीया इति भावना। अक्षराणि त्वेवं नीयन्ते–रूपं शुद्धाशुद्धभेदं, टंकं विषमाहताक्षरं, नैव रूपकश्छेकोऽसांव्यवहारिक इत्यर्थः। द्वयोरपि शुद्धरूपसमाहताक्षरटंकयोः समायोगे सति रूपकश्छेकत्वमुपैतीति गाथार्थः॥

# ( २ ) द्रव्यस्याप्रधानार्थकत्वेऽङ्गारमर्दकाचार्यदृष्टान्तः

इहैव निदर्शनमाह-**अंगारमर्दकः** प्रवचनप्रतीतः..........एतत्संबन्धे विधानकं चैवं श्रूयते-सूरिर्**विजयसेना**ख्यो मासकल्पविहारतः । समायातो महाभागः पुरे **गर्जनका**भिधे ॥१॥ अथात्र तिष्ठतस्तस्य कदाचिन्मुनिपुङ्गवैः । गवां विसर्गवेलायां स्वप्नोऽयं किल वीक्षितः ॥२॥ कलभानां शतैः शूरैः शूकरः परिवारितः । पञ्चभिर्भद्रजातीनामस्मदाश्रयमागतः ॥३॥ ततस्ते कथयामासुः सूरेः स्वप्नं तमद्भुतम् । सूरिस्तूवाच तस्यार्थं साधूनां पृच्छताममुम् ॥४॥ सुसाधुपरिवारोऽद्य सूरिरेष्यति कोऽपि वः । प्राघूर्णकः परं भव्यो नासाविति विनिश्चयः ॥५॥ यावज्जल्पत्यसौ तेषां साधूनां सूरिरग्रतः । **रुद्रदेवा**भिधः सूरिरस्तावत्तत्र समागतः ॥६॥ शनैश्चर इव स्फारसौम्य-ग्रहगणान्वितः । एरण्डतरुवत् कान्तकल्पवृक्षगणान्वितः ॥७॥ कृता च तस्य तैस्तूर्णमभ्युत्थानादिका क्रिया । आतिथेयी यथायोगं सगच्छस्य यथाऽऽगमम् ॥८॥ ततो विकालवेलायां कोलाकारस्य तस्य तैः । परीक्षणाय निक्षिप्ता अङ्गाराः कायिकाभुवि ॥९॥ स्वकीयाचार्यनिर्देशात् प्रच्छन्नैश्च तकैः स्थितैः । वास्तव्यसाधुभिर्दृष्टास्ते प्राघूर्णकसाधवः ॥१०॥ पादसञ्चूर्णिताङ्गारक्रशत्काररवश्रुतौ । मिथ्यादुष्कृतमित्येतद् ब्रुवाणाः प्राणिशङ्कया ॥११॥ क्रशत्काररवस्थाने कृतचिह्ना इतीक्षया । दिने निभालयिष्यामः क्रशत्कारः किमुद्भवः ॥१२॥ आचार्यो रुद्रदेवस्तु प्रस्थितः कायिकाभुवम् । क्रशत्काररवं कुर्वन्नङ्गारपरिमर्दनात् ॥१३॥ जीवाऽश्रद्धानतो मूढो वदंश्चैतज्जिनैः किल । जन्तवोऽमी विनिर्दिष्टाः प्रमाणैर्न्यक्कृता अपि ॥१४॥ वास्तव्यसाधुभिर्दृष्टो यथादृष्टं च साधितम् । सूरेर्विजयसेनस्य तेनापि गदितं ततः ॥१५॥ स एष शूकरो भद्रास्त एते वरहस्तिनः । स्वप्नेन सूचिता ये वो न विधेयोऽत्र संशयः ॥१६॥ तैः प्रभातेऽत्र तच्छिष्या बोधितास्तूपपत्तिभिः । यथैवं चेष्टितेनायमभव्य इति बुध्यताम् ॥१७॥ त्याज्यो वोऽयं यतो घोरसंसारतरुकारणम् । ततस्तैरप्युपायेन क्रमेणासौ विवर्जितः ॥१८॥ ते चाकलङ्कसाधुत्वं विधायाथ दिवं गताः । ततोऽपि प्रच्युताः सन्तः क्षेत्रेऽमुत्रैव भारते ॥१९॥ श्रीवसन्तपुरे जाता जितशत्रोर्महीपतेः । पुत्राः सर्वेऽपि कालेन ते प्राप्ता यौवनश्रियम् ॥२०॥ अन्यदा तान् सुरूपत्वात् कलाकौशलयोगतः । सर्वत्र ख्यातकीर्तित्वात् सर्वानाशु न्यमन्त्रयत् ॥२१॥ हस्तिनागपुरे राजा कनकध्वजसञ्ज्ञितः । स्वकन्याया वरार्थाय तत्स्वयंवरमण्डपे ॥२२॥ तत्रायातैः स तैर्दृष्टो गुरुरङ्गारमर्दकः । उष्ट्रत्वेन समुत्पन्नः पृष्ठारूढमहाभरः ॥२३॥ गलावलम्बितस्थूलकुतुपोऽपेशलं रसन् । पामनः सर्वजीर्णाङ्गो गतत्राणोऽतिदुःखितः ॥२४॥ तमुष्ट्रमीक्षमाणानां तेषां कारुण्यतो भृशम् । जातिस्मरणमुत्पन्नं सर्वेषां शुभभावतः ॥२५॥ देवजन्मोद्भवज्ञानज्ञातत्वात् तैरसौ स्फुटम् । करभः प्रत्यभिज्ञातो यथाऽयं बत नो गुरुः ॥२६॥ ततस्ते चिन्तयामासुर्धिक् संसारविचेष्टितम् । येनैष तादृशं ज्ञानमवाप्यापि कुभावतः ॥२७॥ अवस्थामीदृशीं प्राप्तः संसारं च भ्रमिष्यति । ततोऽसौ मोचितस्तेभ्यस्तत्स्वामिभ्यः कृपापरैः

॥२८॥ ततस्तदैव ते प्राप्य भवनिर्वेदकारणम्। कामभोगपरित्यागात् ते प्रव्रज्यां प्रपेदिरे ॥२९॥ ततः सुगतिसन्तानान्निर्वास्यन्त्यचिरादमी। अन्यः पुनरभव्यत्वाद्भवारण्ये भ्रमिष्यति ॥३०॥ इति गाथार्थः ॥६/१३॥

# ( ३ ) शुभभावस्य बोधिबीजकारणता स्तेनज्ञातेन

**स एवा**सावेव परिशुद्धः शुभभाव एव **जायते** संपद्यते। बीजमिव **बीजं** कारणं। **बोधेः** सम्यग्दर्शनस्य। अयं चार्थः कथं समर्थनीय इत्याह-**स्तेनज्ञातेन** चौरोदाहरणेन। तच्चेदम्-इहाभूतां नरौ कौचिदन्योऽन्यं दृढसौहृदौ। युवानौ साहसोपेतौ **चौरौस्व**बलगर्वितौ ॥१॥ भोगलुब्धौ समस्तेच्छापूरकद्रव्यवर्जितौ। तौ च चौर्यं व्यधासिष्टां भोगवाञ्छाविडम्बितौ ॥२॥ दंडपासिकलोकेन संप्राप्तावन्यदा तकौ। नीयमानौ च तौ तेन वध्यस्थानं तपस्विनौ ॥३॥ दृष्टवन्तौ मुनीन् मान्यान् मानिमानवसंहतेः। साधूनां सत्क्रियां दृष्ट्वा तयोरेको व्यचिन्तयत् ॥४॥ अहो धन्यतमा एते मुनयो विमलक्रियाः। स्वकीयगुणसन्दोहाज्जगतां पूज्यतां गताः ॥५॥ वयं पुनरधन्यानामधन्या धनकाङ्क्षया। विदधाना विरुद्धानि वध्यतां प्रापिता जनैः ॥६॥ धिक्कारोपहतात्मानो यास्यामः कां गतिं मृताः ? ही जाता दुःस्वभावेन लोकद्वयविराधकाः ॥७॥ तदेवं साधु साधूनां वृत्तं वारितकल्मषम्। विपरीतमतोऽस्माकमस्मात् कल्याणकं कुतः ? ॥८॥ अन्यः पुनरुदासीनो भवति स्म मुनीनभि। गुणिरागादवापैको बोधिबीजं न चापरः ॥९॥ ततस्तनुकषायत्वाद्दानशीलतया च तौ। नरजन्मोचितं कर्म बद्धवन्तावनिन्दितम् ॥१०॥ मृत्वा च तौ समुत्पन्नौ कौशाम्ब्यां पुरि वाणिजौ। जातौ चानिन्दिताचारौ वणिग्धर्मपरायणौ ॥११॥ जन्मान्तरीयसंस्कारादाबालत्वात् तयोरभूत्। अत्यन्तमित्रताभावो लोकाश्चर्यविधायकः ॥१२॥ रोचते च यदेकस्य तदन्यस्यापि रोचते। ततो लोके गतौ ख्यातिमेकचित्ताविमाविति ॥१३॥ ततः कुलोचितं कर्म कुर्वतोर्यान्ति वासराः। अन्यदा भुवनानन्दी प्राप्तस्तत्र जिनेश्वरः ॥१४॥ भगवान श्रीमहावीर इक्ष्वाकुकुलनन्दनः। वाग्नीरैर्जनसंतापशमनेऽम्भोदसन्निभः ॥१५॥ विदधुस्तस्य गीर्वाणा व्याख्याभूमिं मनोहराम्। तत्रासौ धर्माचख्यौ सनरामरपर्षदे ॥१६॥ तमागतं समाकर्ण्य कौशाम्बीवासिनो जनाः। राजादयः समाजग्मुर्वन्दितुं तत्पदाम्बुजम् ॥१७॥ तावपि श्रेष्ठिसत्सूनू कुतूहलपरायणौ। जनेन सार्धमायातौ जिननायकसन्निधौ ॥१८॥ जिनस्तु देशयामास मोक्षमार्गं सनातनम्। सत्त्वानां सर्वकल्याणकारणं करुणापरः ॥१९॥ ततस्तयोर्वणिक्सून्वोरेकस्य तज्जिनोदितम्। श्रद्धानमार्गमायाति भाव्यते ऽथ स्वमानसे ॥२०॥ स्फाराक्षो मस्तकं धुन्वन् कर्णपर्णपुटार्पितम्। रोमाञ्चितः पिबत्युच्चैर्जिनवाक्यं यथाऽमृतम् ॥२१॥ तदन्यस्य तदाभाति वालुकाकवलोपमम्। अन्योऽन्यस्य च तौ भावं लक्षयामासतुस्तराम् ॥२२॥ व्याख्याभुवः समुत्थाय जग्मतुर्भवनं निजम्। तत्रैको व्याजहारैवं

भ्रातस्त्वं भावितः किल ॥२३॥ जैनवाचा न चाहं भोस्तदत्र किमु कारणम् । एकचित्ततया ख्यातावावां लोक इयच्चिरम् ॥२४॥ इदानीमत्र सञ्जातं विभिन्नं चित्तमावयोः । तदत्र कारणं किं स्यादन्यो वक्ति स्म विस्मितः ॥२५॥ सत्यमेवं ममाप्यत्र विकल्पः संप्रवर्तते । केवलं केवली नूनं निश्चयं नः करिष्यति ॥२६॥ स एव प्रश्रितोऽत्रार्थे तद्यातास्वस्दन्तिके । एवं तौ निश्चयं कृत्वा प्रातर्यातौ तदन्तिकम् ॥२७॥ पप्रच्छतुस्तमाराध्यं विनयेन स्वसंशयम् । सोऽप्युवाच पुरैकेन साधवो वां प्रशंसिताः ॥२८॥ न चान्येन तदेकस्य जातं बीजस्य सत्फलम् । सद्बोधरूपमन्यस्याबीजत्वेन न चाभवत् ॥२९॥ एवं पूर्वभवासेवां जिनेनोक्तां सविस्तराम् । निशम्यैकस्य संजातं जातेः संस्मरणं क्षणात् ॥३०॥ ततोऽसौ प्रत्यये जाते जातः संवेगभावितः । भावतश्च जिनोद्दिष्टं प्रपेदे शासनं शुभम् ॥३१॥ तत्प्रतिपत्तिसामर्थ्यात् शुभकर्मानुबन्धतः । सिद्धिं यास्यत्यसौ काले परः संसारमेव हि ॥३२॥ ततः स्थापितमेतेन भावो जैनमताश्रयः । स्वल्पोऽपि जायते बीजं निर्वाणसुखसंपदाम् ॥३३॥ इति गाथार्थः ॥७/८॥

# ( ४ ) अप्रीतिपरिहारे श्रीवीरज्ञातम्

भावार्थः कथानकगम्यः । तच्चेदम्-जिनः श्रीमान्महावीरो वीरितान्तरशात्रवः । प्राज्यं राज्यं परित्यज्य प्रव्रज्यां प्रतिपद्य च ॥१॥ निःसंगोऽतिमहासत्त्वः सत्त्वानां रक्षणोद्यतः । ग्रामादिसंकुलां पृथ्वीं छद्मस्थो विहरन्नसौ ॥२॥ मथूराकाभिधं ग्रामं संप्रासस्तत्र चाश्रमः । दूयमानाभिधानानां पाखण्डिगृहिणामभूत् ॥३॥ तेषां कुलपतिर्मित्रमासीद्भगवतः पितुः । महावीरमसौ दृष्ट्वा संभ्रमेण समुत्थितः ॥४॥ स्नेहादालिङ्गनार्थाय श्रीजिनस्य ततो जिनः । बाहुं प्रसारयामास तं प्रति प्राक् प्रयोगतः ॥५॥ सोऽवोचत् सन्ति वेश्मानि योग्यान्यत्राश्रमे तव । ततः कुमार ! तिष्ठ त्वमत्राथ जिननायकः ॥६॥ एकां तत्र स्थितो रात्रिमन्यत्र गतवांस्ततः । गच्छन्तं च जिनं स्नेहादवोचत् तापसाधिपः ॥७॥ यद्यत्र रोचते तुभ्यं तदागत्य विधीयताम् । वर्षावासो जनस्यास्यानुग्रहार्थं त्वया मुनेः ! ॥८॥ मासानष्टौ विहृत्याथ तं ग्राममागमज्जिनः । उपागतासु वर्षासु मठं चैकमुपाश्रितः ॥९॥ प्रारंभे प्रावृषस्तत्राप्राप्नुवन्ति नवं तृणम् । गोरूपाणि मठानां तत् प्रचखादुः पुरातनम् ॥१०॥ तापसा वारयन्ति स्म तानि ते दण्डपाणयः । भट्टारकः पुनस्तानि निःसंगत्वादुपेक्षते ॥११॥ ततस्ते तापसाः स्वस्य नायकस्य न्यवेदयन् । यथैष भवतामिष्टो गोभ्यो नावति नो मठम् ॥१२॥ ततः कुलपतिर्गत्वा बभाण श्रीजिनं प्रति । कुमार ! भो न युक्तं ते मठस्योपेक्षणं यतः ॥१३॥ शकुन्तोऽपि निजं नीडं रक्षत्येव यथाबलम् । ततो गावो निवार्यास्ते नाशयन्त्यो मठं स्वकम् ॥१४॥ इत्येवं शिक्षयामास सपिपासमसौ जिनम् । ततः स्वामी तदप्रीतिं ज्ञात्वा निर्गतवांस्ततः ॥१५॥ प्रावृषोऽतिगते पक्षे अस्थिकग्राममाययौ । अप्रीतिपरिहाराय यतेतैवं यथा जिनः ॥१६॥ इति गाथार्थः ॥७/१५॥

# (५) माषतुषदृष्टान्तः -

कथानकसंप्रदायश्चैवम् - बभूव कश्चिदाचार्यो गुणरत्नमहानिधिः । श्रुतमध्वर्थिशिष्यालि-सेव्यमानक्रमाम्बुजः ॥१॥ सूत्रार्थपाथसां दाने महाम्भोद इवाश्रमः । सङ्घादिकार्यभाराणां निस्तारे धुर्यसन्निभः ॥२॥ तस्यैवान्योऽभवद् भ्राता विशिष्टश्रुतवर्जितः । स्वेच्छया स्थाननिद्रादेः कर्ता स्वार्थपरायणः ॥३॥ तत्र सूरिः क्वचित् कार्ये श्रान्तः सन्मुग्धबुद्धिभिः । अज्ञातावसरैः शिष्यैर्व्याख्यानं कारितः किल ॥४॥ ततोऽसौ श्रान्तदेहत्वाद् व्याख्यायामक्षमत्वतः । चित्तखेदं जगामाथ चिन्तयामास चेदृशम् ॥५॥ धन्योऽयं पुण्यवानेष मद्भ्राता निर्गुणो यतः । सुखमास्ते सुखं शेते पारतन्त्र्यविवर्जितः ॥६॥ वयं पुनरधन्या ये स्वगुणैरेव वश्यताम् । परेषां प्रापिताः स्थातुं सुखेन न लभामहे ॥७॥ एवं चिन्तयता तेन निबद्धं कर्म सूरिणा । ज्ञानावरणमत्युग्रं ज्ञानावज्ञानिमित्ततः ॥८॥ नालोचितं च तत् तेन ततो मृत्वा दिवं गतः । ततोऽप्यसौ च्युतः क्वापि सत्कुले जन्म लब्धवान् ॥९॥ कालेन साधुसंपर्कात् बुद्धोऽसौ जिनशासने । सद्गुरूणां समीपेऽथ प्रवव्राज विरागतः ॥१०॥ ततोऽसौ सूरिपादान्तेऽधीते सामायिकं श्रुतम् । उदीर्णं च तकत् तस्य कर्म जन्मान्तरार्जितम् ॥११॥ तस्योदयान्न शक्नोति ग्रहीतुं पदमप्यसौ । प्रपठन्नप्यविश्रामं बहुमानयुतोऽपि सन् ॥१२॥ ततः सूरिरशक्तं तं पाठे ज्ञात्वा तपोधनम् । सामायिकश्रुतस्यार्थं तं संक्षेपादपीपठत् ॥१३॥ यथा मा रुष्य मा तुष्येत्येवमेव स भक्तितः । घोषयामास तत्रापि विस्मृतिस्तस्य जायते ॥१४॥ ततो महाप्रयत्नेन संस्मृत्य किल कञ्चन । तत्रासौ घोषयामास तुष्टो माषतुषेत्यलम् ॥१५॥ ततस्तद्घोषणान्नित्यं माषतुषेत्यभिख्यया । ख्यातिं नीतो महात्मासौ बालिशैः क्रीडनापरैः ॥१६॥ अदोऽपि विस्मरत्येष तदा मोहात् तदा तकम् । न्यस्तचित्तमवाचं च हसन्तो बालका जगुः ॥१७॥ अहो माषतुषः साधुरेष मौनेन तिष्ठति । एवमुक्तः स तैर्मेने साधु भोः स्मारितं मम ॥१८॥ ततोऽधीते तदेवासौ मन्यमानोऽत्यनुग्रहम् । साधवस्तु यदा श्रुत्वा प्रेरयन्ति स्म चादरात् ॥१९॥ शिक्षयन्ति स्म तं साधो मा रुष्येत्यादि घोषय । ततः प्रमोदमापन्नो घोषयामास तत्तथा ॥२०॥ एवं सामायिकस्यार्थेऽप्यशक्तो गुरुभक्तितः । ज्ञानकार्यमसौ लेभे कालतः केवलश्रियम् ॥२१॥ इति गाथार्थः ॥११/७॥

# (६) चण्डरूद्रोदाहरणम्

कथानकं चैवं दृश्यते-चण्डरुद्राभिधानोऽभूदाचार्योऽतिबहुश्रुतः । ज्ञानादिपञ्चधाऽऽचार-रत्नरत्नाकरोपमः ॥१॥ असमाचारसंलोकसंज्वलत्कोपवाडवः । संक्लेशपरिहाराय गच्छपार्श्वे स्म तिष्ठति ॥२॥ विहरंश्च समायात उज्जयिन्यां कदाऽप्यसौ । विविक्तोद्यानदेशे च तस्थौ गच्छस्य

सन्निधौ ॥३॥ अथ श्रीमत्सुतः कोऽपि सुरूपो नवयौवनः । प्रधानवस्त्रमाल्यादिभूषितो मित्रवेष्टितः ॥४॥ विवाहानन्तरं क्रीडन्नागतः साधुसन्निधौ । तन्मित्रैः केलिना प्रोक्तास्तं पुरस्कृत्य साधवः ॥५॥ अस्मत्सखममुं यूयं हे भदन्ता ! विरागिणम् । निर्विण्णं भवकान्तारात् प्रव्राजयत सत्वरम् ॥६॥ साधवस्तु तकान् ज्ञात्वा चसूरीकरणोद्यतान् । औषधं सूरिरेवैषामित्यालोच्य बभाषिरे ॥७॥ भो भद्रा ! गुरवोऽस्माकं कुर्वते कार्यमीदृशम् । वयं तु नो ततो यात गुरूणामन्तिकं लघु ॥८॥ केलिनैव ततो गत्वा गुरुमूचुस्तथैव ते । सूरिणा भणितं तर्हि भस्मानयत सत्वरम् ॥९॥ येनास्य लुञ्चनं कुर्मो वयस्यैस्तु ततो लघु । तदानीतं ततः सूरिः पञ्चमङ्गलपूर्वकम् ॥१०॥ लुञ्चनं कर्तुमारेभे तद् वयस्यास्तु लज्जिताः । चिन्तितं चेभ्यपुत्रेण कथं यास्याम्यहं गृहे ॥११॥ स्वयमाश्रितसाधुत्वः सलुञ्चितशिरोमुखः । ततो विसृज्य मित्राणि गुरुमेवमुवाच सः ॥१२॥ भदन्त ! परिहासोऽपि सद्भावोऽजनि मेऽधुना । रङ्कत्वेनापि तुष्टस्य सौराज्यं मे समागतम् ॥१३॥ ततः स्वजनराजाद्या यावन्नायान्ति मत्कृते । तावदन्यत्र गच्छामो नो चेद् बाधा भविष्यति ॥१४॥ गुरुर्बभाषे यद्येवं ततो मार्गं निरूपय । तथैव कृतवानेष वृत्तौ गन्तुं ततस्तकौ ॥१५॥ आचार्यः पृष्ठतो याति पुरतो याति शिष्यकः । रात्रौ वृद्धत्वतोऽपश्यन् मार्गं प्रस्खलितो गुरुः ॥१६॥ रे दुष्टशैक्ष ! कीदृक्षो मार्गः संवीक्षितस्त्वया । इति ब्रुवाणो दण्डेन शीर्षे तं हतवान् क्रुधा ॥१७॥ एवं स चण्डरोषत्वात् च्चलितः स्खलितः पथि । शिरस्यास्फोटयन् याति तं शैक्षं क्षमिणां वरम् ॥१८॥ शैक्षस्तु भावयामास मन्दभाग्योऽस्म्यहं यतः । महाभागो महात्माऽयं महाकष्टे नियोजितः ॥१९॥ भगवानेष सौख्येन स्वगच्छे निवसन् मया । अहो दशां महाकष्टां प्रापितः पापिना मुधा ॥२०॥ एवं भावयतस्तस्य प्रशस्तध्यानवह्निना । दग्धकर्मेन्धनत्वेन केवलज्ञानमुद्गतम् ॥२१॥ ततस्तं तद्बलेनासौ सम्यग् नेतुं प्रवृत्तवान् । प्रभाते च स तं दृष्ट्वा क्षरल्लोहितमस्तकम् ॥२२॥ आत्मानं निन्दति स्मैवमधन्योऽहमपुण्यवान् । यस्य मे सति रोषाग्निशममेघे बहुश्रुते ॥२३॥ परोपदेशदक्षत्वे बहुकाले च संयमे । न जातो गुणरत्नानां प्रधानः क्षान्तिसद्गुणः ॥२४॥ अयं तु शैक्षो धन्योऽत्र गुणवानेष सत्तमः । यस्याद्यदीक्षितस्यापि कोऽप्यपूर्वः क्षमागुणः ॥२५॥ एवं सद्भावनायोगाद्वीर्योल्लासादपूर्वतः । आचार्यश्चण्डरुद्रोऽपि संप्राप्तः केवलश्रियम् ॥२६॥ इति गाथार्थः ॥११/३५॥

# (७) गुरुकुलमोचने काकज्ञातम्

काकज्ञातं चैवम्-सुस्वादुशीतलं स्वच्छं पद्मरेणुसुगन्धि च । धारयन्ती जलं वापी काचिदासीन्मनोहरा ॥१॥ तस्यास्तटेऽभवन् काकास्तेषु चाल्पे पिपासिताः । अन्विच्छन्तोऽपि पानीयं नाश्रयन्ति स्म ते च ताम् ॥२॥ ततो दृष्ट्वा पुरोवर्तिमृगतृष्णासरांसि ते । तानि प्रति प्रयान्ति स्म वापीं हित्वा जलार्थिनः ॥३॥ कश्चित् तु तानुवाचैवमेषा भो मृगतृष्णिका । यदि वोऽस्ति

जलार्थित्वं तदाश्रयत वापिकाम् ॥४॥ ततः केचित् तदाकर्ण्य वापीमेव समाश्रिताः । भूयांसस्त्ववधीर्यैतन्मृगतृष्णां ययुः प्रति ॥५॥ ततो जलमनासाद्य ते विनाशमुपागताः । वापीं समाश्रिता ये तु बभूवुस्ते कृतार्थकाः ॥६॥ वापीतुल्योऽत्र विज्ञेयो गुरुगच्छो गुणालयः । धर्मार्थिनस्तु काकाभाश्चारित्रं जलसन्निभम् ॥७॥ मृगतृष्णासरस्तुल्या गुरुगच्छाद् बहिःस्थितिः । तच्छिक्षादायको ज्ञेयो गीतार्थस्तत्कृपापरः ॥८॥ चारित्रापात्रतां प्राप्ताः काकवत् केऽपि कुग्रहात् । गुरुगच्छबहिर्वासं संश्रिता ये तपस्विनः ॥९॥ अल्पास्तु केऽपि सद्बोधाच्चारित्रे पात्रतां गताः । काका इवैव ये धन्या गुरुगच्छमुपाश्रिताः ॥१०॥ इति गाथार्थः ॥११/३८॥

# ( ८ ) तैलपात्रि

बभूव नगरे क्वापि कोऽपि भूपालपुङ्गवः । श्रमणोपासकग्रामग्रामणीः करुणापरः ॥१॥ परिवारो निजस्तेन नागरोऽपि बहुर्जनः । जनितो जिनधर्मस्थः स्थायिभावो दयादिषु ॥२॥ किं तु श्रेष्ठिसुतः कोऽपि कथञ्चिन्नोपशान्तवान् । कुग्रहग्राहसंग्रस्तभावो भावितवांश्च सः ॥३॥ हिंसाऽपि धर्म एव स्याद् दुःखिनां दुःखमोचनात् । प्रापणाच्च सुखश्रीणां कर्तुं शक्या च सा यतः ॥४॥ सैव युक्ता ततः कर्तुं नो दानादि यतस्तकत् । अर्थाधीनं स च प्रायो दुर्लभो दुर्व्ययस्तथा ॥५॥ अप्रमादपरं जैनं शासनं तु निरर्थकम् । अशक्यं ह्यप्रमत्तत्वं कर्तुमित्यप्यमन्यत ॥६॥ श्रेष्ठिपुत्रस्य तस्यासावप्रमादविदूषिणः । पार्थिवो बोधनार्थाय चकारोपायमीदृशम् ॥७॥ यक्षाभिधानकं छात्रं कुशलं जिनशासने । प्रेषयामास तद्गेहे हस्ते दत्त्वा वरं मणिम् ॥८॥ राजशिक्षानुसारेण तेनोक्तं श्रेष्ठिनन्दन ! यथा देशान्तरीयोऽहमत्यर्थं राजवल्लभः ॥९॥ नृपस्य भिन्नबोधस्य बोधनार्थं समुद्यतः । तुल्यबोधावहं त्वं च नान्योऽत्र नगरेऽस्ति नौ ॥१०॥ इत्यादिविविधालापान् कुर्वता प्रतिवासरम् । छात्रेण श्रेष्ठिपुत्रस्य प्रेमोत्पादितमात्मनि ॥११॥ ततो विश्रंभितस्यैवं वणिक् सूनोरपश्यतः । तेन छात्रेण तद् रत्नं न्यस्तं तद्रत्नभाजने ॥१२॥ सुन्यस्तं तत्र तत् कृत्वा गत्वा च नृपसन्निधौ । यक्षच्छात्रो यथावृत्तं वृत्तान्तं तं न्यवेदयत् ॥१३॥ नृपोऽप्याज्ञापयल्लोके प्रहतोद्दामडिंडिमम् । यथा भो मुद्रिकारत्नं भ्रष्टं नष्टं च भूपतेः ॥१४॥ ततोऽर्पयतु येनाप्तमित्येवमपि घोषिते । यदा नाप्तं तकद् राज्ञा तदाहूतः पुरीजनः ॥१५॥ उक्ताश्च तेन भोः पौरा मदीयाध्यक्षसंयुताः । गवेषयत तत्सम्यक् प्रतिगृहमिह द्रुतम् ॥१६॥ क्रमेण चेक्षमाणैस्तैस्तद् रत्नमवलोकितम् । तस्यैव श्रेष्ठिपुत्रस्य गेहे माणिक्यभाजने ॥१७॥ ततो राजापकारीति गृहीतो दण्डपाशिकैः । आघातं नेतुमारब्धो वधायासौ वणिक्सुतः ॥१८॥ अवादित् तानसौ दोष शुद्धिमत्र करोम्यहम् । तेऽप्यूचुर्नास्ति ते शुद्धिर्वधादन्या दुरात्मनः ॥१९॥ अथोवाच स तानेवमनवद्योऽपि यद्यहम् । हन्ये तथापि राजानं तावद् विज्ञापयाम्यहो ॥२०॥ ततः सोऽभ्यर्थयामास यक्षच्छात्रं यथा मयि । विज्ञापय नृपं मित्र ! यथासौ देव ! दण्ड्यताम् ॥२१॥

दुष्करेणापि दण्डेन हित्वा शारीरनिग्रहम् । इति ब्रुवाणं तं यक्षः साकूतः प्रोक्तवानिदम् ॥२२॥ किं देहनिग्रहादन्यं सोढुं शक्नोषि निग्रहम् । बाढं शक्तोऽस्मि तेनोक्तं ततो यक्षो व्यचिन्तयत् ॥२३॥ दुष्करस्यापि कार्यस्य करणेऽस्य मनः क्षमम् । ज्ञात्वा चैवं नृपस्तेन विज्ञप्तोऽसौ यथोदितम् ॥२४॥ राज्ञाऽप्युक्तं यथा तेन पात्री तैलातिपूरिता । भ्रमयित्वा पुरे कृत्स्ने आनेतव्याऽस्मदन्तिके ॥२५॥ यद्येकोऽपि ततो बिन्दुः पतेद भूम्यां ततो वधः । कार्यस्तस्य ततो यक्षो नृपादेशं न्यवेदयत् ॥२६॥ श्रेष्ठिपुत्रोऽपि राज्ञोक्तमभ्युपागच्छदादृतः । कृच्छ्राण्यपि हि कुर्वन्ति जीवितव्याय देहिनः ॥२७॥ ततस्तस्य नृपस्तैलपूर्णपात्रीप्रधारिणः । निर्गच्छतो निजाद् गेहादुत्खातासिभटैर्भृशम् ॥२८॥ उत्त्रासं कारयामास प्रेक्षाश्चातिमनोहराः । प्रनटन्नाटिकोपेताः कामहासादिदीपिकाः ॥२९॥ ततोऽसौ मानसक्षोभसंपादनपटीयसि । सत्यपि प्रौढविघ्नौघे जीविताशावशीकृतः ॥३०॥ अप्रमादविशेषेण तैलपात्रीं वणिक्सुतः । अस्रस्तबिन्दुकां राज्ञो निनाय चरणान्तिके ॥३१॥ ततश्चैवं महाकष्टे कृते तेन नराधिपः । प्रेरयामास तं श्रेष्ठिसूनुं सूनृतभाषया ॥३२॥ त्वयैकमृत्युभीतेन यथेदृक्षाऽतिदुष्करा । सौम्याप्रमत्तताऽकारि तथाऽन्ये लघुकर्मकाः ॥३३॥ अनन्तमरणत्रस्तास्तां सेवन्ते विशेषतः । अशक्यपरिहारोऽतः प्रमाद इति ते वृथा ॥३४॥ युग्मम् हिंसा युक्तेति ते बुद्धिर्याऽसावपि न संगता । अन्यथा त्वं कथं भीतो वधात् कष्टं प्रपन्नवान् ? ॥३५॥ श्रुत्वैवं स वणिक्सूनुरनुशास्ति महीपतेः । प्रपेदे भावतो जैनं शासनं पापनाशनम् ॥३६॥ इति ॥१४/२९॥

# ( ९ ) राधावेधदृष्टान्तौ

आसीदिन्द्रपुरं नाम नगरं गुरुकं गुणैः । तत्राभवच्छ्रियामिन्द्र इन्द्रदत्तो महीपतिः ॥१॥ प्रीतिपात्रकलत्राणां तस्य द्वाविंशतिः सुताः । बभूवुर्भूमिपालस्य प्राणेभ्योऽप्यतिवल्लभाः ॥२॥ अन्या भार्याऽभवत् तस्य भूपस्यामात्यपुत्रिका । सा च तेन परं दृष्टा पाणिग्राहं प्रकुर्वता ॥३॥ अथान्यदा कदाचित् सा ऋतुस्नाताऽवलोकिता । राज्ञा पृष्टाश्च पार्श्वस्था यथैषा कस्य ? का च भोः ? ॥४॥ त ऊचुर्देव ! देवी ते ततो राजा तया सह । रात्रिमेकामुवासाथ तस्या गर्भोऽभवत् तदा ॥५॥ सा च पूर्वममात्येन भणिताऽऽसीद्यदा तव । गर्भो भूतो भवेद्भद्रे ! तदा त्वं मे निवेदयेः ॥६॥ ततः सा गर्भसंभूतिं राजसंवासवासरम् । मुहूर्तं राजजल्पं च पितुः सर्वं न्यवेदयत् ॥७॥ सत्यंकाराय तत्सर्वं व्यलिखत् सोऽपि पत्रके । सम्यक् तां पालयामास काले चाजनि दारकः ॥८॥ तद्दिने दासरूपाणि जज्ञुश्चत्वारि तद्गृहे । अग्निकः पर्वतकश्च बहुली सागरस्तथा ॥९॥ सुरेन्द्रदत्त इत्येषा राजसूनोः कृताऽभिधा । कलासूरेरसौ पार्श्वे कलाः काले गृहीतवान् ॥१०॥ गृह्णतश्च कलास्तस्य चक्रिरे तान्युपद्रवान् । न चासौ भाविभद्रत्वान्नृपसूनुर्व्यजीगणत् ॥११॥ ते च द्वाविंशतिः पुत्रा ग्राह्यमाणाः कलाः किल । निघ्नन्ति स्म कलाचार्यं गालीस्तस्य तथा ददुः ॥१२॥ सूरिणा

ताडितास्ते तु स्वमातृभ्यो न्यवेदयन् । तं च ताः कुपिताः शापैश्चक्रुरुद्वेगभाजनम् ॥१३॥ एवं ते जज्ञुरज्ञानाः सूरिणा समुपेक्षिताः । इतश्च मथुरानाथ आसीत् पर्वतको नृपः ॥१४॥ तत्सुता निर्वृतिर्नाम यौवनोद्भेदसुन्दरा । वरार्थे तेन साऽवाचि भर्तारं वृणु वाञ्छितम् ॥१५॥ सा पुनस्तमनुज्ञाप्याचलदिन्द्रपुरं प्रति । राजपुत्रा यतस्तत्र भूयांसः सन्ति सद्गुणाः ॥१६॥ ततः सेन्द्रपुरं प्रापदाप्तलोकसमन्विता । तुष्टेन चेन्द्रदत्तेन राज्ञाऽकारि पुरे महः ॥१७॥ निर्वृत्या भणितं राज्ञो राधावेधं करिष्यति । यः कुमारः स मे भर्ता भविष्यत्यपरो न तु ॥१८॥ तदाकर्ण्य नृपो रङ्गं कारयामास तत्र च । एकत्राक्षेऽष्ट चक्राणि तत्पुरः पुत्रिकां तथा ॥१९॥ सा च चक्षुषि बाणेन भेत्तव्याऽधोविवर्तिना । ततः सैन्ययुतो राजा रङ्गे तस्थौ सपुत्रकः ॥२०॥ निर्वृतिश्चैकदेशेऽस्य स्थिताऽलङ्कृतविग्रहा । यथास्वं च निविष्टेषु सामन्तनागरादिषु ॥२१॥ आदिष्टो ज्येष्ठपुत्रोऽथ राज्ञा श्रीमालिनामकः । भित्त्वा राधां गृहाणेमां कन्यां राज्यं च पुत्रक ! ॥२२॥ ततः सोऽशिक्षितत्वेन साध्वसोत्कंपिविग्रहः । शशाक नैव तां भेत्तुमेवं ते शेषका अपि ॥२३॥ ततो राजा स्वपुत्राणां मूर्खतां वीक्ष्य तत्क्षणात् । शुशोच हस्तविन्यस्तगण्डो भून्यस्तदृष्टिकः ॥२४॥ ततोऽमात्यस्तमापृच्छत् किं देव ! दैन्यवान् भवान् । सोऽवोचद्दुःसुतैरेतैरहं भो धर्षितो जने ॥२५॥ ततोऽमात्योऽवदद्भूपं यथाऽन्योऽपि च ते सुतः । विद्यते सोऽपि देवेन राधावेधे नियुज्यताम् ॥२६॥ राजाऽवोचत् कुतो मेऽन्यः सुतोऽमात्योऽप्यवोचत । मन्त्रसास्ति ततः पत्रं दर्शयामास तस्य तत् ॥२७॥ संजातप्रत्ययो राजा संतुष्टस्तं बभाण च । आनयामात्य ! मत्पुत्रं तस्य तं सोऽप्यदर्शयत् ॥२८॥ आलिङ्ग्य मूर्ध्नि चाघ्राय तं बभाषे सुतोत्तमम् । कन्यां गृहाण राज्यं च भित्त्वा राधां महाद्भुताम् ॥२९॥ यदादिशति तातस्तत् करोमीत्यभिधाय सः । धनुर्वेदोपदेशेन राधां भेत्तुमुपस्थितः ॥३०॥ तान्यस्य चेटरूपाणि ते च द्वाविंशतिः सुताः । उत्खातासी नरौ द्वौ च नाना चक्रुरुपद्रवान् ॥३१॥ कलाचार्योऽप्यवोचत्तं न चेद्राधां विभेत्स्यसि । तदेतौ ते शिरो वत्स ! छेत्स्यतो दारुणौ नरौ ॥३२॥ ततोऽसावपकर्ण्यैतान् लब्धलक्षोऽप्रमादवान् । चक्राणामन्तरं ज्ञात्वा राधां झगिति विद्धवान् ॥३३॥ ततश्चास्फालितं तूर्यं साधुकारः कृतो जनैः । राजादिस्तोषितो लोक ऊढा कन्या च तेन सा ॥३४॥ इति ॥१४/२९॥

## ( १० ) मरुकज्ञातम्

मरुकज्ञातं चैतत्-नगरे पाटलीपुत्रे विप्र आसीत् त्रिलोचनः । वेदवेदाङ्गगर्भार्थविशारदशिरोमणिः ॥१॥ तस्य पार्श्वे बटुः कोऽपि समायातः प्रणम्य तम् । उवाच मयका मोहात् परदाररतिः कृता ॥२॥ तस्य पापस्य मे शुद्धिः क्रियतां सोऽप्यभाषत । तद्भावस्य परीक्षार्थं यथा भो विप्रपुत्रक ! ॥३॥ तप्तां लोहमयीं नारीं फुल्लकिंशुकसन्निभाम् । आलिङ्गय यतो नान्यत् प्रायश्चित्तमिहागसि ॥४॥ तेनापि पापभीतेन प्रतिपन्नमिदं ततः । सोऽपि विज्ञाय तद्भावं शुद्धिमन्यां न्यवेदयत् ॥५॥ इति ।

अथवा मरुकोदाहरणमेवम्-बभूव ब्राह्मणः कोऽपि वेदार्थेषु विशारदः । स्वागमाहितबोधेन धर्मायाभूत् स तापसः ॥१॥ ततस्तपस्यतस्तस्य वसतस्तापसाश्रमे । कन्दमूलाशिनोऽत्यर्थं कष्टानुष्ठानकारिणः ॥२॥ स्नानाद्यर्थं नदीतीरे प्रयातस्यैकदा किल । पश्यतो मत्स्यबन्धानां मत्स्यमांसस्य भक्षणम् ॥३॥ तत्र जाताभिलाषस्य जेमितस्य प्रयाच्य तत् । तस्यैवाजीर्णदोषेण समुत्पन्नो महाज्वरः ॥४॥ तच्चिकित्सार्थमानीतो वैद्यः सोऽपि ; पृष्टवान् किं भोस्त्वं भुक्तवान् ? ब्रूहि सोऽप्यभाषत लज्जया ॥५॥ कन्दमूलफलाहारास्तापसा यत् प्रभुञ्जते । तद्भुक्तं न पुनस्तेन कथितं मत्स्यभक्षणम् ॥६॥ वैद्योऽपि तस्य वाक्येन ज्ञात्वा तं वातिकं ज्वरम् । तथाविधक्रियां चक्रे न चाभूज्ज्वरमुक्तता ॥७॥ पुनः पृष्टोऽथ वैद्येन तदेवाख्यातवानसौ । चक्रे क्रियां स तामेव विशेषान्न त्वभूद्गुणः ॥८॥ अन्यदा वेदनाक्रान्तो भीतोऽसौ मृत्युराक्षसात् । लज्जां विहाय वैद्याय न्यगादीन्मत्स्यभोजनम् ॥९॥ ततो वैद्यो न्यगादीत् तं दुष्ठु दुष्ठु त्वया कृतम् । यदियन्ति दिनानीदं नाख्यातं रोगकारणम् ॥१०॥ अधुनाऽपि कृतं साधु साधो ! यत्साधितं त्वया । निदानं ज्वररोगस्य करोमीतो रुजःक्षयम् ॥११॥ तस्योचितां ततो वैद्यः क्रियां कृत्वा तकं व्यधात् । व्याधिबाधाव्यपेताङ्गं पुष्टदेहं महौजसम् ॥१२॥ इति ॥१५/४६॥

# ( ११ ) ब्राह्मीज्ञातम्

ब्राह्मीवृत्तान्तः-क्षेत्रे महाविदेहेऽभून्नगरी पुण्डरीकिणी । वैरनामाभिधस्तत्र चक्रवर्ती किलाभवत् ॥१॥ वैरसेनाभिधानस्य जिननाथस्य सोऽन्तिके । चतुर्भिर्भ्रातृभिर्युक्तः प्रवव्राज विरागतः ॥२॥ प्राप्तपारः श्रुतांभोधेर्नियुक्तो गच्छपालने । विजहार महीं सार्धं साधूनां पञ्चभिः शतैः ॥३॥ तद्भ्राता बाहुनामा यो लब्धिमानुद्यमान्वितः । वैयावृत्त्यं चकारासौ साधूनामशनादिभिः ॥४॥ सुबाहुनामको यस्तु स साधूनामखिन्नधीः । स्वाध्यायादिप्रखिन्नानां सदा विश्रामणां व्यधात् ॥५॥ अन्यौ पीठ-महापीठनामानौ तस्य सोदरौ । स्वाध्यायादिमहारामे रेमाते रम्यकेऽनिशम् ॥६॥ कदाचित् सूरिराद्यौ तौ श्लाघयामास भावतः । अहो धन्याविमौ साधू साधुनिर्वाहणोद्यतौ ॥७॥ एवं श्रुत्वेतरावेवं भावयामासतुर्मुनी । लौकिकव्यवहारस्था अहो जल्पन्ति सूरयः ॥८॥ करोति यो हि कार्याणि स एव श्लाघ्यते जने । सुमहानप्यकुर्वाणस्तृणायापि न मन्यते ॥९॥ इत्येवं चिन्तया ताभ्यां स्त्रीकर्म समुपार्जितम् । मृत्वा गता विमाने ते सर्वार्थसिद्धनामके ॥१०॥ च्युत्वा ततोऽपि संजात एकः श्रीनाभिनन्दनः । अन्ये तु सूनवस्तस्य तत्रैको भरतोऽभवत् ॥११॥ अन्ये बाहुबली ब्राह्मी सुन्दरी चेति जज्ञिरे । सर्वे ते कर्मनिर्मुक्ताः संप्राप्ता निर्वृतिश्रियम् ॥१२॥ इति ॥१६/३१॥

# (१२) ऋजुजडादित्वे कारणम्

नटादिज्ञातान्नर्तकप्रभृत्युदाहरणात्-किल केचित् प्रथमतीर्थसाधवो विचारभूमेर्गुरुसमीपमागताः पृष्टाश्च गुरुभिः यथा-"भोः किमियच्चिरादागता यूयं ?" । त ऋजुत्वादूचुः, यथा-"नटं नृत्यन्तं वीक्ष्यमाणाः स्थिताः" ततो गुरुस्तानभ्यशिषत्, यथा-"मा पुनरेवं कार्षुरिति" प्रतिपन्नवन्तश्च तत्त। ततोऽन्यदा ते तथैव पृष्टा ऊचुः, यथा-"नटीं नृत्यन्तीं वीक्षमाणाः स्थिताः ।" गुरुणा प्रेरिताश्च ते जडत्वादभिदधुः-"भवद्भिर्नटस्तदा निषिद्धः, न नटीति" । नटे हि निषिद्धे रागहेतुत्वान्नटी नितरां निषिद्धैवेति प्रतिपत्तुं न शकितं तैरिति । आदिशब्दाद्धस्त्यादिग्रहः । **भवन्ति** स्युः । **विज्ञेया** ज्ञातव्याः । **वक्रजडाः** शठमुग्धाः **पुनः** । **चरमा** अन्तिमाः । तत एव ज्ञातात्-किल केचिच्चरमजिनसाधवस्तथैव पृष्टा ऊचुः, यथा-"नटं वीक्ष्यमाणाः स्थिताः" । ततो गुरुणा निषिद्धाः । पुनरन्यदा पृष्टा वक्ततयोत्तरान्तराणि ददुः । निर्बन्धे च नटीमुक्तवन्तः उपालब्धाः सन्तो जडत्वादूचुः, यथा-"नट एव न द्रष्टव्य इत्यस्माभिर्ज्ञातमासीदिति ।" **ऋजुप्रज्ञा** आर्जवोपेताः प्रज्ञावन्तश्च । तत एव ज्ञातात्-एते हि किल तथैव पृष्टा ऋजुत्वादूचुः-"नटं वीक्ष्यमाणाः स्थिताः" । ततो गुरुणा तथैवोक्ताः । पुनरन्यदा नटीं दृष्ट्वा प्राज्ञत्वाद्विकल्पितवन्तः, नटवन्नट्यपि न वीक्षितव्या रागहेतुत्वादिति । मध्यमा द्वाविंशति-जिनसाधवः । **भणिता** उक्ताः । इति गाथार्थः ॥१७/४३॥

# परिशिष्टम्-७

## कतिचित्पदानां भावानुवादः

### १. श्रावकधर्मविधिपञ्चाशकम्

**१/२६ दुष्प्रणिधानलक्षणम्** - મન, વચન અને કાયાનો એકીસાથે અથવા ક્રમિક કષાયો દ્વારા સર્જન કરાતો યોગ દુષ્પ્રણિધાન કહેવાય છે.

દોષોમાંથી જેનું મન નિવૃત્ત થતું નથી, તથા અપરાધો કર્યા પછી પણ જે પશ્ચાત્તાપ કરતો નથી, અને હંમેશા બીજાઓના પરિહાસની ઈચ્છા કરે છે. તે મનદુષ્પ્રણિધાન કહેવાય. ॥૧॥

માયાવી વચનો દ્વારા મિથ્યાત્વનું પોષણ કરનાર જેનું બોલાતું વચન અનેક જીવોનું પતન કરનાર થાય તથા નિરર્થક વચન બોલાય તે વચન દુષ્પ્રણિધાન કહેવાય ॥૨॥

કેવલ વેશ, વય વિડમ્બના નહિ પરંતુ સુતેલું બાળક જેમ ઊંઘમાં આંખ ફરકાવે છે તે જેમ અંગનું દુષ્પ્રણિધાન કહેવાય છે તેવું જ અંગ સમ્બન્ધી દુષ્પ્રણિધાન કહેવાય. ॥૩॥

**१/३१ व्यापारयति** - શ્રાવક સુપાત્રદાન કરીને ભોજન કરે અથવા ભોજન કર્યા પછી દાન કરે કે ઘરના સભ્યો દ્વારા દાન કરાવે.

**१/३४ उपायादयः सूत्राद् विज्ञेया** - આગમ સૂત્રોનું ગીતાર્થ ગુરુભગવંત પાસે વિધિપૂર્વક શ્રવણ કરીને શ્રાવકે ૧૨ વ્રતોને વિસ્તારથી જાણવાના છે અને પોતાની ભાવનાશક્તિ અનુસાર ૧૨ વ્રતોને ગ્રહણ કરીને આચરવાના છે. આમ, આગમથી જ જ્ઞાન-ક્રિયારુપ વ્યાપારમાં પ્રવૃત્તિ થાય છે.

**१/३७ प्रतिपक्षजुगुप्सा** - શ્રાવકોએ અશુભ મન-વચન-કાયાના યોગોનો ત્યાગ કરી અણુવ્રતાદિનો સ્વીકાર કરવાનો છે અને સ્વીકાર કર્યા પછી દરરોજ નવકાર મંત્રનું સ્મરણ આદિ દ્વારો વડે વ્રતોને સારી રીતે આરાધવાના છે. આમ, વ્રતધારી શ્રાવકે વ્રતોના પરિણામને પામવા હંમેશા આગમવચન અનુસાર પ્રયત્ન કરવો જોઈએ.

વ્રતધારી શ્રાવકે હિંસાદિ પાપોનો દ્રવ્ય અને ભાવથી માત્ર ત્યાગ કરવાનો નથી. પરંતુ હિંસાદિપાપપ્રવૃત્તિકરનારાઓની પણ નિંદા કરવાની નથી, કારણકે નિંદા કરવાથી પરપરિવાદ દોષ લાગે. કહ્યું છે કે - "જો અન્ય લોકોની નિંદા કરવાથી સાધકના કાર્યો સિદ્ધ થતા હોય તો આલોકમાં સત્ય શૌચ બ્રહ્મચર્યાદિગુણોને પામવા કોને આદર થાય."

**૧/૪૨-૧/૪૪ श्रावकदिनचर्या** - શ્રાવક નવકાર ઊઠીને ગણે, ત્યારપછી હું શ્રાવક છું. મારું અમુક કુળ છે, હું અમુકનો શિષ્ય છું. મારે અણુવ્રતો વગેરે નિયમો છે વગેરે વિચારે. પછી પોતાના ઘરમંદિરમાં ચૈત્યવંદન કરે. ઘરમાં ત્રણ લોકના નાથ પ્રભુજીને પધરાવવાથી ત્રિકાળ પૂજાભક્તિનો લાભ મળે. આચાર્ય ભગવંતો સાધુ-સાધ્વી-શ્રાવક-શ્રાવિકારૂપ ચતુર્વિધસંઘની દર્શન-પૂજનાર્થે પાવન પધરામણી થાય. ઉત્તમ પુરુષોના સહવાસ-સત્સંગથી જીવન પવિત્ર બને. સુપાત્ર દાનનો લાભ મળે. અનેક ભવ્યાત્માઓના સમ્યગ્દર્શનની પ્રાપ્તિ અને નિર્મળતાનું પ્રધાન કારણ ઘર-દેરાસર છે. ઉત્કૃષ્ટ ભાવે જિનભક્તિ કરનાર પુણ્યશાળી તીર્થંકર પદને પ્રાપ્ત કરે.

આમ, અનેક ગુણોને પામવા દરેક શ્રાવકે પોતાના વૈભવને અનુરૂપ ઘરદેરાસર સ્વદ્રવ્યથી બનાવી પ્રભુજીની પ્રતિષ્ઠા કરાવવી જોઈએ.

**૧/૪૫ स्वगृहगमनम्** - અહીં ઘરે જવું એ સ્વતઃ સિદ્ધ હોવાથી ઘરે જવાનું કહેવું નિરર્થક છે. આથી ગ્રંથકારે ઘરે જઈ સ્વપરિવારને ધર્મદેશના કરવાનું સૂચન કર્યું છે. શ્રીશ્રાદ્ધદિનકૃત્ય પ્રકરણ ગાથા-૩ની ટીકામાં આ વાતનો નિર્દેશ કર્યો છે.

